अभ्यर्थना

१८६ तमे पृष्ठे **संशोधनीयम्**, इति लिखितं स्तम्भं प्राग् विनिरीक्ष्य ग्रन्थालोचनं विधेयं बुधवरैरिति ।

पृ० ८ प० ११ अनुमानात् (अयं ग्रन्थः प्रयोजनवान् प्रयोजनवदान्वीक्षिकीप्रतिपादितसमुदायैकदेशार्थप्रतिपादकत्वात् प्रत्यक्षानुमानेत्यादिसूत्रवत् इतः) ।

पृ० १३ प० ४ अप्रमात्मकप्रयोजनवत्त्वज्ञानात् इत्यस्य स्थाने 'अर्थनिश्चयकाले तद्द्वितीयक्षणे वा यत्र प्रामाण्यसंशयस्तत्रार्थनिश्चयक्षणे तद्द्वितीयक्षणे वा प्रवृत्त्यापत्तिवारणाय' इति पाठः ।

पृ० २० प० २३ षष्ठ्यर्थस्यान्वयोपगमे इत्यस्यानन्तरं 'घटस्य संशयः घटविषयित्वाभाववानितिशाब्दबोधापत्तिः' इतिपाठः ।

प० २८ शाब्दबोधापत्तिरित्यस्यानन्तरं 'नचैवमपि घटस्य संशयो न घटाभावीय इतिधीः ज्ञानं न घटीयमिति बाधनिश्चयदशायां घटाभावस्य संशय इति बोधापत्तिश्चेति वाच्यम् ? इष्टत्वात् । अन्यथा प्रथमविषयितायां षष्ठ्यर्थान्वयेऽपि तदापत्त्योर्दुर्वारत्वात् इति पाठः ।

सम्पादकीयम् ।

माननीयास्तर्ककर्कशविचारचातुरीचमत्कृतचेतसस्सचेतसो न्यायशास्त्र-मर्मज्ञा विद्वांसो गादाधराधारीकृतस्वाध्यायलक्ष्या अन्तेवासिनश्च ! नेदं तत्र भवताम् भवतां विपश्चिदपश्चिमानामालोकपथात्तिरोहितं यदैहिकामुष्मिकाभ्यु-दयस्य निश्श्रेयसस्य च साधनं तत्त्वज्ञानमेव । यथा च भगवतो न्यायशास्त्रा-वतारकस्य गौतमस्य महर्षेः 'प्रमाणप्रमेयेत्यारभ्य तत्त्वज्ञानान्निःश्रेयसाधिगम' इति सूत्रे सिद्धान्तः । तदेव हि तत्त्वज्ञानम् प्रमेति व्यपदिश्यते । अत एवो-दयनाचार्यैः 'तत्त्वानुभूतिः प्रमा' इति कथितम् । खण्डनकृता च तत्त्वानुभूतिः प्रमेति लक्षणमुपादाय तत्त्वशब्दार्थनिर्वचननिराकरणद्वारा प्रमालक्षणं निराकृतम् ।

तत्र प्रमावृत्ति प्रमात्वं स्वतः परतो वा गृह्यते ? इति विशयमालम्ब्य गुरु-भट्टमिश्राख्यमीमांसकानां नैयायिकैस्सह शास्त्रार्थः प्रवृत्तः । स्वतस्त्वं तदप्रामा-ण्याग्राहकस्वाश्रयज्ञानग्राहकसामग्रीग्राह्यत्वम् , परतस्त्वं च संवादिप्रवृत्तिजन-कत्वलिङ्गकानुमितिग्राह्यत्वम् । शास्त्रार्थे ज्ञानप्रामाण्यं तदप्रामाण्याग्राहक-स्वाश्रयज्ञानग्राहकसामग्रीग्राह्यं न वेति विप्रतिपत्तिस्तत्र भावकोटिर्मीमांसकानां निषेधकोटिश्च नैयायिकानाम् । शास्त्रार्थजातमेनमालक्ष्य ग्रन्थस्यास्य प्रामाण्य-वादस्यावतार इति ।

भावल्युडन्तप्रमाणशब्दनिष्पन्नम् प्रामाण्यम् (प्रमात्वम्) तस्य वादः । अन्तरा मतान्तरखण्डनगर्भत्वेऽपि तदुद्देशेनाप्रवृत्ततया न वादलक्षणम् परिही-णम् । चिन्तामणिदीधित्यनुगतस्यास्य व्याख्याता पण्डितमूर्धन्यः श्रीगदाधर-भट्टाचार्योऽनेकवादनिर्मातेति विशिष्टवैदुष्यमस्य व्युत्पत्तिवादादिदर्शनेन सर्वतो-मुखमालोच्यते । बङ्गप्रदेशान्तर्गतनवद्वीपलब्धजन्मकर्मधर्मा चैष महानुभावः षडधिकदशशततमवङ्गाब्दे एकविंशत्यधिकपञ्चदशशततमशाके च बङ्गभूमिमलं चकारेति श्रूयते। निर्मिताश्चैनेन चतुष्षष्टिर्वादा इति प्रसिद्धचरं विद्वद्गोष्ठीषु ।

ग्रन्थस्यास्य च दुरूहतामेव 'नमः प्रामाण्यवादाय मत्कवित्वापहारिणे' इत्यादिवचोनिकरस्समुपस्थापयति । बहुशो नव्यन्यायशास्त्रीयोत्तमपरीक्षासु निर्धारितस्य तस्यास्य पठनपाठनयोः काठिन्यविषये विज्ञा एव प्रमाणम् । अद्यावधि स्वस्वगुरुपरम्परावगतलेखादिरेव प्रचरण-सरणिरासीत् समेषाम् । का कथा परमाणूनां यत्र मज्जति मन्दर इति लौकिकाभाणकमिहैव चरिता-र्थेति । कदाचित् स्थलविशेषेषु करामलकवदाहितन्यायशास्त्राणामपि मतिर्न

रति सुधियाम्। यथा "ऽभिधेयसम्बन्धज्ञानमपि..." पर्याप्तिनिवेशे च थपर्यालोचने लाघवासम्भवात्..." अत्र मिश्रानुयायिनः..." तदङ्कुरप्रकार-ज्ञानमन्तरेणापि..." ज्ञानविषयकप्रहेवारणे विना प्रयासं घटत्वादौ विधि-बुद्धिसम्भवात् ज्ञानत्वे तत्प्रसिद्धिसम्पादकप्रयासवैफल्यादि"त्यादिषु ग्रन्थ-पर्यमात्रस्फोरणायापि समपेक्ष्यते सम्प्रदायः का कथा क्रोडपत्रादीनाम्। त्रयाणां केषाञ्चित् सुहृदां च विशेषतः प्रेरणया विशदटीकाया अभावञ्च कर्तु कामेन मया वर्षत्रयात् पूर्वमेव विचारितं यदस्य विशदा काचिट्टीका अस्य निबन्धनीयेति।

राजकीयविविधनियन्त्रणनिगडनिबद्धतया मषीपत्रादीनाम् व्ययभारवार्द्ध-क्य मुद्रका मुद्रिताननाः नालमभूवन् सन्नद्धलेखानपि समुत्साहयितुमस्मान्। तः परमाराध्यपदपाथोजानां विद्वच्चक्रचूडामणीनां परमोदारचरितानां विश्रुतयशोराशीनां सर्वतन्त्रापरतन्त्राणां पितृकल्पानां वैद्यसम्राट् प० सत्यनारायणशास्त्रिमहाभागानामाज्ञया गूढग्रन्थरहस्यप्रकाशिकया प्रभा-टीकयाऽऽवश्यकटिप्पण्या च प्राचिकाशयिषमेनम्। मदीयशास्त्रार्थमहा-लय-प्रधानसंरक्षकैः काशिकलब्धप्रतिष्ठनागरिकैरस्मत्स्नेहभागभिस्समुदार-रितैः श्रीबाबूलाल ढान्ढनियाँ महोदयैः यावत्कर्गदपत्रव्ययप्रदानेन, प्राशितो-काशितसंस्कृतग्रन्थप्रायैः 'सरला प्रेस' समध्यक्षैः श्रीपरेशानाथामरनाथघोष-दयैरमूल्यमुद्रणेन च महत्साहाय्यमाचरितमिति सर्मेषामेषामाभारमाबिभर्मि।

प्राप्तेऽर्द्धप्रकाशनप्राये नियन्त्रणमाहात्म्यात् पुनरपि सुन्दरचिक्कणपत्रा-भेन मासं यावत् प्रतीक्षापथमातिष्ठन् वैवश्यादनभीप्सितपत्रेष्वेव शेषांशा-णमाचरम्।

समयलाघवात् कस्यचन सहायकस्य विदुषोऽभावात् कार्याधिक्याच्चान्ते ामपि संक्षिपन् यथाभीष्टमेनं नापारयम् मुद्रापयितुम्। प्रकाशनेनानेन माण्येवादस्य समुद्धारो जात इति वदताम् पण्डितप्रवराणामपि केषाञ्चित् हृदां वचो न विश्वसिमि न वा श्रद्दधे। तद्विदन्तु वक्तुमीशे यद् यज्जातन्तद् ावतो भवानीपतेः प्रसादाच्छ्रीगुरुचरणानां कृपावशाद् यच्च न्यूनं नवा रितन्तत् प्राणिसहजमामकानवबोधादिति कृतसंशोधनेऽपि प्रकाशित-रशिष्टसंशोधनीयपत्रे अन्ताङ्कितक्रोडपत्रेऽपि चात्र सम्भवन्तीस्त्रुटीस्संशोधन-राऽनुगृह्यानुग्रहीष्यन्ति मां गुणगृह्या विद्वत्प्रवरा न्यायरहस्यविद इत्याशास्ते।

जया दशमी २००८ वि०

सर्वदा विद्वज्जनानुगृहीत :—

॥ श्रीः ॥

चिन्तामणि-दीधितिविभूषितगादाधर-
प्रामाण्यवादः ।

(दीधितिः) गिरं गुरूणां हृदये निधाय विधाय सिद्धान्तसरोऽवगाहम् ।
संक्षेपतश्श्रीरघुनाथनामा चिन्तामणेर्दीधितिमातनोति ॥

(गादाधरी) नत्वा नन्दतनूजसुन्दरपदं स्मृत्वा गुरोरादरा-
दुर्वीमण्डलमण्डनायितयशोराशेरशेषा गिरः ।
संक्षिप्तोक्त्यतिदक्षदीधितिकृतः प्रत्यक्षचिन्तामणौ,
व्याख्यां व्याकुरुते गदाधरबुधो मोदाय विद्यावताम् ॥

(प्रभा) स्कन्धरोपितरामलक्ष्मणतनुं मात्रा समं सीतया, हुङ्कारेण समस्तवैरिनिकर-प्रत्यूहमूलं क्षयम् । भक्तप्रार्थनया नयन्तमभितो वन्देऽञ्जनीनन्दनं सर्वस्यार्तिहरं हरेः प्रियतमं सिद्धिप्रदं कामदम् ॥ १ ॥

आन्वीक्षिकीवीक्षणशिक्षणेषु सर्वस्वमभ्रान्ततयाऽध्यगच्छन् ।
ये तान् गुरून् कर्कशतर्ककोटीन् काशीं वसन् प्रेममयान् प्रणौमि ॥ २ ॥
पूज्यान् पितॄन् शाब्दिकलोककोकशोकापनोदोष्णकरान् नमामि ।
येषां सुतस्नेहवशेन तावद् व्युत्पादितश्शास्त्रमहार्णवेऽस्मि ॥ ३ ॥
चिन्तामणेर्दीधितिकृद्गदाधराभ्यां कृतं वर्णनमुत्तमन्तु ।
तद्ग्रन्थग्रन्थीन् श्लथयन् प्रभायाम् प्रामाण्यवादं सुपरिष्करोमि ॥ ४ ॥

शिष्टाचारपरम्परानुगतम्प्रत्यूहव्यूहनिरासार्थं नमस्कारात्मकम् मङ्गलं शिष्यशिक्षायै निबध्नाति नत्वेति ।

नन्दतनूजसुन्दरपदमित्यत्र द्वितीयार्थो विषयित्वम्, तच्च स्वावधिकोत्कर्षवत्त्वप्रकारक-बोधानुकूलव्यापारात्मकनमधात्वर्थैकदेशे बोधेऽन्वेति । उत्तरकालवृत्तित्वं क्त्वाप्रत्ययार्थः, राश्यन्तस्य गुरुपदार्थे समानविभक्तिकत्वादभेदान्वयः, गुरोः इत्यत्र षष्ठ्यर्थं उच्चरितत्वं गीःपदार्थेनान्वेति, अशेषपदम् प्रकृतोपयोग्यशेषार्थकम् गीःपदार्थेऽभेदान्वयि च । आदरपदोत्तरपञ्चम्याः प्रयोज्यत्वमर्थः मोदस्सुखविशेषः, जनकत्वं चतुर्थ्यर्थः व्याख्या च विशेषार्थप्रतिपत्त्यनुकूलो व्यापारः, तत्र प्रत्यक्षचिन्तामण्युत्तरसम्बन्धित्वरूपषष्ठ्यर्थस्यान्वयः । किंवा तदेकदेशे विशेषार्थे प्रतिपादितत्वरूपषष्ठ्यर्थान्वयः, तथाच नन्दतनूजसुन्दरपदविषयकस्वावधिकोत्कर्षवत्त्वप्रकारकबोधानुकूलव्यापारोत्तरकालवृत्ति-तादृशयशोराश्यभिन्नगुरूच्चरितप्रकृतोपयोग्यशेषवाक्यविषयकादरप्रयोज्यस्मरणोत्तरकालिक - विद्यावत्समवेतसुखविशेषजन-

...कवा

अत्र किञ्चिद् विचार्यते, ननु जन्यत्वोक्तिरनुचिता "सर्वे नित्याः शाश्वताश्च देहास्तस्य महात्मनः। परमानन्दसन्दोहा ज्ञानमात्राश्च सर्वदा" इत्यादौ भगवद्विग्रहस्य साक्षान्नित्यत्वोक्तेः इति चेन्न ? स्मृत्या श्रुत्या युक्त्या च भगवद्विग्रहस्यानित्यत्वसिद्धौ अन्यार्थपरायाः श्रुतेरन्यार्थतात्पर्यकत्वकल्पनानौचित्यात्। तथा हि, भगवद्विग्रहो न नित्यः महत्त्वे सति रूपवत्त्वात् विग्रहत्वात् वा इत्यनुमानम्। नच तदिदमप्रयोजकम् ? महत्त्वसमानाधिकरणरूपस्य जन्यत्वनियमेन प्रयोजकत्वलाभात्। तथाहि, तस्य पाकजन्यत्वं न सम्भवति पाकपूर्व- रूपान्तरस्य वाच्यत्वेन श्रीकृष्णविग्रहस्य नानारूपत्वापत्तेः। नहि स कदाचित् नवनीरदश्यामः कदाचित् इन्द्रनीलादिश्यामः अपरजातीयरूपवान् वा, तथासति ध्यानस्य अव्यवस्थितत्वापत्तेः। नच नवनीरदश्यामत्वादिकमेवोपास्यं नवनीरदश्याममित्यादिगौतमीयतन्त्रादौ तथोक्तत्वात् तथाच श्रीकृष्णादिविग्रहे एकैकजातीयरूपमेवोपास्यमिति प्रतिविग्रहं पाकजनानारूपस्वीकारे ऽपि नोपासनाव्यवस्थेति वाच्यम् ! एवमपि पूर्वरूपनाशकरूपान्तरोत्पादकस्तेजस्संयोगविशेषरूपः पाको भगवति श्रीकृष्णे जायते इत्यत्र नियामकाभावात्। तस्मात् विग्रहकारणगतरूपजन्यत्वस्यावश्यं वाच्यतया जन्यतादृशरूपस्य भगवद्विग्रहे जन्यत्वसम्पादकत्वात्। एवम् महत्त्वस्यापि रूपसमानाधिकरणस्य जन्यत्वनियमात् जन्यमहत्त्वे च स्वाश्रयावयवस्य महत्त्वं बहुत्वं प्रचयो वा हेतु घटादौ कपालादिमहत्त्वेन त्रसरेणौ द्व्यणुकबहुत्वेन तूलपिण्डादाववयवप्रचयेन च महत्त्व दर्शनात्। तथा च भगवद्विग्रहे तादृशमहत्त्वं प्रति तावदन्यतमहेतुत्वावश्यकतया सावयवत्वेन जन्यत्वसिद्धेः। नचोक्तानुमाने प्राकृतत्वमुपाधिः, दृष्टान्ते साध्यव्यापकत्वस्य पक्षे साधनाव्यापकत्वस्य च सत्त्वादिति वाच्यम् ? भगवद्विग्रहे प्राकृतत्वस्य सन्दिग्धत्वेऽपि अनुकूलतर्काणामत्र सत्त्वेन पक्षीयव्यभिचारसम्भवस्य सन्दिग्धोपाधिरूपकार्याप्रयोजकत्वात्। एवञ्च नित्यत्वबोधकत्वेनाभिमतश्रुतेः अर्थान्तरप्रतिपादकत्वमेव। तथाहि नित्याः शाश्वता इत्यनेन उपासनातिशयेन तत्तज्जातीयदेहाः सर्वदा द्रष्टुं शक्याः पूर्वोत्पन्नश्रीकृष्णादिदेहस्य नष्टत्वेऽपि भक्तवात्सल्येन भगवता तज्जातीयदेहान्तरं जनयित्वा प्रदर्श्यते इति बोध्यते। परमानन्दसन्दोहाः इत्यनेन च दुःखभोगायतनत्व... ज्ञानमात्रा इत्यनेन च आवरणशून्यत्वं विवक्षितम्। रघुनाथादिशरीरे च आवरणाका... रोदनादिकं यद् दृश्यते तद् ब्राह्मणशापावैयर्थ्यसूचनायेति। अत एव च ब्रह्मण्यो देवकी पुत्रो ब्रह्मण्यो मधुसूदनः। चिन्मयेऽस्मिन् महाविष्णौ जाते दशरथे हरौ॥ रघोः कुल... खिलं राति राजते यो महीक्षितः।" इत्यादिश्रुतयः, प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्म मायया-धर्मसंस्थापनार्थाय सम्भवामि-तदाऽऽत्मानं सृजाम्यहम्-जन्मकर्माभिधानानि सन्ति मेऽथ सहस्रशः, बहूनि मे व्यतीतानि जन्मानि तव चार्जुन' इत्यादिस्मृतयश्चोपपद्यन्ते।

एतेन श्रुतिबलात् सावयवोऽपि नित्यः इत्यपास्तम्।

गुरुकीर्त्तनरूपं मङ्गलं कुर्वाण एव स्वीयग्रन्थे प्रेक्षावत्प्रवृत्त्यर्थं तदुत्कर्षं दर्शयति *गिरमिति*। हृदये = मानसे। निधानम् = सम्बन्धसम्पादनम्। मनसि गुरुगिरस्सम्बन्धः स्वार्थज्ञाने जननीये तत्सहकारित्वम्। सहकारित्वं चात्र परम्परया फलोपयोगित्वम्। तथाच गुरुवाक्याधीनशाब्दबोधजन्यसंस्कारसध्रीचीनेन मनसा निबद्धव्यमितरापरिशीलितमर्थं निश्चित्येति फलितोऽर्थः। सिद्धान्ताविरुद्ध एवार्थो वर्णनीय इति सूचयति *विधायेति*। सिद्धान्तः = मूलकृता महर्षिणा तदुपजीविपूर्वपूर्वनिबन्धकारपरम्परया चाभ्युपगतोऽर्थनिकरः, स एव सरः, तदवगाहनस्य निबन्धनीयार्थे सिद्धान्तापसिद्धान्तसन्देहाहितचेतस्सन्तापसन्तानोपशान्तिसाधनत्वात्, तत् अवगाह्य। अवगाहनम् अन्तःप्रवेशः, स च प्रकृते निगूढतत्त्वाकलनरूपः।

विशेषलीलाविग्रहस्य तेजोराशेः नन्दगृहस्थलीलाविग्रहे तेजःपुञ्जविशेषे तदानीमन्तः प्रवेशात् वासुदेवस्यापि नन्दतनूजत्वोक्तौ शङ्कानवकाशात्। नन्दतनूजत्वारोपनिबन्धनलोक व्यवहारेण तथोक्तेश्च।

गुरुकीर्त्तनेति। कीर्तनं च तद्बोधतात्पर्येण तन्नामोच्चारणम्।

तदुत्कर्षमिति। उत्कर्षत्वं च अयमेदतपेक्षया उत्कृष्ट इत्याकारकप्रत्ययसिद्ध जातिविशेषः। स्वार्थज्ञाने = वाक्यार्थज्ञाने। तत्सहकारित्वम् = गुरुवाक्यसहकारित्वम्। तत् च तदसमवधानप्रयुक्तफलोपधायकत्वाभाववत्त्वकत्वम्। यत्र यत्सामानाधिकरण्याभावप्रयुक्त फलोपधायकत्वाभावस्स तस्य सहकारीति यावत्। यथा दण्डचक्रयोः। ननु प्रकृ गुरुवाक्यजन्यशाब्दबोधस्यातीतया व्याख्यानिर्माणेऽनुपयोगादुक्तसहकारित्वं कथमित्यत आ सहकारित्वंचेति। परम्परया संस्कारद्वारेत्यर्थः। फलम् = स्मरणम्। तथा च गुरुवाक्य न्यशाब्दबोधस्यातीतत्वेऽपि तदधीनसंस्कारस्य तदानीमपि सत्त्वादुपयोगित्वसिद्धे संस्कारेति = उद्बुद्ध इति शेषः। सध्रीचीनेन = सहकृतेन। वस्तुतस्तु संस्काराधीना निश्चयस्यैव उपयोगितेत्यनुसन्धायाह *तथाचेति*। मनसा = तृतीयार्थो जन्यत्वम्। तस्य ल्यप्प्रत्ययप्रकृतिभूते निश्चयेऽन्वयः। तादृशमनोजन्यार्थनिश्चयश्च स्मृतिर्मानसवे वा। *परिशीलनम्* सम्यग्ज्ञानम्। *सिद्धान्ताविरुद्धेति*। एतेन मिश्रप्रभृतीनां तत्त्व रूपणं सिद्धान्तविरुद्धमपीति व्यज्यते। तदुत्कर्षान्तरमाह सिद्धान्तेति। मूलकृता = गौतमे सरस्सादृश्यं च

——————तेनतया बोद्धव्यम्। सरोवीक्षणमात्रेण सन्तापानिवृत्ते

(दी०) प्रेक्षावत्प्रवृत्तये—

(गा०)संक्षेपतः = संक्षिप्तीकृतः चिन्तामणेः = चिन्तामणिनामकग्रन्थस्य दीधितिम् = अर्थप्रकाशम्। आतनोति = विस्तारयति। विवरणग्रन्थनिर्माणे बहुतरजनसम्बद्धं करोति। चिन्तामणिग्रन्थतत्त्वार्थान् भूयसः शिष्यान् बोधयतीति फलितोऽर्थः। श्रिया युक्तो रघुनाथनामा श्री रघुनाथनामेति मध्यमपदलोपिसमासः, रघुनाथइति नाम (रूपम्) यस्येतिबहुव्रीहिगर्भो न श्रीरघुनाथेति नाम (रूपं) यस्येत्येकस्समासः, श्रीशब्दस्य नामानन्तर्गतत्वात् तथा सति ह्यादिपदानां द्व्यक्षरत्वानुपपत्तेः। नचास्यैव नाम श्रीघटितमित्याशङ्कनीयम्? रघुनाथकवेरिति विरोधात्।

प्रमाणतत्त्वे निरूपयितव्ये महर्षेः प्रमाणादितत्त्वप्रतिपादकशास्त्रप्रणेतृत्वाद्यभिधानस्य सफलत्वं दर्शयति प्रेक्षावदिति। प्रेक्षावताम् = विवेकिनाम्, प्रकृष्टफलोद्देशमन्तरेण शास्त्राध्ययनेऽप्रवर्त्तमानानामिति यावत्। तेषां स्वीयग्रन्थाध्ययने प्रवृत्त्यर्थमित्यर्थः।

(प्रभा) श्रिया युक्त इति। आयुष्मता स्वनाम श्रीघटितमेव प्रयोक्तव्यमिति व्यवहारस्य बङ्गे मिथिलायाञ्च प्रसिद्धत्वात्। संज्ञाशब्दानां नावयवार्थो भासतेऽन्यथा द्वे दले यस्मिन्निति विग्रह्य बहुव्रीहिणा निष्पन्नस्य द्विदलशब्दस्य दलद्वयविशिष्टार्थप्रतिपादकतया प्रत्येकत्र दले चलतो द्विदलत्वव्यवहारस्य हानिरेव प्रसज्ज्येतेति भवत्यखण्ड एव संज्ञाशब्दो न समासाय विवदनीयमिति मनसिकृत्य नचेति।

प्रेक्षावदिति। जनकत्वं चतुर्थ्यर्थः तस्य च ज्ञानानुकूलव्यापाररूप-आङ्पदार्थैकदेशे ज्ञानेऽन्वयः, फलवच्छास्त्रोपकरणत्वेनेति तृतीयार्थो ज्ञाप्यत्वम्, तस्य प्रयोजनवत्त्वेऽन्वयः। तथा च प्रेक्षावत्प्रवृत्तिजनकफलवच्छास्त्रोपकरणत्वज्ञानज्ञाप्यप्रयोजनवत्त्व—अभिधेयसम्बन्धविषयकज्ञानानुकूलस्वीयग्रन्थाभिन्नव्यापारानुकूलकृतिमान् चिन्तामणिकार इति वाक्यार्थः।

ननु प्रमाणतत्त्वनिरूपणावसरे 'प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते' इत्यनेनैव सामञ्जस्ये अथेत्यारभ्य असूत्रयत्पर्यन्तचिन्तामणेः किम्प्रयोजनमिति चेन्न? प्रेक्षावत्प्रवृत्तये प्रयोजनवत्त्वाभिधेयसम्बन्धज्ञापनार्थन्तदावश्यकत्वात्। तदाह प्रमाणतत्त्वे इत्याद्युपक्रम्य गदाधरः।

'विना विषयसम्बन्धौ तथैवार्थाधिकारिणौ। अव्याख्येयो भवेद् ग्रन्थःस्याद् ग्रन्थे तच्चतुष्टयम्' इति रीत्या सम्बन्धश्चाधिकारीच विषयश्च प्रयोजनम्। विनानुबन्ध ग्रन्थादौ कश्चिन्न [illegible]

(चिन्तामणिः) अथ 'जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रेक्षावत्प्रवृत्त्यर्थम् 'प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगमः' इति आदौ असूत्रयत्। तेष्वपि (तत्र) प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते।

• (दी०) फलवच्छास्त्रोपकरणत्वेन प्रयोजनवत्तामभिधेयसम्बन्धौ 'चाह' स्वीयग्रन्थस्य 'अथ' इत्यादिना 'विविच्यते' इत्यन्तेन।

(गा०) स्वीयग्रन्थस्य प्रयोजनवत्ताम् = परमप्रयोजनभूतनिःश्रेयसरूपफलवत्ताम्, अभिधेयसम्बन्धौ च = प्रमाणतत्त्वरूपं प्रतिपाद्यम्, प्रतिपादकत्वरूपं तत्सम्बन्धं च आहेत्यन्वयः।

(प्रभा) चिन्तामणेरर्थः—अथ = मङ्गलस्य समाप्तिकारणत्वव्यवस्थापनानन्तरम्। प्रमाणतत्त्वं विविच्यते इत्यनेन सम्बन्धः। "ऊङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ" इति रीत्याऽऽनन्तर्यपरस्यापि अथशब्दस्येह मङ्गलपरत्वात्। जगत् = मिथ्याज्ञानजन्यवासनाविशिष्टात्मानः इति। जगत्पदस्य समूहार्थकताया अशेषार्थकताया एवकारस्य तदर्थे तात्पर्यग्राहकताया वाऽग्रे स्फुटीकरिष्यमाणत्वात्। दुःखपङ्कनिमग्नमिति। न्यायमतसिद्धैकविंशतिदुःखवत्। उद्दिधीर्षुः = आत्यन्तिकदुःखध्वंसवत्त्वेन मुमोचयिषुः। अष्टादशविद्यास्थानेषु। स्थानम् प्रभेदः। अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणं च विद्या

रुक्तज्ञानद्वयञ्च अनुबन्धतः अनुबन्धाश्च विषयप्रयोजनसम्बन्धाधिकारिभेदेन चतुर्विधाः। ग्रन्थाध्ययनविषयकप्रवृत्तिप्रयोजकज्ञानविषयत्वञ्चानुबन्धत्वम्। तत्र विषयज्ञानादिष्टसाधनत्वप्रकारकं कृतिसाध्यत्वप्रकारकञ्च ज्ञानं जायते, अधिकारिज्ञानेन च कृतिसाध्यत्वप्रकारकं ज्ञानं जायते, प्रयोजनज्ञानेन चेष्टसाधनत्वप्रकारकं ज्ञानम् सम्बन्धज्ञानेन चोभयज्ञानमित्यनुबन्धचतुष्टयनिरूपणं कर्तव्यतामर्हति। तत्र विषयः इष्टसाधनत्वप्रकारके कृतिसाध्यत्वप्रकारके च ज्ञाने भासते, अधिकारी कृतिसाध्यत्वप्रकारके ज्ञाने सम्बन्धश्च ज्ञानद्वये भासत इति परस्परापेक्षनिखिलभासनाय अनुबन्धनिरूपणम् भवति शिष्टाचारादिति चिन्तामणिकारोऽपि तत्सूचनाय अथेत्यारभते।

'शाब्दबोधप्रकारस्त्वेत्थम्—अत्र कर्तव्यग्रन्थे प्रतिपाद्यत्वं सप्तम्यर्थः, तस्य प्रमाणतत्त्वेऽन्वयः, मयेत्यध्याह्रियते, कृतिजन्यत्वं तृतीयार्थः, तस्य धात्वर्थे विवेचनेऽन्वयः,

(गा०) यद्यपि अभिधेयसम्बन्धज्ञानमपि अर्थविशेषप्रतिपादनद्वारा फलवतो ग्रन्थस्य सफलत्वज्ञान उपयुज्यते, अतः प्रयोजनाभिधेयसम्बन्धाँ-स्तुल्यतयोपादाय तत्प्रदर्शकताकथनं न सङ्गच्छते, तथापि एतद्ग्रन्थप्रतिपाद्यत्वेन सामान्यतः सप्रयोजनज्ञानविषयत्वमवगत्य ग्रन्थस्य प्रयोजनवत्तां जानतोऽपि प्रतिपाद्यस्य ज्ञातत्वसंशये ग्रन्थश्रवणे प्रवृत्तिर्नोपपद्यत इति विशिष्याभिधेयज्ञानमपि अपेक्षितमित्याशयेन तदभिधानम् ।

(प्रभा) ह्येताश्चतुर्दश ॥ आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः । अर्थशास्त्रं च विज्ञेयंविद्या अष्टादशैव तु" इत्यष्टादशविधा विद्या बोध्याः ।

असति बाधके उद्देश्यतावच्छेदकविधेययोः प्रयोज्यप्रयोजकभावेन आन्वीक्षिकी-प्रणयने अभ्यर्हिततमत्वस्योद्देश्यतावच्छेदकस्य प्रयोजकत्वमवगन्तव्यम्, धनवान् सुखीत्यादाविव । अभ्यर्हिततमत्वञ्च सर्वविद्याप्रदीपत्वादि । अतएव

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तिता ॥ इति गीयते ॥

परमकारुणिक इति । कारुणिके परमत्वं च अहेतुककरुणाकारित्वम् । **अत्र विविच्यत इति** । अत्रैवेति सावधारणम् । अत्रैव = अत्र कर्त्तव्यग्रन्थे, सर्वपदार्थनिरूपणात् पूर्वमेवेति यावत् । अत्र हेतुमाह **प्रमाणाधीना सर्वेषां व्यवस्थितिरिति** । ननु चिन्तामणिकारस्य निरूप्यते इति स्वीयसरणिमपहायात्र विविच्यते इत्युक्तिः कुतः ? प्रमात्वगतस्वतस्त्वपरतस्त्वयोरेवात्र विशेषतो निरूपणेन प्रमाणतत्वविवेचनोक्तेरेवौचित्यात् । विवेचनं च परमतनिराकरणपूर्वकस्वमतव्यवस्थापनमेवेति, व्यवस्थापनं च प्रमाणवत्तया बोधनम् ।

प्रमाणाधीना सर्वेषां व्यवस्थितिरित्यनेन प्रमाणे सर्वपदार्थव्यवस्थोपपादकत्वकथनेन प्रमाणतत्त्वविवेचने उपोद्घातसङ्गतिस्सूचिता । अथशब्देन प्रसङ्गोऽपि व्यज्यते ।

यद्यपीति । ननु अभिधेयसम्बन्धज्ञानस्य फलवच्छास्त्रोपकरणत्वहेतोरिव अनुमित्यात्मकप्रयोजनवत्ताज्ञानम् प्रत्येव हेतुत्वात् प्रवृत्तिम् प्रति साक्षादकारणतया प्रेक्षावत्प्रवृत्तिकारणनिरूपणप्रसङ्गे प्रयोजनवत्त्वाभिधेयसम्बन्धानां तुल्यतया व्यवस्थापनं न सङ्गच्छते, तुल्यतया उपादाने उभयत्र साक्षात्कारणताबोधप्रसङ्गादिति चेन्न, विशेषरूपेणाभिधेयसम्बन्धज्ञानस्यापि अन्वयव्यतिरेकसाहचर्येण प्रवृत्तिसाक्षात्कारणत्वस्य समुचितत्वात् । तथाहि 'प्रमाणतत्त्वमत्रविविच्यते' इत्यस्य स्थाने 'आन्वीक्षिकीप्रतिपाद्यमत्र विविच्यते'इति चिन्तामणिकृताऽभिहितं स्याच्चेत्, ततोऽपि आन्वक्षिकीप्रतिपाद्यार्थे ज्ञातत्वसंशये प्रवृत्तिर्न भवति, प्रमाणतत्त्वमित्यादिविशेषरूपेण प्रतिपाद्यार्थप्रतिपादने तु तज्जिज्ञासूनां ग्रन्थे प्रवृत्तिर्जायते इति कारणतानियामकस्य ...... ।

अभिधेयतत्सम्बन्धज्ञानमित्यर्थः। अपिना फलवच्छास्त्रोकारणत्वस्य परिग्रहः। उपयुज्यते इत्येतेन सह सम्बद्ध्यते। **अर्थविशेषप्रतिपादनद्वारा**=प्रमाणतत्त्वरूपार्थविशेषप्रतिपादकत्वसम्बन्धेनेत्यर्थः। फलवत इत्यनेन सम्बद्ध्यते, तथा च स्वजनकज्ञानजनकत्वसम्बन्धेन मोक्षरूपफलविशिष्टस्य ग्रन्थस्येति वाक्यार्थः। अत एव दुःखध्वंसरूपमोक्षस्यात्मनि सत्त्वेन ग्रन्थे तदभावात् तत्र तद्वत्तासिद्धये अर्थविशेषप्रतिपादनद्वारेति निरुक्तम्। **ग्रन्थस्य**=प्रामाण्यवादस्य। **सफलत्वज्ञाने**=अयम् प्रामाण्यवादरूपो ग्रन्थः मोक्षरूपप्रयोजनवान् मोक्षसाधनीभूतान्वीक्षिकीप्रतिपादितार्थसमुदायैकदेशप्रमाणतत्त्वरूपार्थप्रतिपादकत्वात् इत्यनुमित्यात्मकज्ञान इत्यर्थः। दृष्टान्तस्तु प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति सूत्रम्। **उपयुज्यते**=उपयोगीत्यर्थः। ग्रन्थेन सह प्रमाणतत्त्वस्य प्रतिपाद्यप्रतिपादकभावसम्बन्धज्ञाने सति पूर्वोक्तहेतुज्ञानेन सफलत्वानुमितिर्भवतीति भावः।

अत्रेदं बोध्यम्—सफलत्वज्ञान उपयुज्यते इति वाक्यं हि बाधकेऽसति सर्वं वाक्यं सावधारणमिति सिद्धान्तेन सफलत्वज्ञाने एव इत्यवगमयति। अवधारणेन प्रेक्षावत्प्रवृत्तिम्प्रति अभिधेयतत्सम्बन्धज्ञानस्य कारणत्वव्यवच्छेदः। अभिधेयतत्सम्बन्धज्ञानं हि सफलत्वज्ञानम्प्रत्येव हेतुर्न तु प्रेक्षावत्प्रवृत्तिम् प्रत्यपीति फलितार्थः।

अतः=अभिधेयसम्बन्धज्ञानस्य सफलत्वज्ञान एव कारणत्वात्। **प्रयोजनाभिधेयसम्बन्धाँस्तुल्यतयोपादाय**=त्रीनेतान् समानकोटावुपादाय, प्रेक्षावत्प्रवृत्तिरूपकार्यम् प्रति कारणतया व्यवस्थाप्येत्यर्थः। **तत्प्रदर्शकताकथनम्**=प्रेक्षावत्प्रवृत्तये इत्यादिना 'अथेत्यारभ्य विविच्यते, इत्यन्तचिन्तामणितात्पर्यवर्णनं दीधितिकर्त्तुरिति। न सङ्गच्छते इति पूर्वपक्षहृदयम्। उत्तरयति तथापीत्यादिना। **तथापि**=सफलत्वज्ञानेऽभिधेयसम्बन्धज्ञानस्योपयोगित्वेऽपि इत्यर्थः। **एतद्ग्रन्थप्रतिपाद्यत्वेनेति**—तृतीयार्थोऽभेदः, तस्य सामान्यपदार्थे आन्वीक्षिकीप्रतिपाद्यत्वेऽन्वयः। **सप्रयोजनज्ञानेति**। **सप्रयोजनम्**=मुक्तिफलकम् यदान्वीक्षिकीप्रतिपादितार्थज्ञानम तद्विषयत्वम् **अवगत्य**=निश्चित्य इत्यर्थः। तथाच एतद्ग्रन्थप्रतिपाद्यः सप्रयोजनज्ञानविषयः आन्वीक्षिकीप्रतिपाद्यत्वात् तुल्यवित्तिवेद्यतया मुक्तिहेतुज्ञानविषयः एतद्ग्रन्थप्रतिपाद्यः आन्वीक्षिकीप्रतिपाद्यत्वादिति रीत्या वा एतद्ग्रन्थप्रतिपाद्यः सप्रयोजनज्ञानविषय इति बोधः।

सप्रयोजनज्ञानविषयत्वनिश्चये मुक्तिफलकज्ञानविषयान्वीक्षिकीप्रतिपादितार्थप्रतिपादकत्वरूपहेतुमत्त्वज्ञानसम्भवेन ग्रन्थे प्रयोजनवत्त्वज्ञानसम्भव इति हृदि निधायाह **ग्रन्थस्य प्रयोजनवत्त्वं जानतोऽपीति**। **ज्ञातत्वसंशये**=प्रमाणतत्त्वं ज्ञातं नवेति संशये। ज्ञातता च ज्ञानविषयतारूपा। **ग्रन्थश्रवण इति**। एतद्ग्रन्थप्रतिपाद्यत्वेन ज्ञातत्वसंशये जाते जिज्ञासाया असम्भवेन श्रवणेऽप्रवृत्तेः। अयमत्राभिसन्धिः, तद्ग्रन्थाध्ययनधर्मिक-

[ ]

(मा०) 'प्रमाणतत्त्वमत्र 'विविच्यते' इत्यतः साक्षादेवाभिधेयसम्बन्ध-लाभः, प्रयोजनवत्तालाभश्च न तथा, तद्वाचकपदाभावात्, अपि तु आर्थत एव तल्लाभ इति विशेषसूचनाय पृथक् समासेन तदभिधानम्।

कुतोऽर्थात् प्रयोजनवत्तालाभ इत्याकाङ्क्षायामाह फलवच्छास्त्रोपकरणत्वे-नेति। निःश्रेयसफलवदान्वीक्षिकीशास्त्रप्रतिपादितसमुदायैकदेशार्थप्रतिपादक-त्वेनेत्यर्थः। तृतीयार्थः प्रयोजनवत्त्वान्वयि ज्ञाप्यत्वम्। 'जगदुद्दिधीर्षुरान्वी-क्षिकीम् प्रणिनाय' इत्यतो मूलभूतशास्त्रस्य निःश्रेयसरूपोद्धारप्रयोजकता-लाभः। प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगम इति आदौ प्रसूत्रयत-त्वान्तेन निःश्रेयसोपायभूतज्ञानविषयप्रमाणादिपदार्थतत्त्वस्य तच्छास्त्राभिधे-यत्वलाभः।

एवं च तदन्तर्गतप्रमाणतत्त्वप्रतिपादकत्वलाभान्निरुक्तशास्त्रोपकर-णत्वलाभस्स्वीयग्रन्थस्य। तत्र च निःश्रेयससाधनत्वानुमितौ निरुक्तार्थप्रतिपा-दकत्वस्य निःश्रेयससाधनार्थप्रतिपत्तिजनकतात्वेनैव हेतुता, तथाविधार्थे आन्वीक्षिकीप्रतिपाद्यसमुदायान्तर्गतत्वं च तस्यां सहचारज्ञानेन व्याप्तिग्रहार्थ-

---

(प्रभा) प्रमाणतत्त्वत्वादिरूपेण। तथा च सामान्यतः प्रतिपाद्यत्वावच्छिन्नधर्मिकज्ञानस्य [illegible]पयोगित्वेऽपि प्रवृत्त्युपयोगित्वं न सम्भवति सामान्यत एत द्ग्रन्थप्रतिपाद्यस्य प्रयोजनज्ञानविषयत्वनिश्चयेऽपि प्रमाणतत्त्वत्वावच्छिन्नविशेष्यकसप्रयोजनज्ञानविषयत्व-[illegible]स्य प्रवृत्तिविघटकस्योत्पत्तौ बाधकाभावात्। तदभिधानमिति। प्रमाणतत्त्व[illegible] [illegible] अभिधेयाभिधानमित्यर्थः।

ननु पूर्वोक्तदिशा प्रयोजनवत्त्वाभिधेयतत्सम्बन्धानां साक्षादेव प्रवृत्तिहेतुत्वे [illegible]भिधित्सिता 'प्रयोजनवत्त्वाभिधेयसम्बन्धानाह' इति समस्तः प्रयोग एव लाघवात् कुतो न [illegible] इत्याशङ्कमान आह "प्रमाणतत्त्वमत्रेति" गदाधरः। इत्यतः = इतिग्रन्थेन। साक्षादेव = शब्दादेव। न तथा = न शब्दात्। अर्थत एव = अनुमानादेव। [illegible]ल्लाभः = प्रयोजनवत्त्वज्ञानम्। पृथक् इति = एतद्योगे पञ्चम्या भाव्यम्। तदभि-धानम् = क्रमेण प्रयोजनवत्त्व-अभिधेयसम्बन्धाभिधानमितिभावः। अनुमानात् प्रयोजन-वत्तालाभ इतिप्रागुक्तमिदानीं कस्मात् किमाकारकादनुमानादिति विशेषजिज्ञासायामाह कुतोऽर्थादिति। फलवच्छास्त्रोपकरणत्वेनेति। फलवच्छास्त्रप्रकरणत्वेनेत्यपि पाठः।

अयं ग्रन्थः प्रयोजनवान् प्रयोजनसाधनीभूतार्थप्रतिपत्तिजनकत्वात् इत्यनेनैव [illegible]धुना हेतुना सामञ्जस्ये आन्वीक्षिकीशास्त्रप्रतिपादितसमुदायैकदेशत्वविशेषणस्य वैयर्थ्यमित्यापत्त्या निराचिकीर्षति तत्रचेत्यादिना। तत्र च = स्वीयग्रन्थे चेत्यर्थः। [illegible]शेषकत्वं सप्तम्यर्थः। निःश्रेयससाधनत्वानुमितौ = निःश्रेयससाधनत्वप्रकारकानुमितौ। तथा च स्वीयग्रन्थविशेष्यकनिःश्रेयससाधन[illegible]

(दी०) जगत् = संसार्यात्मजातम् ।

मित्यवधेयम् । "प्रणिनाय" इत्यत्रैव वाक्यपरिसमाप्तेः तावन्मात्राच्च सप्रयोजनत्वानुमितावभिधेयसम्बन्धलाभो न सम्भवतीति । तत्र कथन्तानिवृत्तये 'विविच्यते इत्यन्तेन' इति ।

जगत्पदस्य वस्तुमात्रार्थकत्वे घटादीनामचेतनानां मोक्षरूपोद्धारस्य बाधेन तदीयत्वेनोद्धारेच्छा मुनेर्न सम्भवतीति व्याचष्टे *जगदिति*। परमेश्वरस्य मुक्तानां च जीवानां नोद्दिधीर्षाविषयत्वसम्भव इत्यतः संसारित्वं विशेषणम् । संसारश्च मिथ्याधीप्रभवा वासना । मत्वर्थीयार्थ उपलक्षणत्वव्यावृत्तं विशेषणत्वम् । अतस्तदुपलक्षितमुक्तजीवानां व्यावृत्तिः । नच मूलोपात्तदुःखपङ्कनिमग्नत्वविशेषणेनैव परमेश्वरादिव्यावृत्तिसम्भवात् संसारित्वविशेषणवैयर्थ्यमिति वाच्यम् ? एवं ह्यात्मपरजगत्पदस्यापि वैयर्थ्यापातात् आत्मभिन्नानां दुःखपङ्कनिमग्नत्वविशेषणेनैव वारणात् ।

(प्रभा) तस्य च व्याप्तिग्रहेऽन्वयः । यत् निःश्रेयससाधनीभूतार्थप्रतिपत्तिजनकं भवति तत् निःश्रेयससाधनं भवति यथा "दुःखजन्मप्रवृत्तीति" सूत्रम् इत्याकारकसहचारज्ञानाधीनव्याप्तिग्रहार्थमिति भावः । **कथन्तानिवृत्तय इति** । कथमभिधेयसम्बन्धलाभ इति जिज्ञासाप्रशान्तय इति भावः । सारांशस्तु—प्रमाणतत्त्वमत्र विविच्यत इत्यन्तानभिधाने अभिधेयविशेषस्य प्रमाणतत्त्वस्य ग्रन्थेन सह प्रतिपाद्यप्रतिपादकभावसम्बन्धालाभे हेतुज्ञानासम्भवेन सप्रयोजनत्वानुमितेरेव सिद्धिर्न स्यात् ।

उद्धारेच्छा = घटस्य उद्धारो भवतु इत्याकारकेच्छायाः मुनेः स्वीकारे तस्य भ्रान्तत्वं तदीयायास्तादृशेच्छायाश्च विसंवादित्वम् प्रसज्ज्येतेति भावः । **विशेषणत्वम्** । तत्कालावच्छिन्नतद्वत्त्वमित्यर्थः । **अतः** = उपलक्षणत्वव्यावृत्तविशेषणत्वस्य विद्यमानत्वे सति इतरव्यावर्त्तकत्वरूपस्य निवेशादेव । **व्यावृत्तिरिति** । मुक्तात्मनं वासनावत्त्वोपलक्षितत्वेऽपि वासनाविशिष्टत्वविरहेण वारणात् । **परमेश्वरादीति** । आदिपदेन मुक्तात्मपरिग्रहः । **व्यावृत्तिसम्भवात्** । तेषां दुःखपङ्कनिमग्नत्वाभावादिति स्पष्टम् । **संसारित्वविशेषणवैयर्थ्यमिति** । ननु दुःखपङ्कनिमग्नत्वपदेन दुःखवत्त्वस्यैव बोधात् तस्य विशेषणत्वे स्वर्गिणामुद्दिधीर्षाविषयत्वं न स्यात् दुःखाभावेनोद्देश्यतावच्छेदकानाक्रान्तत्वात्, उपलक्षणत्वे तु मुक्तात्मनामपि उद्दिधीर्षाविषयत्वापत्ति तेषामपि प्रतियोगिव्यधिकरणदुःखवत्त्वाभावाभाववत्त्वात् अतः संसारित्वविशेषणत्वमावश्यकम्, तथा सति च दुःखिद्धस्योपलक्षणतया स्वर्गिणामपि संग्रहसम्भवात् इति संसारित्वविशेषणवैयर्थ्यशङ्का गदाधरस्य असंगतेति चेन्न ? दुःखपङ्कनिमग्नत्वपदेन दुःखप्रागभाववत्त्वस्यैव विवक्षणात् । किञ्च दुःखवत्त्वस्यैवं तदर्थत्वेऽपि दुःखानि चैकविंशतिरिति न्यायसि

(गा०) दुःखपङ्कनिमग्नत्वस्योद्दिधीर्षाविषयत्वोद्देश्य जगत्पदार्थव्यावर्त्तक तया विवक्षितत्वे उद्देश्यतावच्छेदकीभूततद्वाचकपदस्य जगत्पदपूर्वमुपादानं क्रियेतेति 'यतो जगत् दुःखपङ्कनिमग्नमतस्तदुद्दिधीर्षुः' इत्यर्थस्यैव विवक्षणात् जगत्पदार्थतावच्छेदकमात्रस्यैव उद्दिधीर्षितत्वोद्देश्यतावच्छेदकतया तत्र संसारित्वान्तर्भावस्य आवश्यकत्वात्। आत्मपदं चावच्छेदकशरीरव्यावृत्तस्य समवायेन वासनाविशेषवत्त्वस्य लाभाय। लक्षणयापि समूहे एव प्रामाणिकानां जगत्पदस्य व्यवहारात् समूहार्थकं जगत्पदं नत्वशेषार्थकम् एवकारेणैव तल्लाभात्। अथवा जगत्पदमेवाशेषार्थकम् तत्परत्वग्राहक एवकारः नतु तदर्थकं यथा "सर्व एव शुभः कालः" इत्यादौ।

(प्रभा) इष्टापत्तौ बाधकमाह दुःखपङ्कनिमग्नत्वेति। अयम्भावः, दुःखपङ्कनिमग्नत्वं यद्युद्देश्यतावच्छेदकतया विवक्षितं स्यात्तदा 'यच्छब्दयोगः प्राथम्यं स्यादुद्देश्यस्य लक्षणम्, इति रीत्या उद्देश्यतावच्छेदकीभूततद्वाचकपदस्य जगत्पदात् पूर्वमुपादानं स्यात् नचैवमस्ति, तस्मात् न तथा, किन्तु यतः जगत् दुःखपङ्कनिमग्नमतस्तदुद्दिधीर्षु रिति उद्दिधीर्षाविषयत्वदुःखपङ्कनिमग्नत्वयोः प्रयोज्यप्रयोजकभाव एव विवक्षितः। संसारित्वान्तर्भावस्यावश्यकत्वादिति। तथा च दुःखपङ्कनिमग्नत्वस्यैव विधेयत्वे जगत्पदार्थतावच्छेदकावच्छेदेनान्वयस्यैव अगत्या विवक्षणीयतया मुक्तात्मनि दुःखपङ्कनिमग्नत्वरूपहेत्वसिद्धिपरीहाराय संसारित्वविशेषणस्य आवश्यकत्वादिति भावः। ननु तथाप्यात्मपदव्यर्थम् संसारविशिष्टस्यैव जगत्पदार्थत्वेऽदोषादित्यत आह आत्मपदं चेति। लाभायेति। अन्यथा अवच्छेदकतासम्बन्धेन मिथ्याज्ञानजन्यवासनात्मकसंसारविशिष्टस्य शरीरस्यापि उद्देश्यतावच्छेदकाक्रान्ततया तस्य चाचेतनतया तत्र मुक्तिरूपोद्धारबाधेन मुनेर्भ्रान्तत्वापत्तेस्तदिच्छायाश्च विसंवादित्वापत्तेः। आत्मपदोपादाने तु समवायेन वासनावत्त्वलाभे शरीरस्यातथात्वान्न तथात्वापत्तिरिति। यत्किञ्चिदेकात्मोद्धारेच्छया महत्तरशास्त्रप्रणयनं व्यर्थं स्यादित्यत आह लक्षणयापीति। अपिना शक्तिपरिग्रहः दृष्टान्तार्थः। अयमाशयः, यथा शक्त्या चेतनाचेतनसमूहस्य बोधकं जगत्पदं तथा लक्षणया तादृशात्मसमूहस्यापि बोधकम्।

नत्वशेषार्थकमिति—व्यवहारेण अशेषार्थकत्वानिर्णयात्। नन्वेवम् जगद्वृत्तिसमूहत्वमात्रेणोद्धारेच्छाविषयत्वे प्रत्येकमुद्धारानुपपत्तिरतः तत्तत्संसारावच्छिन्नयावल्लाभ आवश्यकः। अतएव विशेष्ये सकलजीवानामान्वीक्षिकीशास्त्राध्ययनद्वारोद्देश्यतानिर्वाहोऽभिधास्यते। तथा च अशेषरूपार्थलाभः कुत इत्यत आह एवकारेणैवेति। तल्लाभादिति। एवकारस्यात्र अन्ययोगव्यवच्छेदार्थकतया जगत्पदार्थभिन्ने उद्धारेच्छाशून्यत्व-

(दी०) नचानधिकारिणःशूद्रादीनध्यापयाम्बभूव प्रवरो मुनीनां येनाशङ्क्येतापि प्रत्यवायस्तस्य ।

नचानधिकारिणां शास्त्रावलोकनेन अर्थावगमे प्रत्यवयन्ति प्रणेतारः शास्त्राणाम् ।

(गा०) ननु शूद्रादीनामपि जगदन्तर्गततया विद्यानधिकारिणां तेषामर्थज्ञानेच्छया शास्त्रप्रणयने महर्षिः प्रत्यवेयात् , अनधिकारिणामर्थज्ञानेच्छया शब्दप्रयोगरूपतदध्यापनस्य प्रत्यवायहेतुत्वात् इति अधिकारित्वमपि विशेषणमस्तु इत्याशङ्काम् परिहरति *नचेति* ।

शूद्रादीन् = शूद्रत्वादिजात्याक्रान्तशरीरविशेषविशिष्टात्मनः । *अध्यापयाम्बभूव* = उद्दिश्य शास्त्रम् प्रणिनाय । तादृशशरीरोपलक्षितात्मनां शास्त्रार्थज्ञानभागितया तदुद्देश्यत्वादिति भावः ।

अनधिकारिताप्रयोजकशरीरावच्छिन्नज्ञानेच्छया शब्दप्रयोगस्यैव प्रत्यवायहेतुत्वमित्याशयेनाह *येनेति* । स्वप्रयुक्तशब्दाद् दैववशेनानधिकारिणामर्थज्ञानं न प्रत्यवायहेतुरित्याह *नचेति* । तथा सति ब्राह्मणादिमात्रोद्दिधीर्षया शास्त्रप्रणयनादपि प्रत्यवेयादिति भावः ।

(प्रभा) ननु व्यासज्यवृत्तिजगत्पदार्थघटकसमूहत्वावच्छिन्नभेदः प्रत्येकं जगत्यपि वर्त्तते समुदायभेदस्यैकदेशेऽङ्गीकरात् , तथा च जगत्पदार्थभिन्ने प्रत्येकमुद्धारेच्छाशून्यत्वम् नास्ति इत्यत आह **अथवेति** । वस्तुतः एवपदसमभिव्याहारेण जगत्पदार्थसंसार्य्यात्मत्वसमनाधिकरणसकलतत्संसारवत्त्वलाभेनैवोपपत्तौ समूहनिवेशनमनुचितमेवेत्यत आह **अथवेति** ।

ननु पूर्वोक्तदिशा संसार्य्यात्मत्वस्योद्देश्यतावच्छेदकत्वे असति बाधके उद्देश्यतावच्छेदव्यापकत्वं विधेये विधेयसंसर्गे वा भासत इति नियमेन उद्दिधीर्षाविषयत्वे संसार्य्यात्मत्वव्यापकत्वस्यापि लाभात् शूद्रादिशरीरावच्छिन्नात्मनामपि तादृशोद्देश्यतावच्छेदकाक्रान्ततया तत्रापि उद्दिधीर्षाविषयत्वसम्पत्त्यर्थम् तानध्यापिपयिषुर्मुनिः प्रत्यवेयात् अतः अधिकारित्वविशेषणमपि उद्देश्यकोटावपेक्षितमित्याशङ्कते **ननु शूद्रादीनिति** । तथा च तत एवाचेतनानाम् मुक्तात्माद्यनधिकारिणां च समेषां वारणसम्भवे पूर्वोक्तं जगत्पदेन संसार्यात्मजातत्वविशेषणमसङ्गतमितिहृदयं गदाधरस्य नन्वित्यादिशङ्कने ।

उद्दिश्य शास्त्रम् प्रणिनायेति । तथा च यदि शूद्रत्वजात्यवच्छिन्नशरीरविशेषविशिष्टात्मानमुद्दिश्य मुनिः शास्त्रप्रणयनमकरिष्यत् तदा प्रत्यवैष्यत् प्रकृते तु न तथा । फलपातनेच्छया इषुप्रयोगे विप्रादिमरणे वाचनिकप्रायश्चित्तविध्यन्यथानुपपत्त्या प्रत्यवायान्तरकल्पनेऽपि इह [illegible]

(दी०) उद्देश्यता तु कीटपतङ्गादीनामपि विशिष्टशरीरपरिग्रहादर्थावगमेन सम्भवन्ती न कामपि क्षतिमावहतीति सर्वं चतुरस्रम् । टीकाकृतस्तु समाधिसौकर्यादभ्युपेत्य प्रत्यवायं मुनेरन्यथैव समादधिरे ।

(गा०) ननु जन्यज्ञानस्य शरीरावच्छिन्नत्वनियमात् शूद्राद्यात्मनामुद्धारेच्छया शास्त्रप्रणयने शूद्राद्यात्मनां ज्ञानभागितया उद्देश्यत्वे शूद्रादिशरीरावच्छिन्नज्ञानेच्छा मुनेरावश्यकीत्याशङ्काम् परिहरति *उद्देश्यतेति* । अर्थज्ञानवत्त्वेनेच्छाविषयता त्वित्यर्थः । *विशिष्टशरीरेति* । ब्राह्मणत्वादिविशिष्टशरीरं परिगृह्य एतच्छास्त्रार्थमवगच्छेत् इत्यभिसन्धानेन अनधिकारिशरीरावच्छिन्नतया ज्ञानस्य इच्छयानवगाहनेऽपि उपपद्यमानेत्यर्थः । अन्यथा कीटादिशरीरस्य शास्त्राधीनज्ञानानवच्छेदकत्वनिश्चयात् तदात्मनामुद्देश्यतैव न निर्वहेदिति भावः । *क्षतिम्* = प्रत्यवायम् ।

ननु एवम् मुनेरुत्पन्नोऽपि प्रत्यवायःतपःप्रभावात् नश्यतीति टीकाकारसमाधानविरोध इत्यत आह *टीकाकृतस्त्विति* ।

ननु प्रमाकरणत्वरूपप्रमाणतत्त्वावधारणे तद्घटकप्रमातत्त्वावधारणस्यापि अपेक्षिततया तस्य स्वतः परतश्चासम्भवेन प्रमाणतत्त्वस्य दुरवधारणतया तदवधारणसम्पादनेन शास्त्रस्य निश्श्रेयसोपयोगित्वं यत् सूत्रकृतोक्तं तन्न युज्यते इत्याक्षेपे प्रामाण्यावधारणस्य व्यभिचारान्यथासिद्धिभ्यां प्रवृत्त्यहेतुतया तदसम्भवेऽपि न क्षतिरित्याशङ्कनम् अथ किमित्यादिना मूलकृतोऽसङ्गतम् ,

---

(प्रभा) न शूद्राय मतिंदद्यात्, स्त्रीशूद्रौ नाधीयाताम् इत्याद्यनुशासनात् । प्रत्यवेयादिति । तथाचोक्तरीत्यैव सामञ्जस्येऽधिकारित्वविशेषणस्यानावश्यकतया तद्ग्रन्थसङ्गतेरिति भावः । जन्यज्ञानस्येति । अवच्छेदकतासम्बन्धेन जन्यज्ञानम् प्रति तादात्म्येन शरीरं कारणमिति कार्यकारणभावमूलकः शङ्काग्रन्थ एषः । "यानि चास्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि" इत्युपक्रम्य 'तेषां तेजोविशेषेण प्रत्यवायो न विद्यते । तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरको जनः" इत्याद्यौपनिषदसिद्धान्तम् मनसि कृत्योक्तं तपःप्रभावादिति । टीकाकृतः = वाचस्पतिमिश्राः ।

तद्घटकेति । विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणतया प्रमाणतत्त्वनिश्चयम् प्रति प्रमात्वप्रकारकनिश्चयस्यापि हेतुत्वादिति

[illegible]

(चि० म०) ननु प्रमाणादीनां तत्त्वं प्रतिपादयच्छास्त्रं परम्परया निश्श्रेयसेन सम्बध्यत इति न युक्तम् , प्रमाणतत्त्वावधारणस्याशक्यत्वात्, तद्धि प्रमातत्त्वावधारणाधीनम् , तच्च स्वतः परतो वा न सम्भवति , वक्ष्यमाणदूषणगणग्रासात् ।

(दी०) प्रामाण्यनिश्चायनेन निश्श्रेयसार्थिनम् प्रवर्त्तयच्छास्त्रं निःश्रेयसेन सम्बध्यतइति (आशयं)

(गा०) प्रवर्त्तकतया प्रामाण्यनिश्चयापेक्षाया आक्षेपेऽनुक्तत्वात् अतः-प्रवर्त्तकतया प्रामाण्यनिश्चयापेक्षैव आक्षेपकस्य अभिप्रेतेत्यभिमानमूलकतया शङ्कां सङ्गमयति *प्रामाण्येति* । *प्रामाण्यनिश्चायनेन* = निःश्रेयसार्थिप्रवृत्तिजनक-ज्ञाने प्रामाण्यनिश्चयसम्पादनेन, निश्चीयमानप्रामाण्यकस्य स्वप्रतिपाद्यप्रथम-सूत्रार्थज्ञानस्य सम्पादनेनेति यावत् । *निःश्रेयसेन सम्बध्यत इति* = निःश्रेयसो-पयोगि भवितुमर्हतीत्यर्थः । प्रमात्वस्य दुरवधारणतया च सूत्राधीनप्रयोजन-वत्ताज्ञाने निश्चीयमानप्रामाण्यकत्वं न सम्भवतीति शेषः ।

(प्रभा) ननु प्रमाणादीनामिति चिन्तामणेरभिप्रायः । माध्यमिकशङ्का । स्वजनक-ज्ञानजनकत्वरूपपरम्परया प्रयोजनवत्त्वम् भवितुमर्हति, किन्तु स्वजनकज्ञानजनकत्वमेवात्रा-सम्भवि तस्य ग्रन्थाध्ययनधर्मिकप्रवृत्त्यधीनत्वात् तादृशप्रवृत्तेश्च ग्रन्थाध्ययनधर्मिकप्रयोजन-वत्त्वज्ञानधर्मिकप्रमात्वनिश्चयाधीनत्वात् अप्रमात्मकप्रयोजनवत्त्वज्ञानात् प्रवृत्त्यापत्तिवारणाय तद्धर्मिकप्रवृत्तिम् प्रति तद्धर्मिकप्रयोजनवत्त्वज्ञानधर्मिकप्रमात्वनिश्चयस्य हेतुत्वात् प्रमात्वनिश्चयस्य तु वक्ष्यमाणदूषणगणग्रासेनासम्भवात् तथाच तादृशप्रमात्वनिश्चयाभावेन कस्यचिदपि शास्त्राध्ययनेऽप्रवृत्त्या न ततो मुक्तिसाधनीभूतप्रमाणतत्त्वज्ञानजनकतया प्रयोजनवत्त्वसिद्धिरित्याशयं मन्वानो माध्यमिकः प्रत्यवतिष्ठते नन्वित्यादिना । वक्ष्यमाण-दूषणगणग्रासादिति चिन्तामणिः । वाक्ष्यमाणं च दूषणं प्रमात्वस्य स्वतस्त्वे अनभ्यास-दशोत्पन्नज्ञाने संशयानुपपत्तिरूपम् , परतस्त्वे तु यद्यपि अनभ्यासदशोत्पन्नज्ञाने निरुक्त-दूषणं न सम्भवति इदं ज्ञानम् प्रमा सम्वादिप्रवृत्तिजनकत्वात् इत्यनुमितेः प्राक् संशय-सामग्रीसत्त्वे संशयसम्भवात् तथापि फलमुखी कारणमुखी चानवस्था स्यात् । तथाहि अप्रमात्मकतादृशानुमितेः वस्तुतत्त्वाव्यवस्थापकतया तादृशप्रमात्वानुमितेरेव वस्तुनिश्चायकत्वं वक्तव्यम् । एवंच तादृशानुमितौ प्रामाण्यनिश्चायनाय अनुमित्यन्तरापेक्षणस्यावश्यकता, एवम् पुनस्तत्रापि प्रमात्वनिश्चयायानुमित्यन्तरापेक्षेत्यनवस्थापथः स्फुटति । नच संवादि-प्रवृत्तिजनकत्वलिङ्गकप्रथमानुमितौ प्रमात्वनिश्चयाभावेऽपि तयानुमित्या प्रथमज्ञाने

(चि० म०) अथ किम् प्रामाण्यज्ञानेन प्रवृत्तिमात्रे तस्य व्यभि
चारात् । बहुवित्तव्ययायाससाध्ये प्रवृत्तिश्चावश्यकार्थनिश्चयादेव ।

(दी०) मन्वान आदेशयति अथेति । प्रामाण्यज्ञानेन = प्रामाण्यनिश्चयेन

(गा०) प्रामाण्यनिश्चायनेन इत्यस्य यथाश्रुतार्थपरता तु न सङ्गच्छते, एतच्छ
ास्य मोक्षसाधनताज्ञाने प्रामाण्याबोधकत्वात्, शास्त्राधीनप्रमात्वग्रहे स्वतस्त्व
प्रसक्त्या स्वतःपरतोवेत्यादिना स्वतस्त्वनिराकरणासङ्गतेश्च । इति मन्वानः
ननु इत्याक्षेपकर्त्तु रित्याशयं मन्वानः । अभिमानश्चायं न दुर्घटः तथाहि-परम्प
येत्यस्य प्रवर्त्तकज्ञाने प्रामाण्यनिश्चायनेनेत्यर्थकतायाः सम्भवात्, प्रमाणतत्त्व
वधारणस्येत्यादेश्च शास्त्रश्रवणप्रवृत्तिनिर्वाह्यशास्त्राधीनप्रमाणतत्त्वावधारणस्य
शक्यत्वात्, यतस्तत्र परम्परया प्रवर्त्तकज्ञाने प्रमातत्त्वावधारणमपेक्षितम्, त
स्वतः परतश्च न सम्भवति इत्यर्थकताया अपि सम्भवात् । नचैवमेतदर्थ
ताभिप्रायस्सम्भवदुक्तिक एव मूलकृत इति कथं तदभिमान इति वाच्यम्
सम्मुखत एवाक्षेपसङ्गतेस्तथाभिप्रायस्यानौचित्यात् । प्रामाण्यावधारणात्मव
स्यैव प्राग्दुर्घटत्वोक्तेः अथेत्यादिना तस्यैवानुपयोगित्वं शङ्कितुमुचितम् । ननु तच
ज्ञानसामान्यस्य, तथा सति उत्तरकालं निश्चयमात्रस्यैव उपयोगिताव्यवस्थ
पनमपि असंगतं स्यादतो ज्ञानपदं निश्चयपरतया व्याचष्टे *प्रामाण्यज्ञानेनेति*

(प्रभा). अर्थनिश्चयोत्तरार्थसंशयम्प्रति अर्थनिश्चयधर्मिकप्रमात्वसंशयहेतुत्वावधा
रणात् । कारणमुखी चानवस्था संवादिप्रवृत्तिजनकत्वलिङ्गकानुमितिजनको यःप्रमात्वव्याप
संवादिप्रवृत्तिजनकत्ववदिदं ज्ञानम् इत्याकारकः परामर्शस्तत्रापि पूर्वोक्तदिशा प्रमात
निश्चयस्यावश्यकतया पुनस्तज्जनकज्ञाने परम्परायामपि प्रमात्वनिश्चयस्यापेक्षणीयतः
स्फुटतितमाम् । गादाधर्याम्—स्वप्रतिपाद्येति । सर्वनाम्नामुत्सर्गतःप्रधानपरामर्शितः
स्वमत्र आन्वीक्षिकीशास्त्रम्, तेन प्रतिपाद्याःविषया एव प्रथमसूत्रेण = प्रमाणप्रमे
त्यादिनाऽभिधीयन्ते तेषां ज्ञानस्य सम्पादनेनेति यावत् ।

ननु प्रामाण्यनिश्चायनेनेत्यस्य प्रमाणनिश्चयजनकत्वरूपयथाश्रुतार्थम् परित्यज
निश्चीयमानप्रामाण्यकस्येत्याद्यर्थान्तरानुधावनं किमर्थमित्यत आह यथाश्रुतार्थपर
त्विति । तत्र हेतुमाह एतच्छास्त्रस्येति । आन्वीक्षिकीशास्त्रस्येत्यर्थः । प्रामाण्याबो
कत्वादिति । शास्त्रे तद्बोधकपदाभावादिति शेषः । प्रमात्वप्रकारकबोधजनकत्वादित्यर्थः
एतच्छास्त्रस्य प्रमाणादितत्त्वज्ञानधर्मिकनिःश्रेयससाधनत्वप्रकारकज्ञानस्यैव जनकत्वे
प्रमाणादितत्त्वज्ञानम् मोक्षसाधनम् इति ज्ञानम्प्रमा इत्याकारकनिश्चयाजनकत्वादि
यावत् । तथाच यथाश्रुतार्थपरित्यागो युक्त एव । निश्चीयमानप्रामाण्यकत्वोक्तौ प्रमात
निश्चयस्य अन्यतोलाभसम्भवात् । शास्त्रस्य प्रामाण्यबोधकत्वे त्वाह शास्त्राधीन

(चि० म०) नच यस्य संशयव्यतिरेकनिश्चयौ प्रवृत्तिप्रतिबन्धकौ तन्निश्चयस्तद्धेतुः अनुमितौ व्याप्तेरिव इति वाच्यम्,

---

(दी०) यस्य संशयव्यतिरेकनिश्चयौ = यद्व्यतिरेकसंशयनिश्चयौ ।

(गा०) 'यस्य संशयव्यतिरेकनिश्चयौ, इति मूलं व्यतिरेकज्ञानसामान्यपरतया अनुपदं वर्णनीयम्, सामान्यलाभश्च यावद्विशेषोपादानादेव, तच्च यथाश्रुते नोपपद्यते, यत्संशयानात्मकयद्व्यतिरेकसंशयानुपादानात्, तदभाववद्भेदकोटिकतदभावसंशयस्य तत्संशयानात्मकत्वात् एवं यत्संशयादिपदं यद्रूपावच्छिन्नविषयकसंशयादिपरमवश्यं वाच्यम्, व्याप्तिसंशयसामान्यान्तर्गतानाम् किञ्चिद्रूपेण व्याप्तिप्रकारकनानासंशयानामनुमित्युत्पत्तावप्रतिबन्धकत्वात् । तथा च व्याप्तित्वावच्छिन्नसंशयानात्मकोऽपि व्याप्त्यभावाभावत्वादिना व्याप्तिविषयकव्याप्त्यभावादिसंशयस्सम्भवतीति व्याप्तित्वाद्यवच्छिन्नसंशयत्वेन तदुपादानासम्भवादसङ्गतिः, अतो व्यतिरेकपदव्यत्यासेन व्यतिरेकविषयकसंशयनिश्चयपरतया व्याचष्टे यस्येति ।

(प्रभा) चिन्तामणिः । अत्र तटस्थः शङ्कते अथेत्यादिना । तस्य चायमाशयः, प्रवृत्तिम् प्रति प्रयोजनवत्त्वज्ञानधर्मिकप्रमात्वनिश्चयस्य हेतुत्वं न सम्भवति तादृशप्रमात्वनिश्चयाभावेऽपि केवलप्रयोजनवत्त्वज्ञानेनापि प्रवृत्तेर्दृष्टचरत्वात् । तथा च प्रयोजनवत्त्वज्ञानमादाय ग्रन्थाध्ययने प्रवृत्तिसम्भवेन प्रमाणतत्त्वज्ञानजनकतया शास्त्रस्य प्रयोजनवत्त्वसिद्धिरिति । उत्तरकालमिति । तन्निश्चयस्तद्धेतुरिति ग्रन्थेन । अतः = प्रामाण्यनिश्चयमात्रस्यैवोपयोगित्वव्यवस्थापनतः । ज्ञानपदमिति । प्रमाण्यज्ञानेनेत्यत्र ज्ञानपदमित्यर्थः । व्यभिचारादिति चिन्तामणिः । विसंवादिप्रवृत्तेस्तेन विनापि जननादित्यर्थः तथा च प्रवृत्तिम् प्रति प्रयोजनवत्त्वज्ञानमेव कारणमिति हृदयम् । ननु विसंवादिप्रवृत्तौ प्रामाण्यनिश्चयस्याहेतुत्वेन व्यभिचारसम्भवेऽपि संवादिप्रवृत्तौ व्यभिचाराभावात् हेतुत्वमस्तु इत्याशङ्क्यान्यथासिद्धत्वेन तस्य हेतुत्वं निराकरोति बहुवित्तेति । अर्थनिश्चयादिति । अर्थः प्रयोजनम् तद्वत्तानिश्चयादित्यर्थः । एवकारेण प्रमाण्यनिश्चयो व्यवच्छिद्यते । तथा च संवादिप्रवृत्तेरपि प्रयोजनवत्त्वनिश्चयादेवोपपत्तौ प्रामाण्यनिश्चयस्यान्यथासिद्धत्वमेवेति चिन्तामणेरभिप्रायः । न च विनिगमनाविरहात प्रयोजन-

(प्रभा) तटस्थशंकां निराकर्त्तुं प्रवृत्तौ प्रमाण्यनिश्चयस्य जनकतां स्थ पुनर्माध्यमिकस्सामान्यव्याप्तिमादाय शंकते नन्वेति। प्रवृत्तिप्रतिबन्धकाविति। प्रवृत्ति इति सम्पातायातम् प्रवृत्तेरेवात्र प्रधानतया तदुपादानात्। व्याप्तेः प्रवृत्तिघ अनुमितौ व्याप्तेरिवेति दृष्टान्तासङ्गत्यापत्तेः। अत एवाग्रे वक्ष्यति प्रवृत्तिरि प्रकृताभिप्रायम्। तथाच यस्य संशयः यस्य व्यतिरेकनिश्चयश्च यत्र प्रति तन्निश्चयस्तद्धेतुरिति यथाश्रुतोऽर्थः। अत्रेदमनुसन्धेयम्, हेतुसाध्ययोः सामानाधि सम्पादनाय यत्संशयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वे सति यद्व्यतिरेकनि निष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतावान् यो भवति स तन्निश्चयनिष्ठजनकतानिरूपि तावान् भवति इति सामान्यव्याप्तिरादर्त्तव्या। तथाच ग्रन्थाध्ययनधर्मिक ग्रन्थाध्ययनधर्मिकप्रयोजनवत्त्वज्ञानधर्मिकप्रमात्वनिश्चयजन्या तादृशप्रमात्वसंश प्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वे सति तादृशप्रयोजनवत्त्वज्ञानधर्मिकप्रमात्वव्य निश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वात् इत्यनुमानम् फलति। तत्र दृष्टा अनुमितौ व्याप्तेरिवेति। तथाच यथा धूमधर्मिकव्याप्तिसंशयनिष्ठप्रतिबन्धकतानि प्रतिबध्यतावत्त्वे सति धूमधर्मिकव्याप्तिव्यतिरेकनिश्चयनिष्ठप्रतिबन्धकतानि प्रतिबध्यतावत्त्व धूमलिंगकानुमितौ वर्त्तते तत्र च धूमधर्मिकव्याप्तिनिश्चयजन्यत्व एवम् प्रकृतेऽपि तथा हेतुसद्भावेन साध्यसत्त्वमावश्यकम्। अत्र यस्य संशयो प्रतिबन्धकः एतावन्मात्रोक्तौ व्याप्तिज्ञाने व्यभिचारसंशयनिरूपितप्रतिबध्यत्वस अथच तत्र व्यभिचारनिश्चयजन्यत्वविरहात् व्यभिचारस्स्यादतो व्यतिरेकनिश्चय व्याप्तिशरीर उपादानम्। तथा च व्यभिचारव्यतिरेकनिश्चयस्य व्याप्तिज्ञानेऽप्रति कत्वात् न व्यभिचारसंशयोऽपि। यस्य व्यतिरेकनिश्चय इत्येतावन्मात्रोक्तौ योग्यता रेकनिश्चयस्य शाब्दबोधे प्रतिबन्धकत्वात् अथच योग्यतानिश्चयजन्यत्वस्य शा विरहात् व्यभिचारस्स्यात् अतो व्याप्तिघटकतया यस्य संशयेत्युक्तम्। त योग्यतासंशयस्य शाब्दबोधेऽप्रतिबन्धकतया न व्यभिचारः। नच कदाचित् यो निश्चयोऽपि शाब्दबोधहेतुर्भवत्येवेति कथमुक्त संगच्छत इति वाच्यम्, तन्निश्चय हेतुत्वात् अन्यथा दैवात् प्रामाण्यविषयककृतिसाध्यतानिश्चयजन्यत्वात् प्रवृत्तेः सि धनापत्तेरिति केचित्।

वस्तुतस्तु संशयानुपादाने घटव्यतिरेकनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्य त्वस्य घटवत्ताबुद्धौ सत्त्वेन तत्र च घटवत्त्वनिश्चयजन्यत्वविरहात् व्यभिचारापत्तिर दुपादानम्। तथा च घटसंशयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वस्य घटवत्त्वबु सत्त्वेन न व्यभिचारावसरः, ग्राह्यबुद्धौ ग्राह्यसंशयस्याप्रतिबन्धकत्वात्। ग्राह्यसंशयस्य प्रतिबन्धकतेति दीधितिकृता स्वयमेव स्फुटीकरिष्यमाणत्वात्।

अनुपदमितिगादाधरी। 'तेन व्यतिरेकज्ञानत्वेन प्रतिबन्धकता लभ्यते, अन्येन इति शेषः। **सामान्यलाभश्च यावदिति**। अयमाशयः, यद्व्यतिरेकज्ञा

(प्रभा) लाभमन्तरेण न सम्भवति, स च व्यतिरेकपदव्यत्यासं विना न सम्भवति धूमो व्याप्त्यभाववान् न वा धूमो व्याप्तिमद्भिन्नो न वा, इत्याकारकव्याप्ति-व्यतिरेकज्ञानस्य यत्संशयपदेनासङ्ग्रहात्। अतो व्यतिरेकपदस्य व्यत्यास आवश्यक इति इममेवार्थं स्फुटयति **यत्संशयानात्मकेति**। व्याप्तिसंशयानात्मकेत्यर्थः। **यद्व्यतिरेकसंशयानुपादानादिति**। व्याप्त्यभाववान्नवेति संशयानुपादानादित्यर्थः। **तदभाववद्भेदकोटिकेति**। धूमो वह्निव्याप्त्यभाववद्भिन्नो न वेत्याकारकव्याप्त्यभाव-वद्भेदकोटिकसंशये इत्यर्थः। **तत्संशयानात्मकत्वात्**। व्याप्तिसंशयानात्मकत्वात्। तथाच यत्संशययद्व्यतिरेकनिश्चयान्यतरत्वं यदि यद्व्यतिरेकज्ञानत्वसमनियतं स्यात् तदा लाघवात् यद्व्यतिरेकज्ञानत्वं प्रतिबन्धकतावच्छेदकं स्यात् तदेव तु न सम्भवति, व्याप्त्य-भाववान्नवा व्याप्त्यभाववद्भिन्नो नवेति संशययोर्व्यतिरेकज्ञानत्वसत्त्वेऽपि तादृशान्यतरत्व-विरहादिति भावः। ननु अभावाभावस्य प्रतियोगिरूपतया व्याप्त्यभाववान्नवेति संशयस्यापि व्याप्तिविषयकसंशयरूपत्वेन संग्रहः सम्भवति, एवं व्याप्त्यभाववद्भेदस्यापि व्याप्तिसम-नियततया व्याप्तिरूपत्वसम्भवेन व्याप्त्यभाववद्भिन्नो नवेत्याकारकभेदकोटिकसंशयस्यापि व्याप्तिविषयकसंशयरूपत्वेन संग्रहस्स्यात्तथाच यावद्रूपोपादानत्लाभेन व्यतिरेकपदव्यत्यासो दीधितिकृतः पुनर्व्यर्थ इत्यरुचेराह **एवमिति**[1]। तथाच अयमाशयः, यत्संशयपदेन यन्निष्ठप्रकारताकसंशयविवक्षणे व्याप्त्यभावाभावरूपव्याप्तिनिष्ठप्रकारताकत्वेन व्याप्त्यभाव-वद्भेदरूपव्याप्तिनिष्ठप्रकारताकत्वेन च निरुक्तसंशययोः संग्रहसम्भवेऽपि धूमो वह्निव्याप्त्य-भाववान्नवा घटाभाववच्च भूतलम् इतिसमूहालम्बनसंशयनिष्ठघटाभाववद्भूतलविषय-कत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वस्य घटवद्भूतलमिति ज्ञाने सत्त्वेन तत्र च तन्निश्चयजन्यत्वविरहात् व्यभिचारापत्तिस्स्यादतस्तद्वारणाय यन्निष्ठप्रकारताकसंशयत्व-व्यापकत्वप्रतिबन्धकतेत्यादिरीत्या व्यापकत्वनिवेश आवश्यकः। एवं च प्रमेयत्वेन व्याप्त्यवगाही प्रमेयवान् नवा इत्याकारकसंशयेऽपि व्याप्तिनिष्ठप्रकारताकसंशयत्वस्य सत्त्वात् तत्र च धूमलिङ्गकानुमितिनिरूपतिप्रतिबन्धकत्वस्य विरहेण व्यापकत्वासम्भवाद् दृष्टान्तासिद्धिः स्यात् अतः यद्रूपावच्छिन्नप्रकारताकसंशयत्वव्यापकप्रतिबन्धकतानिरू-पितप्रतिबध्यतावत्त्वे सति यद्रूपावच्छिन्नप्रतियोगिताकाभावप्रकारताकनिश्चयनिष्ठप्रतिबन्ध-कतानिरूपितप्रतिबध्यतावत्त्वस्य हेतुत्वं विवक्षणीयम्। तथा च धूमो व्याप्त्यभाववान्नवा[2]

---

[1]भेदकोटिकसंशयासंग्रहमुक्त्वा अत्यन्ताभावकोटिकसंशयासंग्रहमाह एवमित्यपि केचित्।

[2]नच व्याप्त्यभाववान्नवेत्यादिसंशयादावपि व्याप्तित्वावच्छिन्नविषयताकत्वमस्त्ये-वेति व्याप्तित्वावच्छिन्नविषयताकसंशयपदेनापि तत्संग्रहस्स्यादिति वाच्यम्? निरुक्तव्याप्तिशरीरे सम्बन्धानिवेशे सामान्यतो व्याप्तित्वावच्छिन्नविषयताकसं-

(प्रभा) व्याप्त्यभाववद्भिन्नो नवा इत्याकारकसंशययोः व्याप्तिनिष्ठप्रकारताकत्वसत्त्वेऽ व्याप्तित्वावच्छिन्नप्रकारताकत्वविरहेण यद्रूपावच्छिन्नसंशयपदेन धत्तुमशक्यतया यावद् यद्व्यतिरेकज्ञानलाभासम्भवात् तल्लाभार्थं व्यतिरेकपदव्यत्यासो [१] युक्त एवेति । अधिः क्रोडपत्रे द्रष्टव्यम् । **व्याप्तिसंशयसामान्येति** । व्याप्तिसंशयात्मकघटव्यतिरेकनिश्चय प्रतिबध्यस्य घटविशिष्टज्ञानस्य व्याप्तिनिश्चयाधीनत्वात् व्यभिचारवारणाय **सामान्य** पदम् । अत एव यद्रूपावच्छिन्नविषयकसंशयत्वव्यापकत्वं[२] प्रतिबन्धकतायामग्रे विवक्षणीय मिति भावः । यद्रूपावच्छिन्नेत्यस्य फलमाह **किञ्चिद्रूपेणेत्यादि** । मेयत्वादिनेत्यर्थः प्रमेयत्वेन व्याप्त्यवगाही धूमः प्रमेयवान्नवेत्यादिसंशय इति यावत् । तथा च यत्संशय सामान्यान्तर्गतधूमः प्रमेयवान्नवेतिसंशयप्रतिबन्धकताकत्वस्यानुमितौ विरहाद् दृष्टान्ता सिद्धिरतो यत्संशयपदस्य यद्रूपावच्छिन्नप्रकारताकसंशयपरत्वमवश्यं वाच्यमिति तात्पर्यम् **इदमुपलक्षणम्**, प्रमात्वसंशयसामान्यान्तर्गतानाम् किञ्चिद्रूपेण प्रमात्वप्रकारकसंशयानाम प्रवृत्तावप्रतिबन्धकत्वात् स्वरूपासिद्धिरपि बोध्या ।

व्याप्त्यभाववान्धूम इति व्यतिरेकनिश्चयेऽपि व्याप्तित्वावच्छिन्नप्रतियोगिताकाभाव-निश्चयत्वस्य सत्त्वेन तत्र चानुमितिनिरूपितप्रतिबन्धकत्वविरहेण सएव दोषः स्यात्, अतो यत्सम्बन्धावच्छिन्नयद्रूपावच्छिन्नप्रकारतानिरूपितयद्धर्मावच्छिन्नविशेष्यता-शालिसंशयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वे सति यत्सम्बन्धावच्छिन्न-यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारतानिरूपितयद्धर्मावच्छिन्नविशेष्य-ताशालिनिश्चयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावान् यः स तत्सम्बन्धाव-च्छिन्नतद्रूपावच्छिन्नप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छि-न्नजनकतानिरूपितजन्यतावान् भवतीत्येवं व्याप्तिस्वरूपमादरणीयम् । तथा च व्याप्त्यभावकोटिकव्याप्त्यभाववद्भेदकोटिकसंशयीयव्याप्तित्वावच्छिन्नविषयतायां स्वरूपसम्बन्धावच्छिन्नत्वविरहात् तत्संग्रहानुपपत्तेस्तादवस्थ्यात् । नचोक्तसंशयीय-व्याप्तित्वावच्छिन्नविषयतायाः स्वरूपसम्बन्धावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्न-त्वेन स्वरूपसम्बन्धावच्छिन्नत्वमपि अस्त्येव, तथाहि स्वरूपसम्बन्धावच्छिन्नत्वं नाम स्वरूपावच्छिन्नसंसर्गतानिरूपितत्वम्, परम्परया तादृशनिरूपितत्वस्य व्याप्तित्वा-वच्छिन्नविषयतायां सत्त्वादिति वाच्यम् ? परम्परया तादृशनिरूपितत्वमादाय पुन-र्दृष्टान्तासिद्धिवारणाय साक्षान्निरूपितत्वनिवेशस्यावश्यकत्वात् ।

[१]यत्तु धूमपक्षकस्थलानुरोधेन प्रतिबध्यसमानधर्मितावच्छेदकत्वकथनं तन्न समीचीनम् ? दृष्टान्तासिद्धेर्वारणेऽपि प्रवृत्तौ स्वरूपासिद्धेर्दुर्वारत्वाद् ग्रन्थकारीय-रीतिविरुद्धत्वाच्च ।

[२]संशयत्वनिश्चयत्वे अव्याप्यवृत्तिजातिविशेषौ । [illegible]

(गा०) परेतु यथाश्रुते यस्येति षष्ठ्याः प्रतियोगित्वरूपार्थो व्यतिरेकान्वयी, अन्यश्च विषयितारूपः संशयान्वयी, अतस्तस्या एकार्थपरत्वनिर्वाहाय व्यतिरेकपदं व्यत्यस्यति *यस्येति*। नच घटस्य संशय इत्यादौ एकधर्मिक-घटतदभावावगाहिज्ञानलाभाय संशयपदं व्यतिरेकावगाहिसमानधर्मिक-ज्ञानपरम्, प्रतियोगित्वं विषयत्वं च षष्ठ्या अर्थः, संशयपदार्थैकदेशे व्यतिरेके प्रतियोगित्वस्य, ज्ञाने च विषयत्वस्य अन्वय इति व्युत्पत्तिराव-श्यकीति षष्ठ्या अर्थद्वयपरत्वमावश्यकमेवेति कथमेतदिति वाच्यम्? यतः. स्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवन्धकतावच्छेदकत्व-स्वसामानाधिकरण्यो-भयसम्बन्धेन विषयताविशिष्टविषयताशालिज्ञानं संशयपदार्थः। चरमविष-यितायामेव षष्ठ्यर्थस्य निरूपकत्वस्य निरूप्यत्वस्य वान्वयः,

---

(प्रभा) यस्य संशयव्यतिरेकनिश्चयावित्यादियथाश्रुतमूले यत्पदोत्तरषष्ठ्याः द्विविधोऽर्थः कर्त्तव्यः, एकश्च संशयान्वयी विषयतारूपः, अपरश्च व्यतिरेकान्वयी प्रतियोगितारूप इत्येवमर्थद्वयकल्पनरूपगौरवमेव व्यतिरेकपदव्यत्यासे वीजान्तरम्प्रदर्शयताम् मतमाह **परेत्विति**। **यथाश्रुत** इति। यथाश्रुतत्वं च निरूढलक्षणेतरलक्षणाग्रहाजन्यशक्तिभ्र-माजन्यशाब्दवोधेच्छयोच्चरितत्वम्। **एकार्थपरत्वनिर्वाहायेति**। अर्थद्वयपरत्वे सकृदुच्चरि-तस्सकृदर्थं गमयति इति व्युत्पत्तिविरोधस्स्यात्। घटस्य संशय इत्यादौ संशयसमभिव्याहृत-षष्ठ्याः अर्थद्वयकल्पनाया अभिमततया संशयस्थले सकृदुच्चरितन्यायस्याप्रवृत्तिसिद्धान्तो-नार्थद्वयपरत्वं सम्भावयन्नाशङ्कते **नचेति**। समाधत्ते **यत** इति। **स्वावच्छिन्नेति**। स्वं विषयिता। आहार्यादिज्ञानवारणाय प्रथमसम्बन्धनिवेशः, घटवद्भूतलं घटाभाववद् भूतलम् इत्याकारकविरोधिज्ञानद्वयस्य संशयत्ववारणाय द्वितीयसम्बन्ध-निवेशः। समुच्चये प्रतिवन्धकतावच्छेदकीभूतविषयिताशून्यत्वान्न तत्रातिव्याप्तिः, निरवच्छिन्नसंयोगादिसम्बन्धेन प्रतिवन्धकत्वात्। **चरमविषयितायामेवेति**। एवकारेण प्रथमविषयिताव्यवच्छेदः। **षष्ठ्यर्थस्येति**। घटस्य संशय इत्यादाविति शेषः। **निरूपकत्वस्येति**। निरूपितत्वसम्बन्धेनेति शेषः। निरूपकतायां च प्रकृत्यर्थस्य घटस्य आधेयत्वसम्बन्धेनान्वयः। तथाच उक्तोभयसम्बन्धेन विषयिताविशिष्टा या घटवृत्तिनिरूपकताविशिष्टविषयिता तच्छालि ज्ञानमिति घटस्य संशय इति वाक्याद् वोधः। अत्र प्रथमविषयितापदेन घटाभावविषयिता, द्वितीयविषयितापदेन घटविषयिता ग्राह्या। एवं च घटाभावत्वावच्छिन्नविषयित्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवन्धकता-वच्छेदकत्वस्य घटाभावत्वावच्छिन्नविषयितासामानाधिकरण्यस्य चोभयस्य सम्बन्धस्य घटविषयितायां सत्त्वात् लक्षणसमन्वयो वोद्धव्यः।

नन्वेवम् घटस्य संशयो न पटस्य इति प्रयोगानुपपत्तिः पटनिरूपकत्वस्य निरूपितत्व-सम्बन्धावच्छिन्नप्रतियोगिताकाभावो नञा वोधयितुमशक्यः, निरूपितत्वसम्बन्धस्य [illegible] प्रतियोगिताकाभावासिद्धेः सम्बन्धान्तरेण तदभाव-

(प्रभा) एवं च निरूप्यत्वस्य स्वरूपसम्बन्धेनैव विषयितायामन्वये नञ्समभिव्याहारदशायाम् प्रतियोग्यभावान्वयौ च तुल्ययोगक्षेमौ इतिन्यायेन स्वरूपसम्बन्धेनैव तदभावबोधनात् तस्य च सम्बन्धस्य वृत्तिनियामकतयानुपपत्त्यभावात् । ननु प्रथमविषयितायामपि षष्ठ्यर्थनिरूपितत्वस्यान्वयेऽपि निर्वाहात् कथं चरमविषयितायामेवेति कथितमिति चेत् संशयपदस्य उक्तोभयसम्बन्धेन विषयिताविशिष्टविषयितायां ज्ञाने च खण्डशः शक्तिस्वीकारेण प्रथमविषयितायामन्वये षष्ठ्यर्थस्य एकदेशान्वयापत्तिः । नच खण्डशः शक्तिनये तादृशविषयिताविशिष्टविषयिताया गुरुतया विषयिताद्वये ज्ञाने च शक्तेः स्वीकरणीयतया कथं विषयितायां षष्ठ्यर्थस्यान्वयेऽपि नैकदेशान्वयापत्तिरिति वाच्यम्, खण्डशक्तिनये विषयितात्वेन विषयिताद्वये शक्तिस्वीकारे उद्देश्यतावच्छेदकविधेययोरैक्येन विषयितायां विषयिताऽन्वयासम्भवादतो विषयिताविशिष्टविषयित्वे शक्तिस्वीकारस्यावश्यकत्वात् । नच तथापि विषयिताविशिष्टविषयिताशालिज्ञानरूपसंशयपदार्थैकदेशे चरमविषयितायाम् षष्ठ्यर्थान्वये एकदेशान्वयो दुर्वार एवेति वाच्यम्, यतः निरुक्तोभयसम्बन्धेन विषयिताविशिष्टविषयिताशालिज्ञानं न संशयपदार्थः किन्तु निरुक्तोभयसम्बन्धेन विषयिताविशिष्टविषयिता-ज्ञान-एतदुभयम् । एवञ्च चरमविषयितायामन्वयोपगमे नैकदेशान्वयापत्तिरिति ध्येयम् ।

केचित्तु—ससम्बन्धिकस्थले चैत्रस्य गुरुकुलम् इत्यादौ साक्षात्पदार्थतावच्छेदकेऽन्वयस्य व्युत्पन्नतया चरमविषयितायाम् षष्ठ्यर्थस्यान्वये एकदेशान्वयेऽपि क्षत्यभावः, तस्याः साक्षात्पदार्थतावच्छेदकत्वात् । तथा च निरुक्तोभयसम्बन्धेन विषयिताविशिष्टविषयिताशालिज्ञानमेव संशयपदार्थः । खण्डशक्तिवादिनये शक्तिद्वयकल्पनाया अन्याय्यत्वात् । एवं संख्याकालाद्यतिरिक्तैकपदोपात्तपदार्थस्य विशेष्यविशेषणभावेनान्वयस्याव्युत्पन्नतया ज्ञाने विषयिताविशिष्टविषयित्वान्वयायोगाच्च । परन्तु पदार्थतावच्छेदककोटिप्रविष्टायाम् (पदार्थतावच्छेदकतावच्छेदकीभूतायाम्) प्रथमविषयितायाम् षष्ठ्यर्थान्वस्यान्याय्यत्वादपसिद्धान्ताच्चेतिचरमविषयितायामेवेत्युक्तमित्याहुः ।

अपरेतु संशयपदार्थघटकप्रथमविषयितायां षष्ठ्यर्थस्यान्वयोपगमे ज्ञानं घटनिरूपितविषयित्वाभाववत् इति बाधनिश्चयदशायां घटस्य संशय इति वाक्यजन्यबोधापत्तिः । तादृशबाधनिश्चयसत्त्वे घटनिरूपितविषयिताविशिष्टविषयिताशालिज्ञाने बाधकाभावात् । चरमविषयितायां षष्ठ्यर्थान्वयोपगमे तु तादृशबाधनिश्चयस्य विषयिताविशिष्टघटनिरूपितविषयिताशालिज्ञानप्रतिबन्धकत्वात् न तादृशबाधनिश्चयसत्त्वे तादृशवाक्यजन्यशाब्दबोधापत्तिरिति प्राहुः ।

यत्तु घटस्य संशयो न घटीय इतिवाक्यजन्यबोधापत्तिः घटनिरूपितविषयिताविशिष्टविषयिताशालि ज्ञानं घटनिरूपितविषयित्वाभाववदित्यादिशाब्दबोधे बाधकाभावादतो न प्रथमविषयितायां षष्ठ्यर्थस्यान्वयः । चरमविषयितायां षष्ठ्यर्थान्वयोपगमे विषयिताविशिष्ट-

(प्रभा) त्वबोधकतया प्रमाण्यापत्तेरयोगात् । अन्यथा चरमविषयितायामन्वयेऽपि घटः संशयो न घटाभावीय इति व्यवहारस्य प्रमाण्यापत्तेर्दुर्वारत्वात् ।

वस्तुतो यद्व्यतिरेकज्ञानत्वेन प्रतिबन्धकता लभ्यते इति दीधितिरद्धार्थमेव तादृशान्वयस्य स्वीकारात् । तथाहि प्रथमविषयितायां यद्व्यतिरेकनिरूपितत्वस्यान्वयेयद्व्यतिरेक विषयिताविशिष्टविषयिताशालिज्ञानलाभ: तथासति व्यतिरेकनिरूपितविषयितायाःज्ञानपदार्थेऽनन्वयात् ज्ञाने व्यतिरेकविषयकत्वलाभो न स्यात् । चरमविषयितामन्वये तु व्यतिरेक संशय इत्यत्र व्यतिरेकनिरूपतिविषयिताशालिज्ञानलाभः—तत्र व्यतिरेकविषयितायाः ज्ञानेऽन्वयात् तन्मात्रोपादानेन सर्वसामञ्जस्ये नेतरांशो विवक्षणीय इति **गुरवः** ।

अत्रेदं बोध्यम् । प्रथमविषयितायाम् षष्ठ्यर्थान्वये पर्वतो वह्निमान् वह्न्यभावव्याप्यवान्नवेति संशयस्य वह्निसंशयत्वापत्तिः तादृशोभयसम्बन्धेन वह्निविषयिताविशिष्टाया वह्न्यभावव्याप्यविषयितायास्तत्र सत्त्वात् अतश्चरमविषयितायामेवेत्यभिहितम् । न च चरमविषयितायां तस्यान्वयेऽपि वह्न्यभावव्याप्यांशे सन्दिग्धाप्रामाण्यकपर्वतो वह्निमान् न वह्न्यभावव्याप्यवांश्चेतिसंशयस्य वह्न्यभावव्याप्यसंशयत्वापत्तिरतस्तद्वारणाय यदि चरमविषयितायाम् कोटितात्वादिकं निवेश्यते तदा प्रथमविषयितायामपि तन्निवेशसामञ्जस्ये उक्तदोषतादवस्थ्यमिति वाच्यम् ? तादृशसंशयस्य गृहीताप्रामाण्यकत्वेऽपि तस्य अनाहार्यत्वाभ्युपगमात् । तदभ्युपगमे तु वारणप्रकार:प्रयाससाध्य इति ध्येयम् ।

नच स्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्व-स्वसामानाधिकरण्योभय विषयिताविशिष्टविषयिताशालिज्ञानत्वमेव संशयलक्षणं कुतो न कृतमिति वाच्यम् ? अकल्पे घटस्य संशय इत्यादौ षष्ठ्यर्थस्य चरमविषयितायामन्वये पर्वतो वह्निमान् वह्न्यभाव व्याप्यवान् नवेति संशयस्य वह्निसंशयत्वापत्तेः, तादृशोभयसम्बन्धेन वह्न्यभावव्याप्य विषयिताविशिष्टाया वह्निविषयितायास्तत्र सत्त्वात् । प्रथमविषयितायामन्वये तु तस्यां लक्षणान्तरत्वादिति ध्येयम् ।

अत्र च तद्वत्ताबुद्धिम्प्रति व्याप्यवृत्तितानिरूपकतदभावावगाहिनिश्चयत्वेन प्रतिबन्धकत्वम्, व्याप्यवृत्तित्वं च निरवच्छिन्नाधेयताकत्वम् । अतोऽव्याप्यवृत्तित्वज्ञानकालिक कोटिद्वयावगाहिसमुच्चयमादाय न दोषः । नच तथापि पर्वतो वह्निमान् वह्न्यभावव्याप्यवांश्चेत्याहार्यज्ञानस्य वह्निसंशयत्वापत्तिः तत्रोक्तविषयिताविशिष्टविषयिताकत्वादि वाच्यम् ? स्वावच्छिन्नप्रतिबध्यतावत्त्व-स्वसमानाधिकरण्योभयसम्बन्धेन विषयितावैशिष्ट्य विवक्षणीयम् । प्रतिबध्यतावत्त्वं च स्वसामानाधिकरण्यस्वनिरूपितप्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेन । एवं च आहार्यज्ञाने प्रतिबध्यताविरहादेव संशयत्वापत्तिविरहात् नचैवं वह्निमान् पर्वतो वह्निव्याप्यवान्नवा वह्निमान् पर्वतो घटवान् नवेत्यादिसंशयानाम वह्निसंशयत्वापत्तिरितिवाच्यम् ? चरमविषयितायाम् अवच्छेदकत्वानवच्छिन्नत्वेन तदन्तरत्वेन वा विशेषणात् ।

(दी०) तेन व्यतिरेकज्ञानत्वेन प्रतिबन्धकता लभ्यते ।

(गा०) एवं चाभावस्य संशयपदार्थघटकतया तत्समभिव्याहृतषष्ठ्या अभावान्वयितदीयप्रतियोगितार्थकताया अनावश्यकता। नच विषयतानिरूपकत्वं विषयिताप्रतियोगित्वमेव, तथा च व्यतिरेके संशये चान्वयी एक एवार्थः षष्ठ्या इति कथं तदर्थभेदभयेन व्यतिरेकपदव्यत्यास इति वाच्यम्! अभावनिरूपितस्य विषयितानिरूपितस्य च प्रतियोगित्वस्यैकजातीयत्वविरहादित्याहुः।

(प्रभा) निवेशात् नोक्तापत्तिरिति वाच्यम् ? तथासति वायौ रूपं नवेति कोटिविशेष्यकसंशयस्य रूपसंशयत्वानुपपत्तेरिति चेदत्रोच्यते विशेष्यीभूतविषयितायाम् स्वनिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मानवच्छिन्नत्व —स्वावच्छिन्नविषयितानिरूपितत्वोभयवत्त्वस्य विवक्षितत्वात् । स्वम् प्रथमविषयिता । घटवान्नवेति संशय तु भूतलविषयितायां घटादिविषयितानिरूपकतावच्छेदकतापर्याप्त्यधिकरणघटत्वाद्यनवच्छिन्नत्वस्य सत्त्वेऽपि संशये कोटिद्वयविषयितयोः परस्परमवच्छेद्यावच्छेदकभावात् घटादिविषयित्वावच्छिन्ना या घटाभावादिविषयिता तदनिरूपितत्वविरहादेव भूतलसंशयत्वापत्तिवारणसम्भवात् । तत्रैव कोटिद्वयनिरूपितविषयताद्वयनिरूपितयोर्भूतलनिष्ठविषयित्वयोः स्वपदेनोपादाय अन्यत्र निरूक्तोभयसम्बन्धेन तद्वत्त्वस्य स्वावच्छिन्नविषयित्वानिरूपितत्वस्य च सत्त्वात् तद्दोषतादवस्थ्यमतोऽनवच्छिन्नान्तम् । एवम् स्वनिरूपकतावच्छेदकतापर्याप्त्यधिकरणघटत्वाद्यनवच्छिन्नत्वस्य भूतलविषयित्वे सत्त्वेन तद्दोषतादवस्थ्यवारणाय स्वावच्छिन्नविषयित्वानिरूपितत्वान्तम् । घटस्य संशय इत्यादौ घटविषयित्वे घटाभावविषयितारूपस्वस्य निरूपकतावच्छेदकम् घटत्वमपि इति न तदनवच्छिन्नत्वम् अतः पर्याप्तनिवेशः ।

प्रतियोगित्वस्यैकजातीयत्वेति । अभावीयप्रतियोगितागतप्रतियोगितात्वस्य विषयित्वनिरूपितप्रतियोगितागतप्रतियोगितात्वस्य च मिथो वैलक्षण्यादिति भावः।

आहुरित्यनेनास्वरसस्तु तात्पर्यज्ञानस्य कारणत्ववादिनाम् मते सकृदुच्चरितन्यायस्यास्वीकार एव। तात्पर्यग्रन्थे व्युत्पत्तेरस्या निराकरणात् । तथाहि-अस्या व्युत्पत्तेः स्वीकारे तात्पर्यज्ञानस्य शाब्दबोधकारणत्वं न स्यात् । प्रकृतार्थमात्रोपस्थितौ स्वत एव तस्य शाब्दबोधे बाधकाभावेन भानसम्भवात् तात्पर्यज्ञानस्यान्यथासिद्धत्वात्, अप्रकृतार्थमात्रोपस्थितौ च तात्पर्यज्ञानस्यैवासम्भवात् ।

व्यतिरेकज्ञानत्वेनेतिदीधितिः । अत्रेदमनुसन्धेयम्, संशयत्वनिश्चयत्वयोर्हेतुघटकत्वे यदव्यतिरेकज्ञानं यत्र प्रतिबन्धकं तत्रैव कथमोक्तं किं संशयनिश्चय

(गा०) अत्र संशयादिपदं प्रतिवध्यसमानधर्मितावच्छेदककयद्रूपावच्छिन्नाभावसंशयादिसामान्यपरमवश्यं वाच्यम्, अन्यथा समूहालम्बनरूपघटाभावादिनिश्चयात्मकव्याप्त्यादिव्यतिरेकसंशयादिप्रतिबध्यस्य घटादिज्ञानस्य व्याप्त्यादिनिश्चयाहेतुकत्वाद् व्यभिचारापत्तेः। एवं च व्यतिरेकनिश्चयत्वादिघटकव्यतिरेकज्ञानत्वपुरस्कारेण तज्ज्ञानसामान्यनिवेशादेवोपपत्तेस्तद्घटकदलान्तरोपादानमितरोपादानं च व्यर्थम्, यदि च संशयत्वादिव्यापकत्वेन प्रतिबन्धकतानिवेशो तज्ज्ञानत्वव्यापकताघटकप्रतियोगितावच्छेदकत्वाभावादन्य एव तदभावः संशयत्वादिव्यापकताघटक इत्यवैयर्थ्यम्, संशयत्वनिश्चयत्वे अव्याप्यवृत्तिजातिविशेषाविति मते तच्छरीरे ज्ञानत्वस्यानन्तर्भावादपि न वैयर्थ्यशङ्का, तथापि अनुचितं गौरवं संशयनिश्चययोः पृथङ् निवेशपक्षे दुर्वारमेवेति मनसिकृत्य फलितार्थमाह *तेनेति*।

(प्रभा) प्रतिबन्धकता लभ्यत इति दीधितिकृता वक्ष्यते। ननु यद्रूपावच्छिन्नप्रतियोगिताकाभावप्रकारकसंशयनिष्ठप्रतिबन्धकतानिरूपितप्रतिवध्यतावत्त्वे सति इत्यादिरीत्या निवेशे धूमो वह्निव्याप्त्यभाववान्नवा घटाभाववच्च भूतलम् इत्याकारकज्ञाननिष्ठघटाभाववद्भूतलविषयकत्वावच्छिन्नप्रतिवन्धकतानिरूपितप्रतिवध्यत्वस्य च घटवद्भूतलमितिज्ञाने सत्त्वेन तत्र च व्याप्तिनिश्चयजन्यत्वविरहात् व्यभिचारापत्तिरतस्तद्वारणाय प्रतिवन्धकतायां यद्रूपावच्छिन्नाभावसंशयत्वव्यापकत्वनिवेश आवश्यकः तथाचाप्रसिद्धिः स्यात्,

प्रतिवन्धकतायां तादृशसंशयत्वव्यापकत्वविरहात् तादृशसंशयत्वस्य नानाधर्मिकसंशयेषु सत्त्वेन तत्र धूमलिङ्गकानुमितिनिरूपितप्रतिबन्धकत्वविरहात्। अतः धर्मितावच्छेदकनिवेशोऽपि आवश्यक एवेति मनसिकृत्याह **अत्र संशयादिपदमिति**। **अत्र**=यद्व्यतिरेकसंशयनिश्चयावित्यत्रेत्यर्थः। घटकत्वं सप्तम्यर्थः। **संशयादिपदम्**=आदिना निश्चयपरिग्रहः। निर्धर्मितावच्छेदकज्ञानस्याप्रतिबन्धकतया यद्व्यतिरेकज्ञानत्वव्यापकत्वाप्रसिद्ध्या साधनाप्रसिद्धिः स्यात् तद्वारणाय प्रतिवध्यसमानधर्मितावच्छेदकेति संशयविशेषणमित्यपि मान्याः। **प्रतिबध्यसमानधर्मितावच्छेदकेति**। ननु प्रतिबध्येन समानं धर्मितावच्छेदकं यस्येतिव्युत्पत्त्या प्रतिवध्यधर्मितावच्छेदकधर्मितावच्छेदककस्येत्यर्थः फलति। किन्तु तथा विवक्षणे प्रतिवध्यपदेनात्र अनुमित्यादेरेव ग्रहणे दृष्टान्तासिद्धिः स्यात् व्याप्तिव्यतिरेकसंशयादिप्रतिबध्याया अनुमितेर्धर्मितावच्छेदकं यत् पर्वतत्वादिकं तच्च न तादृशसंशयधर्मितावच्छेदकं अपि तु धूमत्वादिकमेवेति चेत्, प्रतिवध्यश्चासौ समानधर्मितावच्छेदककश्चेत्येव विग्रहः, तथाच व्याप्तिसंशयो व्याप्तिव्यतिरेकनिश्चयो वा व्याप्तिनिश्चयस्य प्रतिवध्यः, तत्समानधर्मितावच्छेदककश्चेति। तथाच यत्सत्त्वे यदनुत्पत्तिप्रयुक्ता यदनुत्पत्तिः प्रतिवध्यपदेन तदुभयस्यैव ग्रहणात्। तथाच तादृशसंशयादिसत्त्वे व्याप्तिनिश्चयानुत्पत्तिप्रयुक्तानुमितेरनुत्पत्तिरिति व्याप्तिनिश्चय एव प्रतिवध्यपदेन ग्रहीतव्यः, तस्य धर्मितावच्छेदकं

(प्रभा) वाच्यम् ? व्याप्तिव्यतिरेकनिश्चयप्रतिवध्यत्वमादायैव तत्सङ्गतेः। अथवा ग्राह्याभावावगाहित्वेन यद्व्यतिरेकनिश्चयप्रतिवध्यपरम् प्रतिवध्यपदम्। तथाच यद्व्यतिरेकनिश्चयप्रतिवध्यतावच्छेदकविशेष्यतावच्छेदकनिष्ठविशेष्यतावच्छेदकताकतादृशसंशयादिसामान्यपरमिति ग्रन्थार्थः। यद्व्यतिरेकनिश्चयप्रतिवध्यीभूतं यन्निश्चयम् अन्यधर्मितावच्छेदककसमूहालम्बनात्मकमादाय न दृष्टान्तासिद्धिरिति। यत्तु धूमपक्षकस्थल एव प्रतिवध्यसमानधर्मितावच्छेदकत्वकथनं तन्न समीचीनम् ? दृष्टान्तासिद्धिवारणेऽपि प्रवृत्तौ स्वरूपासिद्धेर्दुर्वारत्वात्।

अत्र कश्चित् स्वप्रतिवध्यः स्वसमानधर्मितावच्छेदककः इत्यर्थः। स्वं साध्यघटकनिश्चय इत्याह तत्तुच्छम् ? साध्यीभूतनिश्चयमुपादाय तत्प्रतिवध्यसंशयप्रतिबन्धकताकत्वस्य स्वातिरिक्त उपपादनस्य ग्रन्थकारीयरीतिविरुद्धत्वात्। स्वसमानधर्मितावच्छेदकक इत्युक्त्यापि स्वपदेन साध्यघटकनिश्चयोपादानसम्भवेनोक्तार्थलाभाच्च। व्याप्तिनिश्चयप्रतिवध्यव्यभिचारसंशयात्मकसमूहालम्बनघटादिधर्मिकद्रव्यत्वनिश्चयधर्मितावच्छेदककस्य घटो वह्निव्याप्यो न वेत्याकारकसंशयस्यापि यावत्संशयान्तर्गततया तत्प्रतिवध्यत्वस्यानुमितौ विरहेण दृष्टान्तासिद्ध्यापत्तेश्च।

वस्तुतस्तु यत्किंचित्प्रतिवध्यसमानधर्मितावच्छेदकेत्येवात्र विवक्षितम्। अत्रानुगमप्रकारस्तु यद्रूपावच्छिन्ननिश्चयविशिष्टसंशयत्वव्यापिका सती तादृशनिश्चयविशिष्टनिश्चयत्वव्यापिका या प्रतिबन्धकता तन्निरूपितप्रतिवध्यतावद् यद् भवति तत् तद्रूपावच्छिन्ननिश्चयजन्यं भवति। तादृशनिश्चयवैशिष्ट्यं संशये निश्चये च स्वप्रतिवध्यतावच्छेदकधर्मितावच्छेदककत्व स्वप्रकारतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावप्रकारकत्वोभयसम्बन्धेन। *प्रथमसम्बन्धानिवेशे प्रमेयत्वेन धूमावगाहिव्याप्त्यभावसंशयादेरपि यावत्संशयान्तर्गततया तत्रानुमितिप्रतिबन्धकत्वविरहेण दृष्टान्तासिद्ध्याद्यापत्तिः। द्वितीयसम्बन्धानिवेशे धूमधर्मिकद्रव्यत्वसंशयस्यापि यावत्संशयान्तर्गततया तत्रानुमितिप्रतिबन्धकत्वविरहेण दृष्टान्तासिद्ध्याद्यापत्तिः। अतः तत्सम्बन्धनिवेश इति भावः। सामान्यपदाप्रवेशे दोषमाह अन्यथेति। समूहालम्बनेति। धूमो वह्निव्याप्यभाववान्नवा घटाभाववच्च भूतलम् इत्यर्थः। एवञ्चेति। उक्तरीत्या निवेशे चेत्यर्थः। अस्य च उपपत्तेरित्यनेनान्वयः। व्यतिरेकनिश्चयत्वं च व्यतिरेकाभावाप्रकारकत्वे सति व्यतिरेकप्रकारकज्ञानत्वम् तद्घटकेत्यर्थः। तज्ज्ञानसामान्यनिवेशादेवेति। व्यतिरेकज्ञानसामान्यनिवेशादेवेत्यर्थः। तथाच यद्रूपावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नप्रतियोगिताकाभावप्रकारकज्ञानत्वव्यापकप्रतिवन्धकतानिरूपितप्रतिवध्यतावद् यद् भवति तत् तद्रूपावच्छिन्नविशेष्यतानिरूपिततद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावद् भवतीति फलितम्। एवकारव्यवच्छेद्यं स्पष्टयति तद्घटकेति। दलान्तरेति—निश्चयत्वघटकदलान्तरेत्यर्थः। व्यतिरेकाभावाप्रकारकत्वदलान्तरेति यावत्। इतरपदेति। ...... व्यतिरेकाभावाप्रकारकतया तयोस्सामर्थ्यमित्याशङ्कते यद्विति। तज्ज्ञान-

(गा०) *व्यतिरेकज्ञानत्वेनेति* । अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वं तृतीयार्थःनतु स्वरूपसम्बन्धरूपम् , ग्राह्याभावज्ञानत्वस्य ग्राह्यज्ञानप्रतिबन्धकतावच्छेदकग्राह्याभावनिश्चयत्वघटकतया ग्राह्यनिश्चयस्य ग्राह्यज्ञानाहेतुतया व्यभिचारस्य दुर्वारत्वात् । पर्याप्तिनिवेशे च तदर्थपर्यालोचने लाघवासम्भवात् । यद्व्यतिरेकज्ञानत्वावच्छिन्नप्रतिबन्धकताकं यत् तत् तन्निश्चयत्वावच्छिन्नजन्यमिति सामान्यव्याप्तिः पर्यवसितेति न साध्यसाधनयोर्वैयधिकरण्यम् , नवा ईश्वरीयप्रामाण्यनिश्चयजन्यतामादाय सिद्धसाधनावसरः ।

(प्रभा) **संशयत्वादिव्यापकतेति** । यद्व्यतिरेकसंशयवृत्तिभेदप्रतियोगितावच्छेदकत्वाभावरूपा । **अवैयर्थ्यमिति** । स्वसमानाधिकरणत्वे सति प्रकृतसाध्यव्याप्यतावच्छेदकत्वे सति स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्रूपं तद्रूपावच्छिन्नाविषयकप्रतीतिविषयतानवच्छेदकत्वं हि व्यर्थविशेषणघटितत्वरूपं वैयर्थ्यम् । तच्चात्र न सम्भवति यद्व्यतिरेकसंशयत्वादिव्यापकतारूपाभावस्य यद्व्यतिरेकज्ञानत्वव्यापकतारूपाभावस्य च परस्परं भेदेन यद्व्यतिरेकज्ञानत्वव्यापकताघटितप्रतिबन्धकताकत्वस्वरूपधर्मान्तरस्य यद्व्यतिरेकसंशयत्वव्यापकताघटितप्रतिबन्धकताकत्वत्वरूपहेतुतावच्छेदकसामानाधिकरण्याभावात् । **तेनेति दीधितिः** । यद्व्यतिरेकसंशयनिश्चयान्यतरत्वेनेत्यर्थः ।

तृतीयार्थ इति । तथाच यद्रूपावच्छिन्नधर्मिकयद्रूपावच्छिन्नप्रतियोगिताकाभावज्ञानत्वम् यद्रूपावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नः तद्रूपावच्छिन्नधर्मिकतद्रूपावच्छिन्ननिश्चयजन्य इति फलितम् । **स्वरूपसम्बन्धरूपमिति** । तथा सति यद्रूपावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकतावत् यद्धर्मिकयद्व्यतिरेकज्ञानत्वम् तद्रूपावच्छिन्नः तद्धर्मिकतन्निश्चयजन्य इति फलितं स्यात् तत्र व्यभिचारमाह **ग्राह्याभावज्ञानत्वस्येति** । घटाभावज्ञानत्वस्येत्यर्थः । ग्राह्यज्ञानेति । घटज्ञानेत्यर्थः । **ग्राह्यनिश्चयस्येति** । घटनिश्चयस्येत्यर्थः । ग्राह्यज्ञानाहेतुतया = घटज्ञानाहेतुतया । **व्यभिचारस्य दुर्वारत्वादिति** । तथाच स्वरूपसम्बन्धरूपावच्छेदकत्वप्रवेशे घटज्ञाने व्यभिचारः । तथाहि-घटाभावज्ञानत्वस्यापि घटाभावनिश्चयत्वघटकतया तस्यापि घटवत्त्वबुद्धिम्प्रति घटाभावनिश्चयत्वावच्छिन्ना या प्रतिबन्धकता तन्निरूपितस्वरूपसम्बन्धरूपावच्छेदकतावत्त्वेन घटाभावज्ञानत्वनिष्ठाच्छेदकताकप्रतिबन्धकतापदेन घटाभावनिश्चयत्वावच्छिन्नप्रतिबन्धकताया अपि संग्रहेण तन्निरूपितप्रतिबध्यत्वस्य च घटज्ञाने सत्त्वेन तत्र घटनिश्चयजन्यत्वविरहात् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वप्रवेशे तु न व्यभिचारः, घटज्ञानम् प्रति घटव्यतिरेकज्ञानत्वेनाप्रतिबन्धकत्वात् घटव्यतिरेकज्ञानत्वस्य संशयसाधारण्येन प्रतिबन्धकत्व[ान]तिरिक्तवृत्तित्वात् । ननु यद्व्यतिरेकज्ञानत्वपर्याप्तावच्छेदकताकप्रतिबन्धकतानिरूपि[त]

... ... तन्निरूपितप्रतिबध्यत्वमिति वादे न व्यभिचार इत्यत

(प्रभा) ताकज्ञानत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावद् यद् भवति त्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताकनिश्चयत्वा न्नजनकतानिरूपितजन्यतावद् भवतीति व्याप्तिशरीरं वाच्यम् । निरुक्तव्याप्तिव्यतिरेकज्ञानसामान्यप्रतिवध्येऽधिकरणं न धूमीयं वृत्तिर्ना शीयेत्यादिज्ञाने व्याप्तिनिश्चयाजन्ये व्यभिचारः । अभावबुद्धौ प्रतियोगिताव कक्षोटौ संशयत्वासम्भवेनाधिकरणांशे धूमीयत्वादिसंशयासम्भवात् व्याप्तिव्य ज्ञानस्याधिकरणाद्यंशे धूमीयत्वादिनिश्चयत्वनियमादिति चेन्न ? निरुक्तव्यतिरेकज्ञ व्यापकप्रतिबन्धकतायां यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वमात्रावच्छिन्नप्रकारत्वनि रूपसम्बन्धरूपावच्छेदकत्वनिरूपितत्वस्यापि निवेशनीयत्वात् । तथाच निरुक्तनि व्याप्तिव्यतिरेकज्ञानत्वव्यापकप्रतिबन्धकताकत्वसत्वेऽपि व्याप्तिव्यतिरेकप्रकारत्वावच्छि प्रतिबन्धकताकत्वविरहेण हेतोरसत्वान्न व्यभिचारः । एकत्र द्वयमितिरीत्याऽधि धूमीयत्वत्वव्याप्त्यभावत्वोभयावच्छिन्नप्रकारतामादाय तद्दोषतादवस्थ्यवारणाय प्रका तन्मात्रावच्छिन्नत्वानुसरणमिति ध्येयम् ।

तदर्थपर्यालोचने लाघवासम्भवादिति । अथ पर्याप्तिनिवेशेऽनि प्रामाण्यककिञ्चिद्धर्मावच्छिन्नविशेष्यताकयद्व्यतिरेकज्ञानत्वपर्याप्तावच्छेदकताकप्रतिबन्ध वक्तव्यम् । तथा च प्रामाण्यघटकतत्तत्पदार्थत्वेन किंवा व्याप्तिघटकतत्तत्पदा पदार्थान्तरावगाहिभ्रमस्यापि प्रतिबन्धकतया तदनुरोधेन भ्रमप्रमासाधारणनिरूप्यनि भावापन्नविषयिताकज्ञानत्वेनैव प्रतिबन्धकत्वावश्यकत्वात् प्रामाण्यादिव्यतिरेकज्ञ पर्याप्तावच्छेदकताकप्रतिबन्धकत्वाप्रसिद्धयाऽसम्भव एव स्यात् कथं लाघवासम्भव इत्यु नच यत्र विषयविशेषेऽनुमितेरितरसामग्रीसमवधानकाले व्याप्तिघटकपद भ्रमात्मकव्याप्त्यादिव्यतिरेकज्ञानं कस्यापि न जातं तत्र विशिष्टज्ञानत्वेनैव प्रतिबन्ध कल्प्यते लाघवादिति तत्रैव पर्याप्तिनिवेशसम्भव इति वाच्यम् ? तादृशविषयस्य प्रामा त्वे पर्याप्तिघटितनियमस्य सम्भवेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वघटितनियमस्य स्यानौचित्यात् इति चेन्न, प्रमात्वव्याप्त्युभयत्रैव परस्परनिरूप्यनिरूपकभावापन्ना त्वमेव यद्धर्मपदेन विवक्षणीयम् ॥ तथाच यादृशसम्बन्धावच्छिन्नप्रतियोगित्वसम्ब च्छिन्नयादृशरूपविशिष्टविषयितानिरूपितयद्रूपावच्छिन्नविशेष्यतानिरूपिताभावत्वावच्छि प्रकारित्व—अनिश्चितप्रामाण्यकत्वादिकं ज्ञानत्वञ्च एतत्समुदायपर्याप्तावच्छेदकता बन्धकताकं यद् भवति तत् तादृशसम्बन्धावच्छिन्नतद्रूपावच्छिन्नविशेष्यतानिरूपित रूपविशिष्टविषयिताशालिनिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावद् साक्षादवच्छेदकताया व्यासज्यवृत्तित्वानुपगमे ज्ञानत्वान्योक्तसमुदायरूपपर्याप्तावच्छे कज्ञानत्वनिष्ठावच्छेदकताकप्रतिबन्धकताकं यद् भवतीत्यादिरीत्या व्याप्तिनिर्वचनेऽस योगादेव लाघवासम्भवस्यैवोक्तत्वात् । नच तादृशांशे कृते ग्राह्यविशिष्टज्ञानौ व्याप्ति

(प्रभा) श्चयत्वावच्छिन्नाभावस्येति व्यभिचाराभावादिति वाच्यम् ? अप्रामाण्यज्ञानव्यक्तीनां तत्तद्व्यक्तित्वेनैवोत्तेजकतया तदनुमतत्वात् । तथाचाप्रामाण्यनिश्चयाभावानामपि ग्राह्य-विशिष्टबुद्धौ प्रतिबन्धकता । न च पर्याप्तिरितरानवच्छिन्नत्वं तथाच तादृशविषयत्व-निष्ठावच्छेदकताभिन्नं ज्ञानत्वनिष्ठावच्छेदकताभिन्नं यदप्रामाण्यनिश्चयाभावनिष्ठा-वच्छेदकत्वं तन्निरूपितत्वात् तादृशप्रतिबन्धकत्वाप्रसिद्धिरिति वाच्यम् ? तत्तदवच्छेद-कताभिन्नत्वकूटेष्वभावनिष्ठावच्छेदकताभिन्नत्वस्य निवेशनीयत्वात् । नचैवं व्यतिरेक-निश्चयत्वावच्छिन्नप्रतिबन्धकताया अव्यावर्त्तनाद् घटादिनिश्चये व्यभिचार इति वाच्यम् ? अभावनिष्ठावच्छेदकतायां निश्चयत्वघटकाभावनिष्ठावच्छेदकताभिन्नत्वस्य निवेशनीयत्वात् । नचैवमपि व्यापकत्वकल्पे व्यतिरेकप्रकारतानिष्ठस्वरूपसम्बन्धरूपा-च्छेदकतानिरूपकत्वस्यापि निवेशनीयतयाऽवच्छेदकत्वयोर्निवेशमपेक्ष्य निरुक्तपर्याप्तिघटितक-ल्पे लाघवसम्भवात् कथं लाघवासम्भवादित्युक्तेःसङ्गतिरिति वाच्यम् ? तावताऽपि पर्याप्तिपर्यालोचने व्यापकत्वकल्पापेक्षया लाघवानवकाशात् । एवं पर्याप्तिकल्पेऽनिश्चि-ताप्रामाण्यकत्वस्य तत्तद्व्यक्तित्वावच्छिन्नाभावकूटत्वेनैव निवेशनीयतया तदपेक्ष्य विशेष्यता-सामानाधिकरण्योभयसम्बन्धेन ज्ञानत्वावच्छिन्नाभावघटितव्यापकत्वकल्पेऽतीव लाघवसम्भवादिति विभावनीयम् ।

नचानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशकल्पेऽपि प्रतिबन्धकतायां तादृशव्यतिरे-कज्ञानत्वव्यापकत्वनिवेशस्यावश्यकतया व्यापकताघटकाभावप्रतियोगितावच्छेदककोटौ इतरवारकपर्याप्तिनिवेशस्य ध्रौव्यात् व्यापकत्वकल्पेऽपि पर्याप्तिनिवेशकल्पापेक्षया न लाघवं किमपीति वाच्यम् ? यतः यद्धर्मावच्छिन्नव्यतिरेकज्ञानत्वे प्रतिबन्धकतावच्छेदकता-पर्याप्तिनिवेशस्य असाधारणज्ञानप्रतिबन्धकत्वानुरोधेन अशक्यतया वक्ष्यमाणरीत्यैव पर्याप्तिःशक्यते निवेशयितुम् तथाच तत्र न्यूनेतरवारकपर्याप्तिनिवेशे गौरवम्, व्यापकत्व-कल्पे च तादृशज्ञानत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्ववत्त्वमित्याकारकधीविशेषवि-षयत्वरूपसमुदायत्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकप्रतियोगिताकाभाववत्त्वमेव निवेश्यम् इति लाघवस्य स्पष्टत्वात् ।

यद्धर्मावच्छिन्नाभावत्वावच्छिन्नप्रकारतानिरूपितयद्धर्मावच्छिन्नविशेष्यताशालिनिश्चयत्व-व्यापकतादृशविषयत्वावच्छिन्नजनकतावच्छेदकत्वोपलक्षितविषयताशालिज्ञानत्वेऽप्रामाण्य-निश्चयाभावविशिष्टे पर्याप्तावच्छेदकताकप्रतिबन्धकतानिरूपितप्रतिबध्यत्वमेव हेतुः तथाच पर्याप्तिनिवेशे गौरवं स्फुटतरमिति केचित् ।

अपरे तु विशिष्टबुद्धौ व्यभिचारवारणाय अप्रामाण्यनिश्चयाभावविशेष्यप्रतियोगित्व-सम्बन्धावच्छिन्नयद्रूपावच्छिन्नविषयतानिरूपिताभावत्वावच्छिन्नप्रकारतानिरूपितयद्रूपाव-च्छिन्नविशेष्यताशालिज्ञानत्वान्यावृत्तिधर्मावच्छिन्नपर्याप्तिकावच्छेदकताकप्रतिबन्धकता-निरूपितप्रतिबध्यतावत्त्वमेव हेतुतया विवक्षणीयम् । नच व्याप्त्यादिव्यतिरेकज्ञानप्रतिबन्ध

(प्रभा) तादृशज्ञानत्वान्यपदेन तादृशज्ञानत्वावच्छिन्नभेदप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् । अतएव तदर्थपर्यालोचने इत्युक्तमित्याहुः ।

अथ प्रतिबन्धकतानतिरिक्तवृत्तित्वम् प्रतिबन्धकत्वाभाववदवृत्तित्वम् , तथाच विशिष्टस्य विशेष्यीभूतज्ञानत्वानतिरिक्ततया विशेष्यीभूतज्ञानत्वस्यातिप्रसक्तत्वे विशिष्टे तत्रानतिप्रसक्तत्वम् दुर्घटमिति साधनाप्रसिद्धिरिति चेन्न ? अन्यत्र स्थल इवात्रापि स्वव्यापकतत्कत्वरूपस्यैव विवक्षितत्वात् । नचाप्रामाण्यनिश्चयाभावज्ञानत्वोभयावच्छिन्नप्रतिबन्धकतात्वमेव हेतुरस्तु इति वाच्यम् , अवच्छेदकताया व्यासज्यवृत्तित्वानुपगमे उभयावच्छिन्नप्रतिबन्धकत्वस्यैवाप्रसिद्धत्वात् नोक्तमिति ध्येयम् ।

केचित्तु नचेत्याद्याशङ्का माध्यमिकस्यैव, तेन प्रमानङ्गीकारात् पर्याप्तिनिवेशस्य यथाश्रुतस्यैव साधुतेति वदन्ति । तन्न सम्यक् ? माध्यमिकेन नैयायिकमतमवलम्ब्यैव नचेत्याद्याशङ्का कृतेति भट्टाचार्य्येणोक्तं तथाच तन्मतमवलम्ब्य नचेत्याद्याशङ्काकृन्मताभिप्रायेण परिष्कारस्यैव युक्तत्वादिति ध्येयम् ।

सामान्यव्याप्तिः पर्यवसितेति । ननु रक्तदण्डव्यतिरेकज्ञानत्वव्यापकप्रतिबन्धकताकदण्डो रक्तो नवा इतिसन्देहे रक्तदण्डनिश्चयजन्यत्वविरहेण व्यभिचार इति चेन्न ? यन्निश्चयत्वव्यापिका सती यद्व्यतिरेकज्ञानत्वव्यापिका या प्रतिबन्धकता तन्निरूपकं यद् भवति तत् तन्निश्चयजन्यं भवतीत्यस्य विवक्षितत्वात् । रक्तदण्डव्यतिरेकज्ञानत्वव्यापिकाया दण्डो रक्तो नवेति संशयनिरूपितप्रतिबन्धकताया दण्डविशेष्यकरक्तत्वप्रकारकनिश्चयत्वावच्छिन्नायाः रक्तदण्डनिश्चयत्वव्याकपत्वात् । अथवा दण्डांशे रक्तत्वनिश्चयात्मकरक्तदण्डव्यतिरेकज्ञानसामान्यप्रतिबध्यस्यापि दण्डो रक्तो नवेतिसंशयस्य रक्तदण्डनिश्चयाजन्यत्वेन व्यभिचारवारणाय व्यतिरेकविषयतायां स्वप्रतिबन्धकतावच्छेदकत्वमपि निवेशनीयम् । स्वम् पक्षत्वेनाभिमतम् ।

एतेन व्याप्तिव्यतिरेकज्ञानत्वव्यापकप्रतिबन्धकताके व्याप्तिनिश्चयाजन्ये 'अभावो हेत्वसमानाधिकरण. इति ज्ञाने व्यभिचारवारणाय प्रतिबन्धकतायां व्याप्तिव्यतिरेकज्ञानत्वसमनियतत्वविवक्षणं गौरवग्रस्तमिति सूचितम् । प्रतिबन्धकताया असाधारणत्वेन तादृशनियतत्वासिद्धेश्च । नचाभावांशे हेतुसामानाधिकरण्यादिसंशयात्मकव्याप्त्यादिव्यतिरेकज्ञानस्याप्रतिबन्धकत्वात् प्रतिबन्धकतायां व्याप्त्यादिव्यतिरेकज्ञानत्वविरहादेव नोक्तव्यभिचार इति वाच्यम् , प्रतियोगिताविशेषिताभावज्ञानस्य विशिष्टवैशिष्ट्यावगाहित्वनियमेन तादृशज्ञानोत्पादासम्भवात्, विशेषणतावच्छेदकप्रकारकनिश्चयस्य विशिष्टवैशिष्ट्यबोधकारणत्वात् ।

अथ स्वव्यापकत्व स्वभिन्नत्वोभयसम्बन्धेन यद्व्यतिरेकज्ञानत्वव्यापकप्रतिबन्धकताविशिष्टान्यत्वं यद्व्यतिरेकज्ञानत्वव्यापकप्रतिबन्धकतायां निवेशनीयम्, तथा चाभावो हेत्वसमानाधिकरण इति ज्ञानप्रतिबध्यतानिरूपितप्रतिबन्धकतायाः (व्याप्तिव्यतिरेकज्ञानत्व-

(प्रभा) प्रतिबन्धकत्वाप्रसिद्धिवारणाय स्वभिन्नत्वनिवेशः । स्वव्यापकत्वनिवेशनं ज्ञानभेदेन प्रतिबन्धकत्वभिन्नत्वमतेऽसिद्धिवारणार्थम् । व्याप्त्यादिव्यतिरेकवद्धेत्वादिमान् देश इत्यादिज्ञानीयतादृशहेत्वाद्यभावज्ञानप्रतिबन्धकताविशिष्टान्यत्वस्य व्याप्त्यादिव्यतिरेकज्ञानत्वावच्छिन्नप्रतिबन्धकतायां विरहात् (दृष्टान्तासिद्धि) असिद्धिवारणार्थं भेदप्रतियोगितावच्छेदकप्रतिबन्धकतायां यद्व्यतिरेकज्ञानत्वव्यापकत्वं निवेशितम् । घटाद्यभावज्ञानप्रतिबन्धकतायास्तादृशप्रतिबन्धकताविशिष्टान्यत्वेन घटविशिष्टबुद्धौ व्यभिचारवारणाय चरमप्रतिबन्धकतायां यद्व्यतिरेकज्ञानत्वव्यापकत्वं निवेशितम् । यद्यपि विशेष्यताप्रकारतानां विशेष्यविशेषणभाववैपरीत्येन सर्वत्र प्रतिबन्धकता नानैव न कुत्राप्येका, तथाच व्याप्त्यादिव्यतिरेकग्रहत्वव्यापकप्रतिबन्धकतायाः तादृशप्रतिबन्धकताविशिष्टत्वेन तद्भिन्नत्वाप्रसिद्ध्या स्वरूपासिद्धिर्दृष्टान्तासिद्धिश्च, तथापि स्वव्यापकत्व-स्वानधिकरणवृत्तित्वोभयसम्बन्धेन तादृशप्रतिबन्धकतावैशिष्ट्यनिवेशान्न दोषः । एतादृशरीत्या परिष्करणे गौरवादिति ध्येयम् ।

केचित्तु यदभावावगाहिताप्रयुक्तयद्व्यतिरेकज्ञानत्वव्यापकप्रतिबन्धकताकं यत् तत् तन्निश्चयजन्यमित्यर्थेन पूर्वोक्तदोषवारणं सुकरम् । नन्वेवं यद्व्यतिरेकसंशयवृत्तित्वनिवेशेनैव बाधादिप्रतिबन्धकतामादाय घटादिविशिष्टबुद्धौ व्यभिचारवारणसम्भवात् व्यतिरेकग्रहत्वव्यापकत्वनिवेशनं किमर्थमिति वाच्यम् ? पर्वतत्वादिसामानाधिकरण्येन घटाभावादिनिश्चयात्मकतत्सामानाधिकरण्येन घटाभावकोटिकतदवच्छेदेन घटकोटिकसंशयस्य यदभावावगाहिताप्रयुक्तप्रतिबन्धकताविशिष्टत्वात् पर्वतत्वावच्छेदेन घटादिविशिष्टबुद्धौ व्यभिचारवारणाय तादृशव्यापकत्वनिवेशस्यावश्यकत्वादिति वदन्ति ।

यत्तु अप्रामाण्यनिश्चयास्कन्दितयद्व्यतिरेकग्रहस्य अनुमित्यप्रतिबन्धकत्वे तादृशव्यापकत्वभंगभीत्या व्याप्तिशरीरेऽप्रामाण्यनिश्चयानास्कन्दितयद्व्यतिरेकग्रहत्वव्यापकत्वनिवेशस्यावश्यकत्वेन अभावो हेत्वसमानाधिकरणः इतिविशिष्टबुद्धौ व्यभिचारवारणसम्भवः, हेतुसामानाधिकरण्यांशेऽप्रामाण्यसंशयास्कन्दितव्याप्त्यादिव्यतिरेकग्रहस्य उक्तविशिष्टबुद्ध्यप्रतिबन्धकत्वेन व्यापकत्वाभावात्, ग्राह्याभावनिश्चयस्याप्रामाण्यज्ञानाभावविशिष्टत्वेनैव प्रतिबन्धकत्वादिति यथाश्रुतमेव सम्यक् । तन्न ? संशयसाधारणप्रतिबन्धकत्वस्थलेऽप्रामाण्यनिश्चयाभावस्यैव प्रतिबन्धकतावच्छेदककोटौ निवेशस्य आवश्यकत्वेऽपि प्रकृतव्याप्तिशरीरेऽप्रामाण्यनिश्चयाभावमपेक्ष्य लाघवेनाप्रामाण्यज्ञानाभावस्यैव निवेशनीयत्वात् । अभावो हेत्वसमानाधिकरण इतिबुद्धौ व्यभिचारवारणाय गुरुभूतनिश्चयत्वावच्छिन्नाभावस्य निवेशसम्भवेऽपि ग्राह्याभावनिश्चयत्वावच्छिन्नप्रतिबन्धकतामादाय ग्राह्यविशिष्टबुद्धौ व्यभिचारवारकानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशवैफल्यापत्तेश्च, अप्रामाण्यज्ञानाभावस्यैव ग्राह्याभावनिश्चयप्रतिबन्धकतावच्छेदकघटकतया (अप्रामाण्यनिश्चयाभावस्य ग्राह्याभावनिश्चयप्रतिबन्धकतावच्छेदकाघटकतया) स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशस्यैव

(गा०) नच माध्यमिकपूर्वकपक्षे अथेत्याद्याशङ्का न नैयायिकस्य, प्रामाण्यनिश्चयोपयोगितास्वीकारात्, किन्तु तटस्थस्य, तदुपरि च नचेत्य शङ्का पुनर्माध्यमिकस्यैव, तेनेश्वरानभ्युपगमेन न सिद्धसाधनावसरः, सा [illegible] तद्दोषासिद्धतायामेव तद्दोषादिति वाच्यम् ? एवमपि तटस्थेन अर्थान् [illegible] भावनस्य दुर्वारत्वात् । नच स्वतः परतश्च प्रामाण्यस्य ग्रहणं निराकु [illegible] माध्यमिकस्य कथं प्रवृत्तौ प्रामाण्यनिश्चयहेतुकत्वसाधनं सङ्गच्छते [illegible] ? प्रामाण्यनिश्चायनेन शास्त्रस्य निश्श्रेयसोपयोगितावादिनं नैया [illegible] तन्मतमालम्ब्य माध्यमिकस्यापि प्रवृत्तौ प्रामाण्यनिश्चयोपयोगि व्यवस्थापनसम्भवात् ।

[illegible] रैवग्रहत्वस्य स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेश एवोचितः, निश्चयत्वस्य [illegible] स्वरूपानतिरिक्तवृत्तित्वापेक्षया लाघवशरीरत्वात् । तावतैव बाधप्रतिबन्धकता [illegible] विशिष्टबुद्धौ एवं विशेषणान्तरादानेऽपि अभावो हेत्वसमानाधिकरण इति [illegible] नवकाशः । तत्तत्प्रतिबन्धकतायाः अप्रामाण्यनिश्चयाभावविशिष्टव्या [illegible] रेकग्रहत्वानवच्छिन्नत्वात्, किन्तु अप्रामाण्यग्रहाभावघटिततादृशग्रहत्वावच्छिन्नत्व [illegible] ? अत्राहुः, निश्चयत्वस्य मतभेदेन भिन्नतायाः प्रागेवोक्त [illegible] निश्चयत्वावच्छिन्नाभावनिवेशे मतान्तरासंग्रहः । एवमप्रामाण्यज्ञानस्यानु [illegible] त्वावच्छिन्नाभावा एव निवेश्याः गत्यन्तराभावात्, तथाचाप्रामाण्यनिश्चयस्य [illegible] भावस्य प्रतिबन्धकतानवच्छेदकतया दृष्टान्तासिद्ध्यादिप्रसङ्ग इति ।

अथ धूमत्वावच्छिन्नविशेष्यकव्याप्त्यादिव्यतिरेकज्ञानत्वावच्छिन्नप्रकारताक [illegible] दिना धूमत्वावगाहिजातिमान् व्याप्त्यभाववान् इत्याद्यप्रतिबन्धकज्ञानसाधार [illegible] प्रतिबन्धकतायां व्यापकत्वमसम्भवीति चेन्न ? स्वावच्छेदकीभूतविषयताशालित्य [illegible] व्यापकतायाः विवक्षितत्वात् । स्वपदम् प्रतिबन्धकतापरम् । संशयेऽपि [illegible] नवच्छेदकविषयतासत्त्वात् न बाधप्रतिबन्धकतामादाय विशिष्टबुद्धौ व्य [illegible] इति [illegible] संग्रहकाराः ।

[illegible] र्थे गृहीते तादृशप्रतिबन्धकत्वस्य यद्व्यतिरेकज्ञाने तन्निश्चयजन्य प्रवृत्तौ सत्त्वेन साध्यसाधनयोर्वैयधिकरण्यं स्यादतो न तद्ग्राह्यमिति सूर साध्यसाधनयोर्वैयधिकरण्यमित्यादिना । यद्व्यतिरेकनिश्चयनिष्ठजन [illegible] जन्यत्वनिवेशे तादृशनिश्चयनिष्ठोपादानप्रत्यक्षत्वावच्छिन्नजनकतामादाय [illegible] साधनापत्तिस्तद्वारणाय निश्चयत्वावच्छिन्नजनकतानिवेशः । तथाच कार्यं प्रति ईश्वरज्ञानस्य न निश्चयत्वेन हेतुता किन्तूपादानप्रत्यक्षत्वेनेति न सिद्धसाधन इत्याह नवा ईश्वरीयेत्यादिना ।

सिद्धसाधनावसर एव नास्ति इत्याशङ्कते नचेति । प्रमाणादीनां ६

(दी०) ग्राह्यसंशयस्य[1] तु न प्रतिबन्धकतेतिभावः ।

(गा०) ननु अव्यभिचारव्यतिरेकरूपव्यभिचारस्य संशयो निश्चयश्च व्यभिचारग्रहप्रतिबन्धकः, व्यभिचारसंशयप्रतिबन्धकताया व्याप्तिग्रहोप मणिकारैरेवोक्तत्वात् । तथाच व्यभिचारज्ञानसामान्यप्रतिबध्येऽव्यभिचा निश्चयाजन्येऽव्यभिचारनिश्चये व्यभिचार इत्यत आह ग्राह्यसंशयस्येत अव्यभिचारव्यतिरेकसंशयरूपस्येत्यादिः । *न प्रतिबन्धकता* । व्याप्तिग्रह शेषः । तथाच व्यभिचारसंशयस्य व्याप्तिग्रहप्रतिबन्धकत्वाभिधानं मतविशे वलम्बनेनैवोक्तमिति न विरोध इति भावः ।

एतेन घटादिसंशयस्य घटादिग्रहाप्रतिबन्धकतया संशयपदेन घटादिनिश्चय हेतुके घटादिज्ञाने व्यभिचारं वारयतां मिश्राणाम् प्रतिबन्धकसंशया यद्भावत्वप्रकारकत्वनैयत्यविवक्षयाऽव्यभिचारनिश्चयाजन्यतन्निश्चये अव्य भिचाराभावत्वाप्रकारकव्यभिचारत्वप्रकारकसंशयसाधारणप्रतिबन्धकतावे व्यभिचारवारणमयुक्तमिति ध्वनितम् ।

(प्रभा) चेश्वरानङ्गीकारात् कथं सिद्धसाधनावसर इत्याशङ्काभिप्रायः । तन्मतमिति नैयायिकमतमित्यर्थः ।

यद्रूपावच्छिन्नप्रतियोगिताकाभावप्रकारतानिरूपितयद्धर्मावच्छिन्नविशेष्यताकज्ञानत्वव्या पकप्रतिबन्धकतानिरूपितप्रतिबध्यतावान् यः स तद्धर्मावच्छिन्नप्रकारतानिरूपित तद्धर्मावच्छिन्नविशेष्यताकनिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावान् भवतीत्येवं दीधि तिकारीयमते नियमाङ्गीकारे व्यभिचारापत्तिः, अव्यभिचारव्यतिरेकसंशय-अव्यभिचारव्य तिरेकनिश्चयनिष्ठतादृशप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वस्य व्याप्तिबुद्धौ सत्त्वेन त चाव्यभिचारनिश्चयजन्यत्वविरहात् इत्याशयेन शङ्कते नन्विति ।

व्यभिचारज्ञानसामान्यप्रतिबध्येति । एतावता हेतुसत्त्वं सूचितम् । अव्यभि चारनिश्चयाजन्य इति । एतेन स्वस्मिन् स्वजन्यत्वविरहात् साध्याभावः सूचितः । एते नेति । ग्राह्यसंशयस्याप्रतिबन्धकत्वेनेत्यर्थः । अत्रायमाशयः, मूलस्य यथाश्रुतमेवार्थं वर्णयत पक्षधरमिश्रेण यत्संशयप्रतिबध्यत्वे सति यद्व्यतिरेकनिश्चयप्रतिबध्यत्वस्य हेतुत्वमादृतम्, तत्र सत्यन्तदलानुपादाने घटव्यतिरेकनिश्चयप्रतिबध्ये घटविशिष्टबोधे घटनिश्चयजन्यत्वविर हाद् व्यभिचारस्स्यात् अतस्तदुपात्तमिति । अथ च मणिमन्त्रादिन्यायेन व्यभिचारसंशयस्य व्याप्तिबुद्धौ प्रतिबन्धकतामादृत्य यत्संशयपदेन अव्यभिचारसंशयमादाय तत्प्रतिबन्धकताकत्वस्य व्यभिचारात्मकाव्यभिचारव्यतिरेकनिश्चयप्रतिबन्धकताकत्वस्य च व्याप्तिबुद्धौ सत्त्वेन तत्र

---

१. तथासति अनुमितिमात्रोच्छेदापत्तेः । प्राचाम्मते साध्यसंशयस्यैव पक्षता

(गा०) घटादिसंशयस्य तन्निश्चय इव व्यभिचारसंशयस्यापि अव्यभि-
ारनिश्चये ग्राह्यसंशयत्वाविशेषेण अप्रतिबन्धकत्वौचित्यात् । यन्मतमव-
म्ब्य मणिकृतो व्यभिचारसंशयप्रतिबन्धकत्वाभिधानम्, घटादिसंशये
न्निश्चयप्रतिबन्धकताया अपि तन्मतसिद्धत्वात्। अत्र *मिश्रानुयायिन*:—
यभिचारज्ञानस्य व्याप्तिनिश्चये मणिमन्त्रादिवत् पृथगेव प्रतिबन्धकता, नतु
ाह्याभावज्ञानतया,

(भा) अव्यभिचारनिश्चयजन्यत्वविरहात् व्यभिचारमाशंक्य यदभावत्वप्रकारतानैयत्यम्,
तिबन्धकसंशयादौ निवेशितम् । तदप्ययुक्तमेव, घटसंशयादिवद् व्यभिचारसंशयस्यापि
ह्यसंशयरूपतया व्याप्तिबुद्धावप्रतिबन्धकत्वेनैव व्यभिचारवारणसम्भवादिति दीधितेराशयं
ष्टय तिघटादिसंशयस्येत्यादिना । अव्यभिचारज्ञानम्प्रति अव्यभिचारवान्न
इत्याकारकाव्यभिचारसंशयस्य अव्यभिचाराभाववान् इत्याकारकाव्यभिचार-
ातिरेकनिश्चयस्य च यथा प्रतिबन्धकत्वम् तद्वत् व्यभिचारवान्नवा, व्यभिचारवान् इति
शयनिश्चययोः प्रतिबन्धकत्वमनुभवसिद्धम् । एवञ्च लाघवात् व्यभिचारत्वावच्छि-
प्रकारताशालिज्ञानत्वेनैव प्रतिबन्धकतया व्यभिचाराभावाभावप्रकारकसंशयनिष्ठप्रति-
न्धकतायाः व्यभिचाराभावत्वप्रकारकत्वनैयत्याभावात् यत्संशयपदेन अव्यभिचार-
शयस्य यद्व्यतिरेकनिश्चयपदेन अव्यभिचारव्यतिरेकनिश्चयस्य च धर्तुमशक्यतया
व्यभिचार इति भावः ।

यत्संशयेत्यादिव्याप्तौ घटवत्त्वबुद्धौ व्यभिचारवारणाय संशयपदस्य सार्थकत्वं
वता मिश्रेण घटादिग्राह्यसंशयस्य प्रतिबन्धकता न स्वीक्रियते व्यभिचारसंशयस्य च
तिबन्धकता स्वीक्रियते, तन्न युज्यते १ घटादिसंशयवत् व्यभिचारसंशयस्यापि ग्राह्यसंशय-
पतया एकत्र ग्राह्यसंशये प्रतिबन्धकत्वमपरत्र च ग्राह्यसंशये प्रतिबन्धकत्वाभाव इति
र्द्धजरतीयन्यायोऽनुचितः इत्याक्षेपसमाधानाय व्यभिचारसंशयस्य मणिमन्त्रादिन्यायेना-
भवसिद्धम् प्रतिबन्धकत्वम् इति मिश्राणां तात्पर्यं दर्शयितुम् अत्र[1] मिश्रानुयायिन
ति । तथाचायमाशयः, प्रतिबन्धकत्वं हि लोके द्विविधम् ग्राह्याभावत्वावच्छिन्नविषय-
ाशालिनिश्चयत्वेनैकम् यथा ह्रदधर्मिकवह्निमत्त्वबुद्धौ वह्न्याभावत्वावच्छिन्नविषयताशालि-
िश्चयत्वेन । तत्तद्वस्तुगतासाधारणधर्मेण प्रतिबन्धकत्वमपरम् । यथा दाहम्प्रति मणि-

---

१. ननु व्यभिचारज्ञानस्य ग्राह्याभावविषयकनिश्चयत्वेन प्रतिबन्धकत्वस्वीकर्तृणां
ोधितिकाराणाम् मते अत्यन्ताभावघटितव्याप्तिज्ञानकाले अन्योन्याभावगर्भ-
याप्तिज्ञानोदयेनानुमित्यापत्तिरिति चेन्न ? वन्हौ साध्याभाववद्वृत्तित्वरूपव्यभि-
ारग्रहकाले तस्य साध्यवदन्यवृत्तित्वरूपव्यभिचारानुमापकतया, तादृशव्यभिचारानु-
मितेरेव तदानीम अन्योन्याभावगर्भव्याप्तिग्रहविरोधित्वसम्भवात् । नचैवं तादृशा-

(गा०) कथमन्यथाऽत्यन्ताभावगर्भव्यभिचारग्रहस्य अन्योन्याभावगर्भव्याप्तिधीविरोधिता, ग्राह्याभावावगाहितया प्रतिबन्धकत्वमेव च ग्राह्यसंशयव्यावृत्तमिति व्यभिचारसंशयप्रतिबन्धकत्वं युक्तमेव, स्वप्रतिबन्धकसंशयव्यतिरेकनिश्चययोर्यद्भावत्वप्रकारतानियतत्वविशेषणं वैकल्पिकम्, अव्यभिचाराभावत्वप्रकारकत्वस्य व्याप्तिनिश्चयप्रतिबन्धके व्यभिचारनिश्चये संशये चानियमात्, एकत्र तन्निवेशेनैव अव्यभिचारसंशयतद्व्यतिरेकनिश्चयप्रतिबध्ये तन्निश्चयाजन्ये व्याप्तिनिश्चये व्यभिचारवारणासम्भवात्।

(प्रभा मन्त्रादेः मणित्वेन विजातीयमन्त्रत्वेन च। एवं च साध्याभाववद्वृत्तिहेतुरिति व्यभिचारज्ञानस्यापि मणिमन्त्रादिवत् साध्याभाववद्वृत्तित्वविषयकनिश्चयत्वेनैव व्याप्तिबुद्धौ प्रतिबन्धकत्वम् नतु साध्याभाववद्वृत्तित्वाभावरूपग्राह्याभावविषयकत्वेन। अन्यथा साध्याभाववदवृत्तित्वरूपव्याप्तिबुद्धेरेव ग्राह्याभावावगाहित्वेन तामप्रत्येव तादृशव्यभिचारनिश्चयस्य विरोधितया साध्यवदन्यावृत्तित्वादिरूपापरव्याप्तिचतुष्टयबुद्धिम्प्रति अविरोधितया वह्नौ धूमाभाववद्वृत्तित्वरूपव्यभिचारग्रहकालेऽपि वह्नौ साध्यवदन्यावृत्तित्वादिरूपान्योन्याभावगर्भव्याप्तिबुध्युदयापत्तेः, ततोऽनुमित्यापत्तेश्च।

ननु मिश्राणाम् मतेऽपि यथाश्रुत एव मूलग्रन्थो नतु व्यतिरेकपदव्यत्यासः, तथा च यद्धर्मकयत्संशयत्वव्यापिका सती यद्व्यतिरेकनिश्चयत्वव्यापिका या प्रतिबन्धकता तन्निरूपितप्रतिबध्यतावद् यद् भवति तत् तद्धर्मिकनिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावद् भवतीति व्याप्तिस्वरूपम् फलितम्।

ननूक्तनियमे व्याप्तिनिश्चये व्यभिचारः, अव्यभिचारसंशयप्रतिबध्यत्वस्य अव्यभिचारव्यतिरेकनिश्चयप्रतिबध्यत्वस्य च व्याप्तिनिश्चये सत्त्वेन तत्र व्यभिचारनिश्चयजन्यत्वविरहात् इति चेत्? न, यदभावत्वप्रकारतानियतत्वस्य यत्संशययद्व्यतिरेकनिश्चययोः वैकल्पिकविशेषणत्वाभ्युपगमात् इत्याशयेनाह वैकल्पिकम् इति।

व्यभिचारवारणासम्भवादिति। अथात्र यद्ज्ञानप्रतिबध्यत्वमात्रस्यैव हेतुत्वं कुतो नोक्तम् किं विशेष्यीभूतयद्व्यतिरेकनिश्चयप्रतिबध्यत्वनिवेशेन? तथानुमितौ व्यभिचारः वह्निनिश्चयाजन्यायामनुमितौ वह्निनिश्चयप्रतिबध्यत्वसत्त्वादिति वाच्यम्, मिश्रमते अनुमितिशाब्दबोधप्रतिबन्धके समानाकारकसिद्धिशाब्दबोधादौ स्वप्रतिबन्धकयद्ज्ञानस्वव्यापकयदभावत्वप्रकारताकत्वविरहादेवादोषात्। इति चेन्न? यादृशस्थले सिद्धिर्न जाता तत्रानुमितौ बाधमादाय व्यभिचारवारणाय संशयत्वोपादानात्। अथवा यत्र सामानाधिकरण्येन समूहालम्बनात्मकसिद्धिबाधनियमः तत्र सामानाधिकरण्येनानुमितौ व्यभिचारः, तत्र सामानाधिकरण्येन बाधनिश्चयस्याविरोधित्वेऽपि सिद्धेर्विरोधित्वात्, एवं व्याप्तिप्रमात्वयोः संशये यदभावत्वप्रकारकत्वनियमेऽपि तन्निश्चयस्यातथात्वात् साधनाप्रसिद्धिश्च स्यादिति ध्येयम्।

(प्रभा) व्यभिचारापत्तेः । एवं संशये यद्धर्मावच्छिन्नविशेष्यतानिरूपकत्वमपि देयम् । अन्यथा निर्धर्मितावच्छेदकविभिन्नधर्मितावच्छेदककज्ञानस्याप्रतिबन्धकतया यत्संशयत्वव्यापकप्रतिबन्धकत्वाप्रसिद्ध्या साधनाप्रसिद्धेः ।

नचैवम् अव्यभिचारनिश्चये व्यभिचारवारणाय उपात्तस्य यदभावत्वप्रकारकत्वविशेषणस्य वैयर्थ्यम् सर्वासामेवाव्यभिचारनिश्चयनिरूपितप्रतिबन्धकतानां अव्यभिचारि न वा ? व्यभिचारि न वा ? इत्यादिसंशयवृत्तिविभिन्नरूपावच्छिन्नानां चालनीन्यायेन तादृशसंशयत्वाव्यापकत्वादिति वाच्यम्, स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्वसामानाधिकरण्योभयसम्बन्धेन ज्ञानीयविषयितात्रिशिष्टयद्रूपावच्छिन्नविषयित्वरूपसंशयत्वविशिष्टप्रतिबन्धकत्वस्य विवक्षितत्वात् । संशयवैशि व्यापकतासम्बन्धेन ।

नच यदभावत्वप्रकारतानैयत्यविशेषणसार्थकतायै एतादृशविवक्षानुचितेति वाच्यम्, धूमो वह्निव्याप्यो न वा ? वह्निमानाधेयत्वाभाववान् वा इत्याकारकसंशयसाधारणैकप्रतिबन्धकत्वाभावेन अनुमित्यादिप्रतिबन्धकतानामपि तादृशसंशयत्वाव्यापकत्वेन दृष्टान्तासिद्ध्यादिवारणायैव एतादृशविवक्षणस्यावश्यकत्वात् । स्वप्रतिबन्धकत्वं संशयेऽवश्यं वाच्यमन्यथोक्तरीत्या संशयत्वव्यापकयदभावत्वप्रकारकत्वाप्रसिद्ध्या दृष्टान्तासिद्ध्यादिःस्यात् ।

केचित्तु व्याप्तिमद्भेदकोटिकसंशये प्रतिबन्धकत्वास्वीकारपक्षे तदन्तर्भावेण यदभावत्वप्रकारकत्वनैयत्यविरहेण दृष्टान्तासिद्धिरतस्तन्निवेश इत्याहुः । तादृशसंशयस्वीकारे तत्र प्रतिबन्धकत्वास्वीकारस्यानुभवविरोधात् । प्रतिबन्धकत्वास्वीकारेऽपि पक्षधर्मत्वाभावविषयकव्याप्तिमद्भेदकोटिकसंशये प्रतिबन्धकत्वसत्त्वेन तत्र च यदभावत्वप्रकारकत्वनैयत्यविरहेण तद्दोषतादवस्थ्याच्च । अव्यभिचारनिश्चये व्यभिचारवारणाय यत्संशयत्वव्यापकत्वनिवेशः, अन्यथाऽव्यभिचारवान्नवेति संशयान्तर्भावेण यत्संशयत्वसामानाधिकरण्यस्य यदभावत्वाप्रकारताकत्वे सत्त्वात् तद्दोषतादवस्थ्यात् । व्यभिचारसंशयप्रतिबध्यत्वे सति स्व (अव्यभिचारनिश्चय) प्रतिबन्धकव्यभिचारसंशयत्वव्यापकव्यभिचाराभावत्वप्रकारताके अव्यभिचारनिश्चये व्यभिचारनिश्चयाजन्ये व्यभिचारवारणाय यद्व्यतिरेकनिश्चयप्रतिबध्यत्वोपादानमिति तूक्तप्रायम् ।

आचार्यास्तु—ननु यत्संशयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वे सति यद्व्यतिरेकनिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वस्यैव स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशपुरस्सरं हेतुत्वमस्तु तत एव च समूहालम्बनज्ञानमादाय व्यभिचारवारणसम्भवादितिचेन्न ? पर्वतो वह्न्यभाववानितिबुद्धिम्प्रति पर्वतो महानसीयवह्निमान् पर्वतः पर्वतीयवह्निमान् इति सामान्यघटितविशेषवत्तानिश्चयस्यापि प्रतिबन्धकत्वेन तत्तद्वह्नित्वावच्छिन्नविषयताशालिनिश्चयत्वेन प्रतिबन्धकत्वे गौरवं स्यात्तो वह्नित्वावच्छिन्नविषयताशालिनिश्चयत्वेन, एवम् पर्वतो वह्निमानित्यनुमितौ धूमो वह्निव्याप्यो नवा ? धूमो वह्निव्याप्यभाववान् इतिज्ञानद्वयस्यैव प्रतिबन्धकत्वेन व्याप्तित्वावच्छिन्नविषयताक-

(प्रभा) इत्थञ्च व्याप्तित्वावच्छिन्नविषयताकसंशयत्वे प्रतिबन्धकत्वीयस्वरूपसम्बन्धरूपाव
च्छेदकत्वाभावात् तादृशसंशयत्वावच्छिन्नत्वस्य प्रतिबन्धकतायामसत्त्वादिति । ननु व्यभिचार
धूम इति निश्चयस्यापि प्रतिबन्धकतया तस्य च व्यभिचारत्वावच्छिन्नविषयताशालिज्ञानत्वे
प्रतिबन्धकताया व्याप्त्यभाववान् धूम इति ज्ञानस्यापि लाघवाद् व्यभिचारत्वावच्छिन्नविष
यताशालिज्ञानत्वेनैव प्रतिबन्धकतया व्याप्त्यभाववत्त्वावच्छिन्नविषयत्वस्यापि न प्रतिबन्धक
तावच्छेदकत्वमिति चेन्न ? व्यभिचारस्य व्याप्त्यभावरूपत्वाभावात् । अन्यथा तस्य
हेत्वाभासान्तरता न स्यात् व्याप्यत्वासिद्धावन्तर्भावात् । अत एव मणिकृता "नन्वे
व्यभिचारस्य व्याप्त्यभाववत्त्वेनासिद्धिः स्यात् इत्याशङ्क्य 'साध्यसामानाधिकरण्य
हि व्याप्तिः, साध्याभाववद्वृत्तित्वं हि व्यभिचारः" इत्युक्तमिति वदन्ति ।

पण्डितप्रवरास्तु एतत्कल्पे यद्धर्मावच्छिन्नविशेष्यकस्वप्रतिबन्धकीभूतयद्रूपावच्छिन्न
व्यतिरेकनिश्चयत्वे सति यद्रूपावच्छिन्नव्यतिरेकत्वावच्छिन्नप्रकारतानियतस्वप्रतिबन्धकयद्धर्माव
च्छिन्नविशेष्यकयद्रूपावच्छिन्नकोटिकसंशयसामान्यकं यद् भवति तत् तद्धर्मावच्छिन्नविशेष्यक
तद्रूपावच्छिन्नवत्त्वनिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावद् भवत्येवेति व्याप्तिशरीरम् ।
यद्व्यतिरेकनिश्चये यदभावत्वप्रकारतानियतत्वकल्पे तु स्वप्रतिबन्धकयद्रू
पावच्छिन्नविशेष्यकयद्रूपावच्छिन्नकोटिकसंशयसामान्यप्रतिबध्यत्वे सति यद्धर्मावच्छिन्ना
भावत्वप्रकारतानियतयद्रूपावच्छिन्नाभावावगाहिताप्रयुक्तप्रतिबन्धकताकयद्धर्मावच्छिन्नविशेष्य-
कयद्रूपावच्छिन्नव्यतिरेकनिश्चयसामान्यकं यद् भवति तत् तद्धर्मावच्छिन्नविशेष्यकतद्रू-
पावच्छिन्नवत्तानिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावद् भवतीति व्याप्त्याकारः ।

अथैतत्कल्पे पक्षधर्मताविरहत्वेन व्याप्त्यभावावगाहिधूमः पर्वतवृत्तित्वाभाववानिति
व्याप्त्यभावावगाहिताप्रयुक्तानुमितिप्रतिबन्धकताकनिश्चये व्याप्त्यभावत्वप्रकारताकत्वविर-
हाद् यदभावावगाहिताप्रयुक्तप्रतिबन्धकतानिवेशेऽपि न दृष्टान्तासिद्धिवारणमिति । नच
यदभावावगाहिताप्रयुक्तत्वपदेन यन्निष्ठप्रतियोगित्वसंसर्गावच्छिन्नप्रकारतानिरूपिताभावनिष्ठ-
प्रकारताप्रयुक्तत्वमेव विवक्षणीयम्, उक्तनिश्चयप्रतिबन्धकतायां व्याप्तिनिष्ठप्रकारतानिरू-
पिताभावनिष्ठप्रकारताप्रयुक्तत्वविरहादेव तद्वारणमिति वाच्यम्, पक्षधर्मतात्वेन व्याप्त्यवगा-
ह्युक्तनिश्चयमादाय तद्दोषस्यैव सत्त्वात् ।

नच यद्रूपावच्छिन्नप्रकारतानिरूपिताभावनिष्ठप्रकारताप्रयुक्तत्वविवक्षया तद् वारणीय-
मिति वाच्यम्, तथा निवेशे शुद्धव्यभिचारनिश्चयेऽव्यभिचारत्वावच्छिन्नविषयतानिरूपिता-
भावप्रकारताप्रयुक्तप्रतिबन्धकत्वासत्त्वात् निरुक्तप्रतिबन्धकताको योऽव्यभिचाराभावृवा-
निति निश्चयस्तत्राव्यभिचाराभावत्वप्रकारतानियतत्वसत्त्वादव्यभिचारनिश्चयाजन्येऽव्यभिचार-
निश्चये व्यभिचारापत्तेः । अतो यथाश्रुतयदभावावगाहिताप्रयुक्तत्वस्यैव
निवेशनीयतया प्रागुक्तदोषवारणासम्भवात्, नैवम् ? यदभावावगाहिताप्रयुक्तप्रतिबन्धकता-

(प्रभा) प्रतिबन्धकीभूतभ्रमभिन्नव्याप्तिव्यतिरेकनिश्चयाप्रसिद्धया दृष्टान्तासिद्धिवारणाय मुख्यविशेष्यताभिन्नत्वघटिततदर्थानुसरणम्। तथाच पत्वृत्तित्वाभावादिना व्याप्त्यभावावगाहिनिश्चये निरुक्तभ्रमभिन्नत्वविरहात् न तमादाय दृष्टान्तासिद्धिः। नच तथापि वह्न्यभावाभाववन्निरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावरूपवह्न्यभावव्याप्यत्वादिना वह्निव्याप्त्यभावावगाहिनिरुक्तवह्निव्याप्तिव्यतिरेकावगाहिताप्रयुक्तानुमितिप्रतिबन्धकताशालिनिरुक्तभ्रमभिन्ने पर्वतो वह्न्यभावव्याप्यवानितिनिश्चये वह्निव्याप्त्यभावत्वप्रकारताकत्वविरहात् तद्दोषतादवस्थ्यमिति वाच्यम्, यदभावावगाहिताप्रयुक्तत्वमित्यत्रावगाहितायां विशेषणताविशेषसम्बन्धावच्छिन्नत्वनिवेशादेव तद्वारणसम्भवात्। अथवा धूमत्वावच्छिन्नविशेष्यकनिरुक्तस्वप्रतिबन्धकताकव्यतिरेकनिश्चयसामान्ये व्याप्त्यभावत्वप्रकारतानियतत्वसत्त्वात् प्रकृतेऽपि धूमत्वावच्छिन्नविशेष्यकव्याप्तिनिश्चयजन्यत्वात् दृष्टान्तघटकतया पर्वतविशेष्यकतादृशनिश्चये तदसत्त्वेऽपि क्षत्यभावात्। तथा च तद्धर्मावच्छिन्नविशेष्यतानिरूपितयदभावावगाहिताप्रयुक्तत्वमेव निवेशनीयमिति न समूहालम्बनज्ञानमादायोक्तदोष इति मन्तव्यम्।

अथ घटादिव्यतिरेकनिश्चयप्रतिबध्ये घटादिविशिष्टबोधे घटादिनिश्चयाजन्ये व्यभिचारवारणाय यत्संशयप्रतिबध्यत्वं निवेशनीयम्, तन्न सङ्गच्छते, घटवद्वृत्तित्वेन घटाभावावगाहिनि घटाभावावगाहिताप्रयुक्तस्वप्रतिबन्धकताशालिनि च घटवद्वृत्तिमद्भूतलमितिनिश्चये घटाभावत्वप्रकारतानैयत्यविरहादेव व्यभिचारवारणसम्भवाद् यत्संशयप्रतिबध्यत्वनिवेशो व्यर्थः। नच गगनादिनिश्चयाजन्ये गगनादिव्यतिरेकनिश्चयप्रतिबध्ये गगनादिविशिष्टबोधे व्यभिचारवारणाय तन्निवेश आवश्यकः तत्र गगनादिमद्वृत्तित्वेन गगनाभावावगाहिनिश्चयस्य प्रागुक्तभ्रमभिन्नत्वविरहादेव तादृशनिश्चयमादाय व्यभिचारवारणासम्भवादिति वाच्यम्? प्रमेयवान् गगनाभाववान् प्रमेयवाँश्च देश इति प्रमेयत्वेन गगनाभावावगाहिताप्रयुक्तस्वप्रतिबन्धकताशालिनि केवलप्रमेयवान् देश इति निश्चये गगनाभावत्वप्रकारतानैयत्यविरहादेव तत्रापि व्यभिचारवारणसम्भवादिति चेन्न? अनुमितिम्प्रति व्याप्तिसंशयव्याप्तिव्यतिरेकनिश्चययोरिव व्याप्त्यभावावच्छेदकत्वेन गृहीतधर्मवत्तानिश्चयस्यापि तुल्ययुक्त्या प्रतिबन्धकतया प्रमेयवान् व्याप्त्यभाववानितिनिश्चयकालीनं यद् व्याप्त्यभावावगाहिताप्रयुक्तस्वप्रतिबन्धकताशालिव्याप्त्यभावत्वप्रकारताशून्यप्रमेयत्वेन व्याप्त्यभावावगाहिप्रमेयवाँश्च धूम इतिनिश्चयात्मकं ज्ञानं तदा दृष्टान्तासिद्धिपरिहाराय निरुक्तस्वप्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशस्यावश्यकतया तत एव व्यावर्त्तकधर्मदर्शनविधया प्रतिबन्धकत्ववारणसम्भवात्। गगनादिनिश्चयाजन्ये गगनादिव्यतिरेकनिश्चयप्रतिबध्ये गगनादिविशिष्टबोधे व्यभिचारवारणाय यत्संशयप्रतिबध्यत्वनिवेशस्यावश्यकत्वात्। नच व्याप्त्यभावावच्छेदकत्वेन गृहीतधर्मनिश्चयस्यानुमितिम् प्रति प्रतिबन्धकत्वस्वीकारे तुल्ययुक्त्या [illegible]

(गा०) यद्यपि प्रमेयत्वादिना व्याप्त्यभावावगाहिनि पक्षधर्मत्वाभावत्वाद्यवच्छिन्नविषयकज्ञानेऽनुमितिप्रतिबन्धके व्याप्त्यभावत्वादिप्रकारकत्वाभावात् दृष्टान्तासिद्ध्यादिवारणाय यदभावावगाहिताप्रयुक्तप्रतिबन्धकताशालिसंशयादौ यदभावत्वप्रकारतानैयत्यं विवक्षणीयम् । तथा च व्यभिचारसंशयप्रतिबध्ये तद्व्यतिरेकनिश्चये व्यभिचारनिश्चयाजन्ये व्यतिरेकनिश्चयपदोपादानव्यावृत्त्यसङ्गतिः, अव्यभिचारनिश्चयम् प्रति प्रतिबन्धकताया व्यभिचाराभावावगाहित्वाप्रयुक्ततया यत्पदेन व्यभिचारोपादानासम्भवात् , तथापि व्यतिरेकनिश्चये यदभावत्वप्रकारतानियतत्वनिवेशपक्ष एव प्रतिबन्धकतायां यदभावावगाहिताप्रयुक्तत्वं निवेशनीयम् , नतु संशये तद्विशेषणनिवेशपक्षे, अनुमित्यादिप्रतिबन्धकव्याप्त्यादिसंशये व्याप्त्यभावत्वाप्रकारकत्वायोगेन दृष्टान्तासिद्ध्याद्यनवकाशात् । तथाच सति व्यभिचारावगाहिताप्रयुक्तानुमिति प्रतिबन्धकतावति व्यभिचारसंशये व्यभिचाराभावत्वप्रकारतानैयत्येनैव यत्पदेन व्यभिचारोपादानसम्भवात् व्यतिरेकनिश्चयोपादानव्यावृत्तिश्शक्यते संगमयितुम् ,

---

(प्रभा) मादाय दृष्टान्तासिद्धितादवस्थ्यमिति वाच्यम् ? तद्वद्वृत्तिधर्मवत्तानिश्चयस्यापि निश्चयविशिष्टनिश्चयत्वेनैव प्रतिबन्धकत्वम् नतु निरूप्यनिरूपकभावापन्नविषयताशालिनिश्चयत्वेन, एवञ्च प्रोक्तविशेषणेनैव तस्यापि वारणसम्भवात् ।

अथवा यदभावावगाहितायाम् अभावत्वावच्छिन्नावच्छेदकत्वानिरूपकत्वनिवेशेनैव तद्वारणसम्भवादिति विभावनीयम् ।

ननूक्तरीत्या यदभावत्वप्रकारतानियतत्वनिवेशे यद्व्यतिरेकनिश्चयप्रतिबध्यत्वदलोपादानं व्यर्थं स्यात् तथाहि प्रमेयवान् धूमः पर्वतावृत्तिरित्याकारकनिश्चयेऽपि अनुमितिप्रतिबन्धकतायाःसत्त्वेन तत्र च व्याप्त्यभावत्वप्रकारताकत्वाभावेन यत्पदेन व्याप्तेरपि धर्त्तुमशक्यत्वात् दृष्टान्तासिद्धिरिति तद्वारणाय प्रतिबन्धकतायां यदभावावगाहिताप्रयुक्तत्वमवश्यं निवेशनीयम् , एवञ्च व्यभिचारसंशयनिष्ठप्रतिबन्धकताया व्यभिचाराभावविषयिताप्रयुक्तत्वाभावेन यत्पदेन व्यभिचारस्य धर्त्तुं शक्यतया व्यभिचारसंशयप्रतिबध्ये व्याप्तिज्ञाने व्यभिचारनिश्चयाजन्ये व्यभिचारवारणसम्भवेन यद्व्यतिरेकनिश्चयपदोपादानस्य निष्प्रयोजनत्वात् इत्याशयेन शङ्कते **यद्यपीत्यादिना** । **दृष्टान्तासिद्ध्या**दीति । आदिना स्वरूपासिद्धिपरिग्रहः । प्रमेयत्वेन प्रामाण्याभावावगाहिनि कृत्यसाध्यत्वादिनिश्चये प्रवृत्तिप्रतिबन्धके प्रामाण्याभावत्वप्रकारताकत्वनियतप्रामाण्यव्यतिरेकनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यत्वविरहादिति । समाधत्ते **तथापीत्यादिना** । अत्रायमाशयः, व्यतिरेकनिश्चये यथोक्तयदभावत्वप्रकारतानियतत्वविशेषणनिवेशपक्षे एव यदभावावगाहिताप्रयुक्तत्वविशेषणं देयं नतु संशये तन्निवेशपक्षे, प्रयोजनविरहात । संशये यदभाव-

(चि० म०) तन्निश्चयस्तद्धेतुः अनुमितौ व्याप्तेरिवेति वाच्यम्,

(दी०) **तन्निश्चय** इति। तद्व्यतिरेकज्ञानमात्रस्य प्रतिबन्धकत्वे तत्संशयात् कार्यानुत्पत्तेस्तन्निश्चयत्वेनैव तद्धेतुत्वात्।

(गा०) यदभावत्वाप्रकारकज्ञाननिष्ठयदभावावगाहिताप्रयुक्तप्रतिबन्धक

(प्रभा) यद्व्यतिरेकनिश्चयपदोपादानं सार्थकमेवेति। **अनुमित्यादीति**। आदिना प्रवृत्तिपरिग्रहः। **व्याप्त्यभावत्वाप्रकारकत्वायोगेनेति**। इदमुपलक्षणम्, प्रामाण्याभावत्वाप्रकारकत्वायोगेनेत्यपि बोध्यम्। **दृष्टान्तासिद्ध्याद्यनवकाशादिति**। आदिना स्वरूपासिद्धिपरिग्रहः। अनुमितौ व्याप्त्यभावत्वप्रकारतानियतव्याप्तिसंशयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यत्वरूपहेतोः सत्त्वान्न दृष्टान्तासिद्धिः।

एवम् प्रवृत्तौ प्रामाण्याभावत्वप्रकारतानियतप्रामाण्यसंशयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यत्वरूपहेतोः सत्त्वान्न स्वरूपासिद्धिरिति भावः[1]।

यदभावत्वाप्रकारकेति। पूर्वोक्तरीत्या नैयत्यनिवेशे गौरवमाशंक्याह यदभावत्वेत्यादि। **यदभावत्वाप्रकारकज्ञाननिष्ठेति** अवगाहिताविशेषणम्। यदभावत्वानव-

१ ननु प्रमेयत्वेन व्याप्त्यभावावगाहिपक्षधर्मत्वावच्छिन्नविषयकेऽनुमितिप्रतिबन्धकज्ञाने व्याप्त्यभावत्वप्रकारकत्वनैयत्याभावात् दृष्टान्तासिद्धिवारणाय प्रतिबन्धकतायां यदभावावगाहिताप्रयुक्तत्वनिवेशनमावश्यकम्। परन्तु संशये यदभावत्वप्रकारतानैयत्यनिवेशपक्षे दृष्टान्तासिद्ध्याद्यनवकाशेन यदभावावगाहिताप्रयुक्तत्वनिवेशनमनर्थकम्। एवञ्च व्यभिचारसंशयप्रतिबध्ये व्याप्तिनिश्चये व्यभिचारवारणार्थम् व्यतिरेकनिश्चयोपादानं सार्थकमिति यदुक्तन्तन्न सङ्गच्छते, संशये यदभावत्वप्रकारतानैयत्यनिवेशकल्पेऽपि तद्व्यक्तित्वेन व्याप्त्यवगाहितद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावत्वेन व्याप्त्यभावावगाहिव्याप्त्यंशे संशयात्मकपक्षधर्मत्वाभावत्वावच्छिन्नविषयकनिश्चये पक्षधर्मत्वाभावावगाहिताप्रयुक्तानुमितिप्रतिबन्धकताके व्याप्त्यभावत्वप्रकारताकत्वनैयत्यविरहाद् दृष्टान्तासिद्धिवारणाय अवश्यं संशयप्रतिबन्धकतायामपि यदभावावगाहिताप्रयुक्तत्वं निवेशनीयम्। तथाच व्यभिचारसंशयप्रतिबध्यव्याप्तिनिश्चये न व्यभिचारः। तत्प्रतिबन्धकतायां व्यभिचाराभावावगाहिताप्रयुक्तत्वाभावादेव यदभावावगाहिताप्रयुक्तस्वप्रतिबन्धकताशालियदभावत्वप्रकारतानियतसंशयप्रतिबध्यत्वरूपहेतोरभावात् इति कथं यद्व्यतिरेकनिनिश्चयोपादानव्यावृत्तिसङ्गतिरिति चेन्न ? यत्संशये प्रकारतावच्छेदकांशे भ्रमभिन्नत्वनिवेशेनैव तद्दोषवारणात्। तथाच प्रकारतावच्छेदकांशे भ्रमभिन्नस्वप्रतिबन्धकयत्संशयत्वव्यापकयदभावत्वप्रकारताकत्वे सति यदभावावगाहिताप्रयुक्तस्वप्रतिबन्धकताशालियद्व्यतिरेकनिश्चयत्वव्यापकयदभावत्वप्रकारताको यः स तन्निश्चयजन्य

(प्रभा) च्छिन्नेति तदर्थः। तथाच यदभावत्वाप्रकारकज्ञाननिष्ठयदभावावगाहिताप्रयुक्तप्रतिबन्धकतानिरूपितप्रतिबध्यतावद् यद् यत् तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत् सति यत्संशयत्वव्यापिका सती यद्व्यतिरेकनिश्चयत्वव्यापिका या प्रतिबन्धकता तन्निरूपितप्रतिबध्यतावद् यत् तत् तन्निश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावद् भवतीति व्याप्तिस्वरूपम् फलितमित्यवगन्तव्यम्। तथाच व्याप्त्यभावत्वाप्रकारकं तद्व्यक्तित्वेन व्याप्त्यभावावगाहि यद् ज्ञानम् तद्व्यक्तिमान् धूम इत्याकारकं तादृशज्ञाननिष्ठा या व्याप्त्यभावावगाहिता तत्प्रयुक्तप्रतिबन्धकतानिरूपितप्रतिबध्यतावत् यत् तद्व्यक्त्यभाववान् धूम इत्याकारकं ज्ञानम् तद्भिन्नत्वस्यानुमितौ सत्त्वेन सत्यन्तदलस्य व्याप्तिसंशयव्याप्तिव्यतिरेकनिश्चयत्वव्यापकप्रतिबन्धकताकत्वस्य च तत्र सत्त्वेन विशेष्यदलस्य च सत्त्वात् दृष्टान्तासिद्धिः। एवम् प्रमात्वाभावत्वाप्रकारकप्रमात्वाभावव्यक्तित्वावच्छिन्नप्रकारकं यत् ज्ञानम् तद्व्यक्तिमत्प्रयोजनवत्त्वज्ञानं तन्निष्ठप्रमात्वाभावविषयित्वाप्रयुक्तप्रतिबन्धकतानिरूपितप्रतिबध्यतावत् यत् प्रमात्वाभावव्यक्तित्वावच्छिन्नाभावविषयकं तद्व्यक्त्यभाववत् प्रयोजनवत्त्वज्ञानं तदन्यत्वस्य च प्रवृत्तौ सत्त्वेन तस्याः सत्यन्तदलाक्रान्ततया प्रमात्वसंशयप्रमात्वव्यतिरेकनिश्चयप्रतिबन्धकतानिरूपितप्रतिबध्यत्वस्य सत्त्वेन विशेष्यादलाक्रान्ततया न स्वरूपासिद्धिः।

अत्र यदभावत्वाप्रकारकज्ञाननिष्ठत्वस्य यदभावावगाहितायामविशेषणत्वे दृष्टान्तासिद्धिव्याप्त्यभावत्वेन व्याप्त्यभावावगाहिज्ञानीयव्याप्त्यभावावगाहिताप्रयुक्तप्रतिबन्धकताकत्वस्यैवानुमितौ सत्त्वेन तस्याः सत्यन्तदलाक्रान्ततया यत्पदेन व्याप्तेर्धर्तुमशक्यत्वात् अतस्तन्निवेशः। एवम् यदभावावगाहिताप्रयुक्तत्वानिवेशे पुनर्दृष्टान्तासिद्धिः व्याप्त्यभावत्वाप्रकारकं यत् प्रमेयत्वेन व्याप्त्यभावावगाहिप्रमेयवान् धूमः पर्वतावृत्तिरित्याकारकं ज्ञानं तन्निष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यत्वस्यैवानुमितौ सत्त्वेन तस्याः सत्यन्तदलानाक्रान्ततया यत्पदेन व्याप्तेर्धर्तुमशक्यत्वात्। नच यदभावत्वप्रकारकज्ञाननिष्ठयदभावावगाहिताप्रयुक्तप्रतिबन्धकताकत्वे सतीत्येव कुतो नोक्तम् किन्नञ्द्वयोपादानेनेति वाच्यम् तथा सति यत्पदेनाव्यभिचारस्याप्युपादानसम्भवात् व्याप्तिनिश्चये व्यभिचारापत्तेः। तथाहि अव्यभिचाराभावत्वप्रकारकाव्यभिचाराभावत्वेनाव्यभिचाराभावावगाहिज्ञाननिष्ठाव्यभिचाराभावविषयिताप्रयुक्तप्रतिबन्धकताकत्वस्य व्याप्तिनिश्चये सत्त्वेन सत्यन्तदलस्य अव्यभिचारसंशय-अव्यभिचारव्यतिरेकनिश्चयप्रतिबन्धकतानिरूपितप्रतिबध्यत्वस्य च सत्त्वेन विशेष्यदलस्यापि सत्त्वात् तत्रापि व्यभिचारनिश्चयजन्यत्वविरहात्। नञ्द्वयोपादाने तु नोक्तव्यभिचारावसरः। अव्यभिचाराभावत्वाप्रकारकं यद् व्यभिचारत्वेन व्यभिचारज्ञानं तदीयव्यभिचाराभावविषयिताप्रयुक्तप्रतिबन्धकतानिरूपितप्रतिबध्यत्वस्य च तत्र सत्त्वेन तदन्यत्वस्य व्याप्तिनिश्चये विरहात् तस्य सत्यन्तदलानाक्रान्तत्वात्।

इदमत्रावधेयम्। घटव्यतिरेकनिश्चयसामान्यप्रतिबध्ये घटत्वनिष्ठत्वाज

(गा०) ताकान्यत्वे सति यत्संशयव्यतिरेकनिश्चयसामान्यप्रतिबध्यत्वं वा हेतुः, अव्यभिचाराभावत्वानवच्छिन्नाव्यभिचारविषयिताप्रयुक्तप्रतिबन्धकताकव्याप्तिनिश्चये सत्यन्ताभावात् अव्यभिचारनिश्चयत्वावच्छिन्नाजन्यत्वेऽपि न व्यभिचारः। व्यभिचारसंशयमात्रप्रतिबध्यस्य व्याप्तिनिश्चयस्य व्यभिचाराभावत्वानवच्छिन्नाव्यभिचाराभावविषयिताप्रयुक्तप्रतिबन्धकताकान्यत्वं तत्प्रतिबन्धकतायां व्यभिचाराभावविषयित्वाप्रयुक्तत्वादेवाक्षतमिति व्यतिरेकनिश्चयोपादानसार्थक्यम्। व्यभिचाराभावत्वानवच्छिन्नतदभावविषयिताप्रयुक्तत्वं च तदभावव्यक्तित्वावच्छिन्नाभावज्ञानप्रतिबन्धकतायामेव प्रसिद्धम्,

---

(प्रभा) निरूपितप्रतिबध्यताया घटज्ञाने सत्त्वेन विशेष्यदलस्य व्याप्त्यभावत्वाप्रकारकव्याप्त्यभावव्यक्तित्वावच्छिन्नप्रकारकज्ञाननिष्ठव्याप्त्यभावविषयिताप्रयुक्तप्रतिबन्धकतानिरूपितप्रतिबध्यतावत् यद् व्याप्त्यभावव्यक्तित्वावच्छिन्नज्ञानम् तदन्यत्वस्यापि घटज्ञाने सत्त्वेन सत्यन्तदलस्य च तत्र सत्त्वात् तत्र व्याप्तिनिश्चयजन्यत्वविरहात्। व्यापकत्वनिवेशे तु असमूहालम्बनात्मकव्याप्तिसंशयादौ घटज्ञानप्रतिबन्धकत्वविरहेण न तत्र व्यभिचारावकाशः। भेदकूटघटितसत्यन्तार्थविवक्षणे यत्पदेनाव्यभिचारमादाय व्याप्तिनिश्चय एव व्यभिचारः, अव्यभिचाराभावत्वाप्रकारकतद्व्यक्तित्वेनाव्यभिचाराभावावगाहिज्ञाननिष्ठाव्यभिचाराभावविषयिताप्रयुक्तप्रतिबन्धकतानिरूपितप्रतिबध्यतावत् यत् यत्किञ्चित्-अव्यभिचाराभावव्यक्त्यभाववान् इत्याकारकं ज्ञानम् तद्भिन्नत्वस्य व्याप्तिनिश्चये सत्त्वात्। वीप्सया तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटनिवेशे तु अव्यभिचाराभावत्वाप्रकारकज्ञाननिष्ठव्यभिचारत्वावच्छिन्नविषयिताप्रयुक्तप्रतिबन्धकतानिरूपित प्रतिबध्यताविशिष्टत्वस्य व्याप्तिनिश्चये सत्त्वेन तस्यापि यद्यद्व्यक्त्यन्तर्गततया तद्भेदस्य व्याप्तिनिश्चये विरहेण सत्यन्तदलानाक्रान्ततया न व्यभिचारः।

सत्यन्तदलप्रयोजनमाह **अव्यभिचाराभावत्वानवच्छिन्नेति**। तथा च सत्यन्तदलानुपादाने अव्यभिचारसंशय-अव्यभिचारव्यतिरेकनिश्चयप्रतिबध्ये अव्यभिचारनिश्चये व्यभिचारस्स्यात् विशेष्यदलाक्रान्तत्वात्। तदुपादाने तु अव्यभिचाराभावत्वाप्रकारकं यज् ज्ञानम् तन्निष्ठाव्यभिचाराभावरूपव्यभिचारविषयिताप्रयुक्तप्रतिबन्धकताकत्वस्यैव अव्यभिचारनिश्चये सत्त्वेन न व्यभिचारावसर इति।

व्यतिरेकनिश्चयपदोपादानं सार्थकयति **व्यभिचारसंशयमात्रेति**। मात्रपदेन व्यभिचारव्यतिरेकनिश्चयस्य व्यवच्छेदः। अत्रापि व्यभिचारसंशयसामान्यप्रतिबध्ये घटाभावप्रकारकनिश्चयात्मकव्यभिचारव्यतिरेकनिश्चयप्रतिबध्ये व्यभिचारनिश्चयाजन्ये घटज्ञानात्मकव्याप्तिग्रहे व्यभिचारवारणाय **सामान्यपदम्**। तस्माच्च समूहालम्बनात्मकव्यभिचारव्यतिरेकनिश्चयाप्रतिबध्यत्वान्न व्यभिचारः। प्रतिबन्धकतायां व्यभिचाराभा-

(गा०) स्वप्रतिबन्धकतानवच्छेदकयदभावत्वानवच्छिन्नयदभावविषयितामान्यकत्वे सतीति वा वक्तव्यमित्याहुः ।

(प्रभा) अथ अभावांशे व्याप्तित्वेन घटावगाहि अभावत्वेन व्याप्त्यभावावगाहिव्याप्तिमान्नवेत्याकारकव्याप्त्यभावत्वाप्रकारकज्ञाननिष्ठयदभावावगाहिताप्रयुक्तस्वप्रतिबन्धकताकान्यत्वविरहेणाप्रसिद्धितादवस्थ्यम् इति चेन्न ? यदभावावगाहितापदेन यन्निरूपितप्रतियोगितावच्छेदकावच्छिन्नाभावावगाहिताया विवक्षणीयतया पूर्वोक्तदोषवारणसम्भवात् ।

• ननु व्याप्तिमद्भेदाभावस्य व्याप्तिस्वरूपत्वे व्याप्त्यभावत्वाप्रकारकव्याप्तिमान् व्याप्तिमद्भेदवान् वेत्याकारकसंशयनिष्ठव्याप्तिनिरूपितप्रतियोगितावच्छेदकीभूतव्याप्तिमद्भेदत्वावच्छिन्नावगाहिताप्रयुक्तप्रतिबन्धकताकान्यत्वविरहेणानुमितेर्दृष्टान्तत्वमनुपपन्नम् अतः कल्पान्तरमाह **स्वप्रतिबन्धकतानवच्छेदकेति** । इदंच विषयिताविशेषणम् । स्वपदम् प्रतिबध्यत्वेनाभिमतानुमित्यादिपरम् ।

परेतु भेदकूटघटितसत्यन्तार्थविवक्षणे गौरवमित्यतःकल्पान्तरमाह स्वप्रतिबन्धकेत्यादीत्यवतारयन्ति ।

तथाच यदभावत्वानवच्छिन्नयदभावविषयितात्वव्यापकस्वप्रतिबन्धकतावच्छेदकत्वाभावकत्वे सति यत्संशयत्वव्यापिका सती यद्व्यतिरेकनिश्चयत्वव्यापिका या प्रतिबन्धकता तन्निरूपितप्रतिबध्यतावद् यद् भवति तत् तन्निश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावद् भवतीति व्याप्तेः स्वरूपम् फलितम् , तेन न दृष्टान्तासिद्धिः । व्याप्त्यभावत्वानवच्छिन्नतद्व्यक्तित्वेन व्याप्त्यभावविषयितात्वव्यापकधूमलिङ्गकानुमितिप्रतिबन्धकतावच्छेदकत्वाभावकत्वस्य व्याप्तिसंशयव्याप्तिव्यतिरेकनिश्चयप्रतिबध्यत्वस्य धूमलिङ्गकानुमितौ सत्त्वात् । एवम् प्रमात्वाभावत्वानवच्छिन्नतद्व्यक्तित्वेन प्रमात्वाभावविषयितात्वव्यापकप्रवृत्तिप्रतिबन्धकतावच्छेदकत्वाभावकत्वस्य प्रमात्वसंशयप्रमात्वव्यतिरेकनिश्चयप्रतिबध्यत्वस्य च प्रवृत्तौ सत्त्वान्न स्वरूपासिद्धिः । ननु यन्निरूपितप्रतिबन्धकतावच्छेदकत्वाभावः यदभावत्वानवच्छिन्नयदभावविषयितात्वसमानाधिकरण इत्यादिरीत्यैवोच्यतां किम् व्यापकत्वार्थकसामान्यपदोपादानेनेति चेत् न ? एतादेनाव्यभिचारमादाय व्याप्तिनिश्चये व्यभिचारापत्तेः, अव्यभिचाराभावत्वानवच्छिन्नतद्व्यक्तित्वेनाव्यभिचाराभावावगाहिज्ञानीयव्यभिचाराभावविषयितायाम् व्याप्तिनिश्चयप्रतिबन्धकतानवच्छेदकत्वस्य सत्त्वेन स्वपदेन व्याप्तिनिश्चयस्य धर्तुं शक्यत्वात् । सामान्यपदोपादाने तु तादृशविषयितासामान्यान्तर्गतव्यभिचारत्वावच्छिन्नविषयितायाम् व्याप्तिज्ञानप्रतिबन्धकतानवच्छेदकत्वविरहेण स्वपदेन व्याप्तिज्ञानस्य धर्तुमशक्यतया सत्यन्ताभावान्न व्यभिचारः । यदभावविषयितायां यदभावत्वानवच्छिन्नत्वानिवेशे दृष्टान्तासिद्धिः, व्याप्त्यभावत्वेन व्याप्त्यभावविषयिताया अपि यदभावविषयितासामान्यान्तर्गततया तत्रानुमितिप्रतिबन्धकतानवच्छेदकत्वविरहेण स्वपदेनानुमितेर्धर्तुमशक्यत्वात् यदभावविषयितायां तदुपादाने तु व्याप्त्यभावत्वानवच्छिन्नतद्व्यक्तित्वेन व्याप्त्यभावविष

(१ आ) ननु यदभावत्वानवच्छिन्नविषयितामात्रं निवेश्यताम् विषयितायां यदभावविशेष [illegible]मिति चेन्न ! व्याप्त्यभावत्वानवच्छिन्नपक्षवृत्तित्वाभावादिविषयिताया अपि यदभाव[illegible]वच्छिन्नविषयितासामान्यान्तर्गततया तत्र चानुमितिप्रतिबन्धकतावच्छेदकत्वस्यैव सत्त्वे पुनर्दृष्टान्तासिद्ध्यापत्तेः । यदभावनिवेशे तु तद्व्यक्तित्वावच्छिन्नविषयिताया एव वर्त्तव्यतया दोषविरहात् । नन्वेवम् यदभावत्वानवच्छिन्नयदभावविषयितात्वव्यापकस्वप्रतिबन्धकत्व[illegible]कत्वमात्रमेव निवेश्यतां किमवच्छेदकत्वानुसरणेनेति चेन्न ! व्याप्त्यभावत्वानवच्छिन्न[illegible]विषयितायास्तद्व्यक्तित्वेन व्याप्त्यभावविषयकपक्षधर्मत्वाभावविषयकसमूहालम्बन[illegible] सत्त्वेन तत्र चानुमितिप्रतिबन्धकत्वाभावविरहेण स्वपदेनानुमितेर्धर्त्तुमशक्यतया [illegible]सिद्ध्यापत्तेः । अवच्छेदकत्वाभावानुसरणे तु तद्व्यक्तित्वेन तादृशव्याप्त्यभाव[illegible]विषयितायाम् अनुमितिप्रतिबन्धकतानवच्छेदकत्वस्य सत्त्वात् न दृष्टान्ता[illegible] । नञ्द्वयोपादानव्यावृत्तिश्च पूर्ववदेवेति । अथात्र यत्संशयप्रतिबध्यत्वनिवेशं [illegible] । घटादिव्यतिरेकनिश्चयप्रतिबध्येऽपि घटविशिष्टज्ञाने घटाभावत्वानवच्छिन्नघटा[illegible]विषयितासामान्यान्तर्गतायाः तद्व्यक्तिमान् घटाभाववान् इति निश्चयकालीनतद्[illegible] इति निश्चयीयतद्व्यक्तित्वावच्छिन्नविषयितायाः घटवत्त्वधीप्रतिबन्धकतान[illegible]वच्छेदकत्वविरहेण सत्यन्ताभावेनैव व्यभिचाराप्रसक्तेः । एवम् व्यभिचारसंशयप्रति[illegible] व्याप्तिज्ञाने व्यभिचाराभावत्वानवच्छिन्नव्यभिचारविषयितासामान्यान्तर्गताया [illegible]वान् व्यभिचारवान् इति निश्चयकालीनाभाववान् इतिनिश्चयीयाभावत्वावच्छिन्न[illegible]विषयितायाः व्याप्तिधीप्रतिबन्धकत्वानवच्छेदकत्वविरहेण सत्यन्तदलानाक्रान्ततया व्यभि[illegible]प्रसक्त्या यद्व्यतिरेकनिश्चयप्रतिबध्यत्वदलं च व्यर्थम् । नच स्वप्रतिबन्धकताय[illegible]वैशिष्ट्यानवच्छिन्नत्वं निवेश्य नैष दोष इति वाच्यम्, ज्ञानवैशिष्ट्यानवच्छिन्नत्वं निवेश्य [illegible]चारं सम्पाद्य पुनर्व्यभिचारवारणाय दलान्तरनिवेशस्य 'प्रक्षालनाद्धि' इतिन्यायेना[illegible]चितत्वात् । एवमपि प्रतियोगितासम्बन्धेन घटाभावांशे घटत्वेन पदार्थान्तरावगाहिभ्रमीय[illegible]विषयितायाःव्यभिचारत्वेनाव्यभिचारवदवृत्तित्वेन वा व्यभिचाराभावावगाहि[illegible]व्यभिचाराभावविषयितायास्तादृशविषयितासामान्यान्तर्गतायाःस्वपदग्राह्यघटवत्त्वज्ञान[illegible]प्रतिबन्धकतानवच्छेदकत्वविरहेण सत्यन्ताभवेन व्यभिचाराप्रसक्त्या तद्वैयर्थ्यस्य [illegible] । नच यदभावत्वानवच्छिन्नयदभावविषयितायां भ्रमान्यवृत्तित्वं निवेश्यमिति [illegible] तथापि घटवदवृत्तित्वेन घटाभावावगाहिघटवदवृत्तिमान् इतिनिश्चयीयघटा[illegible]विषयितायाः तादृशविषयितासामान्यान्तर्गतायाः घटज्ञानप्रतिबन्धकतानवच्छेदकत्वविर[illegible]प्रतिबध्यत्वदलवैयर्थ्यस्य दुर्वारत्वात् । यदि च पक्षधर्मताविरहत्वेन व्याप्त्य[illegible]ज्ञानवारणाय प्रतिबन्धकतायां तदवच्छेदकविषयितायां वा भ्रमावृत्तित्वं प्रवेश्यते, [illegible] घटवत्त्वप्रमायाम् व्यभिचारः तत्र घटवदवृत्तिमानितिज्ञानस्य भ्रमात्मकस्यापि सम्भ[illegible] तादृशघटाभावविषयितायाः भ्रमावृत्तिप्रतिबन्धकतानवच्छेदकत्वेन सत्यन्तार्थसत्त्वात् [illegible]प्रतिबन्धकतायाः कामिनीजिज्ञासादौ [illegible]

(प्रभा) यितासामान्यस्य भ्रममात्रवृत्तिप्रतिबन्धकतावच्छेदकत्वात् । एवं भ्रमान्यवृत्तित्वरूपतद्विशेषणेऽपि ।

अथ यदभावविषयितापदेन यन्निरूपितप्रतियोगितावच्छेदकावच्छिन्नविषयिता विवक्षणीया, घटवदवृत्तित्वावच्छिन्नविषयितायाः घटनिरूपितप्रतियोगितावच्छेदकावच्छिन्नत्वाभावेन तत्प्रतिबन्धकतानवच्छेदकतादृशविषयिताकत्वं घटवत्त्वज्ञानस्याक्षतमिति तत्र व्यभिचारवारणाय यत्संशयेत्यादेः सार्थक्यम् । नचैवं दृष्टान्तासिद्धिः व्याप्त्यभावत्वावच्छिन्नविषयितायां व्याप्तिनिरूपितप्रतियोगितावच्छेदकावच्छिन्नत्वाभावादिति वाच्यम् ? आधेयत्वाभावत्वस्यापि हेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिनिरूपितप्रतियोगितावच्छेदकतया तदवच्छिन्नविषयिताया व्याप्त्यभावत्वावच्छिन्नत्वेन स्वप्रतिबन्धकतानवच्छेदकतादृशविषयिताकत्वेनानुमितेर्दृष्टान्तत्वसम्भवात् इति चेन्न ? द्रव्याभावत्वस्यापि घटनिरूपितप्रतियोगितावच्छेदकतया घटवदवृत्तिद्रव्याभाववान् इति ज्ञानीयद्रव्याभावत्वावच्छिन्नविषयितायाः घटाभावत्वानवच्छिन्नत्वेन घटनिरूपितप्रतियोगितावच्छेदकावच्छिन्नत्वेन च तादृश्याः प्रतिबन्धकतावच्छेदकताया घटवत्त्वज्ञानप्रतिबन्धकत्वानवच्छेदकतादृशविषयिताकत्वाभावेन व्यभिचाराप्रसक्त्या संशयपदवैयर्थ्यस्य दुर्वारत्वात् । नच यदभावत्वानवच्छिन्नयदभावविषयितायाम् तद्वदवृत्तित्वानवच्छिन्नत्वमपि निवेशनीयम्, तथाच घटवदवृत्तिद्रव्याभाववानितिज्ञानमादाय न दोष इति वाच्यम् ? तद्वदवृत्तित्वानवच्छिन्नत्वमधिकं निवेश्य घटवत्त्वज्ञाने व्यभिचारं सम्पाद्य तद्वारणाय यत्संशयेत्यादिदलसार्थक्यस्य प्रक्षालनाद्धि इतिन्यायेन अयुक्तस्यानुपदमेव वर्णितत्वात् । नच दृष्टान्तासिद्धिवारणाय तद्वदवृत्तित्वानवच्छिन्नत्वनिवेश आवश्यकः अन्यथा व्याप्त्यभावत्वानवच्छिन्नव्याप्तिमदवृत्तित्वावच्छिन्नव्याप्त्यभावविषयिताया अनुमितिप्रतिबन्धकतावच्छेदकतया स्वप्रतिबन्धकतानवच्छेदकतादृशविषयिताकत्वाभावेनानुमितेर्दृष्टान्तत्वासम्भवादिति वाच्यम् ? अनुमितौ व्याप्तिमदवृत्तिधर्मवत्त्वज्ञानस्य प्रतिबन्धकत्वे मानाभावात् । अन्यथा तन्निवेशस्यावश्यकतया व्यावृत्तिसङ्गतिरिति ध्येयम् ।

कालीशङ्करास्तु— व्याप्त्यंशे तद्घटकपदार्थांशे वा भ्रमात्मकस्य व्याप्त्यभाववत्त्वज्ञानस्य व्याप्त्यभावत्वानवच्छिन्नस्वप्रतिबन्धकतावच्छेदकविषयताकतया दृष्टान्तासिद्धिर्दुर्वारैवेत्यतः स्वप्रतिबन्धकतावच्छेदकतानवच्छेदकयदभावत्वानवच्छिन्नविषयितानिष्ठयन्निरूपितप्रतियोगितावच्छेदकावच्छिन्नत्वसामान्यकत्वस्य सत्यन्तेन विवक्षणादेव सामञ्जस्यात् । तथाचाव्यभिचाराभावत्वानवच्छिन्नविषयितानिष्ठस्य अव्यभिचारनिरूपितप्रतियोगितावच्छेदकीभूतव्यभिचारत्वावच्छिन्नत्वस्याव्यभिचारग्रहप्रतिबन्धकतावच्छेदकतया सत्यन्तविरहान्न व्याप्तिग्रहे व्यभिचारः । अव्यभिचाराभावत्वानवच्छिन्ना या पूर्वक्षणवृत्तित्वविशिष्टाव्यभिचाराभावत्वावच्छिन्नविषयिता तन्निष्ठस्याव्यभिचारनिरूपितप्रतियोगितावच्छेदकीभूतपूर्वक्षणवृत्तित्वविशिष्टस्याव्यभिचारस्याभावत्वावच्छिन्नत्वस्याव्यभिचारधीप्रतिबन्धकतावच्छेदकतानवच्छेदकतया व्यभिचारतादवस्थ्यमतः सामान्यपदम् । तथाच सति निरुक्तप्रतियोगितावच्छेदकावच्छिन्नत्वसा-

(गा०) दीधितिकृतस्तु अन्योन्याभावादिगर्भव्याप्तिबुद्धौ अत्यन्ताभावादिगर्भव्यभिचारधियो विरोधित्वमस्वीकुर्वन्तो मणिमन्त्रादिवत् व्यभिचारज्ञानस्य प्रतिबन्धकत्वं नानुमन्यन्ते, अपितु ग्राह्याभावावगाहित्वेनैवेति न तेषां व्यभिचारसंशयस्य व्याप्तिनिश्चयप्रतिबन्धकतेति यथाश्रुतमेव साधु। उक्तव्याप्तावनुकूलतर्कमुपदर्शयति *तद्व्यतिरेकेति*। मात्रपदं कृत्स्नार्थकम्। *हेतुत्वात्* = हेतुत्वौचित्यात्। अन्यथा संशये स्वरूपयोग्यताकल्पनेन गौरवादित्याशयः।

(प्रभा) त्वावच्छिन्नत्वस्य घटविशिष्टधीप्रतिबन्धकतावच्छेदकतानवच्छेदकतया घटविशिष्टज्ञाने व्यभिचारवारणाय यत्संशयप्रतिवध्यत्वोपादानम्। व्याप्यभावत्वानवच्छिन्नविषयितानिष्ठस्य व्याप्तिनिरूपितप्रतियोगितावच्छेदकीभूततत्तद्व्यक्त्यभावत्वावच्छिन्नत्वस्यानुमितिप्रतिबन्धकतावच्छेदकतानवच्छेदकतया न दृष्टान्तासिद्धिः। यदभावत्वानवच्छिन्नत्वं च यदभावत्वविषयितानिरूपितत्वम्, भ्रमप्रमासाधारणयदभावत्वविषयतात्वेन वास्तवयदभावत्वविषयताया निरूपकतया न तदसंग्रहः। स्वप्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वमपि निवेशनीयम्, तेन द्रव्याभाववान् घटाभावान् इतिनिश्चयकालीनद्रव्याभाववद्भूतलमितिनिश्चयीयघटाभावत्वानवच्छिन्नविषयितानिष्ठस्य घटनिरूपितप्रतियोगितावच्छेदकीभूतद्रव्यत्वानवच्छिन्नत्वस्य घटविशिष्टधीप्रतिबन्धकतावच्छेदकतावच्छेदकत्वेऽपि न व्यभिचार इति संक्षेपतः प्राहुः।

दीधितिकृतस्त्विति। अयमाशयः, व्यभिचारस्य व्याप्तिसमसंख्याकत्वेनासमानाकारकव्यभिचारनिश्चयस्य न प्रतिबन्धकत्वम्। नापि मणिमन्त्रादिन्यायेन तत्त्वम्, किन्तु ग्राह्याभाववगाहितया। एवं च यथा घटसंशयस्यापि ग्राह्यसंशयत्वेन न घटज्ञानप्रतिबन्धकत्वम् तथा व्यभिचारसंशयस्यापि ग्राह्यसंशयत्वाविशेषेण न प्रतिबन्धकत्वम्। एवञ्च अत्यन्ताभावगर्भव्यभिचारग्रहकालेऽन्योन्याभावगर्भव्याप्तिग्रहोदयात् कथञ्चित् जायमानानुमितौ अप्रामाण्यग्रहसम्पादकत्वमेव। यथाश्रुतमेव साध्विति। तथाच ग्राह्यसंशयस्याप्रतिबन्धकतया अव्यभिचारव्यतिरेकज्ञानत्वस्य व्याप्तिज्ञानप्रतिबन्धकतायामसत्त्वेन व्यभिचारविरहेण यदभावत्वप्रकारकत्वनैयत्यविशेषणन्तन्मूलकं यदभावावगाहिताप्रयुक्तत्वविशेषणं च व्यर्थमेव। उक्तव्याप्ताविति। यद् यद्व्यतिरेकज्ञानत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिवध्यतावत् तत् तन्निश्चयजन्यमितिव्याप्तावित्यर्थः। अनुकूलतर्कमिति। तद्व्यतिरेकज्ञानप्रतिवध्यत्वं यस्य तस्य यदि तद्ज्ञानजन्यत्वं स्यात् तदा प्रतिबन्धकीभूतात् तत्संशयादपि कार्योत्पत्तिः स्यादित्याकारकः, यद्व्यतिरेकज्ञानसामान्यप्रतिवध्यत्वं यदि तन्निश्चयजन्यत्वव्यभिचारि स्यात्तदा संशयव्यापकानुत्पादप्रतियोगिवृत्ति न स्यात् इत्याकारको वा तर्कः। तथाच प्रवृत्तिः न प्रामाण्यज्ञानजन्या प्रामाण्यसंशयाजन्यत्वात् इत्यापाद्याभावेनापादकाभावसिद्धिः। प्रवृत्तिः प्रामाण्यनिश्चयजन्या न स्यात् प्रामाण्यव्यतिरेकज्ञानप्रतिवध्या न स्यात् इत्यपि तर्काकारः।

(चि० म०) तत्सन्देहे सत्यर्थसन्देहेन अर्थानिश्चयादेवाप्रवृत्तेः तत्र तयोरप्रतिबन्धकत्वादिति चेत् ? न

(दी०) प्रवृत्तीति प्रकृताभिप्रायम् । यत्प्रतिबन्धकाविरयर्थः । तत्सन्देह इति ।

(गा०) इदमापाततः, कारणतावच्छेदकलाघवानुरोधेन फलानुपधायकसाधारणस्वरूपयोग्यताकल्पने क्षतिविरहात् । तद्व्यतिरेकज्ञानत्वेन प्रतिबन्धकत्वे तज्ज्ञानत्वेन हेतुताकल्पनेऽपि क्षतिविरहादुक्तयुक्त्या निश्चयत्वेन हेतुतासिद्धेरसम्भवदुक्तिकत्वाच्च ।

विशेषतः प्रवृत्तेर्व्याप्तावन्तर्भावेऽनुमितेर्दृष्टान्तत्वासङ्गतिरिति विशेषतस्तदन्तर्भावो नाभिप्रेतः अपितु यत्त्वतत्त्वमात्रेणेत्याह *प्रवृत्तीति* । ननु प्रामाण्यसंशयदशायाम् अर्थानिश्चयादेव प्रवृत्त्यभावनिर्वाहात् प्रामाण्याभावज्ञानस्य कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वासिद्धेरुक्तानुमानं स्वरूपासिद्ध्या दुष्टमिति मूलोक्तं न सङ्गच्छते, प्रवृत्तावर्थनिश्चयस्यैव प्रामाण्या-

---

(प्रभा) यद्व्यतिरेकनिश्चययोर्यत्र प्रतिबन्धकता तत्र तद्व्यतिरेकज्ञानत्वेनैव हेतुता युक्ता नतु तन्निश्चयत्वेनेति वाच्यम् ? अभावस्य हेतुत्वपक्षे व्यतिरेकज्ञानस्य प्रतिबन्धकत्वे अप्रामाण्यनिश्चयानास्कन्दितत्वं निवेशनीयम् इति गौरवापत्तेः निश्चयस्य हेतुत्वेऽप्रामाण्यज्ञानानास्कन्दितत्वनिवेशेन लाघवात् । यद्वा व्याप्तिज्ञानाभावदशायां तद्व्यतिरेकज्ञानाभावसत्त्वेऽपि अनुमित्यनुत्पादात् प्रमात्वज्ञानजन्यत्वसिद्धावपि न क्षतिः, प्रमात्वसंशये सति प्रवृत्त्यनुत्पादेन स्वरूपयोग्यताकत्वकल्पनेऽपि न दोष इतः स्वाभिप्रेतार्थमाह गदाधरः इदमापातत इति । इदम् = निश्चयजन्यत्वम् । कारणतावच्छेदकलाघवानुरोधेनेति । निश्चयत्वेन कारणत्वे संशयान्यत्वज्ञानत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण कारणतावच्छेदकगौरवम्, । तदपेक्षया ज्ञानत्वस्य कारणतावच्छेदकत्वे लाघवमिति भावः । क्षतिविरहादिति । अस्य च असम्भवदुक्तिकत्वेन सम्बन्धः । तथा च यतः क्षतिविरहः अतः दीधितिकारोक्तयुक्त्या निश्चयत्वेन हेतुत्वसिद्धिरसम्भवदुक्तिकेति फलितार्थः । उक्तयुक्त्येति । तत्संशयात्तत्कार्यानुत्पत्तेरिति दीधितिकृद्युक्त्येत्यर्थः ।

माध्यमिकशङ्कां तटस्थो निराकुरुते **तत्सन्देहे सति** इतिचि०म० प्रयोजनवत्त्वज्ञानधर्मिकप्रामाण्यसन्देहे सतीत्यर्थः । **अर्थसन्देहेनेति** । अर्थनिश्चयोत्तरार्थसंशयम् प्रति अर्थनिश्चयधर्मिकाप्रामाण्यसंशयस्य हेतुतया इष्टसाधनत्वसन्देहस्यैवोत्पादेनेत्यर्थः । **अर्थानिश्चयादेवेति** । इदम् इष्टसाधनम् एव इत्याकारकनिश्चयाभावादेवेत्यर्थः । **तत्र** = **प्रवृत्तौ** । **तयोः** = प्रमात्वसंशयप्रमात्वव्यतिरेकनिश्चययोः । **अप्रतिबन्धकत्वादिति** । तथा च स्वरूपासिद्धिनिरासः । [illegible]

(दी०) क्लृप्तकारणसद्भावे यत्सत्त्वे कार्यानुत्पादः अन्वयतया तस्यैव प्रतिबन्धकत्वं कल्प्यते, नचेह तथा ।

(गा०) भावज्ञानाभावस्यापि कारणताग्राहकनियतान्वयव्यतिरेकसत्त्वेन कारणतायादुरपह्नवत्त्वादित्याशङ्कां निराकरोति *क्लृप्तेत्यादिना । तस्य प्रतिबन्धकत्वम्* = तदभावस्यानन्यथासिद्धत्वम् कल्प्यते । *नचेह तथेति* । प्रकृते क्लृप्तापरसकलकारणसत्त्वे प्रामाण्यसंशयादिसत्त्वे प्रवृत्त्यनुत्पाद इति नेत्यर्थः ।

प्रामाण्यसंशयाद्यभावेऽपि विनाऽर्थनिश्चयमप्रवृत्तेः तद्धेतुताया आवश्यकत्वात् । प्रामाण्यसंशयदशायां च तदसत्त्वेनाप्रवृत्तेः इतरसकलकारणासम्पत्तेरिति भावः । तथाच नियतान्वयव्यतिरेकेऽपि प्रामाण्याभावज्ञानाभावस्यान्यथासिद्धत्वमेवेति न तज्ज्ञानस्य कारणीभूताभावप्रतियोगित्वरूपं प्रतिबन्धकत्वं शङ्कास्पदमपीति मूलसङ्गतिः ।

अथार्थनिश्चयकाले तद्द्वितीयक्षणे वा यत्र प्रामाण्यसंशयः तत्र तादृशार्थनिश्चयद्वितीयक्षणे तत्तृतीयक्षणे वा प्रवृत्त्यापत्तिवारणाय प्रामाण्यसंशयस्य

(प्रभा) तथाचार्थनिश्चये यदि प्रमात्वसंशयो वर्त्तते तदार्थस्य संशय एव जायते, तत्सन्देहे च अर्थनिश्चयरूपकारणविरहादेव प्रवृत्त्यभावोपपत्तौ प्रवृत्तिम् प्रति प्रामाण्यव्यतिरेकज्ञानाभावस्याहेतुत्वात् कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वस्य प्रामाण्यव्यतिरेकज्ञाने विरहाद् भवेत् स्वरूपासिद्धिरिति भावः ।

तदसत्त्वेनेति । अर्थनिश्चयासत्त्वेनेत्यर्थः । अर्थनिश्चयोत्तरार्थसंशयप्रति अर्थनिश्चयधर्मिकप्रामाण्यसंशयस्य हेतुत्वेन प्रामाण्यसंशयस्य अर्थसंशयसम्पादकतया अर्थनिश्चयविरहप्रयोजकत्वादितिभावः । स्वरूपासिद्धिपरिहाराय प्रामाण्यसंशयस्य प्रतिबन्धकत्वं व्यवस्थापयति अथेत्यादिना । अयम् भावः, प्रवृत्तौ प्रमात्वव्यतिरेकज्ञानस्य प्रतिबन्धकत्वं यदि नाङ्गीक्रियते तदा घटादिरूपार्थनिश्चयक्षण एव तन्निश्चयधर्मिकसमूहालम्बनप्रमात्वसंशयो यदा तदा तादृशनिश्चयद्वितीयक्षणे प्रवृत्त्युत्पादापत्तिः, पूर्वक्षणेऽर्थनिश्चयादिघटितप्रवृत्तिकारणसमुदायस्य सत्त्वात् । अतः प्रामाण्यव्यतिरेकज्ञानस्यापि प्रवृत्तौ प्रतिबन्धकत्वं वाच्यम्, तथासति च पूर्वक्षणेऽर्थनिश्चयसत्त्वेऽपि प्रामाण्यव्यतिरेकज्ञानरूपप्रतिबन्धकस्य सत्त्वात् न प्रवृत्त्युत्पादापत्तिरिति । प्रामाण्यसंशय इति । प्रामाण्यव्यतिरेकनिश्चयस्यचेति शेषः । प्रामाण्यसंशयसामग्र्याः अर्थनिश्चयविरोधित्वेऽप्याह तद्द्वितीयक्षणे वेति । प्रवृत्त्यापत्तिवारणायेति । तथाच प्रमाणतत्त्वज्ञानम् इष्टसाधनम् इति ज्ञानम् तादृशज्ञानधर्मिकप्रामाण्यसंशयस्य समूहालम्बनरूपं यत्र तत्र द्वितीयक्षणे प्रवृत्त्यापत्तिवारणाय, यत्र च क्रमेण तौ तत्र तृतीयक्षणे प्रवृत्त्यापत्तिवारणायेत्यर्थः ।

नच कार्यसहभावेन अर्थनिश्चयस्य हेतुत्वोपगमात् नेयमापत्तिरिति वाच्यम् ? तथासति यत्र प्रथममर्थनिश्चयः ततो द्वितीयक्षणे कुतश्चित् प्रतिबन्धकवशात् न प्रवृत्त्युत्पत्तिः तत्र तृतीयक्षणे प्रवृत्त्यभावापत्तेः । प्रामाण्यसंशयस्येति ।

(दी०) नच प्रयोजकीभूताभावप्रतियोगित्वमेव वाच्यम्,

(गा०) प्रतिबन्धकत्वमावश्यकमिति चेन्न ? अगृहीताप्रामाण्यकार्थनिश्चयत्वेन हेतुतयैव निर्वाहात्, गौरवेणाप्रामाण्यज्ञानाभावस्य पृथक् कारणत्वाकल्पनात्। मूले स्वरूपासिद्धिप्रदर्शनं दृष्टान्तासिद्धेरप्युपलक्षणं बोध्यम्।

प्रमात्वाभावग्रहाभावस्य प्रवृत्तिकारणत्वाभावेऽपि न स्वरूपासिद्धिः, अन्यविधप्रतिबन्धकताया एव विवक्षणीयत्वादित्याशङ्क्य निराचष्टे नचेति। यद्यपि प्रयोजकत्वमिदं न नियतपूर्ववृत्तित्वरूपम्, व्याप्त्यभावसंशयद्वितीयक्षणे व्याप्तिनिश्चयोत्पत्तौ तृतीयक्षणेऽनुमित्युत्पत्त्या व्याप्त्यभावग्रहाभावस्यानुमित्यप्रयोजकत्वेन दृष्टान्तासिद्धेः। नापि जनकजनकत्वम्, ग्राह्यसं-

(प्रभा) त्यपि बोध्यम्। आवश्यकमिति। तथाच न स्वरूपासिद्धिरिति भावः। उत्तरयति इति चेन्नेति। तथाच अप्रामाण्यज्ञानविरहविशिष्टार्थनिश्चयत्वेन प्रवृत्तिकारणत्वोपगमात् न तादृशस्थले प्रवृत्त्युत्पादापत्तिः, तत्राप्रामाण्यज्ञानविशिष्टार्थनिश्चयसत्त्वेनाप्रामाण्यज्ञानविरहविशिष्टार्थनिश्चयरूपप्रवृत्तिकारणस्यासत्त्वादिति भावः।

कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वस्याङ्गीकारपक्षे प्रामाण्याभावज्ञानाभावस्याकारणत्वेन प्रामाण्याभावज्ञाने कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वविरहात् अस्तु स्वरूपासिद्ध्यवसरः किन्तु इदानीम् प्रयोजकीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वमेवाङ्गीक्रियते, तथाच न स्वरूपासिद्धिः। प्रमाण्याभावज्ञानाभावविशिष्टार्थनिश्चयस्य प्रवृत्तिम् प्रति हेतुतायास्त्वयापि स्वीकृतत्वेन प्रयोजकीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वस्य तत्र सत्त्वात् प्रामाण्याभावज्ञानाभावस्याकारणत्वेऽपि कारणतावच्छेदकत्वेन प्रयोजकत्वेऽविवादात् इत्याशयेनाह प्रमात्वाभावग्रहाभावस्येति। अन्यविधप्रतिबन्धकताया एवेति। एवकारेण कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वव्यवच्छेदः। ननु प्रयोजकीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वनिवेशेऽपि दृष्टान्तासिद्धिर्दुर्वारैव व्याप्तिव्यतिरेकसंशयस्य ग्राह्यसंशयत्वेन व्याप्तिज्ञानाविरोधित्वादन्यथोक्तरीत्या व्याप्तिनिश्चये व्यभिचारापत्तेः। एवञ्च व्याप्तिव्यतिरेकसंशयाभावस्यानुमितिप्रयोजकताया दुर्घटत्वात् नियतपूर्ववर्त्तित्वरूपप्रयोजकत्वविवक्षणे व्याप्तिव्यतिरेकसंशयस्य व्याप्तिज्ञानाप्रतिबन्धकत्वेऽपि व्याप्तिनिश्चयजन्यानुमितौ व्याप्तिव्यतिरेकसंशयाभावस्य नियतपूर्ववर्त्तिताया अक्षततया दृष्टान्तासिद्धिपरिहारेऽपि तस्य नियतपूर्ववर्त्तित्वमेव नास्तीत्याशंकते यद्यपीत्यादिना। अनुमित्यप्रयोजकत्वेनेति। अनुमितिपूर्वक्षणे व्याप्तिव्यतिरेकसंशया-

संवलनात् तदुत्तरमर्थसंशय एव भवति, प्रवृत्तिज्ञानयोरयौगपद्यात् तदानीम् प्रवृत्त्युत्पादनासम्भवादिति चेदत्राह तद्द्वितीयक्षण इति। तथाच प्रथममर्थनिश्चयः ततः

गा०) शयस्याप्रतिबन्धकत्वेन तदभावस्यानुमितिजनकव्याप्तिनिश्चया
फत्वेनतद्दोषतादवस्थ्यात् । तथापि जनकतावच्छेदकप्रविष्टत्वमेव त
व्याप्तिसंशयभेदस्य निश्चयत्वघटकतयाऽनुमितिजनकतावच्छेदकत्वात्
व्याप्तिसंशयस्यानुमितिप्रतिबन्धकत्वान्न दृष्टान्तासिद्धिः । उक्तयुक्त्या अगृही
प्रामाण्यकत्वस्य अर्थनिश्चयनिष्ठप्रवृत्तिहेतुतावच्छेदकताया आवश्यकत्वा
स्वरूपासिद्धिः ।

अथवा यन्निश्चयविरहविशिष्टस्य यद्धर्मिकयद्व्यतिरेकज्ञानस्याभा
यद्विशेष्यकयत्प्रकारकयज्जातीयकार्यनियताव्यवहितपूर्ववृत्तिः तद्ध
कतन्निश्चयः तद्विशेष्यकतत्प्रकारकतज्जातीयकार्यजनक इति समुदायार्थ

(प्रभा) भावस्यासत्त्वेन अनुमितिनियतपूर्ववर्त्तित्वासिद्धेः । ग्राह्यसंशयस्येति
व्याप्तिव्यतिरेकसंशयस्येत्यर्थः । तदभावस्य = व्याप्तिव्यतिरेकनिश्चयाभावस्य
प्रयोजकत्वम् । व्याप्तिसंशयभेदस्य । व्याप्तिव्यतिरेकसंशयभेदस्य इत्य
बोध्यम् । निश्चयत्वघटकतयेति । व्याप्तिनिश्चयत्वघटकतयेत्यर्थः । न दृष्टान्ता
सिद्धिरिति । व्याप्तिनिश्चयस्यानुमितौ हेतुत्वं निर्विवादम्, व्याप्तिनिश्चयत्वं च व्या
संशयान्यज्ञानत्वम् व्याप्तिव्यतिरेकसंशयान्यज्ञानत्वञ्च । एवञ्च व्याप्तिसंशयभेदवत् व्या
व्यतिरेकसंशयभेदस्यापि अनुमितिकारणतावच्छेदकतया प्रयोजकीभूताभावप्रतियोगित्वरू
प्रतिबन्धकत्वं व्याप्तिव्यतिरेकसंशयस्याक्षतमिति न दृष्टान्तासिद्धिरिति भावः । स्वरू
सिद्धिम्परिहरति उक्तयुक्त्येति । अप्रामाण्यज्ञानानास्कन्दितार्थनिश्चयस्य प्रवृत्तौ हेतु
स्वीकारे प्रामाण्यव्यतिरेकज्ञानाभावविशिष्टार्थनिश्चयस्य प्रवृत्तिहेतुत्वपर्यवसायितया प्रामा
व्यतिरेकज्ञानाभावेऽपि कारणतावच्छेदकत्वरूपप्रयोजकत्वसत्त्वेन प्रयोजकीभूताभावप्र
योगित्वरूपप्रतिबन्धकत्वसत्त्वादिति भावः ।

यन्निश्चयविरहेति । धूमधर्मिकव्याप्तिनिश्चयविरहविशिष्टस्येत्यर्थः । यद्धर्मि
कयद्व्यतिरेकज्ञानस्याभावः = धूमधर्मिकव्यतिरेकज्ञानस्याभावः । यद्विशेष्य
कयत्प्रकारकयज्जातीयकार्यनियताव्यवहितपूर्ववृत्तिः = पर्वतविशेष्यकवह्निप्रकारकधूमलिंगकानुमि
तित्वजातीयकार्यनियताव्यवहितपूर्ववृत्तिः । तद्धर्मिकतन्निश्चयः = धूमधर्मिकव्याप्ति
निश्चयः । तद्विशेष्यकतत्प्रकारकतज्जातीयकार्यजनकः = पर्वतविशेष्यकवह्निप्रका
रकधूमलिंगकानुमितित्वजातीयकार्यजनकः । एवम् यागधर्मिकप्रयोजनवत्त्वज्ञानधर्मिकप्रा
माण्यनिश्चयविरहविशिष्टस्य यागधर्मिकप्रयोजनवत्त्वज्ञानधर्मिकप्रामाण्यव्यतिरेकज्ञानस्याभ
वो यागविशेष्यकयागत्वप्रकारकप्रवृत्तित्वजातीयकार्यनियताव्यवहितपूर्ववृत्तिः, अतः यागधर्मि

---

१. न दृष्टान्तासिद्धिरिति । नच, व्याप्तिव्यतिरेकज्ञानसामान्यस्य प्रतिब
न्धकत्वमसिद्धम् विरोधावगाहिव्याप्तिव्यतिरेकज्ञानस्यैव निश्चयत्वघटकतया क.१७

(गा०) व्याप्त्यभावसंशयद्वितीयक्षणोत्पन्नव्याप्तिनिश्चयात् यत्र तदनन्तरक्षणेऽनुमितिः तत्र तत्पूर्वक्षणे विशेषणाभावाद् विशिष्टाभावोऽक्षत एवेति न दृष्टान्तासिद्धिः।

एतेन अप्रमाण्यग्रहाभावस्य कारणतावच्छेदकत्वोपगमे विशेष्यविशेषणभावे विनिगमनाविरहात् तस्य कारणत्वमपि अनपवादमिति कारणीभूताभावप्रतियोगित्वघटितहेतुरप्यविकल इति प्रयोजकताघटितसाधनानुसरणाशंकाया असंगतिरिति दूषणमनवकाशम्।

(प्रभा) प्रयोजनवत्त्वज्ञानधर्मिकप्रामाण्यनिश्चयः यागविशेष्यकयागत्वप्रकारकप्रवृत्तित्वजातीयकार्यजनकः। प्रकृते च प्रमाणतत्त्वज्ञानधर्मिकनिःश्रेयससाधनत्वप्रकारकनिश्चयविरहविशिष्टस्य तादृशनिश्चयधर्मिकप्रामाण्यव्यतिरेकज्ञानस्याभावः प्रमाणतत्त्वज्ञानधर्मिकतादृशज्ञानत्वप्रकारकप्रवृत्त्यव्यवहितपूर्ववर्त्ती तादृशनिश्चयधर्मिकप्रामाण्यनिश्चयः तादृशप्रवृत्तिजनक इति। तथाच यद्विशेष्यकयत्प्रकारकयज्जातीयं यत् कार्यम् स्वनियताव्यवहितपूर्ववर्त्तियन्निश्चयविरहविशिष्टयद्धर्मिकयद्व्यतिरेकज्ञानाभावकं तत् तद्धर्मिकतन्निश्चयत्वावच्छिन्नजनकतानिरूपितजन्यतावदिति पर्यवस्यति।

यन्निश्चयविरहविशिष्टस्यानुपादाने दृष्टान्तासिद्धिः[1] सामान्यतो धूमधर्मिकव्याप्तिव्यतिरेकज्ञानाभावस्य तादृशानुमितित्वजातीयकार्यनियताव्यवहितपूर्ववर्त्तित्वाभावात् अतस्तदुपादानमित्याशयवानाह व्याप्त्यभावसंशय इत्यादि।

अत्र व्यतिरेकज्ञाने यद्धर्मिकत्वानिवेशे घटादिधर्मिकव्याप्तिव्यतिरेकज्ञानस्य प्रकृतहेतुभिन्नधर्मिकत्वात् तदभावस्य अनुमितिनियतपूर्ववर्त्तित्वाभावेन दृष्टान्तासिद्धिः अन्यधर्मिकाप्रामाण्यज्ञानसत्त्वेऽपि[2] प्रवृत्त्युत्पत्त्या प्रामाण्यव्यतिरेकज्ञानाभावस्य प्रवृत्त्यव्यवहितपूर्ववर्त्तित्वाभावात् स्वरूपासिद्धिश्च स्यादतस्तन्निवेशः। साध्यकोटौ तद्विशेष्यकत्वनिवेशे सामान्यतोऽनुमितित्वजात्यवच्छिन्ने कस्यापि व्याप्तिव्यतिरेकज्ञानाभावस्य नियतपूर्ववर्त्तित्वाभावात् दृष्टान्तासिद्धिरिति तद्विशेष्यकेत्युक्तम्। पटादिनिश्चयाजन्यघटादिज्ञानाव्यवहितपूर्वमपि कदाचित् पटादिनिश्चयविरहविशिष्टपटव्यतिरेकज्ञानाभावसत्त्व

---

१ धूमधर्मिकव्याप्तिनिश्चयाजन्यान्यलिङ्गकानुमितौ व्यभिचाराद् धूमलिङ्गकानुमि दृष्टान्तता बोध्या।

२. इष्टसाधनत्वज्ञानधर्मिकप्रामाण्यनिश्चयविरहविशिष्टेष्टसाधनत्वज्ञानधर्मिकप्रामाण्यज्ञानाभावग्रन्थाध्ययनविशेष्यकतादृशाध्ययनत्वप्रकारकप्रवृत्तित्वजातीयनियत

(दी०) अप्रयोजकत्वात्, यत्तदर्थयोरननुगमाच्चेतिभावः ।

(गा०) अप्रयोजकत्वादिति । प्रामाण्यव्यतिरेकज्ञानाभावस्य अर्थनिश्चयनिष्ठकारणतावच्छेदकतया अर्थसंशयकारणाभावतया अर्थनिश्चयरूपादकत्वेन वा प्रवृत्तावपेक्षणीयत्वेन तत एवातिप्रसङ्गभङ्गे प्रामाण्यनिश्चयस्य प्रवृत्तिहेतुत्वास्वीकारेऽनिष्टप्रसङ्गरूपविपक्षबाधकाभावादित्यर्थः । अप्रयोजकत्वं च कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकताया हेतुघटकतापक्षेऽपि बोध्यम् ।

(प्रभा) व्यभिचारवारणाय नियतत्वनिवेशः[2] । प्रथमजातीयपदानुपादाने[1] व्याप्त्यभावज्ञानाभावविषयकमानसप्रत्यक्षव्यक्तौ व्यभिचारः । आत्मविशेष्यकताद्दशाभावविषयकप्रत्यक्षवृत्तित्वावच्छिन्नम्प्रति व्याप्तिव्यतिरेकज्ञानाभावस्यापि विषयविधया नियतपूर्ववर्त्तितया तत्प्रत्यक्षव्यक्तौ हेतुसत्त्वेऽपि व्याप्तिनिश्चयजन्यत्वरूपसाध्यस्य विरहात् । द्वितीयजातीयपदम् हेतुघटकसाध्यघटकीभूतजात्योरेकत्वलाभार्थम् । यद्वा ईश्वरीयप्रमात्वनिश्चयनिष्ठजनकतानिरूपितकार्यत्वावच्छिन्नजन्यतामादाय सिद्धसाधनवारणाय द्वितीयं जातीयेति ।

अप्रयोजकत्वादिति दीधितिः । प्रवृत्तिर्यदि प्रामाण्यनिश्चयजन्या न स्यात् तर्हि प्रामाण्यव्यतिरेकज्ञानप्रतिबध्या न स्यात् इत्याकारकानुकूलतर्कासम्भवादित्यर्थः । तथा च यत्संशययद्व्यतिरेकनिश्चयौ यत्प्रयोजकीभूताभावप्रतियोगिनौ तन्निश्चयस्तद्धेतुरिति व्याप्तिरप्यप्रयोजिकेत्यर्थः ।

प्रामाण्यव्यतिरेकज्ञानाभावस्येति । अप्रामाण्यज्ञानाभावविशिष्टार्थनिश्चयस्य कारणतयेत्यादिः । अर्थसंशयकारणाभावतयेति । ननु विनिगमकाभावादर्थनिश्चयविशिष्टप्रामाण्यव्यतिरेकज्ञानाभावस्य हेतुत्वमेवास्त्वित्यतः पूर्वकल्पम्परित्यज्य कल्पान्तरमाह अर्थसंशयेत्यादि । अर्थसंशयस्य कारणीभूतो यः प्रामाण्यसंशयः तदभावतयेत्यर्थः । अर्थसंशयसामग्र्यभावतयेति यावत् ।

---

१. यत्किञ्चिद्घटादिव्यक्तिमादाय तद्व्यक्तिनियताव्यवहितपूर्वं व्याप्तिनिश्चयविरहविशिष्टव्याप्तिव्यतिरेकज्ञानाभावसत्त्वाद् व्याप्तिनिश्चयाजन्यतद्व्यक्तौ व्यभिचारवारणाय प्रथमजातीयेति अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वलाभाय ।

२. अत्र नियतत्वकथनेन यद्धर्मिकयद्व्यतिरेकज्ञानस्याभावे व्यापकत्वमावश्यकमिति सूचितम् । तथाच व्यापकत्वानिवेशे 'काशीमरणान्मुक्तिः' इतिज्ञानधर्मिकप्रामाण्यनिश्चयविरहविशिष्टस्य काशीमरणान्मुक्तिरितिव्याप्तिव्यतिरेकज्ञानाभावस्यापि कदाचित् यागत्वप्रकारकयागविशेष्यकप्रवृत्तित्वजातीयकार्यपूर्ववर्त्तितया अथ च तत्र यागप्रवृत्तिजनकत्वाभावेन [illegible]

(चि० म०) प्रामाण्यसंशयानन्तरम् इदम् इत्थमेवेत्यवधारणस्य निष्कम्पप्रवृत्त्यङ्गस्य प्रामाण्यनिश्चयाधीनत्वात् ।

(दी०) अभ्युपेत्य समाधत्ते प्रामाण्येति । तथाच कारणत्वाभावेऽप्यवश्यमपेक्षणीयत्वमितिभावः ।

(गा०) अनुमाने दूषणान्तरमाह *यत्तदर्थयोरिति* । तथाच यत्पदेन प्रामाण्योपादाने दृष्टान्तासिद्धिः, व्याप्त्युपादाने च स्वरूपासिद्ध्यादिः ।

ननु प्रामाण्याभावज्ञानाभावस्य उक्तयुक्त्याऽर्थज्ञाननिष्ठकारणतावच्छेदकत्वं विनिगमनाविरहभयेन स्वतन्त्रकारणत्वं वाऽवश्यमङ्गीकर्त्तव्यम्, तथाच प्रामाण्यनिश्चयस्यैव हेतुना युक्तेति हेतुविधयैव प्रामाण्यनिश्चयापेक्षाया एव सम्भवादर्थनिश्चयसम्पादकतया तदपेक्षाभिधानं प्रामाण्यसंशयानन्तरमित्यादिना मणिकृतो न युक्तमित्यत आह *अभ्युपेत्येति*। परेण व्यवस्थाप्यमानं प्रामाण्यनिश्चयस्य प्रवृत्त्यहेतुत्वमभ्युपेत्यैवेत्यर्थः । *समाधत्ते* = प्रामाण्यनिश्चयापेक्षां व्युत्पादयति । अथवा प्रवृत्तौ प्रामाण्यनिश्चयानपेक्षायामपि नन्वित्याद्याक्षेपकर्त्तुरभिप्रेतया प्रमात्वस्य प्रमाणतत्त्वघटकतया तदवधारणे प्रमात्वावधारणापेक्षयैवोद्देश्यसिद्धेः प्रवृत्तौ प्रामाण्यनिश्चयस्य परम्परयापेक्षणीयत्वव्यवस्थापनमयुक्तमित्याशंक्याह *अभ्युपेत्येति*। प्रवृत्तौ प्रामाण्यनिश्चयापेक्षयैव तदसम्भवेन शास्त्रस्य निःश्रेयसोपयोगित्वानिर्वाह इत्येव स्वाभिप्रेतमिति स्वीकृत्यैवेत्यर्थः । इदमित्थमेवेत्यर्थनिश्चये प्रामाण्यनिश्चयापेक्षायामपि प्रवृत्तौ तत्कारणत्वासिद्धौ नोद्देश्यसिद्धिरित्याशङ्कां निराकुरुते *तथाचेति* । अवश्यापेक्षणीयत्वं कारणसम्पादकतया । तादृशापेक्षायामपि तदसम्भवे शास्त्रश्रवणे प्रवृत्त्यनुपपत्त्या शास्त्रस्य निष्फलत्वे प्राप्ते सङ्गतेरिति भावः

(प्रभा) ननु निरुपाधिकत्वमेव प्रयोजकत्वमित्याशंक्याह यत्तदर्थयोरिति ।

तटस्थमतम् पुनर्माध्यमिको निराचिकीर्षति इदमित्थमिति चिन्तामणिः । तथाच सफलप्रवृत्तिम् प्रति इदमित्थमेवेत्यवधारणात्मकज्ञानस्य जनकतया तस्य च प्रामाण्यनिश्चयाधीनत्वेन अवश्यन्तस्य प्रवृत्तावपेक्षणीयतया तम् विना प्रवृत्तेरनुत्पादापत्तिरिति-प्रामाण्यनिश्चयस्य स्वतो वा परतो वाऽसम्भवात् पूर्वपक्षसङ्गतिरिति । उक्तयुक्त्येति गादाधरी । अर्थनिश्चयकाले तद्द्वितीयक्षणे वा यत्र प्रामाण्यसंशयस्तत्र प्रवृत्त्यापत्तिवारणायेत्यादिपूर्वोक्तयुक्त्येत्यर्थः । विनिगमनाविरहभयेनेति । विशेष्यविशेषणभावे विनिगमनाविरहभयेनेत्यर्थः । कारणतावच्छेदकगौरवादित्यपि शेषः ।

ननु इत्याद्याक्षेपमन्यथा बुद्ध्वा कृताया अथकिमित्याशङ्कायाः स्वाभिप्रायप्रकटनेनैव निरसितुं शक्यत्वात् तत्प्रकटनमेव कथं न कृतमित्याशंक्याह अथवेति । नन्वित्याद्याक्षेपकर्तुः = माध्यमिकस्य । तदवधारणे = प्रमाणतत्वावधारणे । तदसम्भवेन =

(चि० म०) ननु[1] स्वत एवास्तु तन्निरूपणम् ?

(दी०) स्वतः = स्वस्मात् स्वकीयात् । तत्र स्वप्रकाशतया[2] तेनैः तत्प्रामाण्यं गृह्यते इति गुरवः ।

(गा०) ननु स्वत एवेति मीमांसकत्रयस्यैव प्रत्यवस्थानम्, नतु गुरोरेव मिश्रभट्टयोरेव वा मतत्रयसाधारणविप्रतिपत्तेरग्रे दर्शनीयत्वात्, अनुव्यवसायेनानुमित्या स्वप्रकाशेन वा गृह्यते इत्यादिना मतत्रयसाधारणस्वतस्त्वस्य व्यवस्थापनीयत्वाच्च,[3] एवं च स्वपदस्य प्रामाण्याश्रयमात्रपरत्वे तदीयमात्रपरत्वे वा न मतत्रयसाधारण्यमतस्तदुभयपरतया व्याचष्टे *स्वत* इति । *स्वस्मादिति*। प्रामाण्याश्रयव्यवसायादित्यर्थः । *तन्निरूपणमिति* मूलस्य च प्रामाण्यव्यवहार इत्यर्थः, तावता च व्यवसायस्यैव स्वप्रामाण्यविषयकत्वलाभः, तावतैव व्यवहर्त्तव्यज्ञानविधया प्रामाण्यव्यवहारहेतुतायाःस्वस्य निर्वाहात् । एतच्च गुरुमतानुसारेण । मिश्रभट्टयोरनुसारेणाह *स्वकीयादिति* । स्वप्रयोज्यादित्यर्थः । मिश्रमते व्यवसायजन्योऽनुव्यवसाय एव तत्प्रयोजकतया विवक्षितः, भट्टमते च व्यवसायजन्यज्ञाततारूपहेतुजन्यानुमितिरेवेति मतद्वयोपसंग्रहः ।

(प्रभा) मीमांसकत्रयस्यैवेति । गुरुमिश्रभट्टाख्यत्रयस्येत्यर्थः । अतः = मतत्रयसाधारण्यायेतिभावः । तदुभयपरतया = स्वपरतया स्वकीयपरतया चेत्यर्थः ।

पूर्वग्रन्थेन प्रवृत्तिम् प्रति प्रामाण्यनिश्चयस्य अपेक्षणात् तस्य स्वतः परतो वाऽसम्भवेन तदनुपपत्तिस्तदवस्थैवेति माध्यमिकमतमुपन्यस्तम् । इदानीम् मीमांसकमतनिरासद्वारा माध्यमिकमतं निराचिकीर्षुः मीमांसकमतमुत्थापयति चिन्तामणौ नन्वित्यादिना ।

१ स्वत इति मूले स्वपदमात्मपरम्, प्रकृते चात्मपदेन प्रामाण्याश्रय एव । प्रयोज्यत्वम् पञ्चम्यर्थः, तत्पदस्य च प्रकृतपरामर्शकतया तन्निरूपणमित्यत्र तत्पदेन प्रामाण्यस्य परामर्शः, निरूपणं व्यवहारः सच इदं ज्ञानम्प्रमा इत्याकारकशब्दप्रयोगरूपः, एवकारोऽन्ययोगव्यवच्छेदार्थः, तथाच स्वेतरप्रयोजकतानिरूपितप्रयोज्यत्वाभाववत्त्वे सति स्वप्रयोज्यतावान् प्रामाण्यव्यवहार इति न युक्तम् ? प्रामाण्याश्रयव्यवसायेतरेण संवादिप्रवृत्तिजनकत्वलिंगकानुमित्यापि मीमांसकैरपि प्रामाण्यनिश्चयेन प्रमात्वव्यवहारस्वीकारात् । किंतु अयोगव्यवच्छेदार्थक एवेह एवकारः, तथाच प्रमाण्याश्रयनिष्ठप्रयोजकतानिरूपितप्रयोज्यत्वसम्बन्धाभावाभाववान् प्रामाण्यव्यवहार इत्येव बोधः ।

२ स्वप्रकाशतया प्रामाण्यं गृह्यते इति गुरव इति दीधितिः । स्वप्रकाशतया इत्यत्र तृतीयार्थः प्रयोज्यत्वम्, तेनैव इत्यत्र तृतीयार्थोऽभेदः, तथाच स्वप्रकाशताप्रयोज्यतदभिन्नग्रहविषयतावत् प्रामाण्यम् ।

३ व्यवस्थापनीयत्वाच्चेति । पंचमविप्रतिपत्तौ चिन्तामणौ 'विशेष्ये तद्धर्मवत्त्व'

(गा०) केचित्तु *तन्निरूपणम्* = प्रामाण्यग्रहः। *स्वस्मात्* = व्यवसायात्, व्यवसायप्रयोज्य इति यावत्, सच मिश्रमतेऽनुव्यवसायरूपः, भट्टमते ज्ञाततालिंगकानुमितिरूपः। गुरुमतानुसारेणाह *स्वकीयादिति*। स्वोत्पत्तिप्रयोजककारणसमुदायादित्यर्थः। एतावता स्वसामग्रीजन्यत्वेन स्वस्यैव स्वप्रामाण्यग्रहरूपता लभ्यते इति व्याचक्रुः। तच्चिन्त्यम्[1]? तथा सति 'तत्र स्वप्रकाशतया' इत्यादिना प्रथमतो गुरुमतविवरणस्यायुक्तत्वापातात्। *स्वप्रकाशतया* = व्यवसायस्य स्वविषयकतया। *तेनैव प्रामाण्यं गृह्यत इति*। तस्यैव प्राथमिकज्ञानग्रहत्वात् सर्वेषामेव मीमांसकानाम् प्राथमिकज्ञानग्राह्यतायाः स्वतो ग्राह्यतारूपत्वादिति भावः।

(प्रभा) **तावताचेति**। निरूपणपदस्य प्रामाण्यव्यवहारपरतया चेत्यर्थः। व्यवसायस्य प्रामाण्यविषयकत्वे हेतुमाह **तावतैवेत्यादि**। **तावतैव** = व्यवसायस्य प्रामाण्यविषयकत्वेनैवेत्यर्थः। **स्वस्य** = व्यवसायस्य। **निर्वाहादिति**। अत्रायमाशयः, तद्व्यवहारम् प्रति तज्ज्ञानस्यैव कारणतया प्रामाण्याश्रयीभूतव्यवसायात्मकं ज्ञानम् प्रामाण्यविषयकं न स्याचर्हि तस्य प्रामाण्यरूपव्यवहर्त्तव्यविषयकज्ञानत्वाभावात् प्रामाण्यव्यवहारहेतुतैव न स्यात्। तस्मात् प्रामाण्यव्यवहारहेतुत्वसिद्धये प्रामाण्यविषयकत्वं व्यवसायस्याङ्गीकर्त्तव्यमिति भावः। **एतच्चेति**। व्यवसायस्य प्रामाण्यविषयकत्वं चेत्यर्थः। **मतद्वयोपसंग्रह इति**। तथा च प्रामाण्याश्रयो व्यवसायः तज्जन्योऽनुव्यवसायः तत्प्रयोज्यः प्रामाण्यव्यवहार इति भट्टमते व्यवसायजन्या ज्ञातता तज्जन्यप्रथमज्ञानविषयकानुमितिः तज्जन्यःप्रामाण्यव्यवहार इति फलितम्। एतेन च मिश्रमतेऽनुव्यवसायस्य प्रामाण्यविषयकत्वम्, भट्टमते च ज्ञाततालिङ्गकानुमितेः प्रामाण्यविषयकत्वमित्यागतम्, तयोरेव व्यवहर्त्तव्यज्ञानस्वरूपत्वात्। **स्वस्मादिति**। मिश्रभट्टमतानुसारेणैवोक्तम् इति जगदीशमतमुपक्षिपति केचित्तु इति। **सच** = प्रामाण्यग्रहश्च। **अयुक्तत्वापातादिति**। स्वस्मादित्यादिना मिश्रभट्टयोरेव मतयोः संग्रहे पूर्वम् मिश्रभट्टमतयोर्निरूपणस्यैवावश्यकतया गुरुमतस्य तु मिश्रभट्टमतनिरूपणानन्तरं निरूपणौचित्येन प्रथमं तन्मतनिरूपणस्यायुक्तत्वापातादित्यर्थः।

तत्रेतिदीधितिः। मतत्रये इत्यर्थः। **स्वप्रकाशतयेति**। स्वम् व्यवसायः तद्विषयकतयेत्यर्थः। तथाच गुरूणाम् मते स्वविषयकत्वमेव ज्ञानस्य स्वप्रकाशत्वम्। तन्मते चक्षुस्संयोगाद्यनन्तरम् अयं घटः घटमहं जानामि इत्याकारकप्रत्यक्षस्यैवोत्तरया

---

१ तच्चिन्त्यमितिगादा०। निपूर्वकरूपधातोः ज्ञानानुकूलव्यापार एव शक्तिःनतु ज्ञाने, तथाच निरूपणपदस्य ज्ञानार्थकत्वं जगदीशोक्तमयुक्तमिति केचित् चिन्ताबीजमाचक्षते तन्न सम्यक्? व्यापारांशमोषपूर्वकम् ज्ञानमात्रे लक्षणया तदर्थकल्पने

(ज्ञा) 'मितिमातृमेय' एतत्त्रितयविषयकत्वमेव । तत्र च ज्ञानम् स्वस्वरूपतया स्वं गृह्णा आश्रयतया चात्मानं विषयतया च घटम् अवगाहते । दीधितौ तेनैवेति । व्यवसायेः स्वश्चः । तथा च व्यवसायस्य स्वप्रकाशतया तेनैव तद्ग्रहणे तद्गतप्रमात्वस्य ग्रहण सिद्धं स्वतोग्राह्यत्वम् । ननु ज्ञानस्य स्वप्रकाशत्वे मानाभावः ज्ञानस्य तद्गतप्रामाण्यस्य ज्ञानान्तरग्राह्यत्वे तादृशज्ञानान्तरस्य तद्गतप्रामाण्यस्य वा ग्रहार्थम् पुनर्ज्ञानान्तरापेक्षा न... स्यात् अतः स्वप्रकाशरूपतायामेव तन्मतप्रसरात् । तस्यैव = व्यवसायस्यैव ।

प्राथमिकज्ञानग्रहत्वादितिगा० । ननु प्राथमिकत्वं ज्ञाने ज्ञानग्रहे वा विशेषणः यदि च ज्ञाने तर्हि मीमांसकानाम् प्राथमिकज्ञानविषयकग्रहविषयत्वस्यैव प्रमा स्वतोग्राह्यत्वेन "विषयनिरूपितं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषयः" इति सिद्धान् तृतीयतुरीयज्ञानयोरपि प्रथमज्ञानविषयकग्रहरूपतया तद्विषयत्वम् अयं घट इत्याकार प्रथमज्ञानगतप्रमात्वेऽपि ततो लभ्येत यच्च न सिद्धान्तसंगतम् । मीमांसकैः घटं जानामीत्याकारकानुव्यवसायमात्रेणैव अयं घट इत्याकारकज्ञानगतप्रमात्वग्रहणाङ्गीकार न तु तृतीयचतुर्थज्ञानाभ्याम् । अतः प्राथमिकत्वस्य ज्ञानग्रहे एवान्वयः । तथा च प्राथमि को ज्ञानग्रहः तत्त्वादिति तदर्थः । ज्ञानग्रहे प्राथमिकत्वं च ज्ञानग्रहविशिष्टान्यत्व स्वसामानाधिकरण्य स्वध्वंसकालीनत्वैतदुभयसम्बन्धेन । मुरारिमिश्रमते अनुव्यवसायो प्राथमिको ज्ञानग्रहः तत्र लक्षणसमन्वयश्चेत्थम्-स्वम् चैत्रीयानुव्यवसायरूपो ज्ञानग्र स्वसामानाधिकरण्यस्य तद्ध्वंसकालीनत्वस्य च तृतीयतुरीययोर्ज्ञानयोः सत्त्वेन तयोस्तद्वि शिष्टतया तदन्यत्वस्यानुव्यवसाये सत्त्वात् । चैत्रीयप्रथमानुव्यवसायो हि न केनापि ज्ञा ग्रहेण विशिष्ट इति तत्र ज्ञानग्रहविशिष्टभेदस्सुलभ एव । स्वसामानाधिकरण्यानुपादा -नेऽत्र स्वपदेन मैत्राद्यनुव्यवसायमादाय चैत्रीयानुव्यवसायस्यापि तद्विशिष्टत्वापत्तिः । द्विती सम्बन्धानुपादाने स्वपदेन तृतीयादिज्ञानग्रहमादाय तद्वैशिष्ट्यस्य प्राथमिकानुव्यवस सत्त्वेन तस्यापि प्राथमिकज्ञानग्रहत्वानुपपत्तिः ।[१]

प्राथमिकज्ञानग्राह्यताया इति । गुरुमते ज्ञानग्रहो व्यवसाय; मिश्रमते नुव्यवसायः,भट्टमते ज्ञाततालिङ्गकानुमितिःतद्विषयताया इत्यर्थः । अयमाशयः, गुरुम ज्ञानमात्रस्य यथार्थत्वेन अप्रमात्मकं ज्ञानमेव नास्ति इति या सामग्री ज्ञानं जनयिष्यति सै तद्गतं ज्ञाने प्रामाण्यमपि ग्राहयिष्यति, तन्मते ज्ञानत्वस्य ज्ञानधर्मिकप्रामाण्यज्ञानत्वस्य च सम नियतत्वात् समनियतधर्मावच्छिन्नकार्योत्पादिका सामग्री समनियतधर्मान्तरावच्छिन्नकार्य त्पादिकेति सिद्धान्तात् । तथाच गुरुमते अयं घटः घटमहं जानामि इत्याकारकज्ञानस्य आत्मानमिव स्वस्यैव स्वनिष्ठप्रामाण्यविषयकतया तद्विषयत्वस्य प्रमात्वे सत्त्वेन प्राथमिक ज्ञानग्राह्यत्वरूपस्वतस्त्वोपपत्तेः ।

मिश्रमते च चक्षुस्संयोगाद्यनन्तरम् यद् घट इत्याकारकं व्यवसायात्मकं ज्ञानन्तद् विषयकं यद् घटमहं जानामि इत्यनुव्यवसायात्मकं लौकिकमानसप्रत्यक्षं तद्विषयत्वस्य प्रमात्वे सत्त्वेन तादृशस्वतस्त्वोपपत्तिः ।

(चि० म०) तथाहि तत्र विप्रतिपत्तयः—

(दी०) तदनुव्यवसायेनेति मिश्राः ।

(गा०) *तदनुव्यवसायेनेति* = तद्विषयकलौकिकमानसेनेत्यर्थः । तत

(प्रभा) भट्टमते च ज्ञानमतीन्द्रियम् अतो न मिश्रमतवत् अनुव्यवसायेन प्रामाण्यभा पपत्तिःकिन्तु ज्ञानेन विषये ज्ञाततानामकः कश्चिद् धर्मविशेषो जन्यते सच ज्ञातो घट इ प्रतीतिसाक्षिको विषयताविशेषः प्राकट्यापरपर्यायो वा,तया च ज्ञाततया ज्ञानमनुमीयत तथाच प्रयोग इयं ज्ञातता घटविशेष्यकघटत्वप्रकारकज्ञानसाध्या घटवृत्तिघटत्वप्रकारकज्ञ तात्वात् या यद्वृत्तिर्यत्प्रकारिका ज्ञातता सा तद्विशेष्यकतत्प्रकारकज्ञान'साध्या यथा पटत्वप्रकारकज्ञातता पटविशेष्यकपटत्वप्रकारकज्ञानसाध्येति सामान्यतो व्याप्तिराश्रीयत अत्र व्याप्तौ यत्त्वतत्त्वप्रवेशेन एकोपादानेऽन्यस्यासंग्रहः स्यादितिचेत्तर्हि घटवृत्तिघटत्वप्रक कज्ञातताात्वं यत्र तत्र घटविशेष्यकघटत्वप्रकारकज्ञानसाध्यतात्वरूपेण विशेषणात् । दृष्टान्तः पटविशेष्यकपटत्वप्रकारकज्ञानानन्तरजन्यज्ञातता । प्राथमिकघटत्वादिप्रकारकप्र साध्यत्वसाधकानुमितौ च जन्मान्तरानुभूतव्याप्तिस्मरणमेव गतिः । एवञ्च अपूर्वचैत्र दिप्रकारघटितप्रामाण्यविषयकानुमित्यनुपपत्तिरेवेति एतन्मते दूषणमेव । अतीताग गतविषयज्ञानेन ज्ञाततया एवाजननात् । असन्निकृष्टविषयकानुमित्यादिना ज्ञातताजननेऽ तस्याःप्रत्यक्षासम्भवात् ज्ञानान्तरोपायाभावात् लिङ्गज्ञानासम्भवात् भट्टमते ज्ञानस्यात न्द्रियत्वेऽपि ज्ञातताप्रत्यक्षसिद्धेति व्यवसायेन द्वितीयक्षणे ज्ञाततायां जनितायां तृतीयक्ष घटत्वप्रकारकत्वेन तत्प्रत्यक्षे जायमाने घटवृत्तिभानस्यावश्यकतया प्रमाव्यापकतावच्छेद प्रकारेण हेतुग्रहध्रौव्यम् ।

ननु ज्ञातताप्रकारेण भासमाने घटे घटत्वभानेऽपि ज्ञाततायां घटवृत्तित्वं न भास व्यवसायद्वितीयक्षणे ज्ञातो घट इत्येव प्रत्यक्षोदयात् इति कुतो दर्शितहेतुग्रहनैयत्येन ज्ञात लिङ्गकानुमित्या प्रमात्वग्रहोक्तिसंगतिः इतिचेन्न ? अयंघटो घटत्वेन ज्ञात इति प्रत्यक्षे घटे ज्ञाततावत्त्वमिव ज्ञाततायां घटवृत्तित्वस्यापि भानात् आधारत्वाधेयत्वयोः समानसंवि संवेद्यत्वात् प्रत्यक्षस्थले तदुभयभासकसामग्रीसमनैयत्येन तत्सम्भवात् ।

दृष्टान्तेऽपि दृष्टान्तान्तरेण साध्यसिद्धिरित्यग्रे व्यक्तीभविष्यति । एवंच उक्तरीत्या ज्ञा तालिङ्गकानुमितिविषयत्वस्य प्रमात्वे सत्त्वात् स्वतोग्राह्यत्वसिद्धिः ।[1]

तदनुव्यवसायेनेति दीधितिः । तृतीयार्थोऽभेदः तस्य गृह्यत इत्यत्र ग्रहेऽन्वय तदनुव्यवसायेन तत्प्रामाण्यमित्यत्र च तत्पदेन व्यवसायग्रहणम्, तथाच तदनुव्यवसाय भिन्नज्ञानविषयीभूतं ज्ञाननिष्ठप्रामाण्यमित्यर्थः । स्वोत्तरवर्त्तिस्वविषयकलौकिकप्रत्यक्षविष भूतं स्वनिष्ठप्रामाण्यम्, इति यावत् । **तद्विषयकलौकिकमानसेनेति** । लौकिकत्वा

[illegible] माण्यं गृह्यते इत्यनुषज्यते। एवमग्रेऽप्यनुषङ्गो बोध्यः। उपनीतप्रामाण्यस्य [illegible]कत्वेऽपि ज्ञानमानसे भानाल्लौकिकत्वविशेषणम्। नच ज्ञानांशे लौकिक[illegible]त्वेऽपि उपनीतप्रामाण्यभानात् तद्विशेषणेनापि न न्यायमताद् विशेष[illegible] वान्यम्, स्वांशे लौकिकत्वस्य विवक्षणीयत्वात्। तच्च स्वविषयकज्ञाना[illegible]त्वम्। स्वाश्रयग्राह्यत्वरूपगुरुमतसिद्धस्वतस्त्वेऽपि स्वविषयकज्ञाना[illegible] स्वाश्रयो विशेषणीयः, अन्यथा प्रामाण्याश्रयज्ञानेऽपि कदाचिदुपनीत[illegible]मानस्य न्यायमतसिद्धतया तदविशेषापत्तेः। *ज्ञानस्यातीन्द्रियतयेति।*

[illegible] फलमाह उपनीतप्रामाण्यस्येति। प्रमितो घट इत्याद्याकारकज्ञाने ज्ञानल[illegible]मानस्येत्यर्थः। न्यायमतेऽपीति। प्रामाण्यस्य स्वतस्त्वानङ्गीकर्तृमतेऽपि। ज्ञान[illegible] । उक्तालौकिकज्ञानमानस इत्यर्थः। अयम्भावः, नैयायिकमतेऽपि अद्य अयं घट[illegible] सफलप्रवृत्तौ सत्याम् इदं ज्ञानम् प्रमा संवादिप्रवृत्तिजनकत्वात् इत्यनुमित्या[illegible]नुभवजन्यसंस्कारवशात् प्रमात्वस्मरणरूपज्ञानलक्षणया नैयायिकैरपि प्रमात्वस्य [illegible] इति न्यायमतसाधारणतया तदविशेषापत्तिरिति लौकिकत्वविशेषणम्। [illegible] घट इत्याकारकज्ञानस्य प्रमात्वांशेऽलौकिकतया तद्व्यावृत्तिः। ननु प्रमितो [illegible]कालीनघटज्ञानवानहमित्यादिज्ञानानामपि ज्ञानांशे लौकिकत्वमेव तादृशज्ञानेषु [illegible] मनस्संनिकर्षस्यैव प्रयोजकत्वेन ज्ञानलक्षणासन्निकर्षस्य अप्रयोजकतया [illegible]पदेनापि तद्ग्रहणेन तद्विषयत्वस्य प्रमात्वे सत्त्वेन लौकिकत्वोपादानेऽपि [illegible]लक्ष्यमित्याशङ्कते नचेति। उत्तरयति स्वांश इति। अंशो विषयित्वम्, [illegible] स्वविषयकत्वावच्छेदेन यत् लौकिकत्वं तद्विशिष्टमानसप्रत्यक्षविष[illegible] स्वनोग्राह्यत्वम्। तच्चेति। प्रामाण्यांशे लौकिकत्वं चेत्यर्थः। स्ववि[illegible]ज्ञानाजन्यत्वमिति। स्वम् प्रामाण्यम्। तथाच उपनीतस्थले प्रामाण्यभान[illegible]सन्निकर्षप्रयोज्यतया तादृशज्ञानस्य प्रामाण्यज्ञानाजन्यत्वविरहात्। [illegible] तु न प्रामाण्यविषयकज्ञानजन्यत्वम्, तस्यैव प्रामाण्यविषयकत्वेन स्वस्य [illegible] अत्र स्वाश्रयविषयकं यत् स्वाश्रयं तदादाय गुरुमतादविशेषापत्तेः। [illegible] कदाचिदुपनीतप्रामाण्यभानस्य न्यायमतसिद्धतया गुरुमतस्य न्यायमताद्विशे[illegible] स्वाश्रयग्राह्यत्वरूपेति। स्वम् प्रमात्वम्, मिश्रमते स्वाश्रयज्ञान[illegible]ऽपि गुरुमते ज्ञानानिवेशेऽनुचितगौरवापत्तेरित्याशयेन स्वाश्रय[illegible] अन्यथा = स्वविषयकज्ञानाजन्यत्वानिवेशे, तदविशेषापत्तेः = न्यायमताद[illegible]।

[illegible]नस्यातीन्द्रियतयेति। भट्टानामयमाशयः, यत्सविकल्पकं ज्ञानमपि न प्रत्यक्षं [illegible] प्रत्यक्षं स्यात्तर्हि निर्विकल्पस्यापि प्रत्यक्षं दुर्निवारं स्याज्ज्ञानत्वाविशेषात् [illegible] निर्विकल्पकस्य प्रत्यक्षत्व[illegible]

(प्रभा) नच विशिष्टवैशिष्ट्यप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुतया तदभावान्न निर्विकल्पकप्रत्यक्षापत्तिरिति वाच्यम्, विशेष्ये विशेषणमिति रीत्या एकत्रोभयमितिरीत्या वा तादृशप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वाभावेन तद्रीत्या निर्विकल्पकप्रत्यक्षापत्तेर्दुर्वारत्वात्। एवञ्च गुरुभूतप्रतिबध्यप्रतिबन्धकभावकल्पनमपेक्ष्य आत्मनिष्ठगुणप्रत्यक्षे तादात्म्येन ज्ञानस्यैव धर्माधर्मभावनानामिव ज्ञानभावनाऽदृष्टसाधारणवैजात्यं कल्पयित्वा तज्जात्यवच्छेदेनैव वा प्रतिबन्धकत्वकल्पनमुचितम्। जानामीत्यनुभवानामपि अनुभवामीत्युपनीतभानत्वम्। एवञ्च विषयनिष्ठज्ञाततया तन्निष्ठज्ञानमेवानुमीयते घटो ज्ञानवान् ज्ञाततावत्त्वात् इति। तत्र घटत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन ज्ञानानुमितौ तादृशप्रकारतानिरूपितविशेष्यतारूपप्रामाण्यग्रहः। नच ज्ञाततायाः प्रमात्वाव्याप्यतया तदनुमापकत्वासम्भव इति वाच्यम्, प्रमात्वस्याननुमेयत्वात् ज्ञानानुमाने समानसंवित्संवेद्यतया ज्ञानत्ववत्प्रमात्वस्यापि स्वतस्त्वसम्भवात्। न च ज्ञाततायाम्मानाभावः, तस्या विषयज्ञानातिरिक्तायाः आवश्यकत्वात्। तथाहि विषयता न तावज् ज्ञानस्वरूपा, घटप्रकारकभूतलविशेष्यकज्ञानाद् भूतलप्रकारकघटविशेष्यकानुव्यवसायापत्तेः। नापि विषयस्वरूपा, विशिष्टज्ञानसमूहालम्बनज्ञानयोर्वैलक्षण्यापत्तेः। अत उभयातिरिक्ता सा नित्या लाघवात्।

अन्यथा अनन्ततत्तद्विषयकज्ञानैरनन्ततत्तद्विषयतोत्पत्तितन्नाशकल्पने गौरवापत्तेः। एवञ्च नष्टयुधिष्ठिरादिविषयकज्ञानोत्पत्तिरपि सुलभेति युक्तम्।

अन्ये तु ज्ञातताविषये एव मातः तत्तज्ज्ञानजन्या तत्तद्विषयनिष्ठा ज्ञातता सा च नष्टभाविविषयनिष्ठाऽपि। नचासतोर्नष्टभाविनोः कथं कार्योत्पत्तिरिति वाच्यम्, द्वित्वादिकमिव तदुत्पत्तौ बाधकाभावात्। नच तत्र नष्टद्वित्वस्य स्मरणमिति वाच्यम्, अननुभूततद्द्वित्वस्यस्मरणानुपपत्तेः। नच यावदाश्रयप्रत्यक्षं विना कथं द्वित्वप्रत्यक्षमिति वाच्यम् लाघवेन संयोगप्रत्यक्षे तस्य हेतुत्वाङ्गीकारेण व्यासज्यवृत्तिधर्मप्रत्यक्षे तस्य हेतुत्वाभावेन तत्प्रत्यक्षस्य सुवचत्वात्। वायुप्रत्यक्षाभावेऽपि तद्गतस्पर्शप्रत्यक्षस्य त्वयाङ्गीकारात्। अतो द्वित्वबहुत्वयोर्भाविभूतपदार्थनिष्ठत्ववत् तज्ज्ञानोत्पाद्यविषयताया अपि भाविभूतपदार्थनिष्ठत्वम्। नच द्वित्वादिगुणस्य समवायिकारणाभावेन भाविभूतयोः कथमुत्पत्तिरिति वाच्यम्, समवायेन भावकार्योत्पत्तौ तादात्म्येन द्रव्यस्य जनकता इति समवायिकारणकार्यभावस्यैव वक्तव्यत्वेन संख्यायाःपदार्थान्तरत्वेन विषयतावत् समवायेनोत्पत्त्यभावात् समवायिकारणानावश्यकत्वात् संख्याया विषयतायाश्चाभावं जानामीति, अभावौ द्वौ, चतुर्विंशतिर्गुणा इतिप्रतीत्या अभावादिनिष्ठतया स्वरूपसम्बन्धेनैवोत्पत्त्यङ्गीकारेण समवायिकारणानावश्यकत्वात्।

न च द्वित्वादीनामाकस्मिकत्वप्रसङ्गः, अपेक्षाबुद्धेरेव जनकतया नियामकत्वात्। अपेक्षाबुद्धेरपि व्यंजकत्वे तु नित्यतया न तदापत्तिप्रसङ्गोऽपि।

(दी०) तत्र = मतत्रयसाधारणस्वतस्त्वे ।

(गा०) एतेन भट्टानां ज्ञाततालिङ्गकानुमितेर्मिश्रमतसिद्धानुव्यवसायवत् प्राथमिकज्ञानग्रहरूपतेति सूचितम् , तेन न्यायमतेऽपि अनुमित्या प्रामाण्यं गृह्यते, परन्तु तन्मते ज्ञाततायाः अप्रसिद्धतया तल्लिङ्गकानुमित्या ग्राह्यत्वासम्भवः, एवञ्च ज्ञाततायामेव विवादपर्यवसानम् नतु स्वतोग्राह्यत्व इति दूश्यानवकाशः ।

नच ज्ञाततालिङ्गकानुमितिग्राह्यत्वे ज्ञानातीन्द्रियत्वस्याप्रयोजकतया ज्ञानस्यातीन्द्रियतयेति हेत्वनन्वयः, अनुमित्येत्यस्य सावधारणपरतया तल्लभ्यप्रत्यक्षाग्राह्यत्वे हेत्वन्वयस्य विवक्षितत्त्वात् । मूलस्थं तत्रेत्युपादाय व्याचष्टे *मतत्रयसाधारणस्वतस्त्व इति* । एतेन प्रथमावधि विप्रतिपत्तित्रयस्य मतत्रयसाधारण्यं मूलस्थतच्छब्दलभ्यमेवेति तदभिधानमयुक्तमिति निरस्तम् । तुरीयविप्रतिपत्तेः प्रत्येकमेवेत्यनेन यथा एकमतसिद्धस्वतस्त्वकोटिकत्वमभिहितम् तथा प्रथमादिविप्रतिपत्तीनां मतद्वयमात्रासिद्धस्वतस्त्वादिकोटिकत्वशङ्कावारणाय युक्तं त्रितयसिद्धस्वतस्त्वकोटिकत्वाभिधानम्, तद् विना न्यूनत्वस्यापरिहारः । *तत्रेति* । सप्तम्यर्थविषयतायाःसंशयजनकवाक्यरूपविप्रतिपत्तिपदार्थैकदेशे संशयेऽन्वयो बोध्यः ।

(प्रभा) द्वित्वादेःक्षावस्थानमिति वाच्यम्, कपालादिनाशे क्षणमात्रं घटादेरिव विषयताया अपि सत्त्वे बाधकाभावात् । अतो नष्टघटादावपि घटो ज्ञातइत्यनुभवात् भूतभाविनिष्ठत्वमित्यन्यत्र विस्तरः ।

एतेनेति । ज्ञानातीन्द्रियत्वकथनेनेतिभावः । **एवञ्च** = अनुमितिग्राह्यत्वे च । **दूश्यानवकाशः** = पूर्वपक्षानवकाशः । भट्टमते ज्ञानस्यातीन्द्रियत्वेऽपि विवादादिति तात्पर्यम् । इदमुपलक्षणम्, मीमांसकमते स्वाश्रयज्ञानग्रहत्वव्यापकविषयितानिरूपकत्वं स्वतोग्राह्यत्वम् , तच्च नैयायिकमते न सम्भवति, तादृशग्रहत्वस्यानुव्यवसायेऽपि सत्त्वात् तत्र प्रामाण्यविषयिताया अभावादिति ध्येयम् ।

ननु ज्ञानं ज्ञाततालिङ्गकानुमितिग्राह्यमित्यत्रातीन्द्रियत्वं हेतुरप्रयोजकः, ज्ञानस्य ऐन्द्रियकत्वेऽपि अनुमितिग्राह्यत्वसम्भवात् इत्याशङ्कते **नचेति** । तल्लभ्येति अवधारणलभ्येत्यर्थः । तथाच प्रत्यक्षाग्राह्यत्वांशे अतीन्द्रियत्वस्य प्रयोजकतया प्रत्यक्षाग्राह्यत्वविशिष्टतादृशानुमितिग्राह्यत्वम् प्रत्यपि तत्प्रयोजकत्वसम्भवः ।

अत्रेदं बोध्यम् । गुरुमिश्रयोर्मते विषयोपधानेनैव ज्ञानभानात् विषयानुपधानेन ज्ञानप्रत्यक्षस्यालीकतया विषयपुरस्कारेण तदभानात भट्टमते च ज्ञाततालिङ्गकानुमि-

(चि० म०) ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहक-सामग्रीग्राह्यं न वा ?

(दी०) विचाराङ्गसंशयजननीं विप्रतिपत्तीराह ज्ञानेत्यादिना ।

(गा०) विप्रतिपत्तेरुपयोगितां दर्शयितुमाह *विचारांगेति* । विचारो जल्पः विपरीतोद्भावकपरविजिगीषया न्यायप्रयोगरूपः, जिज्ञासासम्पादनेन तदंगस्य तदुपयोगिनो मध्यस्थसंशयस्य जननीरित्यर्थः । अत्र च नन्वित्यादिवक्तुर्मीमांसकस्यैव न 'तथाहि' इत्याद्यभिधानम् तथासति विधिकोटिमात्रस्य तदभिधेयतया निषेधादिबोधक 'नवा' इत्याद्यभिधानासङ्गतेः, स्वसंशयज्ञापनाय मध्यस्थस्यैव तथाभिधानौचित्यात् इति 'स्वत एवास्तु तन्निरूपणम्' इत्यनन्तरम् 'इतिमीमांसकानां स्वमतपरिग्रहेण नैयायिकेन विचारप्रसक्तिः' इतिपूरणीयम्, तथाच ग्रंथकृत एवोक्तिरियम् । तथाच स एव विचारो विप्रतिपत्त्यभावे न घटत इत्यालोच्य ग्रन्थकृतैव 'तथाहि' इत्यादिना विप्रतिपत्तयो दर्शिताः । उत्तरवत् पूर्वपक्षोऽपि परिष्करणीय इत्यवधेयम् ।

पक्षे ज्ञानपदोपादानं प्रामाण्यपदस्य प्रमाकरणत्वार्थपरत्वभ्रमनि-

---

(प्रभा) तदङ्गस्य = विचाराङ्गस्य । तदुपयोगिनः = विचारोपयोगिनः । नन्वित्यादिवक्तुरिति । ननु स्वत एवास्तु निरूपणमित्यादिवक्तुरित्यर्थः । तदभिधेयतया = नन्वित्यादिवक्तुरभिधेयतया । उत्तरवत् = उत्तरग्रन्थवत् । पूर्वपक्षः = पूर्वपक्षग्रन्थः । पूर्वपक्षग्रंथस्य यथावदनिरूपणे पूर्वपक्षस्य यथावदज्ञाने सति उत्तरस्य (उत्तरग्रंथस्य) यथार्थतोऽज्ञेयत्वेनानुपादेयत्वापत्तेरिति भावः ।

पक्षे = पक्षबोधकवाक्ये इत्यर्थः, तेन अर्थरूपस्य पक्षस्य ज्ञानपदघटितत्वाभावेऽपि न क्षतिः । प्रमाकरणत्वार्थपरत्वेति । प्रमाकरणत्वबोधेच्छयोच्चरितत्वभ्रमे इत्यर्थः । सच भ्रमःप्रामाण्यपदमनेन प्रमाकरणत्वबोधेच्छयोच्चरितम् इत्याकारकः । निरासपरतयेति । ननु तस्य निरासस्तन्निवृत्तिःसाच यदि ध्वंसरूपा तर्हि तृतीयक्षणे स्वत एव तद्ध्वंसस्य सिद्धतया तदर्थं ज्ञानपदोपादानादिप्रयासस्य व्यर्थत्वापत्तिरतःप्रमाकरणत्वार्थपरत्वभ्रमनिरासः प्रमाकरणत्वार्थभ्रमेऽप्रामाण्यग्रहसम्पादनम्, तादृशभ्रमप्रतिबन्धो वा । तथा च पक्षघटकप्रामाण्यपदम् प्रमाकरणत्वबोधेच्छयोच्चरितं स्यात् तर्हि स्वसमभिव्याहृतपदार्थान्वितार्थबोधकं स्यात् , नचैवम्, तस्मात् प्रमाकरणत्वबोधेच्छयोचरितत्वाभाववत् स्वसमभिव्याहृतपदार्थान्वितार्थबोधकत्वाभावात् इत्याद्यनुमानेन प्रमाकरणत्वार्थपरत्वभ्रमप्रतिबन्धःतादृशभ्रमेऽप्रामाण्यग्रहो वा सम्भवति । स्वम् प्रामाण्यपदम् तत्समभिव्याहृतं पदं ज्ञानपदम्, तदर्थः ज्ञानवृत्तित्वम् तदन्वितोऽर्थः प्रमाकरणत्वरूपः तद्बोधकत्वाभावादित्यर्थः ।

(दी०) अत्र च तात्पर्यवशात् तद्वति तत्प्रकारकत्वरूपप्रकर्षविशि ज्ञानं प्रशब्दोपसंहितेन माधातुना प्रत्याय्यते, भावल्युटा च तादृशज्ञानत्व करणल्युटा तादृशज्ञानकरणत्वं तद्धितान्तेनोपस्थाप्यते, तत्र तादृशज्ञानकरणत निरासाय ज्ञानेति सावधारणम्। तच्च न ज्ञानत्वनियतम्,

---

(गा०) रासपरतया सार्थकयिष्यन् तत्पदस्य प्रमात्वतत्करणत्वोभयार्थकतां त्पादयति *अत्रेति*। अत्र = पक्षबोधके ज्ञानप्रामाण्यपदे। ज्ञानेतिपदं ज्ञानक त्वनिरासाय, तात्पर्यभ्रमविषयितावारणायेत्यन्वयः। तद्वति तत्प्रकारकत्व याथार्थ्यमिवान्योऽपि प्रकर्षःप्रशब्दार्थ इति कुतोऽस्यैव लाभ इत्यत आह *ता वशादिति*। माधातुपूर्वप्रशब्दस्य याथार्थ्यरूपप्रकर्ष एवानादितात्पर्यादित्यः प्रशब्दस्य वाचकत्वे विवादात् पदत्वं सविवादमिति प्रशब्देत्यभिधान तदुपसन्धानं च तदव्यवहितोत्तरत्वम्। *माधातुना* = ज्ञानत्वविशिष्ट कमाधातुना। तद्धितान्तेनेत्यस्य भावल्युटा करणल्युटा इत्युभयत्र सम्ब तद्धितश्च भावार्थकःष्यञ्प्रत्ययः तस्य प्रकृत्यर्थतावच्छेदकबोधकत्वव्युत रितिभावः। *तत्र* = तयोरर्थयोर्मध्ये। ज्ञानपदादेव कथं तन्निरास इत्यपे यामाह *सावधारणमिति*। ज्ञानस्यैव यत्प्राभाण्यमित्यर्थपरम्। *तच्च* = प्रमा णत्वं च। *न ज्ञानत्वनियतम्* = न ज्ञानमात्रवृत्ति इत्यर्थः। तथाच प्रमाकर समभिव्याहृतज्ञानमात्रवृत्तित्वान्वयानुपपत्त्या प्रामाण्यपदे तत्परत्वभ्रमनिर गङ्गायां घोष इत्यादौ प्रवाहे घोषाद्यन्वयानुपपत्त्या गङ्गापदे तत्परत्वभ्रमनि

(प्रभा) तत्पदस्य = प्रामाण्यपदस्येत्यर्थः। अन्योऽपि = विशेष्यावृत्त्यप्रकारकत्वरू गृहीताग्राहित्वरूपोऽपीत्यर्थः। अस्यैव लाभ इति। तद्वति तत्प्रकारकत्वस्य लाभ इत्य तात्पर्यादिति। प्रवृत्तिम् प्रति तद्वति तत्प्रकारकत्वरूपप्रमात्वग्रहस्य हेतुतया तादृश एवानादितात्पर्यादिति भावः। तात्पर्येऽनादित्वं च स्वप्रागभावाधिकरणकालत्वव्यापक मानविषयकतात्पर्यकत्वम्। ईश्वरीयतात्पर्यमादाय समन्वयो बोध्यः। आधुनिकल स्थलीयतात्पर्ये व्यापकत्वस्वसमानविषयकत्वनिवेशः। गङ्गायां घोष इत्यत्र तात नादित्वम्।

दीधितौ ज्ञानेतीति। ज्ञानपदानुपादाने प्रामाण्यस्यैव पक्षत्वे बाधः, प्र स्वतोग्राह्यत्वसत्त्वेऽपि प्रमाकरणत्वे स्वतोग्राह्यत्वाभावादिति भावः। कथन्न रास इति गादा०। तादृशज्ञानकरणत्वस्य व्याप्तिज्ञानादिषु सत्त्वात् तत्र ज्ञानवृत्ति अक्षतत्वादितिभावः। न ज्ञानमात्रवृत्तीति। प्रमाकरणत्वस्य मनश्चक्षुरादीन्द्रिये सत्त्वात्। उभयविधार्थे शक्तिकल्पने गौरवेण एकविधार्थे एव शक्तिकल्पनस्यौचित्यात्

(दी०) मनःप्रभृतिवृत्तित्वात् ।

गा०) सर्वादितिभावः । *मनःप्रभृतीति* । यद्यपि परामर्शादिनिष्ठमनुमित्यादिप्रमा-करणत्वं ज्ञानत्वनियतमेव तथापि विशेष्यतावच्छेदकावच्छेदेन विशेषणान्व-ास्यौत्सर्गिकत्वात् प्रमाकरणत्वत्वावच्छेदेन ज्ञानत्वनैयत्यान्वयानुपपत्त्या द्वति तत्प्रकारकज्ञानत्वत्वावच्छेदेन तदन्वयसम्भवेन तत्परतैव गृह्यत ति भावः ।

अथैवं ज्ञानस्यैव इत्यवधारणपरत्वादसौ व्यर्थः, मनःप्रभृति-नेष्ठज्ञानकरणतायाः परामर्शादिनिष्ठकरणतातो भिन्नतया तत्र ज्ञानवृत्तित्वस्य ाधेन प्रमाकरणतापरत्वभ्रमनिरासासम्भवादिति चेत् सत्यम्, सावधारण-मित्यस्य अन्वयितावच्छेदकावच्छेदेन स्वार्थसम्बन्धपरमित्यर्थः, तच्च न ानत्वनियतमित्यस्य तत्त्वं च न ज्ञानवृत्तित्वव्याप्यमित्यर्थं इति न दोषः । तेन ज्ञानप्रामाण्यपदस्य ज्ञानस्यैव यत् प्रामाण्यमित्यर्थपरत्वनिर्णायकाभावात् ोक्तभ्रमनिरासासम्भवः, नह्यवच्छेदकावच्छेदेनान्वयपरतावदेताद‍ृशार्थपरताया प्रपि औत्सर्गिकत्वमित्यपि परास्तम् ।

प्रभा) ननु करणत्वं न जातिर्जातावपि सत्त्वात् किन्तु उपाधिरेव,एवञ्च परामर्शनिष्ठ-रणतायाःमनःप्रभृतिनिष्ठकरणतातो भिन्नतया ताद‍ृशपरामर्शनिष्ठकरणताया ज्ञानत्वव्याप्य-ामेवेति भाव इत्याह यद्यपीति । समाधत्ते तथापीति । असति बाधके उद्देश्यतावच्छे-कव्यापकत्वं विधेये विधेयसंसर्गे वा भासते इति नियमादित्यर्थः ।

एवमिति । असति बाधके उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयस्वीकारे ति भावः । अन्वयितावच्छेदकावच्छेदेन' स्वार्थसम्बन्धपरम् इति । अन्वयि-ावच्छेदकावच्छेदेन = प्रामाण्यत्वावच्छेदेन । स्वम् ज्ञानपदम्-तदर्थो ज्ञानवृत्तित्वम्, त्सम्बन्धः ज्ञानवृत्तित्वप्रतियोगिकस्वरूपसम्बन्ध इत्यर्थः । तथाच प्रमाकरणत्वत्वव्यापकत्वम् ज्ञानवृत्तित्वप्रतियोगिकस्वरूपसम्बन्धे । ज्ञानवृत्तित्वव्याप्यमिति । ऐतेन तुल्यवित्ति-द्यतया उद्देश्यतावच्छेदकव्यापकत्वस्य विधेयसंसर्गे भानमिव विधेयव्याप्यत्वमपि उद्देश्य-ावच्छेदके भासते । एतेनेति । अन्वयितावच्छेदकावच्छेदेन स्वार्थसम्बन्धपरत्वमङ्गीकृत्य ानवृत्तित्वव्याप्यत्वार्थकरणेनेत्यर्थः ।

अन्वयितावच्छेदकेति । अन्वयि प्रामाण्यम्, अन्वयितावच्छेदकम् प्रामाण्यत्वम् ार्थसम्बन्धपरमिति । स्वम् ज्ञानपदम् तदर्थः ज्ञानवृत्तित्वम्, सम्बन्धश्च व्याप्तिरूपोऽत्र ानवृत्तित्वव्याप्तिपरमिति संधातार्थः । तत्त्वं चेति = प्रमाकरणत्वत्वं चेति । तथा च ानपदोपादाने प्रामाण्यत्वे ज्ञानवृत्तित्वव्याप्यत्वलाभे प्रमाकरणत्वरूपार्थो नात्र प्रामा-ण्यपदेन विवक्षितः, प्रमाकरणत्वत्वरूपान्वयितावच्छेदके ज्ञानवृत्तित्वव्याप्यत्वविरहात

(गा०) यत्तु प्रमात्वप्रमाकरणत्वयोःप्रामाण्यपदार्थत्वव्युत्पादनं रूपेण पक्षत्वमिति प्रदर्शनाय, 'तादृशज्ञानकरणत्वस्य निरासाय' इति व्यावर्त्तनायेत्यर्थः । तथाच ज्ञानमात्रवृत्तिप्रामाण्यपदार्थत्वेन ज्ञानान्य तानवच्छेदकप्रामाण्यपदार्थतावच्छेदकवत्त्वेन पक्षत्वात् प्रमाकरण रूपप्रामाण्यपदार्थतावच्छेदकस्य च मनःप्रभृतिवृत्तित्वावच्छेदकत्व प्रमाकरणत्वस्य पक्षान्तर्भाव इति नांशतो वाधादिरिति व्याख्यानम्, तथासति ज्ञानपदस्य करणव्युत्पत्त्या ज्ञानजनकार्थकत्वात् तत्समभि हारेणापि न भ्रमनिरास इत्याशङ्कायां असम्भवेन ज्ञानपदस्य ज्ञा भूरिप्रयोगदर्शनात् न ज्ञानकरणत्वपरत्वशङ्केत्यर्थपराया ज्ञानपदेने भ्रिमफक्किकाया अवतारासम्भवात् ।

(प्रभा) स्वमते प्रमात्वत्वेनैव पक्षता ज्ञानपदं तूक्तशङ्कानिरासार्थम् । ज्ञानस्य पक्षान्तर्भावमन्यन्ते तन्मतमुत्थापयति यत्त्विति । तेन रूपेण = प्रमाण्य त्वेन रूपेणेत्यर्थः ।

तथाच प्रामाण्यपदार्थः तदप्रामाण्याग्राहकज्ञानग्राहकसामग्रीग्राह्यो न वेति । पक्षस्वरूपम् ।

अत्रहि प्रमाकरणत्वत्वरूपपक्षतावच्छेदकावच्छिन्ने प्रमाकरणत्वात्मकप्रामाण्य रूपपक्षे साध्यं नास्ति प्रमात्वत्वरूपपक्षतावच्छेदकावच्छिन्ने प्रमात्वात्मकप्रामाण्य रूपपक्षे साध्यमस्तीति आंशिको वाधो वोध्यः । पक्षतावच्छेदकसामानाधिकरण्येन र भावस्यांशिकवाधरूपत्वात् इति । तस्य = प्रमाकरणत्वस्य । व्यावर्त्तनायेति । पक्ष तत्वसम्पादनायेत्यर्थः ।

ननु प्रामाण्यपदार्थत्वसामानाधिकरण्येन पक्षीकृत्य तदप्रामाण्याग्राहकज्ञानग्राहकस जन्ययावद्ग्रहविषयत्वसाधने नांशतो वाध इति चेन्न ? अयंघटइत्यत्र प्रमात्वे स्वतोग्र विरहेऽपि सुखविशेष्यकमानसप्रत्यक्षानन्तरमहंसुखी नवेति संशयानुदयेन सर्वमते एव विषयकमानसप्रत्यक्षे प्रामाण्यस्य स्वतोग्राह्यत्वं सिद्धम्, तथाच नैयायिकमते सिद्ध स्यादतः प्रामाण्यपदार्थत्वसामानाधिकरण्येन पक्षत्वं न वक्तुं शक्यते । अतएव द्धर्मविशेषघटितप्रामाण्ये न कदाचिदपि तादृशसंशयसम्भवस्तदा तत्पक्षाद् बहिर्भावनं इति दीधितिकृता वक्ष्यते, सुखादिप्रत्यक्षे तत्तात्पर्यम् । ज्ञानमात्रवृत्तिप्रामाण्यपदा पक्षत्वे अनुमितिकरणत्वस्य पक्षत्वापत्तिर्दुर्वारित्यंशतो वाधो दुर्वार एवेत्यत ज्ञानान्यवृत्तितानवच्छेदकेत्यादि ।

तथाच ज्ञानान्यवृत्तितानवच्छेदकप्रामाण्यपदार्थतावच्छेदकवत्त्वेन पक्षत्वे ज्ञा वृत्तितानवच्छेदकमेयंच प्रामाण्यपदार्थतावच्छेदकप्रमात्वत्वमेव भतु प्रमाकरणत्वमि

अत्र च ज्ञानान्यवृत्तितानवच्छेदकत्वदलानुपादाने प्रमाकरणत्वस्य ...

(दी०) ज्ञानपदेनोत्सर्गतो ज्ञप्तिरेवोपस्थाप्यते । तद्वति तत्प्रकारकज्ञानत्वन्तु फलितार्थः । तद्वति तत्प्रकारकज्ञानत्वस्य तत्तदर्थभेदेन भिन्नत्वात् कस्यापि प्रामाण्यस्य च यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वाभावात् तत्तज्ज्ञानप्रामाण्यम् तत्तज्ज्ञानग्राहकयावद्ग्राह्यम् नवेति लाभार्थं तत्तज्ज्ञानपरं ज्ञानपदमिति तु तत्त्वम् ।

(गा०) ज्ञानपदार्थत्वेन ज्ञाननिवेशे प्रयोजनाभावात् ज्ञानकरणरूपज्ञानपदार्थमात्रवृत्तितायाःप्रमाकरणत्वे सत्त्वेऽपि अंशतो बाधाशङ्कानवकाशेन तादृशफक्किकाया अवतारयितुमशक्यत्वात् । ज्ञानपदार्थत्वेन ज्ञाननिवेशे ज्ञप्तेरेवौत्सर्गिकज्ञानपदाधीनोपस्थितिविषयत्वेऽपि ज्ञानकरणस्य ज्ञानपदार्थत्वानपायेन अंशतो बाधवारणासम्भवेन ज्ञानपदेनेत्यादेदुरसङ्गतापत्तेश्चेति ।

विशिष्य तद्वति तत्प्रकारकज्ञानत्वस्य पक्षत्वे ज्ञानत्वनियतत्वस्य पक्षतावच्छेदकानुप्रवेशो व्यर्थ इत्याशंकां निराकर्तुमभिमतार्थतात्पर्यनिर्वाहार्थमेव ज्ञानत्वनियतत्वांशोपादानम् नतु तदपि पक्षतावच्छेदकघटकमित्याशयेनाह *तद्वति* इति । प्रवर्त्तकज्ञानविषयप्रामात्वात्मकप्रामाण्यपदार्थमधिकृत्य विचारादेव प्रमाजनकत्वपरताभ्रमो न सम्भवतीत्यालोच्य ज्ञानपदोपादाने प्रयोजनान्तरमाह *तद्वतीति* । तत्तदर्थभेदेन = प्रकारीभूतघटत्वपटत्वादिभेदेन । *तत्तज्ज्ञानेति* । यद्धर्मप्रकारकज्ञानप्रामाण्यं यदा पक्षस्तदा तद्धर्मप्रकारकज्ञानग्राहकयावद्ग्राह्यत्वमेव साधनीयम् नतु सामान्यतो ज्ञानग्राहकयावद्ग्राह्यत्वम् । तद्धर्मप्रकारकज्ञानग्राहकयावद्ग्राह्यत्वंवेति नवेति विप्रतिपत्तिलाभायेत्यर्थः । तत्तज्ज्ञानपरम् = विशिष्य साध्यघटकघटत्वादिज्ञानपरम् । तादृशज्ञानस्य च न पक्षतावच्छेदकान्तर्भावः, प्रामाण्यपदेन घटत्ववतीत्यादेः विशेषरूपेणवोपस्थित्याऽव्यावर्त्तकत्वात्, अपि तु ताद्रूप्येणैव घटत्ववतीत्यादिकं घटत्वादिप्रकारकज्ञानघटितसाध्यसाधने पक्ष इत्यवधेयम् ।

तथाच अनुमितिकरणत्वत्वं न प्रामाण्यपदार्थतावच्छेदकम् प्रमाकरणत्वत्वावच्छिन्न एव प्रामाण्यपदस्य शक्तिसत्त्वात् अनुमितिकरणत्वत्वावच्छिन्ने तदभावात् ।

ज्ञानान्यवृत्तितानवच्छेदकप्रामाण्यपदार्थतावच्छेदकेत्यत्र ज्ञानपदार्थत्वेन ज्ञाननिवेशस्यापि सम्भवेन ज्ञानपदार्थान्यवृत्तितानवच्छेदकप्रामाण्यपदार्थतावच्छेकेत्यादिरीत्या निवेशे पुनरपि प्रमाकरणत्वत्वस्य वारणं न सम्भवतीत्याशङ्क्य ज्ञानपदेन ज्ञप्तिरेवोपस्थाप्यते इति दीधितिकृतां ग्रन्थ इत्येवंरीत्या यत्तुवादिना स्वपक्षे समर्थिते तत्खण्डनायाह भट्टाचार्यः ज्ञानपदार्थत्वेन ज्ञाननिवेशे प्रयोजनाभावादित्यादि । ज्ञानान्यवृत्तितानवच्छेदकप्रामाण्यपदार्थतावच्छेदकेत्यत्र ज्ञानपदार्थत्वेन निवेशे प्रयोजनाभावादिति तदर्थः । तुष्यतु दुर्जनन्यायेन कल्पान्तरमाह ज्ञानपदार्थत्वेनेत्यादि ।

(दी०) यत्तु मिश्रादिमते अगृहीतज्ञानप्रामाण्यविशेषे बाधवारणाय ज्ञानपद

(गा०) मिश्रोक्तज्ञानपदव्यावृत्तिमुपन्यस्य दूषयति यत्तु इत्यादिन मिश्रादीत्यादिना भट्टपरिग्रहः। *अगृहीतेति*। निर्वाच्ययानुव्यवसायसामग्र्या अगृहीतं यद्धर्मप्रकारकज्ञानसामान्यं तद्धर्मवति तद्धर्मप्रकारकज्ञानत्वरूपप्रामाण्य इत्यर्थः।

(प्रभा) किंवा घटत्वस्य संग्रहे तद्घटितप्रमात्वस्यैव संग्रहःस्यान्नतु तदपरस्य। तथा घटत्ववति घटत्वप्रकारकज्ञानत्वम् घटत्ववति घटत्वप्रकारकज्ञानधर्मिकाप्रामाण्याग्राहकग्राहकसामग्रीग्राह्यं नवेति विप्रतिपत्तिस्वरूपपर्यवसाने बाधाद्यापत्तिःस्यात्तथाहि घटत्ववति घटत्वप्रकारकज्ञानधर्मिकाप्रामाण्याग्राहकत्वस्य सामान्यतो ज्ञानग्राहकत्वस्य घटमठादिसकलपदार्थविषयकज्ञानग्राहकसामग्र्यां सत्त्वेन तादृशसामग्रीजन्यग्रहविषयत्वस्य घटत्वघटितप्रमात्वे विरहात्। बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नतत्वदशक्ति स्वीकृतवताम्मते तु सुतरां बाधः। घटमहं जानामि पटमहं जानामि इत्यादिसर्वस्मिन्ननुव्यवसायादौ घटत्वादिमति घटत्वादिप्रकारकज्ञानत्वत्वेनैव घटत्वादिमति घटत्वादिप्रकारकज्ञानत्वादेरेव भानेन कुत्रचिद् ज्ञानग्रहे बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नवति बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नप्रकारकज्ञानत्वत्वे तादृशज्ञानत्वत्वस्याभानात्।

ज्ञायते इति व्युत्पत्त्या निष्पन्नज्ञानपदस्य ज्ञायमानपरतया ज्ञायमानप्रामाण्यपक्षत्वमिति वदताम्पक्षधरमिश्राणाम्मतमुत्थापयति दीधितौ यत्त्विति। अगृहीतज्ञानप्रामाण्यविशेषे इति। अगृहीतम्=अज्ञायमानं ज्ञानाविषयीभूतमिति यावत् तादृशं यज्ज्ञानं तन्निष्ठप्रामाण्ये इत्यर्थः। यत्रायं घट इति व्यवसायोत्तरं घटमहंजानामीत्यनुव्यवसायो न जातस्तत्रायं घट इति व्यवसायस्यागृहीततया (ज्ञानाविषयतया तन्निष्ठप्रामाण्यस्य पक्षत्वे इति यावत्। तदेवाह निर्वाच्ययेति। मिश्रादिमतसिद्धयेति यावत्। अनुव्यवसायसामग्र्या। वक्ष्यमाणयेतिशेषः। तृतीयार्थो जन्यत्वं तस्यागृहीतपदार्थघटकज्ञानेऽन्वयः। अगृहीतं=ज्ञानाविषयीभूतम्। अनुव्यवसायसामग्रीजन्यज्ञानाविषयीभूतमिति यावत्। अनुव्यवसायपदं ज्ञाततालिङ्गकानुमितेरप्युपलक्षकम्। तथाच ज्ञाततालिङ्गकानुमितिसामग्रीजन्यज्ञानाविषयीभूतमित्यपि बोध्यम्। यद्धर्मप्रकारकज्ञानसामान्यमिति। घटत्वप्रकारकज्ञानसामान्यमित्यर्थः, अयंघट इतिज्ञानमिति यावत्। अङ्कुरकल्पनमिदमित्यूह्यम्। कदाचिदपि कस्यचित् तद्धर्मप्रकारकज्ञानग्रहे तद्ग्राहकसामग्र्येव तादृशं प्रसिद्धा स्यादतः सामान्यपदमप्रसिद्धिप्रयोजकतयोपात्तम्। तद्धर्मवति=घटत्ववति तद्धर्मप्रकारकेति=घटत्वप्रकारकेत्यर्थः। अयम्भावः, यत्र घटज्ञानानन्तरं तज्जन्यानुव्यवसायो न जातस्तत्र घटज्ञानस्य तद्गतप्रमात्वस्य वाऽज्ञायमानत्वं विषयताया ज्ञानसमानकालीनत्वात्। अनुव्यवसायानुत्पादश्च विरोधि[illegible]

(गा०) *बाधवारणायेति* । बाधस्साध्यसत्त्वानिर्वाहः तत्प्रामाण्याश्रयग्राहक-वक्ष्यमाणसामग्र्या एवाप्रसिद्ध्या प्रसक्तः, तद्वारणायेत्यर्थः । गुरुमते ज्ञान-मात्रस्यैव तथाविधस्वप्रकाशसामग्रीग्राह्यतया नैतादृशो धर्मः प्रसिध्यति यद्धर्मप्रकारकं ज्ञानं तादृशसामग्र्या न गृह्यत इति तन्मतमुपेक्षितम् । नचाप्रामाण्यग्राहकसामग्रीकाल एव यद्धर्मप्रकारकग्रहसामग्री नान्यदा,

---

बाधस्स्यादतो ज्ञानपदं ज्ञायमानत्वार्थलाभार्थम् । ज्ञानविषयीभूतप्रमात्वस्यैव पक्षतया अज्ञायमानप्रामाण्यस्य पक्षतावच्छेदकानाक्रान्ततया तत्र साध्यविरहेऽपि न क्षतिरिति भावः ।

नंनु उक्तस्थले साध्यघटकज्ञानपदेन तादृशाज्ञायमानप्रामाण्याश्रयज्ञानग्रहणे तद्विषयकग्रहाप्रसिद्धया तादृशग्रहजनकसामग्र्यप्यप्रसिद्धैवेति साध्याप्रसिद्धिरेव, साध्याप्रसिद्ध्या तदभावोऽप्यप्रसिद्ध एव, अलीकप्रतियोगिकाभावानङ्गीकारात्, एवञ्च साध्याभाववत्पक्षाप्रसिद्धया कथं बाधः किन्तु साध्याप्रसिद्धिरेवेत्यत आह साध्यसत्त्वानिर्वाह इति । साध्यसत्त्वानिर्वाहश्च साध्याप्रसिद्धिरेव । तथाच दीधितौ बाधपदं साध्याप्रसिद्धिपरम् । साध्ये साध्यतावच्छेदकाभावस्य साध्याप्रसिद्धित्वं यथा तथा साध्यतावच्छेदके साध्यतावच्छेदकाभावोऽपि साध्याप्रसिद्धिरेव । यथा पर्वतः काञ्चनमयवह्निव्याप्यधूमवान् आर्द्रेन्धनसंयोगादित्यादौ वह्नौ काञ्चनमयत्वाभावः । अज्ञायमानप्रामाण्यरूपपक्षत्वे साध्यसत्वाभावरूपबाध इत्यपि वदन्ति । ननु मिश्रादीत्यादिना भट्टपरिग्रह इत्युक्तम्, गुरुमतेऽपि अज्ञायमानज्ञानगतप्रामाण्यस्य पक्षत्वेऽपि उक्तदोषसम्भवात् (साध्याप्रसिद्धिसम्भवात्) ज्ञानस्य स्वप्रकाशतया अगृहीतज्ञानमेव नास्तीत्याह **गुरुमते** इति । अस्य नैतादृशो धर्मः प्रसिद्ध्यतीत्यनेनान्वयः । **ज्ञानमात्रस्यैवेति** । एवकारो भिन्नक्रमः ग्राह्यतयेत्युत्तरं योजनीयः । **तथाविधेति** । चक्षुःसंयोगालोकसंयोगादिघटितसामग्रीत्यर्थः । **सामग्रीग्राह्यतयेति** । ननु सामग्र्यन्तरग्राह्यतयेति यावत् । **एतादृशो धर्मः** । = घटत्वादिरूपः । **यद्धर्मप्रकारकं ज्ञानं** = घटत्वादिप्रकारकं ज्ञानं, **तादृशसामग्र्या** = घटज्ञानोत्पादकसामग्र्या । गुरुमते यत्सामग्रीजन्यत्वं घटज्ञाने तत्सामग्रीमात्रग्राह्यत्वमपि तत्रेति भावः ।

अत्रेदं बोध्यम् । गुरुमते ज्ञानग्रहार्थं न मिश्रभट्टयोरिवानुव्यवसायानुमितिसामग्री अपेक्षिता येन तादृशसामग्रीविरहप्रयुक्तो योऽनुव्यवसायानुमित्यभावस्तत्प्रयुक्तं घटज्ञानस्याज्ञायमानत्वं ततः साध्याप्रसिद्धिः स्यात्, किन्तु तन्मते ज्ञानमात्रस्य स्वप्रकाशतयाऽज्ञायमानज्ञानाप्रसिद्धेः, तथाच घटज्ञानोत्पादिका या सामग्री सैव प्रामाण्यग्राहिकेति स्वपदग्राह्यं यद् घटज्ञानगतप्रामाण्यं तदाश्रयो घटज्ञानं तद्विषयको ग्रहस्स्वमेव तज्जनकसामग्रीजन्यो ग्रहस्स्वमेव तद्विषयत्वस्य प्रमात्वे सत्त्वान्न बाधाद्यवसर इति । **तन्मतमुपेक्षितम्** = गुरुमतमुपेक्षितम् ।

यद्धर्मप्रकारकं ज्ञानं तादृशसामग्र्या न गृह्यते स धर्मोऽप्रसिद्ध एव गुरुमते इत्युक्तं तदसहमानः शङ्कते **नचेति** । **अप्रामाण्यग्राहकसामग्रीकाले** इति = घटज्ञानधर्मिकाप्रामाण्यग्राहकसामग्रीकाले इत्यर्थः । [illegible]

(गा०) स एव तादृशो धर्मः, अप्रामाण्याग्राहकत्वस्य तादृशसामग्र्या विशेष-
णादिति वाच्यम् ? तद्धर्मघटिताप्रामाण्यग्रहस्य तत्प्रकारकज्ञानानुत्तरमसम्-
अप्रामाण्यग्रहसम्पादकतज्ज्ञानसामग्र्या एव तदप्रामाण्याग्राहिकायास्त-
ग्राहकसामग्र्याः प्रसिद्धेः, वर्तमानज्ञानग्राहकसामग्र्या ज्ञाने गृह्यमाणे
ज्ञानत्वधर्मविषयकत्वादेर्विपरीतं न गृह्यते, तथा सविषयकत्वसप्रकार-
त्वेऽपीति सर्वमतसिद्धम् ।

(प्रभा) स एव=घटत्वमेव । तादृशो धर्मः=यद्धर्मप्रकारकं ज्ञानं तादृशसाम-
गृह्यते तादृशो धर्म इत्यर्थः । ननूक्तस्थले अप्रामाण्यग्राहकसामग्रीकालीनायास्तद्धर्मप्र-
ज्ञानसामग्र्या एव तद्धर्मप्रकारकज्ञानग्राहकत्वात् तादृशो धर्मो न स्याद् यद्धर्मप्रकार-
तया न गृहीतमत आह अप्रामाण्याग्राहकत्वस्येति सामग्रीविशेषणत्वादिति । त-
प्रामाण्यग्राहक घटज्ञानसामग्र्या अपि साध्यघटकतया तज्जन्यग्रहविषयत्वस्य प्रमात्वेऽ-
बाधवारणाय तदप्रामाण्याग्राहकत्वस्यापि सामग्र्यां विशेषणीयत्वादिति उक्ताङ्कुरस्थल-
दृशसामग्र्या ज्ञानग्राहकत्वेऽपि अप्रामाण्याग्राहकत्वादिति । अयम्भावः, यत्र घटज्ञ-
मग्री नियमतो घटज्ञानगताप्रामाण्यस्य ग्राहकसामग्रीसमवहितैव तत्स्थलीयघटज्ञानगत-
ण्यस्य पक्षान्तर्गततया तादृशप्रमात्वाश्रयज्ञानग्राहकतादृशज्ञानधर्मिकाप्रामाण्यग्राहकसा-
अप्रसिद्धया साध्याप्रसिद्धिरिति । नच तत्र ज्ञानग्राहकसामग्री भिन्ना अप्राम-
ग्राहिका च भिन्नेति ज्ञानग्राहकसामग्र्यामप्रामाण्याग्राहकत्वं निर्विवादमेवेति वा-
तदप्रामाण्याग्राहकसामग्र्यसमवहितत्वस्यैव ज्ञानग्राहकसामग्र्यां निवेशनीय-
अन्यथा वक्ष्यमाणभ्रमसामग्र्याः साध्यघटकतया वक्ष्यमाणबाधवारणासम्भवेन तद-
ग्राहकत्वनिवेशवैफल्यापत्तेः । एवञ्च तादृशसामग्र्या अप्रामाण्यग्राहकसामग्र्या सम-
त्वाभावान्नासङ्गतिरिति ध्येयम् ।

तदप्रामाण्याग्राहकतज्ज्ञानग्राहकसामग्र्याश्चैककाले सम्वलनं न सम-
अप्रमात्वस्य तदभाववति तत्प्रकारकज्ञानरूपतया तत्प्रकारकज्ञानम्प्रति तज्ज्ञानस्य का-
या तज्ज्ञानसामग्र्या एव तज्ज्ञाननिष्ठप्रमात्वग्राहकतया तादृशसामग्रीकाले तज्ज्ञानघटि-
ग्राहकसामग्र्यां वर्तमानत्वासम्भवादित्याशयेन समाधत्ते तद्धर्मघटिताप्रामाण्यग्रह-
घटत्वघटिताप्रामाण्यग्रहस्येत्यर्थः । तत्प्रकारकज्ञानानुत्तरमसम्भवेन=घटत्वप्रक-
ज्ञानानुत्तरमसम्भवेनेत्यर्थः । तद्धर्मघटिताप्रामाण्यग्रहस्य तत्प्रकारकज्ञानोत्तरमेव सम्भवे-
पादन् । अयंभावः, अप्रमात्वं हि तदभाववति तत्प्रकारकज्ञानत्वम्, एवञ्च तत्प्रकारक-
म्प्रति तज्ज्ञानस्य कारणतया तज्ज्ञानसामग्र्या एव तज्ज्ञानगतप्रमात्वग्राहकतया तादृशसा-
काले तज्ज्ञानघटिताप्रमात्वग्रहसामग्र्या वर्त्तमानत्वासम्भवात्, तथाच पूर्वकालावच्छे-
तज्ज्ञानग्राहिका या सामग्री सैव तदप्रामाण्यग्राहकसामग्र्यसमवहिता प्रसिद्धा इति न साध्य-
सिद्धिस्तादृशसामग्रीजन्ययावद्ग्रहविषयत्वस्योक्तप्रमात्वे सत्त्वादिति । अप्रामाण्यग्रहस-
म्पादकतज्ज्ञानसामग्र्या इति=अप्रामाण्यग्रहसम्पादकं यत्तज्ज्ञानं तज्जनकसाम-

(प्रभा) नन्वेवं घटत्वप्रकारकज्ञानेऽप्रामाण्यं कदापि न गृह्येत तथाहि तादृशा प्रामाण्यग्रहो हि उक्तयुक्त्या घटत्वप्रकारकज्ञानानन्तरमेव भविष्यति, नचैवमपि सम्भवः घटज्ञानोत्पादकसामग्र्या एव प्रामाण्यग्राहकतया तस्या अप्रामाण्यग्रहविरोधित्वात् घटज्ञानस्य च नियमतः प्रामाण्यविषयकत्वात् । अतोऽप्रामाण्यग्राहकसामग्रीविरहविशिष्टत त्प्रकारकज्ञानसामग्र्या एव प्रामाण्यग्राहकत्वं स्वीकार्यम्, तथाच गुरुमते ज्ञानमात्रस्यैव यथार्थत्वेन अप्रामाण्यज्ञानानुत्पत्तेरिष्टत्वात् स्वरूपतो विषयतश्च मिथो भेदाग्रहादेव इदं ज्ञानमप्रमेति व्यवहारात् ।

नन्वत्राप्रामाण्यम् प्रामाण्यविरोधि इति स्वयमेव दीधितिकृता वक्ष्यते, विरोधित्वं च तद- भाववति तत्प्रकारकत्वरूपभ्रमत्वे निष्प्रकारकत्वे च, भ्रमत्वे प्रामाण्यविरोधित्वमादायाप्रसिद्धि- र्वारिता किन्तु निष्प्रकारकत्वरूपप्रामाण्यविरोध्यादायाप्रसिद्धिर्दुर्वारैव, तथाहि-निष्प्रकारकत्व- भ्रमकाले एव यद्धर्मप्रकारकज्ञानसामग्री नान्यदा, स एव तादृशो धर्मःप्रसिद्ध्यति यद्धर्म- प्रकारकज्ञानं सामग्र्या न गृह्यते, तथाच यत्र घटज्ञानसामग्री नियमतो घटज्ञानगत- प्रामाण्यविरोधिनिष्प्रकारकत्वग्राहकसामग्रीसमवहितैव तत्स्थलीयप्रमात्वस्यापि पक्षान्तर्गततया तत्र च प्रामाण्यविरोध्यग्राहकतज्ज्ञानग्राहकसामग्र्या अप्रसिद्ध्या साध्या- प्रसिद्धिर्दुर्वारैवेत्याशङ्क्य समाधत्ते **वर्त्तमानज्ञानग्राहकसामग्र्या** इत्यादि । लौकिकत्वनियामकसन्निकर्षादिघटितसामग्र्यां ज्ञानत्वादिविपरीतविषयताप्रयोजक- तत्तद्दोषसंवलनमप्रसिद्धमितिसूचयितुं वर्त्तमानपदम् । **ज्ञानग्राहकसामग्र्या** इति । वर्त्तमानं यज्ज्ञानं तद्विषयकज्ञानजनकसामग्र्या इत्यर्थः । साच सामग्री गुरुमते प्रथमज्ञानो- त्पादिकैव । मिश्रमतेऽनुव्यवसायसामग्री भट्टमतेऽनुमितिसामग्री इत्यनुपदमेव वक्ष्यति । **ज्ञाने गृह्यमाणे** इति = ज्ञानग्राहकसामग्रीजन्यज्ञानविषयीभूते ज्ञाने इत्यर्थः । उत्तरस्याप्रामाणि- कत्वशङ्कानिरासाय पूर्वपक्षिणःसम्मतं दृष्टान्तम्प्रथमतो दर्शयति **धर्मविषयकत्वादेर्विपरी- तम्** = धर्मविषयकत्वाभावधर्मविषयकत्ववद्भेदौ दार्ष्टान्तिके योजयति **तथेति** । **सविषयक त्वादेरिति** । अस्यापि विपरीतं न गृह्यते इत्यनेनान्वयः सप्रकारकत्वविपरीतं निष्प्रकार- कत्वम् । तथाच यथा ज्ञानग्राहकसामग्र्यां सत्यां ज्ञानत्वविरुद्धज्ञानत्वाभावग्राहकसामग्र्याः संवलनं न सम्भवति तदुत्तरं सुतरां न ज्ञानत्वाभावग्रहः । यथा धर्मविषयकत्वग्राहकसामग्र्यां सत्यां न तद्विरुद्धधर्मविषयकत्वाभावग्राहकसामग्रीसंवलनं तथैव तद्वति तत्प्रकारकत्वरूपप्रमात्व- ग्राहकसामग्रीकाले न तद्विरुद्धनिष्प्रकारकत्वग्राहकसामग्रीसंवलनसम्भवः । एवञ्च गुरुमते तादृश धर्मोऽप्रसिद्धो यद्धर्मप्रकारकज्ञानं तादृशसामग्र्या न गृह्यते, तथाच प्रामाण्यविरोध्यग्राहिका एवं ज्ञानग्राहिका च सैव सामग्री प्रसिद्धेति न साध्याप्रसिद्धिरिति । **सर्वमतसिद्धमिति** । माध्यमिकनैयायिकमतेऽपि तादृशसामग्रीकाले दोषसंवलनं नास्ति किमु मीमांसकमते इति सूचयितुं सर्वपदमिति । **तादृशी चेति** । वर्त्तमानज्ञानग्राहिकेत्यर्थः । **मिश्रादिमते** ।

(मा०) गुरुमते तत्स्थानाभिषिक्ता व्यवसायसामग्री। अतः स्वप्रकाशात्मव दंकुरादिप्रकारकज्ञानसामग्रीकाले न तत्र निष्प्रकारकत्वभ्रमसामग्रीसम्भव इति न सप्रकारकत्वग्रहविरोधिदोषघटितनिष्प्रकारकत्वभ्रमसामग्रीसमवहितस्वप्रकाशात्मकतज्ज्ञानसामग्र्यास्तादृशज्ञानप्रामाण्यविरोधिग्राहकत्वोक्तिसम्भवः अन्यथा तेषां निर्विषयकत्वभ्रमसामग्रीकाले विषयोपरागासम्भवेन स्वप्रकाशात्मकज्ञानसामग्री विषयानुपरक्तमपि ज्ञानं गृह्णातीति स्वीकारापत्तेः।

(प्रभा) तत्स्थानेति = अनुव्यवसायसामग्रीस्थाने इत्यर्थः। अतः = व्यवसायसामग्र्याः स्थानापन्नत्वात् तदुत्तरं निष्प्रकारकत्वग्रहाभावादेवेति यावत्। स्वप्रकाशात्मकेति स्वं व्यवसायः घटत्वप्रकारकं ज्ञानमिति यावत्, अस्य तदङ्कुरत्वादिप्रकारकज्ञानेऽन्वयः तदङ्कुरत्वादिप्रकारकज्ञानसामग्रीकाल इति = घटत्वादिप्रकारकज्ञानसामग्रीकाले इत्यर्थः तत्र = काले। न सामग्रीसम्भव इति = न सामग्री कल्प्यते इत्यर्थः।

सप्रकारकत्वग्रहविरोधीति दोषविशेषणं, दोषस्य प्रमाविरोधित्वात्। तज्ज्ञानसामग्र्या तदङ्कुरादिप्रकारकज्ञानसामग्र्याः। तादृशज्ञानेति। तादृशज्ञानम् घटत्वप्रकारकं ज्ञान तन्निष्ठं यत्प्रामाण्यं तद्विरोधी यो निष्प्रकारकत्वग्रहस्तज्जन्यत्वेत्यर्थः। तथाच तादृशभ्रमसामग्रीसमवहितघटत्वप्रकारकज्ञानसामग्री तादृशभ्रमजनिका विशिष्टं ज्ञानम्।

ननु गुरुमते एवं तादृशसामग्री अस्तु इत्यत आह अन्यथेति। तज्ज्ञानसामग्र्या निर्विषयकत्वग्राहकसामग्रीसमवहितत्वे इत्यर्थः। तेषां = गुरूणाम्। निर्विषयकत्वभ्रमसामग्रीकाले इति। तज्ज्ञानसामग्रीसत्त्वे चेतिशेषः। निर्विषयकत्वेति निष्प्रकारकत्वादीनामप्युपलक्षणम्, तस्यैवाशङ्क्यमानतया तदुपादानात्। एवञ्च निष्प्रकारकत्वभ्रमसामग्रीकालीनज्ञानग्राहकसामग्र्युत्तरं ज्ञानस्यैवासम्भवात्कुतस्तत्प्रामाण्यस्यैवाशङ्का। एवं, तादृशसामग्रीज्ञानग्राहकत्वे निर्विषयकत्वभ्रमसामग्रीकालीनसामग्र्या अपि ज्ञानग्राहकत्वसम्भवात्तज्ज्ञानेन निर्विषयकत्वस्यापि विषयीकरणाद्विषयभानासम्भवेन तज्ज्ञानेन गुरुमते विषयानुपरक्तत्वस्वीकारापत्तेः। यथा निर्विषयकत्वभ्रमसामग्रीकालीनसामग्र्या ज्ञानग्राहकत्वं नास्ति तथा निष्प्रकारकत्वभ्रमसामग्रीकालीनसामग्र्या अपि ज्ञानग्राहकत्वं नास्तीति न गुरुमतेऽज्ञायमानप्रामाण्यप्रसिद्धिरिति समुदितार्थः।

गुरूणां तु स्वातन्त्र्येणोपस्थितौ धर्मिज्ञानमिति दीधितिकृता स्वयं वक्ष्यमाणतया अप्रामाण्यग्रहपदेन तदङ्कुराभाववति तदङ्कुरप्रकारक 'इदन्त्वेन' धर्मिप्रत्यक्षस्यैव ग्रहणेन तत्सामग्र्यां तदजनकत्वाभावात्। नच तथापि गुरुमतेऽपि स्मरणं प्रति पूर्वानुभवस्य कारणतया पूर्वं तदङ्कुराभाववति तदङ्कुरप्रकारकज्ञानत्वरूपभ्रमत्वानुभवस्यावश्यकत्वेन कथं तादृशानुभव इति वाच्यम्, विसंवादीच्छायामिदं तदङ्कुरं मे स्यादित्याकारिकायां तादृशभ्रमत्वस्य मानसप्रत्यक्षेण ग्रहणात्। किञ्च तादृशेच्छाम्प्रति तदङ्कुरप्रकारकज्ञानस्य कारणतया प्रामाण्यकत्वेन सैव तदङ्कुरप्रकारकज्ञानसामग्री तदप्रामाण्याग्राहकत्वेन प्रसिद्धः

(गा० यद्यपि तदंकुरप्रकारकज्ञानमन्तरेणापि जातायां धर्म्यगृहीतासंसर्गकतदंकुरविशेष्यकज्ञानात्मकतदंकुरभ्रमजन्यतदंकुरप्रकारकविसंवादीच्छायां

(प्रभा) त्वस्यैव स्वीकारेण तदङ्कुरप्रकारकज्ञानजन्यत्वास्वीकारेण तदङ्कुरप्रकारकज्ञानस्य प्रागनावश्यकत्वात् ।

नच विसंवादीच्छाम्प्रति गुरुमते न तदङ्कुरप्रकारकज्ञानं कारणमपि तु धर्म्यगृहीतासंसर्गकतदङ्कुरविशेष्यकज्ञानमेव, तथाच साध्याप्रसिद्धिरिति यद्यपीत्यादिना शङ्कितुराशयः । तदङ्कुरप्रकारकज्ञानमन्तरेणापि जातायामिति = तदङ्कुरादिमति तदङ्कुरप्रकारकज्ञानं विनैवेत्यर्थः । इदं रजतमिति प्रमात्मकज्ञानं विनैवेति यावत् । प्रकारता चात्र तादात्म्येन ग्राह्या । यदि तङ्कुरप्रकारकप्रमात्मकज्ञानानन्तरमिच्छा स्यात्तर्हि तादृशतदङ्कुरप्रकारकज्ञानजनका सामग्र्येवाप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च प्रसिद्धा स्यादिति गुरुमते साध्याप्रसिद्धिर्न स्यादित्यत उक्तं तदङ्कुरप्रकारकज्ञानमन्तरेणापि जातायामिति । ननु तथापि तदङ्कुरप्रकारकेच्छाम्प्रति तदङ्कुरप्रकारकज्ञानस्य कारणतया गुरुमते भ्रमात्मकज्ञानमात्रस्य ज्ञानद्वयात्मकतया तत्प्रकारकत्वासम्भवस्तथाच कारणाभावात् कथं तदङ्कुरप्रकारकेच्छासम्भवः, एवमिदं रजतभिन्नमिति बाधनिश्चयोऽपि प्रतिबन्धक इत्यत आह धर्म्यगृहीतासंसर्गकेति । धर्मिणि अगृहीतः असंसर्गो यत्रेति समासः, तथाच बाधनिश्चयाभावसहकृतेत्यर्थः, तदङ्कुरविशेष्यकज्ञानात्मकेति = रजतविशेष्यकज्ञानात्मकेत्यर्थः इदं यावत् रजतमिति ज्ञानात्मकेति । इत्यपि न शक्यते वक्तुं विशेष्यभूततज्ज्ञानसामग्र्याः तादृशभ्रमसामग्रीसमवहितत्वाभावादितिभावः ।

ननु यत्र तादात्म्येन तदङ्कुरप्रकारकप्रमात्मकज्ञानसामग्री तदङ्कुराभाववति तदङ्कुरप्रकारकज्ञानत्वरूपाप्रामाण्यस्मरणप्रयोजकसामग्रीनियता तत्र तदङ्कुरादिमति तदङ्कुरप्रकारकज्ञानत्वरूपप्रमात्वस्य पक्षतायां साध्याप्रसिद्धिः, तादृशप्रमात्मकाप्रामाण्यग्राहकसामग्र्याः प्रामाण्यविरोधिग्राहकत्वेन भ्रमत्वात्मकाप्रामाण्यग्राहकत्वात् । नच घटितबुद्धौ घटकज्ञानस्य कारणतया तत्र तदङ्कुरप्रकारकज्ञानस्य पूर्वमावश्यकत्वेन तज्ज्ञानजनकसामग्र्यामेव तदप्रामाण्याग्राहकत्वं सुघटमिति वाच्यम्, घटितानुभवप्रत्येव घटकज्ञानस्य कारणत्वेन गुरुमते भ्रमस्थले धर्मिप्रत्यक्षप्रकारस्मरणेतिज्ञानद्वयस्यैव स्वीकारेण तदङ्कुरप्रकारकज्ञानस्य प्रागनावश्यकत्वात् ।

नचैवं तदङ्कुरप्रकारकज्ञानरूपधर्मिण इदन्त्वेन प्रत्यक्षप्रयोजकसामग्र्याः स्मरणप्रयोजकसामाग्र्यपेक्षया भिन्नत्वेन तत्राप्रामाण्यग्राहकत्वमस्त्येव स्मरणप्रयोजकसामाग्र्या एवाप्रामाण्यग्राहकत्वादिति वाच्यम्, अग्रे प्रामाण्यग्रहःइदं ज्ञानमप्रमेति व्यवहारजनकःसत्र मिश्रादिमते अत्रेदं बोध्यम्, प्रमात्मकं यदिदं रजतमिति ज्ञानं तत्तु इदन्त्वावच्छिन्नविशेष्यकं तादात्म्येन रजतप्रकारकं, भ्रमात्मकं ज्ञानमपि इदं रजतमित्याकारकमेव, परन्तु गुरुमते भ्रमत्वास्वीकारेण इदं रजतमित्यस्य ज्ञानद्वयरूपतया उभयमपि विशेष्यमेव (प्रत्यक्षे इदं विशेष्यं स्मृतौ रजतं विशेष्यमिति प्रमातो भेदः) एवञ्च भ्रमस्य तदङ्कुरप्रकारकत्वाभावात्तदङ्कुरविशे

गृहीतस्य तदंकुराभाववति तदंकुरप्रकारकत्वस्योपस्थितया तदंकुर
प्रकारकज्ञानसामग्री-दशायां नियमत उपस्थिततादृशधर्मसाकाङ्क्षतादृशज्ञान
रूपधर्मिज्ञानरूपाप्रामाण्यभ्रमसामग्रीसम्भवः, तथापि तादृशाप्रामाण्यभ्रमस्य
ग्राह्याभावानवगाहितया प्रामाण्यग्रहाप्रतिबन्धकत्वेन तत्सामग्र्या अपि
प्रामाण्यग्रहप्रतिबन्धकत्वम् ।

(अत्र) विशेष्यतातादात्म्येन रजतप्रकारकेच्छायामित्यर्थः । इच्छाया व्यधिकरणप्रकारकत्व
गुरुणा स्वीकारादिति भावः । गृहीतस्य = प्रसिद्धस्य । तदङ्कुराभाववति तदङ्कुर
प्रकारकत्वस्य = रजताभाववति रजतप्रकारकत्वस्य । उपस्थितया अस्य सम्भव इत्यनेन
अन्वयः । ननु कथं तादृशोपस्थित्या तादृशसामग्रीसम्भव इत्याकाङ्क्षायामाह तदङ्कुर
प्रकारकसामग्रीदशायामिति । इदं रजतमित्याकारकरजतादिरूपाङ्कुरप्रकारकप्रम
ज्ञानसामग्रीदशायामित्यर्थः । ज्ञाने व्यधिकरणप्रकारकत्वस्य गुरुणाऽनभ्युपगमे
तदङ्कुरप्रकारकज्ञानपदेन प्रमात्मकस्यैव घर्त्तव्यत्वादिति ध्येयम् ।

ननु रजतप्रकारकज्ञानसामग्रीकाले न तदभाववति तत्प्रकारकत्वोपस्थितिसामग्रीसम्भव
गुरुमते भ्रमस्य ज्ञानद्वयात्मकत्वेन तत्प्रकारकत्वघटितसामग्र्या अप्रसिद्धेरित्यत आ
नियमत इति । अनियमे तु अप्रामाण्यग्राहकसाध्यघटकसामग्री प्रसिद्धा स्यात्
उपस्थिततादृशधर्मेति । तदङ्कुराभाववति तदङ्कुरप्रकारत्वरूपेत्यर्थः । तत्साकाङ्क्षं
तादृशज्ञानरूपो धर्मी । तदङ्कुराभाववति तदङ्कुरप्रकारकत्वरूपधर्मसाकाङ्क्ष
अर्थात्संसर्गाग्रहनिबन्धनो यस्तादृशज्ञानरूपधर्मी इदं रजतमितिप्रमात्मकज्ञानरूपधर्म
विशेषकं यज्ज्ञानम् इदं रजतमिति ज्ञानं रजताभाववति रजतप्रकारकमित्याकारक
अप्रामाण्यभ्रमरूपं तत्सामग्रीसम्भवः, तर्हि वह्निसाकाङ्क्षत्वं ह्रदादौ स्वीक्रियते आकाङ्क्षा न
धर्मधर्मिणोः । विशेष्यविशेषणभावम् तथाच यत्र रजतप्रकारकज्ञानसामग्रीकाले नियमत
इच्छायां प्रसिद्धस्य तदभाववति तत्प्रकारकत्वस्योपस्थितिसामग्री वर्त्तते तत्र इदं रजतमिति
ज्ञानं रजताभाववति रजतप्रकारकमिति ज्ञानं (ज्ञानद्वयात्मकम्) तद्गतप्रमात्वस्यापि
ग्राहकतया तत्र उपस्थितिसामग्र्या अप्रामाण्यग्राहकतया तदप्रामाण्यग्राहिक
सामग्री च या तदन्या सामग्री तज्जन्यग्रहविषयत्वस्याभावाद् गुरुमते बाधः स्यात्
साकाङ्क्षत्वकथनं भ्रमत्वनिर्वाहकासंसर्गाग्रहज्ञाभायैवेति ध्येयम् ।

मूलस्थं तथापीति । तादृशाप्रामाण्यभ्रमस्येति । इदं तदंकुरप्रकारकं ज्ञान
तदंकुराभाववति तदंकुरप्रकारकमिति भ्रमत्वधर्मितावच्छेदककाप्रामाण्यग्रहस्येत्यर्थः
ग्राह्याभावानवगाहितयेति । ग्राह्यं तद्वति तत्प्रकारकत्वं तदभावानवगाहितयेत्यर्थः
तादृशाप्रामाण्यग्रहो न प्रमात्वविरोधी किन्तु तद्वति तत्प्रकारकत्वाभावनिश्चय एव तथा
तत्सामग्र्या अपि = तादृशाप्रामाण्यग्राहकसामग्र्या अपीत्यर्थः । न प्रामाण्यग्रहप्र
तिबन्धकत्वमिति ।

(दी०) कर्मणिल्युटा ज्ञानस्य प्रामाण्यमिति विषयत्वार्थकषष्ठ्या वा ज्ञायमानपरमिति, तन्न, तादृशप्रामाण्यत्वेन रूपेण ज्ञानाज्ञानयोर्बोधबुद्ध्यसम्भवात् ।

गा० पूर्वं तादृशप्रामाण्यावच्छेदेन ज्ञाने प्रामाण्यविरहग्रहोपगमेन तत्प्रतिबन्धकत्वोपपादने च तादृशाप्रामाण्यग्रहस्यैव प्रामाण्यविषयकतया तत्सामग्रीग्राह्यतयैव तत्प्रामाण्ये साध्यसत्त्वनिर्वाह इति सर्वं समञ्जसम् ।

ज्ञानपदोपादानेऽपि कथं तज्ज्ञानप्रामाण्यव्यावृत्तिरिति अपेक्षायामाह *कर्मणि ल्युटेति* । कृत्यल्युटो बहुलमिति सूत्रानुशिष्टेनेत्यादिः । *ज्ञायमानपरमिति* । निर्वाच्यसामग्रीजन्यज्ञानविषयार्थमित्यर्थः । एतदपि न पक्षतावच्छेदकघटकम्, प्रमापदप्रवृत्तिनिमित्तत्वेन पक्षत्वे प्रमापदप्रवृत्तिनिमित्ताश्रयग्राहकसामग्रीजन्ययावद्ग्रहविषयतायाश्च क्वचिदपि प्रामाण्येऽसत्त्वात् घटत्ववति घटत्वप्रकारकताश्रयग्राहकसामग्रीजन्ययावद्ग्रहविषयत्वादेश्च अंशतो बाधेन विशिष्य तत्तद्धर्मघटितप्रामाण्यानां पक्षत्वस्य उपगन्तव्यतया अव्यावर्त्तकत्वात्, किन्तु विशिष्य ज्ञायमानप्रामाण्यमेव पक्षो नोक्तप्रामाण्यमिति सूचनाय ज्ञानपदमिति ध्येयम् ।

तादृशप्रामाण्यत्वेन = तदङ्कुरादिमति तदङ्कुरविषयत्वादिप्रकारक-

---

(प्रभा) ननु तदंकुराभाववति तदंकुरप्रकारकं ज्ञानं तदंकुरादिमति तदंकुरप्रकारकत्वाभाववत् इदं च ज्ञानं तदंकुरप्रकारकमिति निश्चयविशिष्टनिश्चये तादृशप्रमात्वग्रहप्रतिबन्धकत्वसम्भवः प्रामाण्यग्रहविरोध्यग्राहकज्ञानग्राहकसामग्री चाप्रसिद्धेत्यत आह **पूर्वमिति** । **तत्प्रतिबन्धकत्वोपपादने चेति** = प्रमात्वग्रहविरोधित्वोपपादने चेत्यर्थः । **तादृशाप्रामाण्यग्रहस्यैवेति** = तदंकुराभाववति तदंकुरप्रकारकज्ञानं तादृशप्रमात्वाभाववदित्याकारकस्यैवेत्यर्थः । **प्रामाण्यविषयकतयेति** । प्रमात्वाभावग्रहस्य (प्रतियोगिकोटौ) धर्म्यंशे तत्प्रकारकत्वावगाहितया प्रमात्वघटिततया प्रामाण्यावगाहित्वादिति भावः ।

घटत्वपटत्वादिघटितानन्तप्रामाण्यानां घटत्ववति घटत्वप्रकारकत्वत्वादिना सकलज्ञानविषयत्वासम्भवेन सर्वत्रैकदा स्वतस्त्वादिसाधनासम्भवात् प्रमापदप्रवृत्तिनिमित्तत्वेन पक्षत्वमिति मतं निराकर्त्तुमाह **प्रमापदप्रवृत्तिनिमित्तत्वेनेति** । **अंशतो बाधेनेति** । प्रमापदप्रवृत्तिनिमित्तम्— घटत्ववति घटत्वप्रकारकताश्रयज्ञानग्राहकसामग्रीजन्यग्रहविषयत्वस्य घटत्वघटितप्रामाण्ये एव सत्त्वेन पटत्वादिघटितप्रामाण्येऽसत्त्वेन बाध इति भावः । **विशिष्य तत्तद्धर्मघटितेति** । घटत्ववति घटत्वप्रकारकज्ञानत्वमित्यादिरीत्या प्रामाण्यानाम्पक्षत्वस्योपगन्तव्यतयेत्यर्थः ।

(गा०) ज्ञानत्वत्वेन प्रकारेण । *ज्ञानाज्ञानयोरिति* । ज्ञाने तादृशसामग्र्या ए
ज्ञानत्वतत्प्रकारकत्वयोर्वैशिष्ट्यादिघटकतया ज्ञानग्राहकत्वेन प्रामाण्याग्रा
कतया ज्ञानग्राहकतया च भट्टमतसिद्धभिन्नसामग्रीत्वेन च तामादाये
साध्यसत्त्वोपपत्तेः, अज्ञाने च पक्षतावच्छेदकतादृशप्रामाण्यत्वेन साध्यघट

(प्रभा) ज्ञानत्वत्वप्रकारकं ज्ञानमवश्यं घटत्वादिप्रकारकत्वज्ञानत्वयोर्वैशिष्ट्यविषयकं वाच्यं
नीलोत्पलत्वमित्यादिज्ञानस्य नीलत्वोत्पलत्वयोर्वैशिष्ट्यविषयकत्वदर्शनात् वैशिष्ट्यं
तादृशप्रकारकत्वाधिकरणवृत्तित्वरूपम्, तादृशाधिकरणञ्च ज्ञानमेव नान्यत्, एवञ्
तादृशज्ञानस्य घटत्वादिमति घटत्वप्रकारकज्ञानत्वमित्याकारकस्य निरुक्तवैशिष्ट्यविषयक
तद्घटकज्ञानविषयकत्वस्याप्यक्षततया निरुक्तज्ञानत्वत्वप्रकारकं यज् ज्ञानं तदेव स्वाश्रय
विषयकं ज्ञानं प्रसिद्धं तज्जनिका या सामग्री सैव च स्वाश्रयज्ञानग्राहिका प्रसिद्धा, प्रामाण्य
ग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धसामग्रीभिन्नत्वेन च प्रसिद्धेति न साध्याप्रसिद्धि
तादृशसामग्रीजन्यो ग्रहःस एव तादृशज्ञानत्वत्वप्रकारको ग्रहस्तद्विषयत्वस्य च निरुक्तप्रम
त्वे सत्त्वात् स्वत एव सिद्धिरित्याशयेनाह **तदङ्कुरादिमति** ।

तदङ्कुरादिप्रकारकज्ञानत्वत्वप्रकारेणेति = घटत्ववद्विशेष्यकत्वावच्छिन्नत्वविशिष्टघ
त्वप्रकारकज्ञानत्वत्वप्रकारेणेत्यर्थः । **ज्ञाने इति** । सतीतिशेषः । सति ज्ञा
इति यावत् । **तादृशसामग्र्या एवेति** । तदङ्कुरादिमति तदङ्कुरादिप्रकारकज्ञानत्वत्व
प्रकारकज्ञानजनकसामग्र्या एवेत्यर्थः । **ज्ञानत्वतत्प्रकारकत्वयोर्वैशिष्ट्यघटकतये**
ति = ज्ञानत्वतत्प्रकारकत्वयोर्यद्वैशिष्ट्यं तदधिकरणवृत्तित्वरूपं तद्घटकत्वमधिकरणवि
धया स्वाश्रयज्ञानस्येति भावः । **ज्ञानग्राहकत्वेनेति** । **एतेन** ज्ञानविषयकग्रहस्य ज्ञानवि
षयकग्रहजनकसामग्र्याश्च प्रसिद्धिर्दर्शिता । प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन न
भट्टमतसिद्धभिन्नत्वरूपवक्ष्यमाणविशेषणसत्त्वं दर्शयति **प्रामाण्याग्राहकतयेति**
साध्यसत्त्वोपपत्तिः = तादृशज्ञानत्वत्वप्रकारकग्रहजनकसामग्रीजन्यतादृशज्ञानत्वत्वप्रकार-
कग्रहविषयत्वरूपसाध्यसत्त्वस्य प्रमात्वोपपत्तिरित्यर्थः ।

अयम्भावः, स्वरूपतःसाध्याप्रसिद्धिर्हि न साध्यवत्ताग्रहविरोधिनी अपि तु तज्ज्ञानमेतद्वि
रोधि, प्रकृते च द्वितीयग्रहे स्वाश्रयविषयकत्वाभावज्ञानमेव स्वाश्रयविषयकत्ववैशिष्ट्यग्रह
विरोधितया साध्यवत्त्वग्रहविरोधीति वाच्यम्, किन्तु तदंकुरादिमति तदंकुरादिप्रकारकज्ञानत्व
त्वेन रूपेण तादृशप्रमात्वाज्ञाने द्वितीयग्रहे स्वाश्रयविषयकत्वाभावग्रहासम्भवेन विरोधिनं
विरहात्तादृशप्रमात्वरूपपक्षेऽपि स्वाश्रयविषयकग्रहजनकसामग्रीजन्यग्रहविषयत्वरूपसा
ध्यवत्त्वग्रहसम्भवात् इयञ्च साध्याप्रसिद्धिरकिञ्चित्करेत्याशयेन समाधत्ते **अज्ञाने चेति**
सतीति शेषः । घटत्वादिमद्विशेष्यकत्वावच्छिन्नत्वविशिष्टघटत्वादिप्रकारकज्ञानाभावे
सतीति यावत् ।

(गा०) यत्प्रामाण्यं तदाश्रयज्ञानविषयकत्वस्य तद्विशेष्यतया साध्यघटकीभूते ग्रहे अभावग्रहासम्भवादित्यर्थः ।

नच तत्र तदभावग्रहासम्भवेन तदंशे तद्रूत्वघटितविशिष्टसाध्यज्ञान-प्रतिबन्धासम्भवेपि तद्घटितविशिष्टसाध्यविषयिण्या वाद्युद्देश्यानुमितेर्भ्रमत्वं दुर्वारमेवेति वादिनिग्रहप्रसङ्ग इति वाच्यम् ? मध्यस्थादेरपि तादृक्प्रामाण्य-त्वरूपपक्षतावच्छेदकप्रकारकपक्षाज्ञानेन तदवच्छिन्न उक्तसाध्यस्यानुमित्याव-गाहनासम्भवात् प्रतिवादिना तदुद्भावनासम्भवाच्च । प्रामाण्यपदार्थस्य दर्शितरीत्या ज्ञानत्वघटिततया इच्छावृत्तेर्घटत्ववति घटत्वादिप्रकारकत्वा-देरिच्छादिग्राहकाग्राह्यत्वात् बाधवारकतया ज्ञानपदसार्थक्यसम्पादनं मिश्रा-णाम् अतितुच्छमिति तन्नोपन्यस्तम् ।

(प्रभा) मद्विशेष्यकतदङ्कुरादिप्रकारकज्ञानत्वम् । **तदाश्रयज्ञानविषयकत्वस्येति** = अस्य चाभावग्रहासम्भवादित्यत्राभावेऽन्वयः । तादृशप्रमात्वाश्रयज्ञानविषयकत्वस्येत्यर्थः । **तद्वि-शेष्यतयेति** = तादृशप्रमात्वाश्रयविषयकत्वविशेष्यतयेत्यर्थः । **साध्यघटकीभूते ग्रहे** = साध्यघटकद्वितीयग्रहे इत्यर्थः । स्वाश्रयविषयकत्वविशेष्यकतया साध्यघटकीभूते द्वितीयग्रहे तादृशप्रमात्वाश्रयज्ञानविषयकत्वस्याभावग्रहासम्भवादिति फलितान्वयः । तथाचोक्तस्थले पक्षतावच्छेदकप्रकारकज्ञाने तादृशज्ञानजनकसामग्र्येव स्वाश्रयविषयकज्ञान-ग्राहकसामग्री प्रसिद्धेति न साध्याप्रसिद्धिरिति । यदि तादृशप्रमात्वस्वरूप-पक्षतावच्छेदकप्रकारकज्ञानं नास्ति तर्हि साध्याप्रसिद्धिज्ञानरूपप्रतिबन्धकविरहादेव निरुक्त-प्रमात्वे साध्यवत्त्वानुमितिसम्भव इति निरुक्ताज्ञायमानप्रमात्वे साध्यवत्त्वानुमितिप्रतिबन्धो-क्तिर्मिश्राणान्न सङ्गच्छते इत्यभिप्रायः । निरुक्तस्थले पक्षतावच्छेदकाज्ञाने साध्याप्रसिद्धेः साध्यवत्त्वानुमितिविरोधित्वासम्भवेऽपि वाद्युद्देश्यानुमितेर्भ्रमत्वमेव दोष इत्याशङ्कते **नचेति** । **तत्रेति** = स्वाश्रयविषयकत्वविशेष्यतया साध्यघटकीभूतद्वितीयग्रहे इत्यर्थः । **तदभाव-ग्रहासम्भवेनेति** । निरुक्तप्रमात्वाश्रयविषयकत्वाभावग्रहासम्भवेनेत्यर्थः । **तदंशे** = साध्यघटकीभूतद्वितीयग्रहांशे । **तद्घटितेति** = तादृशप्रमात्वाश्रयविषयकत्वघटितेत्यर्थः । **विशिष्टज्ञानप्रतिबन्धासम्भवेऽपि** । साध्याप्रसिद्धिज्ञानरूपप्रतिबन्धकज्ञानविरहादिति भावः । **तद्घटितेति** = स्वाश्रयविषयकत्वविशिष्टग्रहघटितेत्यर्थः । **वादिनिग्रहप्रसङ्ग इति** । **तदवच्छिन्ने** । निरुक्तप्रामाण्यत्वावच्छिन्नप्रमात्वरूपपक्षे उक्तसाध्यस्यानुमित्यावगाह-नासम्भवात् इति पक्षतावच्छेदकज्ञानरूपकारणविरहादुक्तसाध्यानुमितेरेवासम्भवात् । **तदुद्भावनासम्भवात्** = भ्रमत्वोद्भावनासम्भवादिति । इयं तवानुमितिर्भ्रमात्मिके-त्युद्भावयितुमशक्यत्वादित्यर्थः । तथाच निरुक्तप्रामाण्यत्वरूपपक्षतावच्छेदकरूपेण पक्षा-ज्ञानेऽनुमितेरेवासम्भवात्तादृशप्रमात्वस्य पक्षतया निरुक्तदोषदानं मिश्राणामसङ्गतमतो-

(दी०) विधौ सिद्धसाधनस्य निषेधे बाधस्याप्रसिद्धेर्वा वारणाय

(गा०) *विधाविति* । मीमांसकैःसाध्य इति शेषः । *सिद्धसाधनस्येति* प्रामाण्यानुमितिसामग्रीमादायेत्यादिः । *निषेधे* = नैयायिकैः साध्ये, तादृशसामग्रीग्राह्यत्वमादायैव बाधस्य वारणायेत्यन्वयः । घटज्ञानम् प्रमा सर्वमभिधेयम् इत्यादिज्ञानविषयत्वस्य केवलान्वयित्वेन यावत्त्वाघटितसाध्याप्रसिद्धावपि अभावसाधने पक्षे प्रतियोगिमत्त्वमेव बाध इत्याशयेनेदम् । *अप्रसिद्धेर्वेति* समुच्चये वाकारः । उक्तबाधपक्षेऽपि साध्याप्रसिद्धिसत्त्वेन परस्परव्यवच्छेदरूपविकल्पासम्भवात् ।

अथवा उक्तमीमांसकसाध्ये पक्षनिष्ठाभावप्रतियोगित्वसाधनेनापि नैयायिकस्य कृतकृत्यतया तत्साधनाभिप्रायेण *बाधस्य* इत्युक्तम् । तदभावसाधना

(प्रभा) प्रामाण्यानुमितिसामग्रीमादायेति । इदं ज्ञानम्प्रमा संवादिप्रवृत्तिजनकत्वादित्यनुमितिसामग्रीमादायेत्यर्थः । तथाच यावत्पदानुपादाने स्वाश्रयग्राहकसामग्रीपदेन इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वादित्यनुमितिसामग्रीमादाय तज्जन्यग्रहविषयत्वस्य प्रमात्वे नैयायिकैरपि स्वीकारात् सिद्धसाधनं स्यादेवेतिभावः । **निषेधे** = प्रमात्वे स्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहविषयत्वाभावे । **तादृशसामग्रीग्राह्यत्वमादायैवेति** = संवादिप्रवृत्तिजनकत्वलिङ्गकानुमितिग्राह्यत्वमादायैवेत्यर्थः । तथाच यावत्पदानुपादाने उक्तरीत्या तादृशसामग्रीग्राह्यत्वाभावाभावरूपतादृशसामग्रीग्राह्यत्वस्यैव ज्ञानप्रामाण्ये सत्त्वेन बाधःस्यात् । यावत्त्वोपादाने च यावत्सामग्र्यन्तर्गतानुव्यवसायादिसामग्रीग्राह्यत्वाभावरूपसाध्यसत्त्वेन न बाधः । दीधितौ **अप्रसिद्धेर्वेति** । साध्याप्रसिद्धेर्वेत्यर्थः । घटज्ञानं प्रमा सर्वमभिधेयमित्यादिज्ञानविषयत्वस्यैव सर्वत्र सत्त्वात्तत्र तादृशविषयत्वाभावरूपसाध्याप्रसिद्धेरित्यर्थः । ननु यावत्त्वानिवेशे कथं बाधः साध्याभाववत्पक्षो हि बाधः प्रकृते च साध्याप्रसिद्ध्या साध्याभावस्याप्यप्रसिद्ध्या बाधासम्भवादित्यभावसाध्यकस्थले पक्षे साध्यात्मकाभावप्रतियोगिमत्त्वमेव बाध इति सिद्धान्तं द्रढयितुं साध्याप्रसिद्धिं (नैयायिकसाध्ये इत्यर्थः) दर्शयति यावत्त्वाघटितसाध्याप्रसिद्धावपीति । **समुच्चये वाकारः** । बाधः अप्रसिद्धिश्चेत्यर्थः । **उक्तबाधपक्षेऽपि** = पक्षे प्रतियोगिमत्त्वरूपबाधपक्षेऽपीत्यर्थः । **उक्तमीमांसकसाध्ये** = स्वाश्रयज्ञानग्राहकसामग्रीग्राह्यत्वरूपसाध्ये । **पक्षनिष्ठाभावप्रतियोगित्वसाधनेनापि** = प्रमात्वनिष्ठाभावप्रतियोगित्वसाधनेनापीत्यर्थः । **कृतकृत्यतया** । स्वतो ग्राह्यत्वं प्रमात्वनिष्ठाभावप्रतियोगीत्याकारकप्रतियोगित्वस्यापि साध्यत्वेन नैयायिकमतसिद्धिसम्भवात् । **तत्साधनाभिप्रायेणेति** = तादृशप्रतियोगित्वसाधनाभिप्रायेणेत्यर्थः । **बाधस्येत्युक्तमिति** । तथाच तादृशप्रतियोगित्वस्य साध्यतास्थले तादृशप्रतियोगित्वाभावरूपबाधस्य प्रसिद्ध्या बाधस्येत्युक्तिः संगता । तथाच स्वाश्रयज्ञानग्राहकसंवादिप्रवृत्तिजनकत्वलिङ्गकानुमितिसामग्रीजन्यग्रहविषयत्वरूपस्वतोग्राह्यत्वे प्रमात्वनिष्ठा-

(गा०) भिप्रायेण अप्रसिद्धेर्वेति । प्रसिद्धसाध्यक एव बाध इत्याशयेन वाकारसङ्गतिः । अन्यथा अप्रसिद्धिर्बाधश्च द्वयं द्वितीयपक्षे दूषणमवगन्तव्यम्

ननु सामग्र्यां यावत्त्वविशेषणमयुक्तम्, यावत्सामग्रीजन्यग्रहाप्रसिद्धेः, नहि सर्वाभिर्ज्ञानसामग्रीभिःकिमपि ज्ञानं जन्यते ? यदि च यावतीस्सामग्रीःप्रातिस्विकरूपेणोपादाय तत्तज्जन्यग्रहविषयत्त्वं साध्यते तदा तदन्तर्गतानुमितिसामग्र्यादिजन्यत्वसाधने सिद्धसाधनादिकमेव दुर्वारम्, अनुव्यवसायादिसामग्रीणां ताद्रूप्येण प्रवेशे मतत्रयसाधारण्यानिर्वाहः, तादृशसामग्रीत्व-

(प्रभा) अप्रसिद्धेर्वेति । तथाच स्वतोग्राह्यत्त्वाभावरूपसाध्यत्वाभिप्रायेण , पूर्वोक्तरीत्या साध्याप्रसिद्धिरभिहितेत्यर्थः । उक्तबाधपक्षेऽपि = अभावसाधने पक्षे प्रतियोगिमत्त्वबाधपक्षेऽपि । साध्याप्रसिद्धिसत्त्वेन = यत्किञ्चिज्ज्ञानपदेन घटज्ञानमप्रमा सर्वमभिधेयमित्याकारकसमूहालम्बनानुमितेरपि धर्तुं शक्यतया तद्विषयत्वस्य केवलान्वयित्वेन सर्वत्र सत्त्वात् तदभावरूपसाध्याप्रसिद्धिसत्त्वेनेत्यर्थः । अन्यथा = तादृशविषयत्वाभावसाधने । द्वितीयपक्षे = स्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहविषयत्वाभावरूपनैशयिकसाध्यपक्षे इत्यर्थः । यथाश्रुतशब्दतो यावत्त्वं सामग्र्यां लभ्यते तच्च न सम्भवति पूर्वोक्तदोषतादवस्थ्यादित्याशंकते नन्विति । यावत्सामग्रीजन्यग्रहाप्रसिद्धेः = साध्याप्रसिद्धेरित्यर्थः । संघटयति नहीति । अयम्भावः, व्यवसायानुव्यवसायसंवादिप्रवृत्तिजनकत्वलिङ्गकानुमित्यादिसामग्रीभिःसकलाभिरेकस्य कस्य चिदनुव्यवसायादिग्रहस्यानुत्पत्तेः । प्रातिस्विकरूपेणेति = तत्तद्व्यक्तित्वेनेत्यर्थः । स्वाश्रयज्ञानविषयकग्रहजनिका यावत्यःसामग्र्यस्तादृशसामग्रीत्वसमानाधिकरणोभयावृत्तिधर्मवत्त्वेनेति यावत् । साध्यते इति । तथाच तत्तत्सामग्रीजन्यत्वं तत्तज्ज्ञाने प्रसिद्धमेवेति । सिद्धसाधनादिकमेवेति । अयम्भावः, प्रातिस्विकरूपेण सामग्रीनिवेशे घटत्वप्रकारकज्ञानत्वम् तदप्रामाण्याग्राहकस्वाश्रयज्ञानविषयकग्रहजनकतत्तत्सामग्रीजन्यग्रहविषयत्वरूपसाध्यस्वरूपे पर्यवसिते तत्सामग्रीपदेन संवादिप्रवृत्तिजनकत्वलिङ्गकानुमितिसामग्रीमादाय तज्जन्यतादृशानुमित्यात्मकग्रहविषयत्वस्योक्तप्रमात्वे साधने सिद्धसाधनापत्तेः नैयायिकैरपि तथा स्वीकारात् । आदिपदाद् बाधपरिग्रहः प्रत्येकविषयत्वस्य प्रत्येकरूपेण साध्यत्वादिति भावः । आदिना उद्देश्यासिद्धिपरिग्रहश्च । अत्र तादृशविषयताकूटस्य साधने न सिद्धसाधनमिति चेन्न, बाधापत्तेः । अनुव्यवसायादिसामग्रीणामिति । आदिना भट्टमतसिद्धज्ञाततालिङ्गकानुमितिसामग्र्याः स्वप्रकाशसामग्र्याश्च परिग्रहः । ताद्रूप्येणेति । अनुव्यवसायादिसामग्रीत्वेन रूपेणेत्यर्थः । तथाच घटत्ववति घटत्वप्रकारकज्ञानत्वे तदप्रामाण्याग्राहकस्वाश्रयानुव्यवसायजनकयावत्सामग्रीजन्यग्रहविषयत्वे साध्ये गुरुभट्टयोस्संग्रहानुपपत्तिः । तादृशप्रमात्वं स्वाश्रयव्यवसायजनकसामग्रीजन्यग्रहविषयमित्युक्तौ मिश्रभट्टयोरसंग्रहः । तादृशप्रमात्वाश्रयज्ञाततालिङ्गकानुमितिजनकसामग्रीजन्यग्रहविषयत्वसाधने गुरुमिश्रयोरसंग्रहः । अनुव्यवसायादिसामग्रीणां ताद्रूप्येण निवेशे इतरसामग्रीद्वयस्यालाभेन मतत्रयसा-

(दी०) यावदिति फलतो ग्रहविशेषणम् । तथाच तादृशग्रहत्वव्यापकविषयिताप्रतियोगित्वमर्थः ।

(गा०) व्यापकस्वग्राहकताकत्वनिवेशे नायं दोष इति चेत्? तथापि ज्ञानग्राहकत्वव्यापकत्वनिवेशेनैवोपपत्तौ सामग्रीत्वनिवेशवैयर्थ्यमित्यत आह *विशेषणमिति* । स्वाश्रयग्राहकसामग्रीजन्ययावद्ग्रहविषयत्वं साध्यमिति फलितम् । व्यापकत्वरूपयावदर्थमन्तर्भाव्य निष्कर्षमाह *तादृशेति* ।

(प्रभा) ज्ञानग्राहकेत्यर्थः । **स्वग्राहकताकत्वेति** । स्वम् प्रमात्वं स्वघटितबहुव्रीहावन्यपदार्थः स्वमेव । ग्राहकताकत्वं ग्राहकताविशिष्टत्वम् वै० स्वनिरूपितजन्यतावद्ग्रहविषयत्वसंबन्धेन । स्वाश्रयज्ञानग्राहकसामग्रीत्वव्यापकजनकतानिरूपितजन्यतावद्ग्रहविषयत्वम्फलितम् । स्वग्राहकताकत्वं स्वग्राहकताकालीनत्वम्, तथाच प्रमात्वं तदप्रामाण्याग्राहकस्वाश्रयज्ञानग्राहकसामग्रीत्वव्यापकस्वग्राहकताकालीनमिति फलितमित्यपि केचित् । **उपपत्ताविति** = स्वाश्रयज्ञानग्राहकताव्यापकजनकतानिरूपितजन्यतावद्ग्रहविषयत्वनिवेशनैवोपपत्तावित्यर्थः । यथासन्निवेशे न वैयर्थ्यम् अखण्डाभावघटकतया सार्थक्यात् । ज्ञानग्रहत्वव्यापकत्वात् तादृशसामग्रीजन्यग्रहत्वव्यापकत्वस्य भेदादितिभावः । अत्र तदप्रामाण्याविषयकग्रहत्वेनोपादानं सम्भवतीतिज्ञानशून्यः तेन रूपेण तदनुपादानाकर्त्तृत्वे सति तादृशज्ञानग्राहकसामग्रीजन्यग्रहत्वेनोपादानकर्त्तृत्वादिति दीधितिकृदुपरि कटाक्षयति **निवेशवैयर्थ्यमिति** । प्रमात्वं स्वेतरभिन्नं स्वाश्रयज्ञानग्राहकसामग्रीत्वव्यापकस्वग्राहकताकत्वादितीतरभेदानुमाने व्यर्थविशेषणघटितत्वरूपवैयर्थ्यमिति भावः ।

ननु वैयर्थ्योक्तिरसंगता गुरुभूतधर्मस्य लघुभूतधर्मे सामानाधिकरण्यत्वे एव वैयर्थ्यसम्भवात् तच्चात्र न सम्भवति, तथाहि, तदप्रमाण्याग्राहकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकज्ञानग्राहकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकज्ञानग्राहकत्वनिष्ठावच्छेदकतानिरूपकज्ञानग्रहोत्पत्तिप्रयोजकतावच्छेदकसमुदायत्वरूपसामग्रीत्वनिष्ठावच्छेदकताभिन्नाधिकरणत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकाधिकरणत्वनिष्ठावच्छेदकतानिरूपिका याऽधिकरणनिष्ठावच्छेदकता तद्भिन्नावच्छेदकत्वानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकवृत्तित्वनिष्ठावच्छेदकतानिरूपकभेदनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकभेदनिष्ठावच्छेदकतानिरूपकप्रतियोगित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकप्रतियोगित्वनिष्ठावच्छेदकतानिरूपकावच्छेदकतात्वावच्छिन्नप्रतियोगिताकाभावो हि सामग्रीत्वनिवेशपक्षे । अनिवेशपक्षे तु तदप्रामाण्याग्राहकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपक[illegible]

(गा०) तत्तद्धर्मप्रकारकज्ञानग्राहकसामग्रीजन्येत्यर्थः । तादृशज्ञानग्रहस्यैव तज्जनकसामग्रीजन्यग्रहत्वेनोपादानेऽपि यथासन्निवेशो न वैयर्थ्यम् । यद्यपि नैयायिकमतेऽपि प्रामाण्यविषयिताया घटत्वप्रकारकत्वविषयितात्वादिना अनुव्यवसायादिसामग्रीजन्यग्रहत्वव्यापकत्वात् सिद्धसाधनम्, घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वत्वावच्छिन्ननिरूपितविषयितात्वेन व्यापकत्व-

---

(प्रभा) निष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकाधिकरणत्वनिष्ठावच्छेदकतानिरूपिका योऽधिकरणनिष्ठावच्छेदकता तन्निरूपकवृत्तित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकवृत्तित्वनिष्ठावच्छेदकतानिरूपकेत्यादिरीत्यैव निवेशाद् व्यापकतारूपाभावयोस्तादृशसमुदायत्वरूपसामग्रीत्वनिष्ठावच्छेदकताप्रवेशाप्रवेशाभ्यां भेदादितिचेन्न, तदप्रामाण्याग्राहकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकतन्निष्ठावच्छेदकतानिरूपकज्ञानग्राहकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकज्ञानग्राहकत्वनिष्ठावच्छेदकतानिरूपिका या ज्ञानग्रहोत्पत्तिप्रयोजकतावच्छेदकसमुदायत्वाधिकरणनिष्ठावच्छेदकता तद्भिन्नावच्छेदकत्वानिरूपकतन्निष्ठावच्छेदकतानिरूपकवृत्तित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकेत्यादिक्रमेण निवेशे समुदायत्वनिष्ठावच्छेदकत्वानिवेशेनोभयोर्वैलक्षण्याभावात् सामग्रीत्वानिवेशेऽपि ज्ञानग्राहकताधिकरणं समुदाय एव, अनिवेशपक्षे समुदायत्वाधिकरणं समुदाय एवेति, उभयत्रैव समुदायनिष्ठावच्छेदकताप्रवेशेनोभयत्र समानावच्छेदकताप्रवेशात् ।

विशेषणमिति । यावत्त्वं न सामग्र्यां विशेषणं किन्तु ग्रहस्यैवेति फलितार्थमाह **स्वाश्रयेति** । स्वम् प्रमात्वम्, यावत्त्वस्य चरमग्रहविशेषणत्वे यत्र तादृशसामग्र्या एक एव ग्रहो जनितस्तत्र यावत्त्वाप्रसिद्ध्या साध्याप्रसिद्धिरत आह **व्यापकतारूपेति** । दीधितौ **तथा चेति** । यावत्त्वस्य ग्रहविशेषणत्वे चेत्यर्थः । **तत्तद्धर्मप्रकारकेति** = घटत्वप्रकारकेत्यर्थः । तथाच तत्तज्ज्ञानप्रामाण्यं तत्तद्धर्मप्रकारकज्ञानग्राहकसामग्रीजन्यग्रहवृत्तिभेदप्रतियोगितानवच्छेदकविषयितानिरूपकं नवेतिविप्रतिपत्तिस्वरूपं पर्यवसितम् । दीधितौ विषयिताप्रतियोगित्वमित्यस्य विषयितानिरूपकत्वमित्यर्थः । ननु तदप्रामाण्याविषयकतत्तद्धर्मप्रकारकज्ञानग्रहत्वव्यापकविषयितानिरूपकत्वमेव साध्यमस्तु व्यर्थमेव चिकीर्षितमित्यत आह **तादृशज्ञानग्रहस्यैवेति** । तत्तद्धर्मप्रकारकज्ञानग्रहस्यैवेत्यर्थः ।

अथैवमपि तादृशग्रहत्वव्यापकत्वं विषयितायां केन रूपेण, विषयितात्वेन विशिष्टविषयितात्वेन वा ? नाद्यः, सिद्धसाधनप्रसङ्गात्, न द्वितीयः, साध्याप्रसिद्धेरित्याशङ्कते **यद्यपीत्यादिना** । घटत्वप्रकार**कत्वविषयितात्वादिनेति** । आदिना विषयितात्वघटत्ववद्विशेष्यकत्वविषयितात्वपरिग्रहः । **व्यापकत्वादिति** । व्यापकत्वं द्विविधम् अत्यन्ताभावघटितं भेदघटितञ्च, तत्राद्यपक्षे विषयितायां तादृशग्रहत्वव्यापकत्वम् तादृशग्रहत्वाधिकरणवृत्त्यभावीयप्रतियोगितानवच्छेदकधर्मवत्त्वरूपम् । एवञ्च सिद्धसाधनम्, नैयायिकैरपि केवलघट-

(गा०) विवक्षा च न्यायमते साध्याप्रसिद्ध्या न सम्भवति। न च विशिष्टप्रामाण्ये तादृशग्रहनिष्ठभेदप्रतियोगितानवच्छेदकविषयितानिरूपकत्वपर्याप्तेस्साध्यतया नानुपपत्तिरिति वाच्यम्, तत्तज्ज्ञानव्यक्तिविषयितावच्छिन्नप्रामाण्यविषयितायास्तत्तज्ज्ञानरूपाश्रयभेदेन भिन्नतया चालनीन्यायेन तादृशग्रहनिष्ठभेदप्रतियोगितावच्छेदकतया तदनवच्छेदकप्रामाण्यविषयित्वाप्रसिद्धेः।

यत्तु विषयितानिष्ठतादृशग्रहत्वव्यापकतायां निरूपितत्वसम्बन्धेनावच्छेद

(प्रभा) पितविषयत्वाभावस्य धर्त्तुमशक्यतया तादृशाभावीयप्रतियोगितानवच्छेदकीभूतघटत्वप्रकारकत्वविषयितात्वधर्मवत्त्वरूपव्यापकत्वस्य प्रामाण्यविषयितायां सत्त्वात्तन्निरूपकत्वस्य च प्रामाण्ये सत्त्वादिति भावः।

साध्याप्रसिद्ध्या न सम्भवतीति। तथाच यदि तादृशग्रहत्वाधिकरणवृत्त्यभावीयप्रतियोगितानवच्छेदकं यद् घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वनिरूपितविषयितात्वं तद्वत्त्वमेव व्यापकत्वं विवक्ष्यते तदा साध्याप्रसिद्धिः, तादृशविशिष्टविषयितायां निरुक्तव्यापकत्वासम्भवादनुव्यवसायादावुक्तविशिष्टविषयित्वाभावस्यैव सत्त्वेन तत्प्रतियोगितावच्छेदकत्वस्यैव तत्र सत्त्वात्। भेदघटितव्यापकतापक्षमाश्रित्य समाधातुं शङ्कते **नचेति**। विशिष्टप्रामाण्ये = तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपप्रामाण्ये। **तादृशग्रहनिष्ठेति**। तदप्रामाण्याग्राहकस्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहनिष्ठेत्यर्थः। **भेदप्रतियोगितानवच्छेदकेति**। तथाच व्यापकत्वं नात्यन्ताभावघटितं येनोक्तदोषसम्भवः, एवञ्च भेदप्रतियोगितानवच्छेदकत्वं घटत्वप्रकारकत्वादिविषयितायां प्रसिद्धमिति नाप्रसिद्धिः। सिद्धसाधनवारणाय पर्याप्तिनिवेशः, अन्यथा तादृशभेदप्रतियोगितानवच्छेदकीभूतघटत्वप्रकारकत्वविषयितानिरूपकत्वस्य प्रामाण्यैकदेशे घटत्वप्रकारकत्वे सत्वात् सिद्धसाधनसम्भवात्। तथाच प्रमात्वं तदप्रामाण्याग्राहकस्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहनिष्ठभेदप्रतियोगितानवच्छेदकविषयितानिरूपकतापर्याप्त्यधिकरणं न वेति विप्रतिपत्तिस्वरूपं पर्यवसितमेतादृशभेदप्रतियोगितावच्छेदकत्वं प्रामाण्यविषयितायामेव मीमांसकानां सुशकं नतु नैयायिकानामिति न सिद्धसाधनम्। **तत्तज्ज्ञानव्यक्तिविषयित्वावच्छिन्नेति**। प्रामाण्याश्रयतत्तज्ज्ञानव्यक्तिनिरूपितविषयित्वावच्छिन्नेत्यर्थः। इदञ्च भिन्नत्वे हेतुः। समानाधिकरणविषयितयोरवच्छेद्यावच्छेदकभावेन तत्तज्ज्ञानव्यक्तिविषयितायाःप्रामाण्यविषयितायाश्चावच्छेद्यावच्छेदकभाव इति।

ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकसामग्रीजन्यग्रहत्वनिरूपितविषयितानिष्ठव्यापकतानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतावन्न वेति विप्रतिपत्तिस्वरूपम्। भावकोटिर्मीमांसकानां तादृशाभावीयप्रतियोगितानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकत्वरूपतदभावो नैयायिकानां साध्य इति। तथाच गुर्वादिमते व्यवसायानुव्यवसायादौ

(गा०) कत्वं साध्यम् निरूपितत्वसम्बन्धेन घटत्ववति घटत्वप्रकारकत्वविशिष्टसामान्याभावो न निरुक्तज्ञानग्रहे इति परमते तथाविधप्रामाण्ये तथाविधव्यापकतावच्छेदकत्वमक्षतमेवेति न बाधः, न्यायमते च केवलघटत्वप्रकारकत्वत्वाद्यवच्छिन्ननिरूपितविषयितायां विशिष्टप्रामाण्यनिरूपितत्वविरहात् तादृशविषयिताशालिन्यपि अनुव्यवसाये निरूपितत्वसम्बन्धेन विशिष्टप्रामाण्यावच्छिन्नविषयिताविरहस्य अक्षततया विशिष्टप्रामाण्ये न तादृशानुव्यवसायनिष्ठाभावप्रतियोगितानवच्छेदकत्वमिति न सिद्धसाधनम्, घटत्ववति घटत्वप्रकारकत्वादीनां तत्तद्घटविशेष्यकत्वावच्छिन्नघटत्वादिप्रकारकत्वादिरूपाणां विशेष्यभेदेन भिन्नतया प्रत्येकं घटत्वादिप्रकारकघटादिज्ञानग्रहत्वसमानाधिकरणाभावप्रतियोगितायां निरूपितत्वसम्बन्धेनावच्छेदकत्वेऽपि

(प्रभा) साध्यमिति। अयम्भावः, तत्तज्ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकस्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहवृत्त्यभावीयप्रतियोगितानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकत्वाभाववान्नवेति विप्रतिपत्तिस्वरूपम्। अत्रावच्छेदकत्वाभावरूपविधिकोटिर्मीमांसकानाम्। तादृशाभावीयप्रतियोगितानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकत्वरूपतदभावो नैयायिकानां साध्य इति। तथाच गुर्वादिमते व्यवसायानुव्यवसायादौ निरूपितत्वसम्बन्धेन प्रामाण्यविशिष्टविषयिता नास्तीत्यभावो न धर्त्तुं शक्यते, तन्मते तस्य सत्त्वात् किन्तु निरूपितत्वसम्बन्धेन घटत्वविशिष्टविषयिता नास्तीत्यभाव एव, तादृशाभावीयप्रतियोगितानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकता घटत्वादौ तदभावरूपव्यापकत्वं विषयितायां तादृशावच्छेदकत्वरूपं व्यापकतावच्छेदकत्वं प्रामाण्ये इति समन्वयः।

नैयायिकमते तु तादृशसामग्रीजन्यानुव्यवसायादौ निरूपितत्वसम्बन्धे प्रामाण्यविशिष्टविषयित्वाभावसत्त्वान्निरूपितत्वसम्बन्धवाच्छिन्नात्र च्छेदकत्वरूपनिषेधकोटिनिर्वाह इति ध्येयम्। निरूपितत्वसम्बन्धेन प्रामाण्यविशिष्टविषयितायां व्यापकत्वं प्रामाण्ये च तदवच्छेदकत्वमुपपादयति **निरूपितत्वसम्बन्धेन घटत्ववतीति**। घटत्ववद्विशेष्यकत्वावच्छिन्नेत्यर्थः। **घटत्वप्रकारकत्वविशिष्टेति**। विषयित्वस्येति शेषः। वै० निरूपितत्वसम्बन्धेन। **निरुक्तग्रहे** इति = स्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहे इत्यर्थः। तथाच निरूपितत्वसम्बन्धेन घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वविशिष्टविषयितासामान्याभावो न स्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहे इति भावः। बाधं निरस्यति **परमते** इति। मीमांसकमते इत्यर्थः। **तथाविधप्रामाण्ये** = विशिष्टप्रामाण्ये। **तथाविधव्यापकतावच्छेदकत्वमिति** = तादृशविषयितानिष्ठव्यापकतानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकत्वमित्यर्थः। **तादृशविषयिताशालिन्यपि** = केवलघटत्वप्रकारकत्वत्वावच्छिन्ननिरूपितविषयिताशालिन्यपीत्यर्थः। **विशेष्यभेदेन भिन्नतयेति**। अयम्भावः,

(मा०) विशिष्य तत्तद्घटादिव्यक्तिविशेष्यकत्वघटितप्रामाण्ये तत्तद्व्यक्ति
[illegible]घटत्वादिप्रकारकज्ञानग्रहत्वघटितसाध्यस्य साधनीयतया न बाध इ
तदपि न ? गुरुमते व्यवसायरूपग्रहग्रहे विशिष्टप्रामाण्यनिरूपि
[illegible]करणतासत्त्वेनैव तस्य निरूपितत्वसम्बन्धेन व्यवसायवृत्त्यभावप्र
[illegible]गितायामनवच्छेदकत्वाद् व्यवसाये प्रामाण्यविषयित्वासिद्धेः। ताद
[illegible]निष्ठाभावप्रतियोगितावच्छेदकत्वपर्याप्तिविरहरूपव्यापकतावच्छेदकत्वस्य

(प्रभा) प्रकारकत्वरूपप्रमात्वस्य चालनीन्यायेनाभावः सुलभः। व्यापकत्वासिद्धिम्परिहर
विशिष्य तत्तद्घटविशेष्यकत्वघटितप्रामाण्ये इति। तथाच घटत्ववद्घटविशे
[illegible]घटत्वप्रकारकत्वरूपम् प्रामाण्यं तादृशप्रामाण्याश्रयज्ञानग्राहकसामग्रीज
[illegible]निरूपितविषयितानिष्ठव्यापकतानिरूपितेत्यादि विशिष्यैव पक्षसाध्यभाव इति
चालनीन्यायेनाभावमादाय व्यापकत्वासम्भवः। तादृशप्रामाण्याश्रयज्ञानग्रहे ताद
[illegible]विशिष्टविषयित्वाभावविरहेणानवच्छेदकत्वं तादृशप्रामाण्येऽक्षतमेवेति भावः।

स्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहवृत्त्यभावीयप्रतियोगितानिरूपितनिरूपितत्वसम्बन्धाव
[illegible]च्छेदकत्वाभावे साध्येऽपि व्यवसायरूपज्ञानग्रहे प्रमात्वनिरूपिताधिकरणत
[illegible] निरूपितत्वसम्बन्धेन प्रामाण्यविशिष्टाधिकरणत्वाभावस्य धर्तुमशक्यतया तादृशाभ
[illegible]प्रतियोगितावच्छेदकत्वाभावरूपव्यापकतावच्छेदकत्वस्य प्रमात्वे सत्त्वाद् व्यवसाये प्राम
[illegible]विषयितासत्त्वे मानाभाव इत्याशयेन यत्तुमतं दूषयति तदपि नेति। विशिष्टप्रामाण
निरूपिताधिकरणतासत्त्वेनैवेति। एवकारेण निरूपितत्वसम्बन्धेन प्रामाण्यविशिष्टवि
[illegible]च्छेदः। विशिष्टप्रामाण्यस्य प्रामाण्यविषयित्वासिद्धेः। तथाचोद्देश्यासिद्धिरित्यर्थः
[illegible]व्यापकतायां विषयितानिष्ठत्वस्यानिवेशात्तादृशग्रहे निरूपितत्वसम्बन्धेन प्रामाण
[illegible]करणत्वाभावस्यासत्त्वेन निरूपितत्वसम्बन्धावच्छिन्नावच्छेदकत्वाभावरूपसाध्यसि
[illegible] प्रामाण्यविषयित्वासिद्धिः। निरूपितत्वसम्बन्धावच्छिन्नावच्छेदकत्वाभावरूप व्या
[illegible] प्रामाण्ये सिद्धावपि प्रामाण्यविषयितायां तादृशग्रहत्वव्यापकत्वसिद्धिस्त
[illegible] निरूपितत्वसम्बन्धेन प्रामाण्यविशिष्टविषयिताया अभावस्तादृशग्रहे न स्यात
[illegible] तादृशग्रहे प्रामाण्यविषयिताया अस्वीकारात्। तथाच तादृशग्रहे प्रामाण्य
[illegible]द्धया प्रामाण्याधिकरणतामादाय प्रामाण्ये व्यापकतावच्छेदकत्वरूपानाकाङ्क्षि
[illegible]र्थान्तरापत्तिरेव। उद्देश्यासिद्धौ सत्यामनाकाङ्क्षितार्थसिद्धिरेवार्थान्तरमि
[illegible] तत्प्रामाण्याश्रयज्ञानग्राहकसामग्रीजन्यग्रहत्वनिरूपितविषयितानिष्ठव्यापकता
[illegible] निरूपितत्वसम्बन्धावच्छिन्नावच्छेदकत्वं साध्यते इति नोद्देश्यसिद्धिर्यतःसाध्यको
[illegible]निष्ठत्वस्येदानीं निवेशेन गुरुमतसिद्धव्यवसायात्मकव्यवसायात्मकज्ञानेऽपि प्रा
[illegible]करणत्वेन प्रामाण्यविषयिताया अनुमित्यभ्युपगमात् इत्यतः सिद्धसाधनमा
[illegible]निष्ठेति। स्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहविशेषणं।

(गा०) केवलघटत्वप्रकारकत्वादौ सत्त्वेनापि अवच्छिन्नत्वान्तविशिष्टे घटत्वादिप्रकारकत्वे पक्षे तत्साधने सिद्धसाधनस्य दुर्वारत्वाच्च, विशिष्टस्यानतिरिक्तत्वात् ।

नच विशेषणान्तर्भावेन विशेष्ये अवच्छेदकत्वपर्याप्तिविरहसिद्धेरुद्देश्यतया तदसिद्धया न सिद्धसाधनमिति वाच्यम् ? अनुमानात् पक्षतावच्छेदकविशेषणांशे साध्यवत्त्वज्ञानासम्भवेन तदन्तर्भावेन पक्षे साध्यवत्त्वसिद्धेरुद्देश्यत्वासम्भवात् ।

नच तादृशविशेषणावच्छेदेन विशेष्ये साध्यवत्त्वसिद्धेरुद्देश्यतामुपगम्य

(प्रभा) केवलघटत्वप्रकारकत्वादौ सत्त्वेनेति । तस्य नैयायिकमते स्वतोग्राह्यत्वात् । ननु केवलघटत्वप्रकारकत्वे तादृशावच्छेदकत्वाभावसत्त्वेऽपि घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रमात्वे तादृशावच्छेदकत्वाभावरूपसाध्यस्य नैयायिकैरस्वीकारात्कुतः सिद्धसाधनमत आह विशिष्टस्यानतिरिक्तत्वादिति । विशेष्यवृत्तिधर्मस्य विशिष्टानुयोगिकाभावानङ्गीकारादिह सिद्धसाधनमिति भावः ।

सिद्धसाधनपरिहारमाशङ्कते नचेति । विशेषणान्तर्भावेनेति । विशेषणे विशेष्ये उभयत्रैव, तद्गतद्वित्वावच्छेदेनेति यावत् । तादृशावच्छेदकत्वपर्याप्तिविरहस्साध्यः । तथाच विशेषणं घटत्ववद्विशेष्यकत्वं विशेष्यं घटत्वप्रकारकत्वमित्युभयत्रैव तद्गतद्वित्वावच्छेदेन निरुक्तसाध्यस्य नैयायिकैरनङ्गीकारान्न सिद्धसाधनमिति भावः ।

दूषयति अनुमानादिति । पक्षतावच्छेदकविशेषणांशे = पक्षतावच्छेदकीभूतविशेषणांशे इत्यर्थः । घटत्ववद्विशेष्यकत्वावच्छिन्नत्वांशे इति यावत् । साध्यवत्त्वज्ञानासम्भवेनेति = तादृशावच्छेदकत्वपर्याप्तिविरहरूपसाध्यवत्त्वज्ञानासम्भवेनेत्यर्थः । तादृशावच्छेदकतापर्याप्तिविरहरूपसाध्यविरहादिति भावः । अयंभावः, यथा नीलरूपवत्पर्वतो वह्निमानित्यादौ नीलरूपांशे (नीलरूपे) वह्निमत्त्वज्ञानासम्भवेन न नीलरूपांशे इच्छीयविशेष्यत्वरूपमुद्देश्यत्वं सम्भवति किन्तु नीलरूपविशिष्टपर्वतांशे एव, तथा प्रकृतेऽपि घटत्ववद्विशेष्यकत्वरूपपक्षतावच्छेदकेऽपि निरुक्तसाध्यस्योद्देश्यत्वासम्भवात् पक्षतावच्छेदकविशिष्टपक्षे एव साध्यानुमितिर्भवति नतु पक्षतावच्छेदके नीलरूपादौ । तदन्तर्भावेन = पक्षतावच्छेदकान्तर्भावेन ।

विशेषणान्तर्भावेनेत्यस्य विशेषणे विशेष्ये इत्युभयत्रैव विशेषणावच्छेदेन विशेष्ये वेत्यर्थद्वयं सम्भवति तत्राद्यं दूषयित्वा द्वितीयं दूषयति द्वितीयनचेत्यादिना । नचेत्यस्य सिद्धसाधनपरिहारसम्भव इत्यनेनान्वयः । तादृशविशेषणावच्छेदेनेति । घटत्ववद्विशेष्यकत्वावच्छिन्नत्वघटत्वप्रकारकत्वत्वरूपविशेषणावच्छेदेनेत्यर्थः । विशेष्ये घटत्वप्रकारकत्वे

(गा०) सिद्धसाधनपरिहारसम्भवः, विशेष्यनिष्ठे अवच्छेदकत्वपर्या
विरहवत्त्वे तन्निष्ठस्य घटत्वप्रकारकत्वत्वादेरिव अवच्छिन्नत्वान्तविशे
स्यापि अवच्छेदकतायाः न्यायमतसिद्धत्वात् तादृशधर्मस्य विशेष्यविशेष
मुदायनिष्ठावच्छेदकत्वपर्याप्तेरनवच्छेदकत्वात् समुदायनिष्ठावच्छेदकता
त्वभाववत्त्वस्य परोद्देश्यसिद्धिकस्यैवावच्छेदकताया एकदेशात्मकविशे
सम्भवादिति ।

(प्र०गा०) मितेरित्यर्थः । सिद्धसाधनपरिहारसम्भव इति । तथाच घटत्ववद्विशेष्य
वच्छिन्नत्वरूपविशेषणावच्छेदेन विशेष्ये घटत्वप्रकारकत्वादौ तादृशावच्छेदकताप
विरहरूपसाध्यस्य नैयायिकैरनङ्गीकारान्न सिद्धसाधनमिति भावः । दूषयति विशेष्यां
इति = घटत्वप्रकारकत्वनिष्ठे इत्यर्थः । अवच्छेदकतापर्याप्तिविरहवत्त्वे इति । त
प्रवृत्त्यभावप्रतियोगितानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतापर्याप्तिविरहरूपस
त्त्वे इत्यर्थः । व्यापकतावच्छेदकत्वे इति यावत् । तन्निष्ठस्य = घटत्वप्रकारकत्वरूपविशेष्य
स्येत्यर्थः । विशेष्यनिष्ठत्वस्य व्यापकतावच्छेदकतावच्छेदकत्वे प्रयोजकत्वम्, उद्देश्यताव
विधेययोः प्रयोज्यप्रयोजकभावात् । घटत्वप्रकारकत्वत्वादेरिवेति । यथा घटत्वप्रकार
रूपविशेष्यनिष्ठत्वाद् घटत्वप्रकारकत्वत्वादेर्निरुक्तव्यापकतावच्छेदकतावच्छेदकत्वसम
घटत्वप्रकारकत्वत्वावच्छेदेन व्यापकतावच्छेदकत्वं तथा घटत्ववद्विशेष्यकत्वावच्छि
त्वस्यापि घटत्वप्रकारकत्वरूपविशेष्यनिष्ठत्वान्निरुक्तव्यापकतावच्छेदकतावच्छेदकत्व
श्यकत्वाद् घटत्ववद्विशेष्यकत्वावच्छिन्नत्वरूपविशेषणावच्छेदेनापि निरुक्तव्यापकताव
दकत्वं नैयायिकेनाप्यगत्याऽङ्गीकरणीयमिति भवति सिद्धसाधनम् । ननु घटत्व
प्रकारकत्वत्वमिव घटत्ववद्विशेष्यकत्वावच्छिन्नत्वस्यावच्छेदकतापर्याप्तिविरहाव
वत्त्वेऽपि न्यायमते समुदायेऽवच्छेदकत्वपर्याप्तेः सत्त्वात्तादृशविशेषणस्य समुदाय
वच्छेदकतापर्याप्त्यवच्छेदकत्वं नैयायिकेनाप्यवश्यं स्वीकार्य्यं, तादृशविशे
विशिष्टविशेष्याभावादेव तादृशसमुदाये निरूपितत्वसम्बन्धावच्छिन्नावच्छेद
पर्याप्तिमत्त्वात्, तथाच तदवच्छेदेन कुतो न्यायमतेऽवच्छेदकतापर्याप्तिविरहस्य सिद्ध
सिद्धसाधनमित्यत आह तादृशधर्मस्येति । विशेषणीभूतघटत्वादिमद्विशेष्यकत्वावच्छि
न्नत्वधर्मस्येत्यर्थः । विशेष्यविशेषणसमुदायनिष्ठावच्छेदकतापर्याप्तेरनवच्छेदकत
दिति । तादृशप्रवृत्तिर्यो विशेषणविशिष्टविशेष्यस्य विशिष्टाभावस्तत्प्रतियोगितानिरू
पितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकताया विशेषणविशिष्टविशेष्यसमुदाये एव पर्याप्त
घटत्ववद्विशेष्यकत्वावच्छिन्नत्वधर्मस्य निरुक्तावच्छेदकतापर्याप्तिविरहावच्छेदकत्वात् प्रति
यनवच्छेदकताया अभावावच्छेदकतानियतत्वस्य प्राचीनमतसिद्धत्वात् ।

अत्रायमाशयः, यद्यपि तादृशग्रहे निरूपितत्वसंसर्गेण घटत्ववद्विशेष्यकत्वावच्छिन्न
विशिष्टघटत्वप्रकारकत्वविशिष्टविषयिता नास्तीत्यभावे प्रतियोगितावच्छेदकता प्राम
वत्त्वे तथापि ...

एतेन प्रामाण्यनिरूपितत्वविशिष्टविषयितात्वं पक्षीकृत्य तादृशग्रह- ।वच्छेदकत्वकोटिका विप्रतिपत्तिः, तादृशग्रहत्वव्यापकतावच्छे- द्रमद् विशेष्यकत्वावच्छिन्नघटत्वादिप्रकारकत्वनिरूपितत्वविशिष्ट- -घटत्वादिविषयितात्वान्यतररूपवद्विषयिताकत्वकोटिकविप्रतिप- न्न साधीयसीति फलितम् ।

तादृशग्रहनिष्ठाभावप्रतियोगितात्वावच्छिन्नं पक्षीकृत्यैव विशिष्ट- ग्यितात्वानवच्छिन्नत्वकोटिकविप्रतिपत्तौ तात्पर्यात् न कश्चिद्दोषः ।

च्छेदेन तादृशावच्छेदकत्वासत्त्वादन्यूनानतिप्रसक्तधर्मस्यैवावच्छेदकत्वात् । एवञ्च च्छेदकस्याभावावच्छेदकत्वनियमात् तादृशग्रहवृत्त्यभावीयप्रतियोगितानिरूपित- न्धावच्छिन्नावच्छेदकतारूपप्रतियोगिनोऽवच्छेदकत्वस्य घटत्ववद्विशेष्यकत्वा- विशेषणे विरहेण तादृशावच्छेदकतापर्याप्तिविरहरूपव्यापकतावच्छेदकता- तादृशविशेषणे सत्त्वेन सिद्धसाधनस्य दुर्वारत्वात् इति । यद्यपि प्रति- स्याभावावच्छेदकत्वमिति न्यायो हि सिद्धान्तलक्षणे दूषितस्तथापि प्राचीन- इति ।

।रकत्वनिरूपितविषयितात्वव्यापकतावच्छेदकत्वस्य सत्त्वेन घटत्ववद्विशेष्य- विविशिष्टघटत्वप्रकारकत्वनिरूपितविषयितात्वेऽपि व्यापकतावच्छेदकत्वं सिद्धसाधनो दुर्वार इत्याशयेनाह एतेनेति । साधनदोषेणेत्यर्थः ।

रूपितत्वविशिष्टविषयितात्वम् = घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्व- ।ष्टविषयितात्वमित्यर्थः । तादृशग्रहत्वेति = स्वाश्रयज्ञानग्राहकसामग्रीजन्य- व्यापकतावच्छेदकेति । अन्यतरेत्यनेनास्यान्वयः । विषयिताकत्व- ।ामाण्यं पक्षीकृत्येति शेषः । तथाच प्रामाण्यं तादृशान्यतररूपवद्विषयिताकं पत्तिस्वरूपं पर्यवसितम् । अत्र तादृशग्रहत्वव्यापकतावच्छेदकघटत्वादि- पादाने सिद्धसाधनम् । तादृशग्रहत्वव्यापकतावच्छेदकघटत्ववद्विशेष्यकत्वा- कारकत्वनिरूपितत्वविशिष्टविषयितात्ववद्विषयिताकत्वमात्रोपादाने साध्या- ।रोपादानमिति ।

ति = स्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहेत्यर्थः । तथाच स्वाश्रयज्ञान- न्यग्रहनिष्ठाभावप्रतियोगितात्वावच्छिन्नं घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्व- ।तविषयितात्वानवच्छिन्नं न वेति विप्रतिपत्तिस्वरूपम्, यत्किञ्चित्पटादिविष- येत्वे विशिष्टप्रामाण्यविषयितात्वानवच्छिन्नत्वस्योभयमतसिद्धतया सिद्ध-

गा०) ज्ञानग्राहकेति । घटत्वादिप्रकारज्ञानग्राहकेत्यर्थः । आत्मादीति । य आत्मनोऽप्रामाण्यग्रहजनकतया अप्रामाण्याग्राहकत्वविशेषणेन व्यावृ गमसङ्गतम्, तथापि अतद्गुणसंविज्ञानवहुव्रीहिणा शरीरविशेषादेरेव वि गीतया न दोषः ।

अथवा स्वयमप्रामाण्यग्राहकपदस्य प्रामाण्याग्राहकत्वेन ज्ञानग्राहक व यद् भट्टमतसिद्धं तदन्यार्थकत्वेन व्याख्येयतया आत्मनःप्रामाण्यग्राहक ज्ञानग्राहकत्वेन च भट्टमतसिद्धतया तद्विशेषणेन न व्यावृत्तिरिति य मममेव साधु । अप्रसिद्धेरिति । घटत्वादिप्रकारकज्ञानग्रहस्यापि घटत्व प्रकारकज्ञानग्राहकजन्ययावद्ग्रहान्तर्गततया गुरुमतातिरिक्तमते तादृशया भाव्यत्वस्याप्रसिद्धेरिति भावः । ज्ञानत्वविशिष्टविषयकयावद्ग्रहोपाद

(प्रभा) ननु पूर्वकल्पेऽपि विशिष्टप्रामाण्यगतसमुदायत्वं स्वाश्रयज्ञानग्राहकसामग्रि निष्ठानाधीयप्रतियोगितानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियो गिकपर्याप्त्यनुयोगितानवच्छेदकं न वेति विप्रतिपत्तिस्वीकारेणैवोपपत्तौ तथापीत्याद्यनुर निरर्थकमिति चेन्न, लाघवमाहत्य तत्कल्पानुसरणादिति । दीधितौ अप्रसिद्धेरि आत्मजन्ययावद्ग्रहविषयत्वस्य कुत्राप्यसत्त्वादिति भावः । प्रामाण्यग्राहकत्ववदप्रामा ग्राहकत्वस्याप्यात्मनि सत्त्वादप्रामाण्यग्राहकत्वविशेषणेनैवात्मनो वारणं सम्भवतीत्याश यद्यपीति । इदम् = अप्रसिद्धिदानम् । समाधत्ते तथापीति । अतद्गुणसं ज्ञानवहुव्रीहिणा = आत्मा आदिर्यस्येत्येतद्गुणसंविज्ञानरूपो वहुव्रीहिस्तेनेत्यर्थः । शरी विशेषादेरपीति । सामान्यशरीरग्रहणे पुनरप्रसिद्धितादवस्थ्यं शरीरस्याप्रामाण्यग्रह ज्ञानाप्रामाण्यग्राहकत्वविशेषणेनैव तद्वारणसम्भवादतो विशेषणपदं यच्छरीरावच्छेदे प्रामाण्यग्रहो न जातस्तच्छरीरलाभार्थम्, तथाच यच्छरीरावच्छेदेनाप्रामाण्यग्रहो न ज शरीरमादायाप्रसिद्धिरिति भावः । यादृशात्मनि अप्रामाण्यग्रहो न जातस्तादृशा तमादायाप्यप्रसिद्धिस्सम्भवति इत्यतःशरीरविशेषादेरित्यत्रादिपदमात्मविशेषपरिग्रहाथ शरीरविशेषादेरप्रामाणिकत्वे आह अथवेति ।

केचित्तु शरीरविशेषादेरित्यत्रादिना इन्द्रियविशेषपरिग्रहः । यादृशात्मनि अप्रामा ग्रहो न जातस्तादृशात्मविशेषोपादानेनाप्यप्रसिद्धिसम्भवे इदमसङ्गतमित्यरुचेरथवा कल्प इत्याहुः । स्वयम् = दीधितिकारेण । भट्टमतसिद्धतयेति । प्रामाण्याग्राहकत्वेन च भट्टमतसिद्धं यत्तदन्यतया आत्मनः संग्रहादितिभावः । तद्विशेषणेन प्रामाण्याग्राहकत्वविशेषणेन । न व्यावृत्तिः । आत्मन इत्यनुवर्त्तते । घटत्वा प्रकारकज्ञानग्रहस्यापीति । तथाच सामग्रीपदानुपादाने घटत्वप्रकारकघटविशेष्य ज्ञानविषयकज्ञानजनकयत्किञ्चित्कारणीभूतं यद् आत्मशरीरेन्द्रियादि

(गा०) ज्ञानत्वे प्रसिद्ध्युपपादनेऽपि घटत्ववति घटत्वप्रकारकत्वादौ बाधवारणमशक्यमेवेति बोध्यम् ।

सामग्रीतीति । यद्यपि सामग्रीपदस्य यावत्कारणपरतया घटत्वादिप्रकारकज्ञानग्राहकयावत्कारणजन्यग्रहघटितसाध्यं पर्यवसितम्, तथाचाप्रसिद्धिः; कस्याप्यनुव्यवसायादेर्घटत्वादिप्रकारकव्यवसायग्राहकतत्तद्व्यवसायतत्तन्मनोयोगादिरूपनानाकारणव्यक्तिघटितसमुदायजन्यत्वासम्भवात्; सामग्रीपदेन प्रागभावमात्रोपादाने गुरुमिश्रयोर्मते ज्ञाततालिङ्गकानुमितेः शशविषाणायमानतया व्यवसायादिरूपज्ञानग्रहस्यैव प्राभाकरादिमते ज्ञाततालिङ्गकानुमितित्वेन भट्टाभिमानविषयतया तत्प्रागभावस्य ज्ञानग्राहकतया भट्टाभिमतत्वमिति व्यवसायादिरूपज्ञानग्रहस्य निर्वाच्यसाध्यघटकत्वानुपपत्तेः । नच व्यवसायादिप्रागभावे ज्ञाततालिङ्गकानुमितिप्रागभावत्वेन भट्टाभिमाने तत्र प्रामाण्यग्राहकत्वमपि तदभिमतमिति प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद् भट्टा-

---

(प्रभा) तिरिक्तमतेऽप्रसिद्धतया साध्याप्रसिद्धिः स्यात्, सामग्रीपदोपादाने तु केवलात्मनः केवलशरीरस्य केवलेन्द्रियादेश्च घटतुमशक्यत्वान्न साध्याप्रसिद्धिः । गुरुमते ज्ञानमात्रस्य त्रितयविषयकत्वेनात्मादिजन्ययावद्ग्रहविषयत्वस्यात्मनि आत्मत्वे च प्रसिद्धत्वाद् गुरुमतातिरिक्तमते इत्युक्तम् । ननु तादृशज्ञानग्राहकजन्यग्रहे ज्ञानत्वविशिष्टविषयकत्वं निवेशनीयं तथाच ज्ञानत्वेतदप्रसिद्धिरित्यत आह बाधवारणमशक्यमेवेति ।

अप्रसिद्धिरिति । घटत्ववति घटत्वप्रकारकज्ञानत्वाश्रयघटत्ववति घटत्वप्रकारकज्ञानग्रहत्वेन पुरुषकालाद्यननुगतसकलज्ञानसंग्रहेण तज्जनकयावत्कारणपदेन च तादृशज्ञानोत्पादकसकलकारणानां संग्रहे तज्जन्यस्यैकस्य कस्यचिद् ग्रहस्याप्रसिद्धेरिति । स्वाश्रयज्ञानविषयकयत्किञ्चिद्ग्रहजनकयावत्कारणजन्यग्रहेतिरीत्योपादाने तु तादृशयत्किञ्चिद्ग्रहवदेव संवादिप्रवृत्तिजनकत्वलिङ्गकानुमितिमादाय सिद्धसाधनापत्तेरतः स्वाश्रयज्ञानविषयकग्रहत्वावच्छिन्नजन्यतानिरूपितजनकतावन्ति यावन्ति तावज्जन्यग्रहेत्यादिरीत्य निवेशे सकलघटानुव्यवसायप्रयोजकमनोयोगादीनां संग्रहे तज्जन्यस्यैकस्य ग्रहस्याप्रसिद्धेरिति भावः । प्रागभावमात्रोपादाने इति । तथा च स्वाश्रयज्ञानग्राहकप्रागभावजन्यग्रहेत्यादिरीत्योपादाने इत्यर्थः । अयम्भावः, प्रागभावेन सह कार्यकारणभावः तदनुव्यवसायत्वेन तदनुव्यवसायप्रागभावत्वेनैकप्रागभावत्वस्याननुगतत्वात् । तथाच स्वाश्रयज्ञानग्राहकप्रागभावपदेन तदनुव्यवसायप्रागभावस्यैव धर्त्तव्यतया तज्जन्यग्रहस्य तदनुव्यवसायस्यैव प्रसिद्धतया नाप्रसिद्धिः । व्यवसायादिरूपज्ञानग्रहस्येति । आदिपदादनुव्यवसायपरिग्रहः । साध्यघटकतानुपपत्तेरिति । एवञ्च व्यवसायादिप्रागभावादेरेव ज्ञानग्राहकत्वेनाभिमततया वस्तुतो व्यवसायप्रागभावतया प्रामाण्याग्राहकत्वेन भट्टाभिमततया

(मा०) मिश्रमते तदन्यत्वं तत्राक्षतमेवेति तज्जन्यग्रहस्यापि प्राभाकरादीनां ...क्तेति वाच्यम् ? ज्ञाततालिङ्गकानुमितिप्रागभावत्वेन प्रामाण्यग्राह ...निविष्टस्यापि व्यवसायादिप्रागभावत्वेन तेषाम् प्रामाण्याग्राहक ...निविष्टतया व्यवसायादिप्रागभावस्य साध्यघटकभेदप्रतियोगित्वात्
यदि च एकरूपेण तदभ्युपगमोऽवश्यं विवक्षणीयः, ...
...रूपसामग्रीनिवेशे व्यवसायादिसामग्र्या ज्ञाततालिङ्गकानु...
...त्वेन ज्ञानग्राहकतया व्यवसायादिसामग्रीत्वेन प्रामाण्याग्राहक
...त्वात् तस्याः साध्यघटकत्वानुपपत्तेः; तथा च प्रागभावमात्रनिवे...
... इति विभाव्यते तथापि पाके ओदनकामकार्यताज्ञानविषयः पाक इत
...शाब्दबोधस्य गुरुमते शब्दानुपस्थाप्यौदनसाधनताज्ञानविषयत्वस्
...सामग्र्याः शब्दाजन्यतादृशयोग्यताज्ञानघटिततया ज्ञान
... भट्टमताऽसिद्धत्वसम्पादनं दीधितिकृतां

(प्र०) व्यवसायादिप्रागभावस्येति । आदिपदादनुव्यवसायपरिग्रहः । स्
...भेदप्रतियोगित्वात् = साध्यघटको हि ज्ञाततालिङ्गकानुमिति प्रागभावस्तद्भि...
... ...ज्ञानग्राहकप्रागभावपदे नज्ञाततालिङ्गकानुमिति प्रागभाव एव ...
... ...किन्तु गुरुमिश्रमतासंग्रह इति प्रद्योतितम् ।
यदि चैकरूपेणेति । येन रूपेण ज्ञानग्राहकत्वं तेन रूपेण प्रामाण्याग्राह...
...यः । तथाच तत्प्रामाण्यग्राहकतानवच्छेदकत्वेन ज्ञानग्राहकतावच्छेदक
... ... तद्भिन्नं यज्ज्ञानग्राहकतावच्छेदकं रूपं तद्रूपावच्छिन्नजनकतानिरूपित
... ...पर्यवसितम् । न दोष इति = नाप्रसिद्धिर्नापि साध्यघटकतानुप...
... = येन रूपेण ज्ञानग्राहकत्वं तेन रूपेण प्रामाण्याग्राहकत्वानिवेशे । भट्ट...
... ...सिद्धिरिति । अयम्भावः, गुरूणाम्मते पदादनुपस्थितस्याप्यर्थस्य योग्यता...
... ... योग्यत्वञ्चान्वयप्रयोजकरूपवत्त्वम्, तथाच घटेन जला...
... ... छिद्रेतरत्वं छिद्रघटे जलाहरणान्वयबाधात् इतियोग्यताब...
... ...जलमाहरेति वाक्यजबोधे छिद्रेतरत्वस्य भानं तथा ओदनक
... ... इति वाक्यजन्यशाब्दबोधे योग्यताबलादोदनसाधनताज्ञानविषयत
... ...ज्ञानविषयः पाकः ओदनकामपुरुषकार्यताज्ञानविषय इत्यन्वयबोधो ...
... । ओदनसाधनताज्ञानविषयत्वस्यैव पाके ओदनकामकर्त्तव्यताज्ञ...
... ..., किन्तु तादृशवाक्यजन्यशाब्दबोधे ओदनसाधनताज्ञानवि...
... ...साधनताज्ञानविषयत्वप्रकारकत्वरूपप्रामाण्याभानेन बाध इति बाधप्रदानाव...
... ... भट्टमतेन तत्प्रामाण्यग्रहाजनकत्वस्य कार्यताज्ञानग्रहाजनकत्व...
... ...ग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धत्वमेवेत्याशंक्य शब्दानुप...
... ...

(गा०) प्रागभावमात्रोपादाने विरुद्ध्येत तादृशशाब्दबोधस्य भट्टमतेऽपि कार्यताज्ञानविषयकतया तत्प्रागभावमात्रस्य ज्ञानग्राहकतया भट्टमतसिद्धत्वात् कथञ्चिदपि तद्भिन्नत्वानुपपत्तेः।

तथापि स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकतावच्छेदकरूपावच्छिन्नप्रयोज्योत्पत्तिकयावद्ग्रहविषयत्वरूपसाध्यविवक्षया नानुपपत्तिः। तत्तद्व्यवसायादिरूपज्ञानग्रहोत्पादप्रयोजकतावच्छेदकतत्तद्व्यक्त्युपधायककारणतावच्छिन्नसमुदायत्वावच्छिन्नतद्व्यक्तिसामग्रीप्रयोज्योत्पत्तिकत्वस्य ज्ञानग्रहात्मकतत्तद्व्यवसायादिष्वेव तत्तन्मते यथायथम् प्रसिद्धेः।

ननु घटत्वादिप्रकारकघटादिज्ञानग्राहकसामग्रीजन्यानां यावतां

(प्रभा) ग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वसम्पादनमिति भावः। प्रागभावमात्रोपादाने विरुद्ध्येत इति।

प्रागभावस्य साध्यघटकत्वे ओदनकामकार्यताज्ञानविषयः पाक इति वाक्यजन्यशाब्दबोधप्रागभावस्य भट्टेनाभ्युपगततया तादृशवाक्यजशाब्दबोधे ओदनसाधनताज्ञानविषयत्वघटितप्रामाण्याभावेन तत्प्रामाण्याग्राहकतया ओदनकर्तव्यताज्ञानग्राहकतया च तत्प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धत्वमेव नतु तद्भिन्नत्वमिति तद्भिन्नत्वसम्पादने विरोधः स्पष्ट एव। तत्प्रामाण्यग्राहकतानवच्छेदकत्वेन ज्ञानग्राहकतावच्छेदकत्वेन भट्टाभिमतं यद्रूपं तद्रूपभिन्नं यज्ज्ञानग्राहकतावच्छेदकं रूपं तद्रूपावच्छिन्नजनकतेत्यादिरीत्या निवेशेऽपि निरुक्तप्रागभावत्वं ओदनसाधनताज्ञानविषयत्वघटिततत्प्रामाण्यग्राहकतानवच्छेदकत्वेन कार्यताज्ञानग्राहकतावच्छेदकत्वेन भट्टाभिमतमेव नतु तद्भिन्नमिति निरुक्तरूपपदेन निरुक्तप्रागभावत्वरूपं नोपादातुं शक्यते इत्याशयः।

समाधत्ते तथापीति। स्वाश्रयेति। स्वं प्रमात्वम्। प्रयोजकतावच्छेदकरूपेति = प्रयोजकतावच्छेदकसमुदायत्वेत्यर्थः। तथाच स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकतावच्छेदकसमुदायत्वावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यतावदुत्पत्तिकयावद्ग्रहविषयत्वमेव मीमांसकमते साध्यम्। स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकतावच्छेदकीभूतं समुदायत्वं च तादृशयत्किञ्चिदेकग्रहप्रयोजककारणकलापगतसमुदायत्वमेव नतु ज्ञानान्तरप्रयोजकसमुदायत्वम्। एवञ्च तत्तज्ज्ञानोत्पत्तिप्रयोजकतावच्छेदकतत्तत्समुदायत्वमादायैव प्रमात्वे साध्यसत्त्वनिर्वाहः। अयं घट इत्याकारकघटत्वप्रकारकघटविशेष्यकज्ञानस्यैव कालपुरुषभेदेन तत्तद्घटरूपविशेष्यभेदेन च भिन्नत्वादेकज्ञानव्यक्तिविषयकग्रहनिरूपितविषयत्वस्य तज्ज्ञाने सत्त्वेऽप्यपरव्यक्तिविषयकग्रहनिरूपितविषयत्वस्य तत्रासत्त्वेन तादृशयावद्ग्रहविषयत्वं न

(दी०) ज्ञानव्यक्तिभेदानामुपादानात् तत्र ज्ञानत्वविशिष्टग्राहकत्वस्य [illegible]णाद् वा ज्ञानत्वे विधिप्रसिद्धिः ।

(गा०) तादृशज्ञानग्रहाणां विषयत्वं न तावत्तादृशज्ञाने सर्वमलसिद्धम्, तादृ[illegible] ज्ञानव्यक्तिग्रहे तादृशापरज्ञानव्यक्तेरविषयत्वात्; नापि ज्ञानत्वे, घटत्वप्रका[illegible] त्वमात्रेण तादृशज्ञानग्रहे नैयायिकादिनये ज्ञानत्वाभानादित्याशङ्काम् परिह[illegible] ज्ञानव्यक्तीति । तत्तद्व्यक्तित्वेन घटादिज्ञानव्यक्तीनां साध्येऽन्तर्भावनीय[illegible] दित्यर्थः । *तत्र* = तत्तज्ज्ञानव्यक्तौ । *विधिप्रसिद्धिरिति* । तत्तज्ज्ञानव्यक्तिग्राह[illegible] सामग्रीजन्ययावद्ग्रहविषयत्वरूपविधिकोटिप्रसिद्धिरित्यभिप्रेणान्वयः । [illegible] ज्ञानानां घटत्वादिप्रकारकघटादिज्ञानत्वेन निवेशेऽपि ज्ञानत्वे तत्प्रसिद्धि[illegible] पादयति *ज्ञानत्वविशिष्टेति* । ज्ञानग्राहकेत्यनेन ज्ञानत्वविशिष्टस्वाश्रयविषय ज्ञानजनकसामग्रीविवक्षणाद् वेत्यर्थः । *ज्ञानत्वइति* । केवलघटत्वादिप्रका[illegible] क[illegible]ण ज्ञानग्रहस्य ज्ञानत्वविशिष्टाविषयकत्वेन व्यावर्त्तनादिति भावः ।

यद्यपि प्रामाण्याग्राहकत्वेनेत्यादिविवक्षणे

(प्रभा) तादृशज्ञानग्रहाणाम् = घटत्ववति घटत्वप्रकारकज्ञानत्वाश्रयज्ञानग्राहकसामग्री[illegible] जन्ययावद्ग्रहाणामित्यर्थः । हेतुमाह तादृशैकज्ञानव्यक्तिग्रहे इति । निरूपितत्वं सप्त[illegible] म्यर्थः । घटत्ववति घटत्वप्रकारकैकज्ञानव्यक्तिविषयकग्रहनिरूपितेत्यर्थः तादृशापरज्ञानव्य क्तेरिति । निष्ठत्वं षष्ठ्यर्थः, घटत्वप्रकारकघटविशेष्यकज्ञानव्यक्तेरित्यर्थः ।

ननु ज्ञानव्यक्तीनामभेदेऽपि ज्ञानत्वस्य जातिरूपतया ऐक्येन तत्र घटत्ववति घटत्वप्र[illegible] कारकज्ञानत्वरूपप्रमात्वाश्रयज्ञानग्राहकसामग्रीजन्ययावद्ग्रहविषयत्वं प्रसिद्धमित्यत आ[illegible] नापि ज्ञानत्वे इति । अप्रसिद्धौ हेतुमाह घटत्वप्रकारकत्वमात्रेणेति । मात्रपदाज्ज्ञा[illegible] [illegible]नुभवः । तादृशज्ञानग्रहे = घटत्वप्रकारकघटविशेष्यकज्ञानग्रहे । घटत्वप्रकारकज्ञानत्व[illegible] [illegible]नुव्यवसाये तस्यापि यावद्ग्रहान्तर्गततया तद्विषयत्वस्य ज्ञानत्वेऽसत्त्वादिति भावः । नैयायिकादिनये । आदिपदान्मीमांसकपरिग्रहः । तत्तज्ज्ञानव्यक्तीति । तथाच स्वाश्रय-[illegible]विषयकग्रहजनकसामग्रीजन्ययावद्ग्रहविषयत्वं साध्यं पर्यवसितमिति [illegible] उभयमते साध्यप्रसिद्धिरिति भावः । तत्तद्व्यक्त्यनिवेशेऽपि उभयमते [illegible]प्रसिद्धिरित्याह ज्ञानत्वविशिष्टेति । तथाच स्वाश्रयज्ञानत्वविशिष्टविषयकज्ञानजनक-[illegible]सामग्रीजन्ययावद्ग्रहविषयत्वं साध्यम्पर्यवसितम् । तथाच ज्ञानत्वविशिष्टविषयको ग्रहो घटत्व-[illegible]ज्ञानवानहमित्याकारक एव, तद्विषयत्वस्य ज्ञानत्वे प्रसिद्धिरिति ।

[illegible]विशिष्टविषयकग्रहजनकत्वपर्यन्तमनिवेश्य स्वाश्रयज्ञानग्राहकसामग्रीतियथा-[illegible] ज्ञानत्वे विधिप्रसिद्धिसम्भवे ज्ञानत्वविशिष्टविषयकत्वानुधावनं [illegible] दूषयति यद्यपीत्यादिना । प्रामाण्याग्राहकत्वेने[illegible]

[illegible]

(गा०) तद्वति तत्प्रकारकज्ञानत्वाग्राहकत्वमेव तत्र निवेश्यम्, अन्यथा ज्ञानत्वविशिष्टग्राहकसामग्र्युपादानेऽपि तद्वति तत्प्रकारकगुणाभिन्नं ज्ञानमित्यादिशाब्दसामग्र्या तद्वति तत्प्रकारकज्ञानत्वरूपप्रामाण्याग्रहेण-बाधस्य[1] दुर्वारत्वात्; तथाच ज्ञानग्राहकपदेन ज्ञानत्वविशिष्टग्राहकत्वपर्यन्ताविवक्षणेऽपि ज्ञानत्वे प्रसिद्धिसम्भवः; तथापि यथाश्रुताभिप्रायेणेदम्।

(प्रभा) तज्ज्ञानप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धा या सामग्री तदन्या या सामग्रीत्यादिविवक्षणे इत्यर्थः। तद्वति तत्प्रकारकज्ञानत्वाग्राहकत्वमेवेति। अयं घट इत्यत्र घटत्ववति घटत्वप्रकारकज्ञानत्वाग्राहकत्वमेवेत्यर्थः। एवकारेण ज्ञानत्वरहिततद्वति तत्प्रकारकत्वमात्रव्यवच्छेदः। तत्र=सामग्र्यामित्यर्थः। निवेश्यमिति। तथाच तद्वति तत्प्रकारकज्ञानत्वाग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धभिन्ना या सामग्रीत्यादिरीत्यैव निवेश्यं नतु केवलम् तद्वति तत्प्रकारकत्वाग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वमितिभावः। अन्यथा=ज्ञानत्वम्परित्यज्य तद्वति तत्प्रकारकत्वाग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वमात्रस्य सामग्र्याम् प्रवेशे इत्यर्थः। शाब्दसामग्र्या इति। तृतीयार्थो जन्यत्वम् अग्रहेणेत्यन्वेति। जन्यत्वाभावेति पर्यवस्यति। बाधवारणायेति। अयम्भावः, ज्ञानत्वाघटितस्य निरुक्तभट्टमतसिद्धभिन्नत्वस्य सामग्र्यां निवेशे तद्वति तत्प्रकारकगुणाभिन्नं ज्ञानमित्यादिवाक्यजशाब्दसामग्र्या अपि तद्वति तत्प्रकारकत्वग्राहकतया तद्वति तत्प्रकारकत्वाग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वेन साध्यघटकतया निरुक्तवाक्यजशाब्दबोधस्यापि तादृशसामग्रीजन्ययावद्ग्रहान्तर्गततया तद्विषयत्वस्य च तद्वति तत्प्रकारकज्ञानत्वरूपप्रमात्वे विरहेण बाधस्यात्तद्वारणायेत्यर्थः। लक्षीभूतप्रमात्वस्य ज्ञानत्वघटितत्वं प्राङ्निरूपितमिति भावः। तथाच=तद्वति तत्प्रकारकज्ञानत्वाग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वेत्यादिरीत्या विवक्षणे चेत्यर्थः। ज्ञानत्वे प्रसिद्धिसम्भव इति। घटत्ववति घटत्वप्रकारकवानहमित्याद्यनुव्यवसायसामग्र्या ज्ञानत्वाग्राहकतया तद्वति तत्प्रकारकज्ञानत्वाग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धत्वमेवेति तद्भिन्नत्वविरहेण निरुक्तसामग्री न साध्यघटिका किन्तु घटत्ववति घटत्वप्रकारकज्ञानवानहमित्यनुव्यवसायसामग्र्येव, तज्जन्यग्रहविषयत्वस्य च ज्ञानत्वे सत्त्वेन ज्ञानत्वे प्रसिद्धिरिति भावः। समाधत्ते तथापीति। यथाश्रुताभिप्रायेणेति=तदप्रामाण्याग्राहकेतिमूलोक्ताभिप्रायेणेत्यर्थः।

१—तद्वति तत्प्रकारकज्ञानत्वरूपप्रामाण्यस्य पक्षत्वे एव बाधो नतु तद्वति प्रकारकत्वमात्रस्य तथात्वे। अत्रेदमवगन्तव्यम्, इच्छादिवृत्ति घटत्वप्रकारकत्वादेरिच्छादिग्राह्यत्वाद बाधवारणाय [illegible]

...) अन्यथा शाब्दबोधादिसामग्रीविशेषैः प्रामाण्याग्रहेण बाधप्रसंगस्य व ... तादृशसामग्रीव्यावर्तककथितविशेषणोपादाने तावतैव घटत्वादिरूपप्र... प्रामाण्यघटकप्रकारकत्वत्वेन ज्ञानविषयकग्रहवारणे विना प्रयासं घटत्व ... विधिप्रसिद्धिसम्भवात् ज्ञानत्वे , तत्प्रसिद्धिसम्पादकप्रयासवैफल्यापि ... नानुपपत्तिः ।

वस्तुतस्तु तद्वति तत्प्रकारकज्ञानत्वत्वेन पक्षत्वं न विचारसह ... ज्ञानत्वत्वस्य स्वतोऽग्राह्यतया तादृशप्रामाण्यत्वविशिष्टस्य स्वतोग्राह्यत्वसा...

(...) अन्यथा—यथाश्रुतार्थं परित्यज्य तद्वति तत्प्रकारकज्ञ... ...त्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वमिति रीत्या निवेशे । शाब्दबोधा ... सामग्रीविशेषैः = घटत्वप्रकारकं ज्ञानं सविशेष्यकमितिशाब्दबोधसामग्रीविशेषैरित्यर्थः । प्रामाण्याग्रहेणेति = निरुक्तशाब्दबोधे प्रमात्वाभानेनेत्यर्थः । तादृशसामग्रीव्यावर्त्त ... कथितविशेषणोपादाने इति । घटत्वप्रकारकं ज्ञानं सविशेष्यकमित्याकारकशाब्दबो ... सामग्रीव्यावर्त्तकं यत्कथितविशेषणं तद्वति तत्प्रकारकज्ञानत्वाग्राहकत्वेन ज्ञानग्राहकत्वे भट्टमतसिद्धभिन्नत्वरूपं तदुपादाने इत्यर्थः । तावतैव = तादृशविशेषणेन । घटत्वा ... प्रकृतप्रामाण्यघटकप्रकारकत्वेनेति = घटत्वादिरूपं यत्प्रकृतप्रमात्वघटकं तत्प्रकारकत ... इत्यर्थः । ज्ञानविषयकग्रहवारणे = घटत्वप्रकारकोऽहमित्याद्यनुव्यवसायवारणे । विन ... प्रयासम् ज्ञानत्वविशिष्टेत्यादिप्रयासं विनेत्यर्थः ।

ज्ञानत्वे विधिप्रसिद्धिसम्भवात् इति दीधितिः । ननु घटं जानामीत्यादिज्ञा ... नानां प्रथमज्ञानविषयविषयकत्वम् आवश्यकम् , अत एव विषयनिरूप्यं हि ज्ञानम ... ज्ञानवित्तिवेद्यो विषय इति मणिकृता वक्ष्यते, एवञ्च घटत्वादावेव विधिप्रसिद्ध्या उक्त ... प्रयासेन ज्ञानत्वादौ विधिप्रसिद्ध्युपपादनं दीधितिकृतामनुचितमिति चेन्न, पुरोवर्त्तिविशेष्यत्व ... त्वावच्छेदेनैव यावत्त्वाश्रयग्राहकसामग्रीग्राह्यत्वरूपस्वतस्त्वसाधनेन घटत्वप्रकारकवानहमित्य ... दिज्ञानानामपि यावदन्तर्गततया तद्विषयत्वस्य घटत्ववद्विशेष्यकत्वावच्छेदेन तथाऽग्रहात् ।

विना प्रयासम् = ज्ञानत्वविशिष्टग्राहकत्वरूपप्रयासं विनेत्यर्थः । घटत्वादौ विधि ... प्रसिद्धिसम्भवादिति । घटत्वप्रकारकज्ञानवानहमित्यादिज्ञानानां तद्वति तत्प्रकारकज्ञान ... ग्राहकतया तद्वतितत् प्रकारकज्ञानत्वाग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वविशेषणे ... नैव तावतैव घटत्ववति घटत्वप्रकारकज्ञानवानहमित्यादिज्ञानानामेव साध्यघटकतया पुरोवर्त्ति ... विशेष्यकत्वावच्छेदेन यावत्त्वाश्रयज्ञानग्राहकसामग्रीग्राह्यत्वस्य घटत्वादौ प्रसिद्धेरितिभावः ... नन्वेवं तद्प्रामाण्याग्राहकेतियथाश्रुतार्थंपरित्यज्य शाब्दसामग्रीव्यावर्त्तकतद्वति तत्प्रकारक ... ज्ञानत्वाग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वविशेषणोपादाने ज्ञानत्वविशिष्टग्रा ... हकत्वाविवक्षणेऽपि ज्ञानत्वे घटत्वे वा विधिप्रसिद्धिसम्भवे दीधितिकृतां ज्ञानत्वविशिष्टे ... त्यादिलक्षणस्यानवधानमूलकत्वप्रसङ्ग इत्याशङ्क्य दीधिकृन्न्यूनतावारणाय तदाशयं दश ... यति वस्तुतस्त्विति ।

(दी०) इदं ज्ञानमप्रमा इति . ज्ञानग्राहकेण

(गा०) बाधात् ; अतः तद्वति तत्प्रकारकत्वत्वस्यैव पक्षतावच्छेदकत्वं स्वीकरणीयम्, तथाच तद्रूपावच्छिन्नाग्राहकत्वमेव प्रामाण्याग्राहकत्वेनेत्यत्र विवक्षणीयम् , एवञ्च ज्ञानत्वविशिष्टग्राहकत्वविवक्षयैव ज्ञानत्वे विधिकोटिप्रसिद्धिः

नच 'प्रामाण्यपदस्य तद्वति तत्प्रकारकत्वमात्रार्थकत्वे यथाश्रुतपरित्यागाद् दोषः, प्रामाण्यपदेन तद्वति तत्प्रकारकज्ञानेतरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वे सति तद्वति तत्प्रकारकज्ञाननिष्ठभेदप्रतियोगितानवच्छेदकत्वेन तद्वति तत्प्रकारकज्ञानत्वरूपप्रकृत्यर्थतावच्छेदकबोधनादिति वाच्यम् ? अगत्या यथाश्रुतार्थपरित्यागात् । *प्रमाण्याग्राहकत्वेनेत्यत्र* च ज्ञानत्वघटितप्रामाण्यग्राहकत्वं प्रतियोगितया विवक्षितमित्यत्रैव *ज्ञानत्वविशिष्टस्य विवक्षणात्* इत्यस्य तात्पर्यमित्यप्याहुः ।

इति ज्ञानग्राहकेण = इत्याकारकज्ञानग्रहजनकसामग्र्या। अप्रामाण्यपदस्य

(प्रभा) बाधात् = ज्ञानत्वस्य जातिरूपतयाऽनुव्यवसायादावनुल्लिख्यमानत्वेन स्वरूपतो भासमानतया तादृशज्ञानत्वत्वविशिष्टे निरुक्तस्वतोग्राह्यत्वाभावेन बाधादित्यर्थः । तद्वति तत्प्रकारकत्वस्य जात्यखण्डोपाध्यतिरिक्तपदार्थतया तद्वति तत्प्रकारकत्वत्वेन भानान्न बाधावकाश इति भावः । अथ तादृशप्रामाण्यत्वविशिष्टं प्रामाण्यत्वाश्रयमेवेति कथमेतत् ? अनुव्यवसायादौ स्वरूपतो ज्ञानत्वभानेन तत्र स्वतो ग्राह्यत्वानपायात् अनुमानात्पक्षतावच्छेदके साध्यसिद्धेर्दूषितत्वादिति चेन्न, तद्वति तत्प्रकारकत्वविशिष्टजातिप्रतियोगिकविषयितासाधारणरूपेणापि प्रामाण्यविषयितायास्तादृशग्राहकत्वव्यापकतासम्भवादर्थान्तरस्य पटत्वप्रकारकज्ञानत्वविषयित्वे अनुव्यवसायादिसामग्रीजन्यग्रहत्वाव्यापकत्वात् सिद्धसाधनस्य च वारणाय प्रामाण्यत्वावच्छिन्नग्राह्यत्वं विवक्षणीयम् । तथाच तत्र बाधभयेन ज्ञानत्वं न प्रवेश्यमित्याशयात् । तथाच = निरुक्ततत्प्रकारकत्वत्वेन पक्षत्वे चेत्यर्थः । तद्रूपावच्छिन्नाग्राहकत्वमेवेति = तद्वति तत्प्रकारकत्वत्वावच्छिन्नाग्राहकत्वमेवेत्यर्थः । एवकारेण तद्वति तत्प्रकारकज्ञानत्वत्वावच्छिन्नाग्राहकत्वव्युदासः ।

शङ्कते नचेति । यथाश्रुतेति = शक्यार्थपरित्यागादिति भावः । दोष इति । वादिवाक्ये लक्षणानाश्रयणसिद्धान्तात् निग्रहस्थानमिति भावः । उत्तरयति अगत्येति । कस्यचिन्मतमाह प्रामाण्याग्राहकत्वेनेति । तत्प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वमिति दीधितावित्यर्थः । आहुरित्यनेनास्वरस उद्धारत्वापत्त्या सूचितः ।

इत्याकारकेति । तथाच तदप्रामाण्याग्राहकत्वस्य सामग्र्यामविशेषणत्वे इदं ज्ञानमप्रमा इत्याकारकज्ञानग्राहकसामग्र्या अपि साध्यघटकतया तज्जन्यस्य तादृशग्रहस्य यावद्ग्रहान्तर्गततया तद्विषयत्वस्य च प्रमात्वेऽसत्त्वेन बाधस्स्यादिति तद्वारणाय

(दी०) प्रामाण्यग्रहाद् बाधवारणाय¹ अप्रामाण्यग्राहकेति । अप्रामा
[illegible]विरोधि ।

(प्रका०) भ्रमत्वार्थकत्वे प्रमात्वाभावार्थकत्वे च भ्रमत्वग्राहकेण प्रमाण्याग्र
बाध इति तदुभयमनुगमयति अप्रामाण्यमिति । प्रामाण्यविरोधित्वम् तत्त
त्प्रामाण्यावच्छेदकावच्छेदेन तद्वद्वृत्तिभिन्नत्वम् । घटत्वादिना घटपटादिविषय
[illegible] अंशभेदेन घटत्वादिप्रमात्वतदभावादिसत्त्वात् तदभाव
नामपि तद्विरोधित्वानुपपत्तिरिति

(प्रभा) [illegible]ज्ञानम् प्रमात्वाभाववत् इत्याकारकज्ञानग्राहकसामग्रीमादाय बाधःस्यात् । यदि
प्रमात्वाभावरूपेणैव गृह्यते तर्हि इदं ज्ञानं भ्रमः इत्याकारकभ्रमग्राहकसामग्रीम
[illegible] भ्रमत्वप्रमात्वयोरेकरूपेण निवेशार्थमाह दीधितौ अप्रामाण्यम् प्रामा
विरोधीति । तथाच तत्प्रामाण्यविरोध्यग्राहिका स्वाश्रयज्ञानग्राहिका या सा
[illegible] साध्यम् पर्यवसितम् । विरोधित्वं द्विविधम् सहानवस्थानलक्ष
[illegible]प्रतिबध्यकज्ञानविषयत्वरूपं च । तत्र प्रतिबन्धकताघटितविरोधित्वस्यानुपदमेव निरा
[illegible] सहानवस्थानलक्षणं विरोधित्वमाह तत्प्रामाण्यावच्छेदकावच्छेदेने'
[illegible] तद्वद्विशेष्यकत्वे सति घटत्वप्रकारकत्वविशिष्टज्ञानत्वम् तदवच्छे
[illegible] तदवच्छेदेनेत्यर्थः । वृत्तावस्यान्वयः । तद्वद्वृत्तिभिन्नत्वम्
[illegible]भिन्नत्वम् । अत्यन्ताभावस्य अव्याप्यवृत्तितया भेदघटितं विरोधि
[illegible] प्रमात्वविरोधित्वापत्तिः, तत्रापि अवच्छेदकभेदेन वृत्तित्वाभा
[illegible] । तथाच तत्प्रामाण्यावच्छेदकावच्छेदेन तद्वद्वृत्ति यद् यत् तदन्यत्वमिति फलि
[illegible] तेन भेदस्य अव्याप्यवृत्तित्वपक्षेऽपि नाप्रसिद्धिः । ईदृशं च प्रमात्वविरो
[illegible] जानामीति तत्प्रकारकग्रहजनकसामग्र्याः संग्रहः । तत्प्रामाण्यावच्छेदकाव
[illegible] घटत्वादिनेति । घटपटादिविषयकज्ञानेति । यत्र घटप
[illegible] इति ज्ञानम् तत्रेत्यर्थः । तदभावादीनामपि = प्रमात्वाभावादीनाम
[illegible] । तद्विरोधित्वानुपपत्तेरिति = प्रामाण्यविरोधित्वानुपप
[illegible] प्रामाण्यावच्छेदकावच्छेदेनेत्यनुक्तौ घटत्वेन घटपटोभयावगाहि
[illegible] तत्र प्रमात्वाभावस्य प्रामाण्यवति निरुक्तज्ञाने वर्त्तमानतया तत्र प्रमात्ववद्
[illegible] तादृशाप्रामाण्ये प्रामाण्यविरोधित्वं न स्यात् । एवंच घटत्वेन घटपटो
[illegible] यो ग्रहः घटावहं जानामीत्याकारकः तज्जनकसामग्र्यपि यावदन्तः
[illegible]ग्राहकत्वाद् ज्ञानग्राहकत्वाच्च, किन्तु तादृशसामग्रीजन्यग्रहविषयत्वस्य प्रा

---

१ दीधितौ बाधवारणायेति — इदमुपलक्षणम्, इदं रजतमिति ज्ञानं रजतत्व

(गा०) अंशैक्योपादानम् । व्याप्यवृत्तेरवच्छेदकानभ्युपगमे ज्ञानत्व प्रामाण्यविरोधित्ववारणाय प्रमात्वावच्छेदकानवच्छिन्नत्वावच्छिन्नः भयाभाववत्प्रमानिष्ठाधिकरणताकान्यत्वम् प्रमात्वविरोधित्वं वक्तव्यम् ।

(प्रभा) वि(रहे)ण बाधस्स्यादिति भावः । अंशैक्योपादानमिति — तत्प्रामाण्यावच्छेदक च्छेदेनेत्यस्योपादानमित्यर्थः । तदुपादाने तु तादृशाप्रमात्वस्य संग्रहस्स्यात्, घटत्ववद्विशे कत्वावच्छेदेन घटत्वाभाववति घटत्वप्रकारकत्वरूपतादृशाप्रामाण्यस्य तादृशघटत्वेन घट विषयकज्ञानेऽसत्त्वात् इति । ननु ज्ञानत्वस्य व्याप्यवृत्तितया तदवच्छेदकाप्रसिद्धया प्रमात्वः तस्य प्रामाण्यावच्छेदकावच्छेदेनावर्त्तमानत्वात् प्रामाण्यविरोधित्वापत्तिस्स्यात्, तथ ज्ञानग्राहकसामग्रीमात्रस्यैव ज्ञानत्वग्राहकतया तस्य प्रामाण्यविरोध्यग्राहकत्वासम्भ साध्याप्रसिद्धिस्स्यात् अत आह व्याप्यवृत्तेरवच्छेदकानभ्युपगम इति । प्रमात्वावच्छे दकानवच्छिन्नत्वेति । प्रमात्वावच्छेदकानवच्छिन्नत्व-अवच्छिन्नत्वोभयाभाववती प्रमानि यद्यद्व्यक्तिनिरूपिताधिकरणता तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वम् प्रमा विरोधित्वमिति पर्यवसितम्, तथा च ज्ञानत्वनिरूपितप्रमानिष्ठाधिकरणतायां व्याप्यवृत्तित प्रमात्वावच्छेदकीभूतघटत्ववद्विशेष्यकत्वाद्यनवच्छिन्नत्वसत्त्वेऽपि अवच्छिन्नत्वविरहेणोभ भाववत्त्वस्य सत्त्वात् यद्व्यक्तिपदेन ज्ञानत्वस्य धर्त्तुमशक्यतया तद्भेदस्य च तत्र विर न तस्य प्रमात्वविरोधित्वम् । एवं घटत्वेन घटपटविषयकज्ञानरूपप्रमानिष्ठायां घटत्वाभ वद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रमात्वाभावाधिकरणतायां प्रमात्वावच्छेद भूतघटत्ववद्विशेष्यकत्वानवच्छिन्नत्वपटत्ववद्विशेष्यकत्वावच्छिन्नत्वरूपावच्छिन्नत्वोभयोस्सत यन्निरूपिताधिकरणतापदेन प्रमात्वाभावनिरूपिताधिकरणता न धर्त्तुं शक्यते किन्तु ज्ञान निरूपिताधिकरणतैव, तदन्यत्वस्य च तादृशघटत्वाभाववद्विशेष्यकत्वावच्छिन्नघटत्वप्रक कत्वरूपाप्रमात्वे सत्त्वेन तादृशाप्रमात्वस्य प्रमात्वविरोधित्वोपपत्तिः । घटत्वपटत्वादेरधि रणतायाः प्रामाण्येऽसत्त्वात् तत्रापि तद्भिन्नत्वसत्त्वेन तेषाम् प्रामाण्यविरोधित्वोपपत्ति अन्यतराभावनिवेशेऽसम्भवः, कस्यापि वस्तुनः प्रमानिष्ठाधिकरणतायामन्यतराभावस्यासत्त्व दिति ध्येयम् । प्रमात्वावच्छेदकानवच्छिन्नत्वाभावमात्रनिवेशे ज्ञानत्वादेः प्रमात्वविरोधित्वापत्ति प्रमात्वावच्छेदकानवच्छिन्नत्वाभावस्य प्रमानिष्ठायां ज्ञानत्वाधिकरणतायामसत्त्वात् यत्पदे ज्ञानत्वं नोपादातुं शक्यते किन्तु घटत्ववति घटत्वप्रकारकत्वमेव, तद्भिन्नत्वस्य च ज्ञान सत्त्वात् । अवच्छिन्नत्वाभावमात्रनिवेशे घटत्ववति घटत्वप्रकारकत्वरूपप्रमात्वस्या प्रमात्वविरोधित्वापत्तिः, प्रमानिष्ठायान्तदधिकरणतायां अवच्छिन्नत्वाभावस्यासत्त्वात तादृशावच्छिन्नत्वाभाववत्प्रमानिष्ठयदधिकरणतापदेन ज्ञानत्वाधिकरणताया धर्त्तव्यतया तदन्यत्वस्य प्रमात्वे सत्त्वात् । प्रमापदानुपादाने सर्वांशे भ्रमात्मकज्ञानवृ भ्रमत्वाधिकरणतायामवच्छिन्नत्वानङ्गीकारात् तदुभयाभाववदधिकरणतानिरूपकत्वे तादृशभ्रमत्वस्य प्रामाण्यविरोधित्वानुपपत्तिरतस्तदुपादानम् । इत्थं च आंशिकभ्रमप्रमात्म

(गा०) यत्तु प्रमात्वग्रहप्रतिबन्धकीभूतग्रहविषयत्वं तद्विरोधित्व भ्रमत्वघटत्वादिग्रहस्य प्रमात्वग्रहे ग्राह्याभावावच्छेदकधर्मदर्शनादिविध प्रतिबन्धकत्वात् भ्रमत्वघटत्वादीनां प्रमात्वविरोधितेति तदसत्, पुरोवर्त्तिवि धकत्वावच्छेदेन प्रमात्वाभावग्रहदशायां तद्धर्मज्ञानस्यापि प्रमात्वग्रहप्रति बन्धकतया तेषामपि प्रमात्वविरोधितया प्रामाण्यग्रहसामग्र्या

(प्रभा) निष्ठाधिकरणताकत्वमेवोच्यतां किमन्द्वयोपादानेनेति वाच्यम् ? घटत्वादेः प्रमा विरोधित्वरक्षार्थन्तदावश्यकत्वात्। प्रमात्वावच्छेदकानवच्छिन्नत्वविशिष्टावच्छिन्नत्वाभाव लाघवात् कुतो नोक्त इति चेत् न, विशिष्टाभावस्य विशेषणाभावस्वरूपतामते तादृशविशि ष्टाभावस्य केवलप्रमात्वावच्छेदकानवच्छिन्नत्वाभावरूपतया तादृशाभावस्य ज्ञानत्वाधिकरणता सत्त्वात् ज्ञानत्वस्य प्रमात्वविरोधित्वापत्तेः। उभयाभावस्य अखण्डभेदघटकतया वैयर्थ्या भावाच्चेति दिक्।

पक्षधरमिश्रमतं निराचिकीर्षुराह यत्तु इति। प्रमात्वग्रहेति = प्रमात्वविषय यो ग्रहः इदं ज्ञानं प्रमेत्याकारकस्तन्निष्ठप्रतिवध्यतानिरूपितप्रतिबन्धकताशालिग्रहप्रकार मित्यर्थः। प्रमात्वविषयकग्रहत्वव्यापकप्रतिवध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतविषय मिति यावत्। तद्विरोधित्वमिति = प्रमात्वविरोधित्वमित्यर्थः। नन्वेवं तद्वत्ताबुद्धिम्प्र तदभाववत्तानिश्चयस्यैव प्रतिबन्धकतया भ्रमत्वस्य घटत्वादेश्च प्रमात्वविरोधित्वं न स्य प्रमात्वग्रहप्रतिबन्धकग्रहविषयत्वाभावात् प्रमात्वाभावबुद्धौ प्रमात्वाभावनिश्चयस् विरोधित्वात् मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वे मानाभावात्, एवञ्च प्रमात्वविरोध्यग्राह सामग्रीपदेन भ्रमत्वग्राहकसामग्र्या अपि धर्त्तुं शक्यतया साध्यान्तर्गततत्त्वेन तज्जन्यग्रह सत्त्वस्य प्रमात्वे विरहाद्बाधो दुर्वार उत्तरग्रन्थासङ्गतिश्चेत्यत आह भ्रमत्वघटत्वादि ग्रहस्येति। इदं ज्ञानम्भ्रम इत्यादिग्रहस्येत्यर्थः। ग्राह्याभावावच्छेदकधर्मदर्शनादिविधया प्रति बन्धकत्वादिति = भ्रमत्ववत्प्रमात्वाभाववत् भ्रमत्ववच्चेदं ज्ञानम् एवं घटत्ववत्प्रमात्वा भाववत् घटत्ववच्चेदं ज्ञानमित्यादिज्ञानानां निश्चयविशिष्टनिश्चयत्वेन प्रतिबन्धकत्वादित्यर्थ भ्रमत्वघटत्वादीनां प्रमात्वविरोधितेति। भ्रमत्वस्य विरोधित्वे न बाधः घटत्वस्य वि रोधित्वसम्पादने न दीधितिकृदुक्तग्रन्थासङ्गतिःविषयत्वेन निरुक्तप्रमात्वविरोधित्वनिर्वा ज्ञानत्ववत्प्रमात्वाभाववत् ज्ञानववच्चेदं ज्ञानत्वम् एवं पुरोवर्त्तिविशेष्यकत्ववत्प्रमात्वाभावव पुरोवर्त्तिविशेष्यकत्ववच्चेदं ज्ञानमिति प्रतिबन्धकज्ञानत्वपुरोवर्त्तिविशेष्यकत्वादेरपि प्रमात्व विरोधित्वापत्त्या साध्याप्रसिद्धिरित्याशयेनाह तदसदिति। पुरोवर्त्तिविशेष्यक त्वावच्छेदेनेति। ज्ञानत्वावच्छेदेन पुरोवर्त्तिविशेष्यकत्वावच्छेदेनेत्यर्थः। प्रमात्वाभा वग्रहदशायामिति = ज्ञानत्ववत् प्रमात्वाभाववत् पुरोवर्त्तिविशेष्यकत्ववत् प्रमात्वाभा ववदिति निश्चयकालिकस्येत्यर्थः। तद्धर्मज्ञानस्यापीति = ज्ञानत्वपुरोवर्त्तिविशेष्यकत्वप्रक ारकज्ञानस्यापीत्यर्थः। ज्ञानत्ववदिदं पुरोवर्त्तिविशेष्यकत्ववदिदं ज्ञानमिति ज्ञानस्यापी त्यर्थः। तेषामपि = ज्ञानत्वपुरोवर्त्तिविशेष्यकत्वादीनामपि। प्रमात्वविरोधितया

(मा०) विरोध्यग्राहकत्वस्य दुर्घटत्वात् । नच भवन्मते ज्ञानत्वादिधर्माणां प्रामाण्याविरोधितया तदवच्छेदेन तद्वति तत्प्रकारकत्वाद्यभावग्रहदशायां विरोध्यग्राहिकया ज्ञानत्वादिग्राहकसामग्र्या. प्रामाण्याग्रहाद् बाधवारणमशक्यम्; यदि च प्रामाण्यस्य लौकिकप्रत्यक्षमङ्गीकुर्वताम् तदापि लौकिकप्रामाण्यभानमुपपद्यत एव अवच्छेदकधर्मदर्शनादेर्लौकिकप्रत्यक्षाविरोधित्वात्, मिश्रातिरिक्तमीमांसकमते प्रामाण्यभानस्य लौकिकसन्निकर्षघटितसामग्र्यधीनत्वेऽपि तादृशसामग्रीतुल्यप्रामाण्यभासकसामग्र्यधीनतद्भानस्य

(प्रभा) विरोध्यग्राहकत्वस्येति । प्रामाण्यविरोधिप्रकारकग्रहाजनकत्वस्येत्यर्थः । **दुर्घटत्वादिति** = अप्रसिद्धेरित्यर्थः । तथाच साध्याप्रसिद्धिरेव स्यादिति भावः । सिद्धान्तिमतेऽपि बाधमाशंक्य निराचष्टे **नचेत्यादिना** । **भवन्मतेइति** । प्रमात्वावच्छेदकानवच्छिन्नत्व-अवच्छिन्नत्व-उभयाभाववत्प्रमानिष्ठाधिकरणताकान्यत्वरूपप्रमात्वविरोधित्ववाधमते इत्यर्थः । **ज्ञानत्वादिधर्माणामिति** । आदिपदात् पुरोवर्त्तिविशेष्यकत्वपरिग्रहः । **प्रामाण्याविरोधितयेति** । व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन निरुक्तप्रमानिष्ठाधिकरणतेतिभावः । **तदवच्छेदेनेति** । ज्ञानत्वपुरोवर्त्तिविशेष्यकत्वावच्छेदेनेत्यर्थः । **तद्वति तत्प्रकारकत्वादीति** । ज्ञानत्ववत्प्रमात्वाभाववत्पुरोवर्त्तिविशेष्यकत्ववत्प्रमात्वाभाववदितिग्रहदशायामित्यर्थः । **विरोध्यग्राहिकयेति** = प्रमात्वविरोध्यग्राहिकयेत्यर्थः । अनेन तादृशसामग्र्याः साध्यघटकत्वं सूचितम् । **ज्ञानत्वादिग्राहकसामग्र्या इति** = प्रमात्वाश्रयज्ञानग्राहकसामग्र्या इत्यर्थः । **प्रामाण्याग्रहादिति** = प्रामाण्यविषयकग्रहाभावादित्यर्थः । तादृशसामग्रीजन्यग्रहविषयत्वस्य प्रामाण्येऽभावादिति यावत् । **बाधवारणमशक्यमिति** । अयम्भावः, साध्यतावच्छेदककोटौ प्रमात्वाश्रयज्ञाने ज्ञानत्वविशिष्टत्वविशेषणसत्त्वेन ज्ञानत्ववदिदमितिनिश्चयसंवलनमावश्यकम् । एवञ्चज्ञानत्ववत् प्रमात्वाभाववत् इतिनिश्चयविशिष्टज्ञानत्ववदिदमितिनिश्चयलीना या ज्ञानत्वग्राहिका सामग्री साऽपि साध्यान्तर्गता ज्ञानत्वादेः प्रामाण्याविरोधित्वात् किन्तु तादृशसामग्रीजन्यग्रहविषयत्वस्य प्रामाण्ये विरहाद् बाध इति ध्येयम् ।

ननु तदभावावच्छेदकतया गृहीतधर्मवत्ताबुद्धिर्लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धिंप्रत्येव विरोधिनीति सिद्धान्तेन प्रमात्वस्य लौकिकप्रत्यक्षाङ्गीकारेण तादृशावच्छेदकधर्मदर्शनकालेऽपि तादृशसामग्रीजन्यग्रहविषयत्वस्य तत्र सत्त्वेन बाधविरहात् प्रामाण्यविरोधित्वनिवेशनमफलमित्याशयेनाह **यदि चेति** । **तदापीति** = निरुक्तनिश्चयविशिष्टनिश्चयसत्त्वेऽपि । **उपपद्यत इति** । ज्ञानत्वादिग्राहकसामग्र्या इत्यादिः । तथाच तादृशसामग्रीजन्यज्ञानविषयत्वस्य प्रामाण्ये सत्त्वान्न बाध इति भावः । **अवच्छेदकधर्मदर्शनादेरिति** = निश्चयविशिष्टनिश्चयस्येत्यर्थः । **लौकिकप्रत्यक्षाविरोधित्वादिति** = तद-

[illegible]

(ना०) लौकिकभानतुल्यतया अवच्छेदकधर्मदर्शनाप्रतिबध्यत्वेन तन्म
तथाप्रामाण्यभानोपपत्तिरित्युच्यते; तदा भ्रमत्वग्रहकालेऽपि अनुव्यवस
देःप्रामाण्यावगाहित्वसम्भवात् तद्ग्राहकत्वनिवेशनमफलमिति याच्य
भ्रमसामग्रीसत्त्वे भ्रमविषयनिष्ठासाधारणधर्मविशेषाणां लौकिकं इ
मपि नोत्पद्यते, शंखःपीत इत्याद्यारोपदशायां श्वैत्याद्यग्रहात्, अतःप्रमा
प्रमात्वविरोधिभ्रमत्वाद्यारोपसामग्रीदशायाम् अनुव्यवसायादिना प्रम
ग्रहासम्भवेन भ्रमत्वाद्यग्राहकत्वनिवेशस्यावश्यकत्वात्।

(प्रभा) घटितसामग्र्यप्रयोज्यत्वेऽपीत्यर्थः। प्रामाण्यांशे इत्यादिः। गुरुमते ज्ञानस्य
ण्यादेश्च स्वयम् प्रकाशमानत्वाद् भट्टमते ज्ञाततालिङ्गकानुमितिसामग्रीप्रयोज्यत्वादिति भ
लौकिकभानतुल्यतयेति। प्रमात्वनिष्ठलौकिकविषयतातुल्यतयेत्यर्थः। यादृशस्थले
ण्यस्य मिश्राणां भानमभानं वा तादृशस्थले गुरूणां भट्टानां च भानाभाने यादृशं च
जकम् लौकिकप्रामाण्यविषयित्वे मिश्रैरुपेयम् गुरुभट्टाभ्यामपि तत्समं तत्र प्रयोजकमु
अन्यथा फलसाम्यानुपपत्तेः। तन्मतेऽपि = गुरुभट्टमतेऽपीत्यर्थः। तथा = पूर्वोक्तदि
तदा = प्रमात्वस्य लौकिकप्रत्यक्षं स्वीकृत्य तादृशविरोधिनिश्चयकालेऽपि प्रमात्व
स्वीकारे इत्यर्थः।

अफलमिति = बाधविरहादिति भावः। यदि चेत्यादिनोक्तं अफलत्वं
चिकीर्षुः तदप्रामाण्याग्राहकत्वस्य फलमाह भ्रमसामग्रीसत्त्वे इति। भ्रमविषयनिष्ठ
रणधर्मविशेषाणामिति। भ्रमविशेष्यीभूतं यत् इदं रजतमिति ज्ञानम् तन्निष्ठो
साधारणधर्मः प्रामाण्यम् तद्विशेषाणामित्यर्थः। नोत्पद्यत इति। तथाचानुभावानुरोध
तादृशासाधारणधर्मविशेषप्रकारकलौकिकज्ञानम्प्रत्यपि दोषघटितसामग्र्याः दोषस्य वा
त्वं स्वीकार्यमिति भावः। अतः = लौकिकज्ञानानुत्पादात्। प्रमायाम् = अयं
इति प्रमात्मकज्ञाने इत्यर्थः। प्रमात्ववि···सामग्रीदशायामिति। अयंघटःइतिप्रमाय
भ्रमत्वारोपःअयं घट इति ज्ञानं भ्रम इत्याकारकःतत्सामग्रीदशायामित्यर्थः। आदिपदात् त
वत्त्वाभाववन्निश्चयपरिग्रहः। प्रमात्वाभावव्याप्यज्ञानत्ववदिदम् इत्यादि। अनुव्यवस
दिनेति। आदिना व्यवसायानुमित्योः परिग्रहः। प्रमात्वग्रहासम्भवेनेति। तद्धर्मविर
धर्मप्रकारकारोपसामग्री तद्धर्मवत्त्वबुद्धेर्विरोधिनीति। भ्रमत्वाद्यग्राहकत्वनिवेशस्याव
कत्वादिति। अन्यथा तादृशभ्रमत्वाद्यारोपसामग्रीकाले प्रमात्वाश्रयज्ञानग्राहकसामग्रीव
ग्रहविषयस्य प्रमात्वे विरहेण बाधस्यादिति भावः। आदिपदात् प्रमात्वाभावसङ्ग्रहः,
च प्रमात्वग्रहे भ्रमत्वादिग्रहस्य अविरोधित्वेऽपि भ्रमत्वारोपजनकसामग्र्याः तद्विरोधि
तात्कालिकप्रमात्वाश्रयज्ञानग्राहकसामग्र्या अपि साध्यघटकतया, तज्जन्यग्रहविषय
प्रमात्व विरहेण बाधापत्तेः परीहारायाप्रामाण्याग्राहकत्वनिवेश आवश्यक इति भावः।

(गा०) अविरोधिज्ञानत्वादेश्च प्रमायामारोपासम्भवात् प्रमात्वाभावावच्छेदकतया गृहीततद्धर्मभानदशायामपि प्रमात्वलौकिकग्रहस्य श्वैत्याद्यभावावच्छेदकतया गृहीतशंखत्वादिग्रहदशायां श्वैत्यादिलौकिक-ग्रहवत् सम्भवात्।

अथ, भ्रमत्वस्य परमतेऽपि अतीन्द्रियतया तस्यारोपे परमते गुरुत्वाद्यारोप इव न साक्षात्कारित्वग्रहः, योग्यपीतत्वाद्यारोप एव तद्ग्रहस्या-नुभविकत्वात्, तथाच तदारोपसामग्र्या न प्रमात्वलौकिकप्रत्यक्षप्रतिबन्धः, यादृशदोषजन्यज्ञाने

(प्रभा) अविरोधिज्ञानत्वादेश्चेति। आरोपासम्भवादिति = भ्रमासम्भवादित्यर्थः। दोषघटितारोपसामग्र्या एव प्रतिबन्धकत्वात् इति भावः। गृहीततद्धर्मेति = गृहीतज्ञानत्वग्रह-दशायामित्यर्थः। ज्ञानत्ववत्प्रमात्वाभाववत् इति निश्चयकालीनज्ञानत्ववदिदमिति निश्चय-दशायामिति यावत्। प्रमात्वलौकिकग्रहस्येति। अस्य सम्भवादित्यनेनान्वयः। तथाच यथा ज्ञानांशे भ्रमत्वभ्रमसामग्रीकाले भ्रमविषयज्ञानवृत्तिप्रमात्वलौकिकप्रत्यक्षानुत्पादः तथा तज्ज्ञानत्वांशे प्रमात्वाभावावच्छेदकत्वज्ञानकालीनज्ञानांशे ज्ञानत्वप्रमात्वकज्ञानग्राहक-सामग्री न प्रामाण्यलौकिकप्रत्यक्षानुत्पादप्रयोजिकेति न बाध इति भावः।

आरोपसामग्र्या अप्रतिबन्धकत्वेन बाधविरहात् प्रामाण्यविरोध्यग्राहकत्वनि-वेशवैयर्थ्यन्दुर्वारमित्याशङ्कते अथेत्यादिना। परमते = मीमांसकमते। अतीन्द्रियत-येति। रजतज्ञानवानहमिति भ्रमानुव्यवसाये तदभाववति तत्प्रकारकत्वरूपभ्रमत्वं न प्रत्यक्षं तदभावरूपविशेषणग्राहकसामग्रीविरहात्।[1] तस्यारोपे = भ्रमत्वस्यारोपे। न साक्षा-त्कारित्वग्रह इत्यनेनास्यान्वयः। गुरुत्वाद्यारोप इवेति = गुरुत्वभ्रम इत्यर्थः। तथाच यथा अतीन्द्रियभूतगुरुत्वाद्यारोपे गुरुत्वेनेदं साक्षात्करोमीत्याकारकः साक्षात्कारित्वग्रहो न जायते तथा अतीन्द्रियभूतभ्रमत्वारोपे भ्रमत्वेनेदं साक्षात्करोमि इत्याकारकः साक्षात्कारित्व-ग्रहोऽपि न सम्भवतीति भावः। आनुभविकत्वादिति = साक्षात्कारित्वग्रहस्यानुभवसिद्ध-त्वादित्यर्थः। तथाचेति। न केवलं दोषघटितसामग्र्या एव प्रमात्वलौकिकज्ञानविरोधिता किन्तु साक्षात्कारित्वग्रहजनिकाया इत्यर्थः। तदारोपसामग्र्या = भ्रमत्वारोपसामग्र्येति तत्त्वम्। यादृशदोषजन्यज्ञान इति = पित्तादिरूपदोषजन्ये पीतः शंख[2] इत्यादिज्ञाने इत्यर्थः।

---

१ मीमांसकानाम् मते भ्रमत्वं विसंवादिप्रवृत्तिजनकत्वेन हेतुनाऽनुमेयम्। नैया-यिकानान्तु नये भ्रमत्वम् प्रमात्वं चेत्युभयमेवानुमेयम्।

२ पीतः शंख इत्यादौ श्वैत्यादिलौकिकभानवारणाय साक्षात्कारित्वग्रहप्रयोजक-

(गा०) साक्षात्कारित्वग्रहः तद्घटितारोपसामग्र्या एव लौकि
प्रत्यक्षसामग्र्यपेक्षया बलवत्त्वादिति कथं भ्रमत्वारोपकाले प्रमात्वग्रह
चेन्न ? उक्तयुक्त्या भ्रमत्वारोपसामग्र्याः प्रमात्वलौकिकप्रत्यक्षसामग्र्यपे
बलवत्त्वविरहेऽपि संशयजनकदोषस्येव विपर्ययजनकदोषस्य च साक्षात्व
त्वग्रहाप्रयोजकस्यापि लौकिकप्रमात्वग्रहप्रतिबन्धकतया भ्रमत्वारोप
प्रमात्वग्रहासम्भवात् ।

अन्तु वा भ्रमत्वग्राहकसामग्र्या अपि प्रमात्वग्राहकत्वम्, तथापि प्रमात्वा
प्रमात्वघटकतद्वद्विशेष्यकत्वाभावाद्यनुगमपर एव प्रकृतग्रन्थ इति नासङ्ग

वस्तुतस्तु[1] तदभाववति तत्प्रकारकत्वरूपं भ्रमत्वं तदभावधर्मितावच्छे
दकतत्प्रकारकाहार्यभ्रमे लौकिकप्रत्यक्षविषय इति ध्येयम् ।

(प्रभा) साक्षात्कारित्वग्रहः = पीतं शंखं साक्षात्करोमीतिग्रह इत्यर्थः । तद्घटित
पेक्षेति = तादृशदोषघटितारोपसामग्र्या इत्यर्थः । अयम्भावः, यादृशदोषजन्यज्ञाने स
कारित्वग्रहः तादृशदोषघटितसामग्री एव भ्रमविषयनिष्ठासाधारणधर्मविषयकलौ
प्रत्यक्षप्रतिबन्धिकेतिसिद्धान्तेन मीमांसकमते भ्रमत्वस्यातीन्द्रियत्वेन साक्षात्कारासम्भ
भ्रमत्वारोपसामग्र्याः प्रमात्वलौकिकप्रत्यक्षाप्रतिबन्धकतया भ्रमत्वारोपकालेऽपि प्रम
लौकिकप्रत्यक्षोत्पादात् बाधविरहेण प्रामाण्यविरोध्यग्राहकत्वनिवेशनं तद्वारणार्थं वि
मिति समुदितस्तात्पर्यार्थः । तत्सार्थकयितुं समाधत्ते उक्तयुक्त्येति । भ्रमत्वस्य परम
अतीन्द्रियतयेत्यनुपदमुक्तयुक्त्येतिभावः । संशयजनकदोषस्येवेति । मीमांस
संशयत्वमपि न लौकिकप्रत्यक्षविषयीभूतम् । प्रमात्वग्रहासम्भवादिति । तथाच
आरोपकाले बाधवारणाय प्रामाण्यविरोध्यग्राहकत्वनिवेश आवश्यक इति भावः । स
आरोप एव दोषोऽसाधारणधर्मज्ञानविरोधी नतु अनुभूयमानारोपोऽपीत्याशं
वस्तुवेति । प्रमात्वघटकेति । प्रमात्वघटकं यत्तद्वद्विशेष्यकत्वं तदभावादीनामनु
पर इत्यर्थः । प्रामाण्यविरोधित्वेनोभयोः संग्रहार्थमिति भावः । प्रकृतग्रन्थ इति =
प्रामाण्यम्, प्रामाण्यविरोधि इति ग्रन्थ इत्यर्थः ।

अनाहार्यभ्रमे तदभावज्ञानासम्भवात् भ्रमत्वाग्रहेऽपि आहार्येण तद
भावरूपविशेषणज्ञानसम्पादनात् तथाविधविशेषणज्ञानसम्पादकसामग्रीवशाद् वा
संयुक्तसमवेतविशेषणतासन्निकर्षेण आहार्ये भ्रमत्वलौकिकप्रत्यक्षं सम्भवती
वस्तुतस्तु इति । भ्रमत्वमिति । अस्य लौकिकप्रत्यक्षविषये इत्यनेनान्वयः । तदभ
धर्मितावच्छेदकाहार्यभ्रमेति। आहार्याकारश्च घटत्वाभाववान् घटत्ववानिति । लौकि
प्रत्यक्षविषये इति । तथाच भ्रमत्वभ्रमजनकदोषः साक्षात्कारित्वग्रहप्रयोजकः स
वादेवेति । ध्येयमिति । एतेन भ्रमत्वस्यातीन्द्रियत्वं निराकृतम् । तथाच भ्रमत्व

---

१ अक्षरार्थस्तु—तदभाववति = घटत्वाभाववति, तत्प्रकारकत्वरूपम = घट
[illegible]

(गा०) यत्तु अप्रामाण्यारोपकालेऽपि निर्धर्मितावच्छेदकप्रामाण्यभानसम्भवात् अत्राप्रामाण्याग्राहकत्वविशेषणानर्थक्यमिति देश्यम्, तन्न साधु ? पुरोवर्त्तिविशेष्यकत्वावच्छेदेन प्रामाण्यग्रहस्यैव पुरोवर्त्तिनि प्रवर्त्तकतया अस्यैव स्वतस्त्वपरतस्त्वविवादास्पदतया तद्विशेष्यकज्ञानप्रामाण्ये तद्विशेष्यकत्वावच्छेदेन यावत्स्वाश्रयग्राहकग्राह्यत्वस्यैव परैस्साधनीयतया तत्सार्थक्यात्।

नचैवं ज्ञाने साध्यप्रसिद्धिकथनं न सङ्गच्छत इति वाच्यम् ? यथाश्रुतसाध्याभिप्रायेण आपाततस्तत्कथनात्। उपदर्शितसाध्याभिप्रायेण प्रामाण्यघटकघटत्वादिकमुपेक्ष्य ज्ञानत्वपर्यन्तानुसरणात्। तच्चानुव्यवसायादेः पुरोवर्त्तिविशेष्यकत्वं धर्मितावच्छेदकीकृत्य ज्ञानत्वावगाहित्वानियमात्

(प्रभा) साक्षात्कारित्वग्रहे सिद्धे यादृशदोषजन्यज्ञाने साक्षात्कारित्वग्रहस्तद्घटितारोपसामग्र्या एव प्रतिबन्धकत्वाङ्गीकारेऽपि भ्रमत्वारोपसामग्र्याःप्रमात्वलौकिकप्रत्यक्षप्रतिबन्धकतया प्रमात्वाग्रहाद् बाधवारणाय प्रामाण्यविशेष्यग्राहकत्वविशेषणं सार्थकमिति भावः। अप्रामाण्यारोपकालेऽपि = इदं ज्ञानमप्रमेति भ्रमत्वभ्रमकालेऽपि इति तदर्थः। निर्धर्मितावच्छेदककेति। प्रमात्वस्य धर्मितावच्छेदकं हि इदन्त्वविशिष्टज्ञानत्वम्, तच्च पुरोवर्त्तिविशेष्यकत्वम्, तद्रहितेत्यर्थः। प्रामाण्यभानसम्भवादिति। निर्धर्मितावच्छेदककबुद्धेरप्रतिबध्यत्वात् तादृशप्रमात्वग्रहस्सुलभ इति भावः। विशेषणानर्थक्यमिति। तादृशभ्रमत्वारोपसामग्र्याः साध्यघटकत्वेऽपि तज्जन्यो यो निर्धर्मितावच्छेदककप्रमात्वग्रहः तद्विषयत्वस्य प्रमात्वे सत्त्वेन बाधानवकाशात्। समाधत्ते तन्नेति। अयमाशयः, पुरोवर्त्तिविशेष्यकज्ञानगतप्रमात्वरूपपक्षे पुरोवर्त्तिविशेष्यकत्वावच्छेदेन ज्ञानग्राहकसामग्रीजन्यग्रहविषयत्वस्यैव साध्यतया भ्रमत्वारोपकाले पुरोवर्त्तिविशेष्यकत्वावच्छेदेन प्रमात्वाश्रयज्ञानग्राहकसामग्रीजन्यग्रहपदेन निर्धर्मितावच्छेदककग्रहस्य वक्तुमशक्यतया न तमादाय बाधवारणसम्भव इति भावः। ननु स्वाश्रयग्राहकसामग्रीग्राह्यत्वमेवास्तु साध्यम् किम्पुरोवर्त्तिविशेष्यकत्वावच्छेदेनेत्यस्य साध्यघटकतयेत्यत आह अस्यैव विवादास्पदेति। अस्यैव = पुरोवर्त्तिविशेष्यकत्वावच्छेदेन स्वाश्रयग्राहकसामग्रीग्राह्यत्वस्यैवेत्यर्थः। अत्रैवोपोद्बलकमाह प्रवर्त्तकतयेति।

एवम् = पूर्ववर्त्तिविशेष्यकत्वावच्छेदेन यावत्स्वाश्रयज्ञानग्राहकसामग्रीग्राह्यत्वस्य साध्यत्वे। न संगच्छते = पुरोवर्त्तिविशेष्यकत्वं धर्मितावच्छेदकीकृत्य ज्ञाने स्वाश्रयग्राहकसामग्रीजन्ययावद्ग्रहविषयत्वरूपसाध्यविरहात् तत्तज्ज्ञानव्यक्तीनामनुव्यवसाये आत्मत्वं धर्मितावच्छेदकीकृत्यैव भानात्। यथाश्रुतसाध्याभिप्रायेणेति = स्वाश्रयज्ञानग्राहकसामग्रीग्राह्यत्वरूपसाध्याभिप्रायेणेत्यर्थः। उपदर्शितेति = पुरोवर्त्तिविशेष्यकत्वावच्छेदेन स्वाश्रयग्राहकसामग्रीग्राह्यत्वरूपसाध्याभिप्रायेणेत्यर्थः। घटत्वादिकमुपेक्ष्येति। तथाच घटत्वाद्युपेक्षणेनैव पुरोवर्त्तिविशेष्यकत्वावच्छेदेनेत्यस्य साध्यघटकता व्यज्यते। अनियमादिति।

... अप्रमात्वनिष्ठप्रकारकत्वादिघटितप्रामाण्यग्रहे तद्विरोधिनः घटत्वादेर्ज्ञानत्वावच्छेदेनाग्रहणे तद्वैयर्थ्यं

(मूल) ... ज्ञानत्वेऽपि उक्तसाध्यप्रसिद्धिसम्भव इति वाच्यम् ? तद्विशेष्यक... ज्ञानत्ववैशिष्ट्यग्राहकसामग्र्या एव साध्येऽन्तर्भावनीयतया त... सामग्रीजन्य...ग्रहविषयतया ज्ञानत्वे प्रसिद्धिसौलभ्यादित्यलमतिविस्त...

तद्प्रामाण्याग्राहकेत्यत्र तत्पदप्रयोजनमाह घटत्वेति । घटत्व... ...प्रामाण्यग्राहकसामग्र्या घटादिरूपविषये तत्प्रामाण्यविरोधि घटत्व... ...ग्रहात् प्रकृतप्रामाण्यविरोध्यग्राहकतद्ग्राहकसामग्र्या अप्रसिद्धेरित्य... अप्रामाण्यपदस्य यदि साक्षात्प्रमात्वग्रहप्रतिबन्धकं यज्ज्ञानन्तद्विषयार्थ... ...युक्त्या भ्रमत्वारोपसामग्र्याःप्रमात्वलौकिकप्रत्यक्षाप्रतिबन्धेन ... ...ग्रहेऽपि क्षतिविरहात् ,

(प्रभा) ... भावः । तद्विशेष्यकत्वावच्छिन्ने = पुरोवर्तिविशेष्यकत्वावच्छि... ज्ञानत्ववैशिष्ट्यग्राहकसामग्र्या एवेति = पुरोवर्तिविशेष्यकत्वनिष्ठधर्मितावच्छेदक... ...वच्छिन्नज्ञानत्वनिष्ठप्रकारताप्रयोजकत्वेन एकविशिष्टेऽपरवैशिष्ट्यग्रा... ...सामग्र्या ... ।

ननु ...प्रामाण्यविरोध्यग्राहकत्वनिवेशेनैव इदं ज्ञानमप्रमा इत्याकारक... ग्राहक...कारणसम्भवेन तदप्रामाण्याग्राहकेत्यत्र तत्पदस्य किम् फलमित्याकाङ्क्षा... ...माह घटत्वेत्यादि । घटत्ववतीत्यादिप्रामाण्यग्राहकेति । घटत्ववद्वि... ...रूप...विशिष्टघटत्वप्रकारकत्वविशिष्टज्ञानत्वरूपप्रामाण्याश्रयज्ञानग्राहकसामग्र... ... । घटादिरूपविषये = विशेष्यीभूतघटे इत्यर्थः । विरोधिघटत्वादेरिति ... ...ज्ञानत्वावच्छिन्नत्व-अवच्छिन्नत्वोभयाभाववत्प्रमानिष्ठाधिकरणताकान्यरूप... ...घटत्वादौ सत्त्वादिति भावः । तद्ग्राहकेति = स्वाश्रयज्ञानग्राहकेत्यर्थ... ... । ...भावः, यदि तत्पदस्य साध्यघटकत्वं न स्यात् तर्हि घटत्वप्रकार... ...सामग्र्याःउक्तरीत्या प्रमात्वविरोधिनो घटत्वादेः भानप्रयोजकतया प्रामा... ...तया अप्रसिद्धिःस्यादिति भावः । उपेयत इति । यद्विषयिता...व्यापि... ...ता स्वीक्रियत इत्यर्थः । साक्षादिति = ज्ञानवैशिष्ट्यानवच्छि... ...निवेश्यत इतिभावः । तथाच साक्षात्प्रमात्वग्रहप्रतिबन्धकं यद्विषय... ...स्वाश्रयज्ञानग्राहिका या सामग्री तज्जन्यग्रहविषयत्वं साध्य... ...न साध्याप्रसिद्धिः । घटत्ववत्प्रमात्वाभाववत् इतिनिश्चयासमानकाली... ...प्रकारकनिश्चये प्रतिबन्धकताविरहेण साक्षात्प्रमात्वग्रहप्रतिबन्धकत्वाभावात् ... भ्रमत्वारोपस्य साक्षात्प्रमात्वग्रहाविरोधितया तत्सामग्र्याःसाध्यान्तर्गतत... ...प्रमात्वे विरहात् बाधतादवस्थ्यम् अत आह उक्तयुक्त्येति । साक्षात्क... ...सामग्र्या एव लौकिकज्ञानविरोधितयेत्यादिपर्यालोचनया...

(गा०) तथा घटत्वादिकमादाय दोषाप्रसक्तावपि इदं निष्प्रकारकमित्यादिज्ञानीयनिष्प्रकारत्वादिमतीत्यादिप्रामाण्यग्राहकसामग्र्याः निष्प्रकारकत्वादिग्राहकत्वस्यावश्यकत्वात् तादृशप्रामाण्यपक्षकस्थलेऽनुपपत्तिर्दुर्वारैवेत्याशयेनाह *निष्प्रकारकत्वेति* ।

प्रमात्वविरोधिज्ञानवृत्तिधर्माग्राहकत्वनिवेशे घटत्वादिग्राहकतामादाय दोषानवकाशाद् . वा निष्प्रकारकत्वाद्यनुसरणम् । घट इत्यादिज्ञाने निर्विशेषणघटत्वादिरूपप्रकारांशे निष्प्रकारत्वसत्त्वात् तत्सम्बन्धावगाहिज्ञानप्रामाण्यविरोधिनस्तत्सम्बन्धेन तत्प्रकारकत्वाभावस्य च ज्ञानेऽतिसुलभत्वात् ज्ञानवृत्तित्वविशेषणेन तद्वारणासम्भवात् । तस्याप्रामाण्यं तदप्रामाण्यमिति षष्ठ्यन्तार्थस्य प्रामाण्येनान्वयात् तदीयप्रमाण्यविरोधिपर्यवसितमिति मिश्र

(प्रभा) भ्रमत्वारोपसामग्र्याःसाध्यघटकत्वेऽपि तज्जन्यग्रहविषयत्वस्य प्रमात्वे सत्त्वेन वाधविरहादिति भावः । दोषाप्रसक्तावपि = साध्याप्रसिद्धेरप्रसक्तावपीत्यर्थः । इदं निष्प्रकारकमित्यादीति । आदिपदात् इदं निर्विशेष्यकमिति ज्ञानपरिग्रहः । निष्प्रकारकत्वादिमति.. प्रामाण्यग्राहकसामग्र्या इति = इदं निष्प्रकारकम् इत्याकारकज्ञानगतं यन्निष्प्रकारकत्ववति निष्प्रकारकत्वप्रकारकत्वरूपम् प्रामाण्यं तस्य यो ग्रहःनिष्प्रकारकज्ञानवानहमित्यनुव्यवसायरूपःतज्जनकसामग्र्या इत्यर्थः । तादृशप्रामाण्यपक्षकस्थले इति = इदं निष्प्रकारकमिति ज्ञानगतनिष्प्रकारकत्ववति निष्प्रकारकत्वप्रकारकत्वरूपप्रामाण्यपक्षकस्थले इत्यर्थः । अनुपपत्तिरिति = साध्याप्रसिद्धिरित्यर्थः । तथाच निष्प्रकारकत्ववति निष्प्रकारकत्वप्रकारकं यत् प्रामाण्यज्ञानं तद्विषयकानुव्यवसायसामग्र्याम् अयं घट इति ज्ञानगतप्रमात्वविरोधिनो निष्प्रकारकत्वादेःभानप्रयोजकतायाःसत्त्वात् सामान्यतः तादृशस्थले ज्ञानग्राहकसामग्र्याम् प्रामाण्यविरोध्यग्राहकत्वस्याप्रसिद्ध्या साध्याप्रसिद्ध्यापत्तिरिति भावः

निष्प्रकारकत्वाद्यनुसरणे वीजान्तरमाह प्रमात्वविरोधिज्ञानवृत्तीति । तथाच प्रामाण्यविरोधी यो ज्ञानवृत्तिधर्मस्तदग्राहकत्वस्य सामग्रीविशेषणत्वे न प्रामाण्यविरोध्यग्राहिकायास्सामग्र्या अप्रसिद्धिर्घटत्वादेर्ज्ञानवृत्तित्वविरहात् इति हृदयम् । ननु मीमांसकैर्निर्विकल्पानुपगमात् निष्प्रकारकत्वस्यापि तन्मते ज्ञानावृत्तितया ज्ञानवृत्तित्वविशेषणेनैव वारणं सम्भवतीत्याशंक्याह घट इति । निर्विशेषणेति = घटत्वस्य स्वरूपतो भानादित्यर्थः । स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताककिञ्चित्प्रकारकत्वाभावरूपनिष्प्रकारकत्वस्य स्वरूपसम्बन्धेन यः निष्प्रकारकम् इदमिति ज्ञानन्तन्निष्ठप्रामाण्यविरोधिनः तादृशनिष्प्रकारकत्वस्य घट इति ज्ञानेऽतिसुलभतामाह तत्सम्बन्धावगाहीति । तद्वारणासम्भवादिति = निष्प्रकारकत्ववारणासम्भवादित्यर्थः । तथाच निष्प्रकारकत्वस्यापि ज्ञानवृत्तितया ज्ञानवृत्तित्वविशे

(३१८) तदिति लुप्तसप्तमीकम्।

(गा०) व्याख्यायां निष्प्रकारकत्वादेःसकलप्रामाण्यविरोधितया उक्तदोषोद्धार[illegible]वान् सप्तमीसमासाभिप्रायेणाह लुप्तसप्तमीकमिति।

ननु तद्प्रामाण्याग्राहकपदस्य सप्तमीसमासेन तद्विशेष्यकाप्रामाण्य[illegible]जनकत्वमर्थः, एवञ्च घटत्वादिप्रकारकज्ञानग्राहकसामग्र्याः तज्ज्ञानांशे प्रामाण्यघटकघटत्वादिग्राहकत्वाभावेन उक्तदोषवारणेऽपि 'अन्यथाख्याति[illegible]गुरोर्ज्ञानविशेष्यकाप्रामाण्यग्रहाप्रसिद्ध्या साध्याप्रसिद्धिर्दुर्वारैव ज्ञाने प्रामाण्याभावेन तत्प्रकारकज्ञानस्य अन्यथाख्यातित्वेन तेनाभ्युपगम

(प्रभा) या सामग्री तज्जन्यग्रहविषयत्वरूपं साध्यं षष्ठीसमासे पर्यवसितं स्यादिति भावः। सकलप्रामाण्यविरोधितयेति = इदं निष्प्रकारकमित्याकारकज्ञानगतप्रमात्वस्यापि विरो[धि]त्वेत्यर्थः। दोषोद्धारासम्भवादिति = साध्याप्रसिद्धिदोषोद्धारासम्भवादित्यर्थः। अयम[भि]प्रायः. प्रमात्वमात्रस्य प्रकारतानियन्त्रितत्वेन निष्प्रकारकत्वस्य सकलप्रमात्वविरोधितया [इदं] [नि]ष्प्रकारकम् इत्याकारकज्ञानगतं यन्निष्प्रकारकत्ववति निष्प्रकारकत्वप्रकारकत्वरूपं प्रामाण्य[स्य]ापि विरोधित्वेन तद्ग्राहकसामग्र्याःइदं निष्प्रकारकमितिज्ञाननिष्ठप्रामाण्यविरोध्यग्रा[हक]त्वाप्रसिद्धेः। सप्तमीसमासाभिप्रायेणेति। तथाच सप्तमीसमासादरे यज्ज्ञाने प्रमा[त्व]ग्रहा[त्] तज्ज्ञाननिष्ठविशेष्यतानिरूपितप्रामाण्यविरोधिनिष्ठप्रकारताशालिग्रहाजनिका या स्व[त]ज्ज्ञानग्राहिका सामग्री तज्जन्यग्रहविषयत्वं साध्यम् पर्यवस्यति। एवंसति च इदं [नि]ष्प्रकारकम् इति स्थलेऽपि न साध्याप्रसिद्धिः, तथाहि इदं निष्प्रकारक[मित्या]कारकज्ञानगतप्रमात्वस्य स्वतो ग्राह्यत्वेन चिकीर्षिततया तत्पदग्राह्यतादृशज्ञाननि[ष्ठ]विशेष्यतानिरूपिता न तावत् निष्प्रकारकत्वनिष्ठा तादृशज्ञानीया प्रकारता किन्तु प्रथमज्ञा[न]निष्ठविशेष्यतानिरूपितैवेति तादृशज्ञानग्राहिका सामग्री तत्प्रामाण्यविरोध्यग्राहकत्वे[न] [प्र]सिद्धत इति न साध्याप्रसिद्धिरिति भावः।

एवमपि गुरुमते साध्याप्रसिद्धेर्दुर्वारतेत्यालोच्याशङ्कते नन्विति। तद्विशेष्यकाप्रामाण्येति = यज्ज्ञानगतप्रमात्वं स्वतोग्राह्यतया चिकीर्षितम् तज्ज्ञान[नि]ष्ठविशेष्यतानिरूपितप्रामाण्यविरोधिनिष्ठप्रकारताशालिग्रहाजनकत्वमित्यर्थः। एवञ्चेति = तद्प्रामाण्याग्राहकपदस्य निरुक्तार्थकत्वे चेत्यर्थः। घटत्वादिप्रकारकेति=घटमहं जानामि [इत्य]नुव्यवसायसामग्र्या इत्यर्थः। तज्ज्ञानांश इति = प्रमात्वाश्रयीभूतेऽयंघट इति ज्ञान इत्यर्थः। प्रामाण्यघटकेति = अयं घट इति ज्ञानविशेष्यकप्रामाण्यविरोधिघटत्वप्रकारको योऽयं घट इत्याकारकं ज्ञानं घटत्ववत् इति ग्रहस्तज्जनकत्वाभावेनेत्यर्थः। उक्तदोषवारणेऽपीति = साध्याप्रसिद्धिवारणेऽपीत्यर्थः। तथाच घटमहं जानामि इत्याकारकग्रहो न [तावत्] यज्ज्ञानगतप्रमात्वं स्वतोग्राह्यत्वेन चिकीर्षितम् तादृशज्ञाननिष्ठविशेष्यतानिरूपितप्रामाण्यविरोधिघटत्वनिष्ठप्रकारताशाली किन्तु [illegible]

(टी०) अप्रामाण्यग्रहः इदं ज्ञानमप्रमेतिव्यवहारजनको ग्रहः ।

(गा०) सम्भवात् । अप्रामाण्यग्रहस्याप्रामाण्यावगाहित्वमात्रेण निवेशे ज्ञाने ऽप्रामाण्यप्रकारकविसंवादीच्छाप्रसिद्धया साध्याप्रसिद्धिवारणे तु ज्ञानग्राहक सामग्र्यां ताहशेच्छाद्यजनकत्वस्य अव्यावर्त्तकतया अप्रामाण्यभ्रमात्मकज्ञान ग्राहकसामग्र्या प्रामाण्याग्रहेण वाधो दुर्वार इत्याशंक्याह *अप्रामाण्यग्रह* इति व्यवहारजनक इति । ताहशशब्द[1]प्रयोगजनक इत्यर्थः । प्रामाण्यविरोधि प्रकारता[2]निरूपिततज्ज्ञाननिष्ठविशेष्यतानिरूपक इति यावत् । गुरुमते भ्रमस्थले विभिन्नज्ञानगोचरयोरपि धर्मधर्मिणोर्विशेषणविशेष्यभावोपगमात न तन्मतसिद्धाप्रामाण्यभ्रमासंग्रहः ।

(प्रभा) कतयाऽप्रामाण्यस्य ज्ञानाधर्मत्वेन ज्ञानविशेष्यकाप्रामाण्यप्रकारकग्रहस्य भ्रमरूपत्वेनाप्र सिद्धिस्स्फुटैवेत्यालोच्यते ज्ञानेऽप्रामाण्यासत्त्वेनेति । ननु यज्ज्ञानगतप्रमात्वम् स्वतोग्राह्य त्वेन चिकीर्षितम् ताहशज्ञाननिष्ठविशेष्यतानिरूपितप्रामाण्यविरोधिनिष्ठप्रकारताशाली यस्त दजनकत्वस्य स्वाश्रयज्ञानग्राहकसामग्र्यां निवेशे ज्ञानविशेष्यकाप्रामाण्यप्रकारकविसंवादीच्छैव ताहशी प्रसिद्धा स्यात्, गुरुणा ज्ञाने व्यधिकरणप्रकारकत्वस्यानभ्युपगमेऽपि इच्छाया व्यधिकरणप्रकारकत्वस्याभ्युपगमात् न साध्याप्रसिद्धिरित्याशंकायामाह अप्रामाण्यावगा हित्वमात्रेणनिवेश इत्यादिना । मात्रपदेन ग्रहो व्यवच्छिद्यते । ज्ञानग्राहकसामग्र्याम् = प्रमात्वाश्रयज्ञानग्राहकसामग्र्यामित्यर्थः । ताहशेच्छाद्यजनकत्वस्येति = अयं घ इत्यादिज्ञानगतप्रमात्वस्य स्वतो ग्राह्यत्वेन चिकीर्षिततया तज्ज्ञानधर्मिकप्रामाण्यविरोधि प्रकारकेच्छाद्यजनकत्वस्येत्यर्थः । आदिना कृतेः परिग्रहः । अव्यावर्त्तकतयेति = इद ज्ञानमप्रमा इदं ज्ञानम् भ्रमः इत्यनुव्यवसायजनकसामग्र्या अवारकतयेत्यर्थः । वाधो दुर्वार इति । तथाच इदं ज्ञानमप्रमा इत्याद्यनुव्यवसायसामग्र्या अपि अयं घट इत्यादि ज्ञानविशेष्यकप्रामाण्यविरोधिप्रकारकत्वेन गुरुमते प्रसिद्धाया इच्छाया अजनकत्वेन साध्या न्तर्गततया तज्जन्यग्रहविषयत्वस्य प्रमात्वे विरहाद् वाध इति भावः । ननु गुरुमते भ्रमस्य ज्ञानद्वयात्मकतया ताहशविशेष्यतानिरूपकग्रहाप्रसिद्धया साध्याप्रसिद्धिर्दुर्वारैवेत्यत आह गुरुमते इति । विशेष्यविशेषणभावोपगमादिति । अयमाशयः, यद्यपि गुरुणा भ्रमो नाङ्गीक्रियते तथापि इदं रजतम् इदं [2]ज्ञानमप्रमेत्यादिव्यवहारस्य अपलपितु मशक्यतया स्वरूपतो विषयतश्च मिथो भेदाग्रहनिबन्धनो विभिन्नज्ञानगोचरीभूतधर्मधर्मि

---

१ तादृशशब्दप्रयोग इति । अभिज्ञा अभिवदनम् उपादानम् अर्थक्रिया चेति अर्थव्यवहारस्य चातुर्विध्येन अत्र अभिवदनरूप एवार्थो विवक्षितः। अपर ग्रहणे प्रयोजनाभावादिति द्योतयति तादृशशब्दप्रयोगजनक इत्यादिना । इदं ज्ञान

(मा०) एतेन शब्दप्रयोगेऽर्थज्ञानकारणतायाः निर्युक्तिकत्वात् । च त्वेऽपि 'इदं ज्ञानमप्रमा' इति वाक्यस्यानुपूर्वीविशेषपुरस्कारेण निवेश पदस्य शक्तिभ्रमेण आधुनिकसङ्केतेन वा प्रामाण्यप्रकारकबोधेऽपि प्रामाण्यग्रहस्यापि तादृशशब्दप्रयोगजनकतया प्रामाण्यग्राहकसामग्र्याः शब्दप्रयोगजनकग्रहाजनकत्वाप्रसिद्धेः अप्रमाशब्देन प्रमाविरोधित्वेन प्र त्वेन च बोधनात् प्रमात्वाभावत्वभ्रमत्वत्वादिनाऽबोधके तत्र तादृप्येण त्वादिग्रहहेतुतायाश्चासम्भवदुक्तिकत्वात् ।

(प्रभा) निष्ठप्रकारताविशेष्यतयोर्निरूप्यनिरूपकभावोऽङ्गीक्रियत एव । तथाच इदं ज्ञा इत्याकारकव्यवहारम्प्रति व्यवहर्त्तव्यज्ञानविषया ज्ञानद्वयं कारणम्, तत्रैकम् इदम वारकम् अनुभवरूपम्, अपरम् अप्रमेत्याकारकं स्मरणरूपम् प्रामाण्यविरोधिनिष्ठप्र निरूपकतज्ज्ञाननिष्ठविशेष्यतानिरूपकग्रहपदेन प्रसिद्धमुपादाय लक्षणसमन्वय इत्यूह्य

एतेनेति = प्रामाण्यविरोधिनिष्ठप्रकारतानिरूपिततज्ज्ञाननिष्ठविशेष्यतानिरूपक अर्थकरणेनेत्यर्थः । अस्य यथाश्रुतासङ्गतावपीत्यनेनान्वयः । निर्युक्ति दिति = अर्थज्ञानं विनैव शुकस्य शब्दप्रयोगदर्शनेन शब्दप्रयोगेऽर्थज्ञानव्यभि सत्त्वादिति भावः । बुबोधयिषापूर्वकशब्दप्रयोगेऽर्थज्ञानस्य कारणत्वे तु न व्यभिचार आह स्युक्तिकत्वेऽपीति । आनुपूर्वी... निवेशे = इदं ज्ञानमप्रमेतिवाक्यप्रयोगजन जनकेत्यादिरीत्या निवेश इत्यर्थः । शक्तिभ्रमेणेति = प्रामाण्यम् अप्रमापदवाच्य शरीरेण । आधुनिकसङ्केतेनेति = अप्रमापदात् प्रमा बोद्धव्या इति आधुनिक नेत्यर्थः । तादृशशब्दप्रयोगजनकतया = इदंज्ञानमप्रमेतिशब्दप्रयोगजनकतयेत ग्रहाजनकत्वाप्रसिद्धेरिति । तथाच प्रमात्वज्ञानस्यापि इदं ज्ञानमप्रमेतिव्यवहार त्वात् तज्जनकसामग्र्या अपि इदं ज्ञानमप्रमेतिव्यवहारजनकग्रहजनकत्वेन साध्याप्र रिति भावः । दोषान्तरमाह अप्रमाशब्देनेति । प्रमात्वविरोधित्वेनेति स्वाव नतु प्रमात्वाभावत्वेनेत्यर्थः । प्रमात्वाभावस्येति शेषः । अबोधके इति । धर्मिवाचक न्यपदसमभिव्याहृतनञा प्रमात्वात्यन्ताभावत्वादिना बोधकत्वासम्भवादिति भावः । त अप्रमाशब्दे । निरूपितत्वं सप्तम्यर्थः, अन्वयश्चास्य हेतुताया इत्यनेन । तादृप्येणे प्रमात्वाभावत्वभ्रमत्वत्वरूपेणेत्यर्थः । असम्भवदुक्तिकत्वादिति = इदं ज्ञानम् अ शब्दप्रयोगम्प्रति अर्थज्ञानविधया प्रमाविरोधि प्रमाभिन्नं वा इदं ज्ञानमिति ज्ञा हेतुतया इदं ज्ञानम्प्रमात्वाभाववत् इदं ज्ञानं भ्रम इति ज्ञानद्वयस्य हेतुताया अस दुक्तिकत्वादिति भावः । तथाच इदं ज्ञानमप्रमेतिव्यवहारजनकग्रहपदेन इदं ज्ञानम् त्वाभाववत् इदं ज्ञानं भ्रमः इति ज्ञानद्वयी धर्त्तुं न शक्यते किन्तु इदं ज्ञानम्प्रमा भ्रमभिन्नं वेत्येव, तादृशग्रहाजनकसामग्रीपदेन इदं ज्ञानं भ्रमः प्रमात्वाभाववत् इत्या ग्रहजनकसामग्रीमुपादाय बाधो दुर्वार एवेति भावः ।

(गा०) तदंशे वस्तुगत्या प्रमात्वविरोधिधर्मप्रकारिका या प्रतीतिःतत्पर-शब्दजनकज्ञानत्वेन इदं ज्ञानं भ्रम इत्यादिज्ञानसंग्रहस्य च तदंशे तत्प्रकार-कत्वस्य गुरुमतसिद्धभ्रमत्वादिप्रकारकभ्रमसाधारणस्य दुर्वचतयाऽशक्यत्वात् ।

सुवचत्वेऽपि तेनैव रूपेण इदं ज्ञानं भ्रम इत्यादिसकलज्ञानसंग्रह-सम्भवे तद्रूपेण प्रतीतिमादाय तत्परवाक्यजनकत्वेन तादृशसंग्रहस्य शिरो-वेष्टनेन नासिकास्पर्शतुल्यत्वात् यथाश्रुतासङ्गतावपि न क्षतिः ।

(प्रभा॰) पीति । अप्रमापदस्य शक्तिभ्रमेणेति = अप्रमापद प्रमात्वावच्छिन्ने शक्तमिति शक्तिभ्रमेणेत्यर्थः । शक्तिभ्रमाधीनं हि अर्थज्ञानं प्रायो न व्यवहारप्रयोजकमित्यरुचेराह आधुनिकसङ्केतेनेति । तथाच प्रामाण्यप्रकारकं ज्ञानमपि इदं ज्ञानमप्रमेतिव्यवहारप्रयोजकम् । एवञ्चेदं ज्ञानमप्रमेतिव्यवहारजनकग्रहेण प्रामाण्यग्रहस्यापि संग्रहात् तदजनकस्वाश्रय-ज्ञानग्राहकसामग्र्येव जगत्यप्रसिद्धेति साध्याप्रसिद्धिरिति भावः । शक्तिभ्रमाजन्यत्वे सति आधु-निकसङ्केतग्रहाजन्यो य इदंज्ञानमप्रमेतिव्यवहारजनको ग्रह इतिनिवेशे नानुपपत्तिरित्यतो दोषान्तरमाह अप्रमाशब्देनेत्यादीत्याहुः । तदंशे इति = तज्ज्ञानांशे इत्यर्थः । यज्ज्ञा-नगतप्रमात्वं स्वतोग्राह्यत्वेन चिकीर्षितं तज्ज्ञानधर्मिकेति यावत् । प्रमात्वाभावप्रकारकज्ञानस्य च संग्रहाय ब्रूते वस्तुगत्या प्रमात्वविरोधिधर्मप्रकारिका या प्रतीतिरिति । वस्तुगत्या प्रमात्व-विरोधी धर्मस्तु प्रमात्वाभावो भ्रमत्वमपि तत्प्रकारिका प्रतीतिःइदं ज्ञानं प्रमात्वाभाववद् इदं ज्ञानं भ्रम इत्यादिरूपा । तत्परशब्दजनकज्ञानत्वेनेति । तादृशप्रतीतीच्छयोच्चरितो यश्शब्दस्स च इदं ज्ञानं प्रमात्वाभाववत् इदं ज्ञानं भ्रम इत्याकारकः तत्त्वेनेत्यर्थः । अनया वाचोभङ्ग्या सकलज्ञानसंग्रह इत्यभिमानः । इदं ज्ञानं भ्रम इत्यादिसकलज्ञानसंग्रह-स्येति । अशक्यत्वादित्यनेनान्वयः । आदिपदादिदं ज्ञानं प्रमात्वाभाववत् इत्यस्य संग्रहः । ननु उक्तरीत्या इदं ज्ञानं भ्रम इत्यादिज्ञानसंग्रहे कुतोऽशक्यत्वमित्यतो हेतुमुपदर्शयति तदंशे इति = तज्ज्ञानांशे इत्यर्थः । तत्प्रकारकत्वस्य = वस्तुगत्या प्रमात्वविरोधिधर्म-प्रकारकत्वस्येत्यर्थः । दुर्वचतया इत्यनेनास्यान्वयः । गुरुमतसिद्धभ्रमत्वादिप्रकारकभ्रम-साधारणस्य = गुरुमतसिद्धो यो भ्रमत्वादिप्रकारको भ्रमः अयंघटः इति प्रमाज्ञानधर्मिक-भ्रमत्वप्रकारको भ्रम इदं ज्ञानं भ्रम इत्याकारकस्तत्साधारणस्येत्यर्थः । दुर्वचतयेति । अन्यथाख्यातिमनभ्युपगच्छतो गुरोर्मते तज्ज्ञानधर्मिकप्रामाण्यविरोधिभूतभ्रमत्वप्रकारकत्वस्य इदं ज्ञानं भ्रम इत्यत्रासम्भवात् । तथाच तत्साधारण्यविरहे बाधापत्तिः स्यादिति भावः ।

सुवचत्वेऽपीति--गुरोर्मते भ्रमस्थले विभिन्नज्ञानगोचरयोरपि धर्म धर्मिणोर्विशेष्यविशेषणभावोपगमात् तज्ज्ञाननिष्ठविशेष्यतानिरूपितप्रामाण्यविरोधिनिष्ठ प्रकारतानिरूपकत्वस्य निवेशे गुरुमतसाधारण्य सुवचमिति भावः । तेनैव रूपेणेति = तज्ज्ञा-ननिष्ठविशेष्यतानिरूपितप्रामाण्यविरोधिधर्मप्रकारताकत्वेनैव रूपेणेत्यर्थः । तद्रूपेण प्रतीति-मादाय तत्परवाक्येत्यादि । तज्ज्ञाननिष्ठविशेष्यतानिरूपितप्रामाण्यविरोधिनिष्ठप्रकारता निरूपकप्रतीतीच्छयोच्चरितशब्दजनकज्ञानत्वेन सकलज्ञानसंग्रहापेक्षया पूर्वोक्तलघुभूत

(मी०) स च मिश्रादिमते विशिष्टज्ञानम् । गुरूणां तत्स्वात
न्त्र्याप्रामाण्योपस्थितौ धर्मिज्ञानम् ।

(भा०) केचित्तु व्यवहारजनक इत्यस्य प्रमात्वविरोधिप्रकारकत्वेन ज्ञानविषयको योऽभिप्रायःतदधीनवाक्यजनक इत्यर्थः । अभिप्रायश्चेच्छा व्यधिकरणप्रकारकोऽपि गुरूणामनुमतः । अर्थबुबोधयिषापूर्वकवाक्ये शा ब्दज्ञानहेतुरिति मतमवलम्ब्येदमित्याहुः ।

स च = तादृशग्रहश्च । विशिष्टज्ञानमिति । तेषाम्मतेऽन्यथाख्यात्यु पगमात् एकज्ञानगोचरधर्मधर्मिणोरेव विशेषणविशेष्यभावादिति भा स्वातन्त्र्येणेति । स्वतन्त्रोपस्थिताप्रामाण्यप्रकारतानिरूपितधर्मिनिष्ठविशेष्यता निरूपकतज्ज्ञानगोचरानुभवरूपज्ञानान्तरमित्यर्थः ।

(प्रभा) भ्रमासंग्रहः । प्रकारान्तरेण यथाश्रुतदीधितिग्रन्थसङ्गतिं प्रदर्शयतां वादिनाम्म केचित्तु इति । तद्भानविषयकः = प्रामाण्यविरोधिभानविषयक इत्यर्थः । अभिप्रा इच्छा । सा च प्रमात्वविरोधिप्रकारकत्वेन प्रमात्वविरोधिज्ञानं जायतामित्याकारिका । धीनवाक्यजनके इति = तादृशेच्छाप्रयोज्यवाक्यजनके इत्यर्थः ।

तादृशग्रहश्चेति = इदं ज्ञानम् प्रमेतिव्यवहारजनको ग्रहश्चेत्यर्थः । प्रामाण्यवि प्रकारतानिरूपिततज्ज्ञाननिष्ठविशेष्यतानिरूपको ग्रहश्चेति यावत् ।

तेषाम् = मिश्रमहानाम्मते । अन्यथाख्यात्युपगमादिति = व्यधिकरण प्रकारकग्रहस्वीकारान्नतु विभिन्नज्ञानगोचरधर्मधर्मिणोरित्यर्थः । धर्मधर्मिणोरेवे अप्रामाण्यरूपधर्मज्ञानरूपधर्मिणोरेवेत्यर्थः । भ्रमात्मकैकज्ञानविषययोर्विशेष्यविशेषणभा दिति भावः ।

दीधितौ गुरूणान्तु = गुरूणाम्मते त्वित्यर्थः । स्वातन्त्र्येणेति = धर्म्यविशेषण त्वेन । विशेष्यत्वेनेति यावत् अप्रामाण्योपस्थिताविति । सत्यामितिशेषः । अप्राम पूर्वकमिति यावत् । धर्मिज्ञानमिति = धर्मिभूतस्य ज्ञानस्य ज्ञानमित्यर्थः । अयं गुरुमतेऽपि इदं ज्ञानमप्रमेत्येवाकारःकिन्तु इदं ज्ञानमिति तु प्रत्यक्षात्मकम् अप स्मृत्यात्मकम् । एवञ्च तन्मते याथार्थ्यमपि निर्वहति ज्ञानद्वयं युगपन्न सम्भवति इति न रयन्तुन्ति प्राभाकराः, तन्मते सर्वत्र भ्रमस्थले स्वरूपतो विषयतश्च मिथो भेद निबन्धनो व्यवहार इत्यन्यत्रोपपादितम् । स्वतन्त्रोपस्थितेति = स्वतन्त्रोप योऽप्रामाण्यप्रकारस्तन्निष्ठप्रकारतानिरूपिता या ज्ञानरूपधर्मिनिष्ठविशेष्यता तन्निरू पकज्ञानगोचरानुभवस्तद्रूपमित्यर्थः । स्वरूपतो विषयतश्च मिथोभेदाग्रहात्समानकालि

मा०) एतेनाप्रामाण्याग्राहकपदस्याप्रामाण्य-विषयकज्ञानाजनकार्थतया ज्ञानग्रहजनकसामग्र्याश्च गुरुमते स्वतन्त्राप्रामाण्यग्रहाजनकतयानुपपत्तेर्ज्ञानरूप-धर्म्यगृहीतासंसर्गकस्वतन्त्राप्रामाण्यग्राहकसामग्र्यसमवहितार्थकतया तत्पद-व्याख्यानं मिश्राणामनुपादेयमिति सूचितम् । मिश्रमते क्षणद्वयात्मककाल-घटितयौगपद्यमेव समवधानं बोद्धव्यम् ।

(प्रभा) धरमिश्रमतं खण्डयितुमाह एतेनेति । स्वातन्त्र्येणाप्रामाण्योपस्थितिपूर्वकधर्मि-ज्ञानमितिकथनेनेत्यर्थः । स्वतन्त्रोपस्थिताप्रामाण्यप्रकारतानिरूपितज्ञानरूपधर्मिनिष्ठविशेष्यतानिरूपकतज्ज्ञानगोचरानुभवरूपज्ञानान्तरमित्यर्थकेनेतियावत् । सूचितमित्यनेन सहान्वयः । अप्रामाण्याग्राहकपदस्येति = मूलकारीयविप्रतिपत्तिस्वरूपघटकेत्यर्थः । ज्ञानग्रहजनक-सामग्र्याश्चेति । अप्रामाण्यभ्रमघटकस्य इदं ज्ञानमित्यनुभवस्य जनकसामग्र्याश्चेत्यर्थः । स्वतन्त्राप्रामाण्यग्रहाजनकयेति = तादृशानुभवस्य गुरुमते स्मृत्यन्यत्वेन तज्जनक-सामग्र्या अप्रामाण्यग्रहजनकत्वासम्भवादित्यर्थः ।

अनुपपत्तेरिति = बाधादित्यर्थः । प्रामाण्याग्रहेणेत्यादिः । गुरुमते इदं ज्ञानमप्रमेति-ज्ञाने अप्रमेतिस्मरणात्मकमेकं ज्ञानम् इदं घटज्ञानमिति चानुभवात्मकमपरज्ञानमिति ज्ञान-द्वयम् । तत्रेदं ज्ञानमित्यनुभवजनकसामग्र्या स्मर्यमाणाप्रामाण्यासंसर्गाग्रहकालीनया प्रामाण्याग्राहकतया तदप्रामाण्याग्राहकस्वाश्रयज्ञानग्राहकसामग्रीपदेन धर्तुं शक्य-तया तज्जन्यतादृशग्रहस्य यावद्ग्रहान्तर्गततया तद्विषयत्वस्य प्रमात्वे विरहाद् बाधापत्ति-रिति भावः । अत्र अप्रामाण्याग्राहकत्वम् अप्रामाण्यग्राहकसामग्र्यसमवहितत्वम् । गुरुमत-साधारण्यायाह ज्ञानरूपगृहीतासंसर्गकेति । ज्ञानरूपो यो धर्मी तत्रागृहीतोऽसंसर्गो यस्य तादृशो यःस्वतन्त्राप्रामाण्यग्रहस्तज्जनिकेत्यर्थः । तत्पदेति = अप्रामाण्याग्राहकपदेत्यर्थः । सूचितमिति, दीधितिकृतेतिशेषः । तथाच मदुक्तव्याख्यानेनैव सामञ्जस्ये मिश्राणां व्याख्यानमनुपादेयमिति दीधितिकृतामाशयः ।

ननु गुरुनये यदि ग्रहणस्मरणात्मकमेकं युगपदुत्पन्नं युगपदुत्पन्नग्रहणस्मरणरूप-ज्ञानद्वयं वा भ्रमःतदैतद्विवक्षया प्रामाण्यभ्रममादाय वारणसम्भवेऽपि यदि क्रमोत्पन्ना-प्रामाण्यस्मरण-इदंज्ञानानुभवरूपज्ञानद्वयं भ्रमःतदा तु नैतद्विवक्षयाऽपि प्रतीकारः, इदं ज्ञानानुभवसामग्र्याः अप्रामाण्यस्मृतिसामग्र्यसमवहितत्वात् । तदानीं तत्स्मृतिसामग्रीसत्त्वे अनुभवोत्पत्तिसमयेऽपि स्मृतेर्दुर्वारतापत्तेः, स्मृतिसामग्र्यपेक्षयाऽनुभवसामग्र्या बलवत्त्वे-ऽनुभवसामग्र्यां स्मृतिसामग्रीसमवहितत्वस्यात्यन्तमसम्भावितत्वाच्चेत्यत आह मिश्रमते इति । क्षणद्वयात्मककालघटितयौगपद्यमेव समवधानं बोध्यम् । एवकारेण एकक्षण-घटितयौगपद्यव्युदासः । एतेन एकक्षणावच्छेदेन एकाधिकरणवृत्तित्वरूपं यदि समवधानं विवक्षितं तर्हि अप्रामाण्यग्राहकसामग्र्याः प्रमात्वाश्रयज्ञानग्राहकसामग्र्याश्चैकक्षणेऽभावा-च्चादृशसामग्रीद्वयसमवधानाभावात् तादृशज्ञानग्राहकसामग्र्या अपि ज्ञानरूपधर्म्य-गृहीतासंसर्गकस्वतन्त्राप्रामाण्यग्राहकसामग्र्यसमवहितत्वेन साध्यघटकतया तज्जन्यतादृश-

(दी०) अत्र च ताद्दशग्रहादिः कदापि न जातस्तत्र अग्राहकान्तं द्रष्टम् प्रयोजनाभावात् इति वदन्ति ।

ननु इदं घटत्वप्रकारकं ज्ञानं सविशेष्यकमित्यादेर्ज्ञानग्र ... ग्राहकत्वाद् बाधः,

(गा०) क्रमिकज्ञानद्वयसामग्र्योरेकक्षणेऽसत्त्वनियमात् ।

ननु यादृशप्रामाण्याश्रयज्ञाने कदाचिदपि अप्रामाण्यभ्रमं ... तत्प्रामाण्यपक्षकस्थले तदप्रामाण्यग्राहकाप्रसिद्ध्या साध्याप्रसिद्धि ... चेत । ग्रहादीत्यादिपदात् तत्राप्रामाण्यप्रकारकगुणान्तरपरि ... तेन ताद्दशज्ञानाप्रसिद्धावपि ताद्दशेच्छासिद्धौ अग्राहकशरीरे ज्ञानत्वं ... भाव्य अप्रामाण्यावगाह्यजनकनिवेशे प्रसिद्धिस्सम्भवति, ताद्दशेच्छाद ... तु ज्ञानत्वपरित्यागेऽपि अप्रसिद्धिरिति सूचितम् *प्रयोजनाभावादिति* । ... प्रसक्तेरिति भावः ।

... इत्यादेः = एताद्दशशब्दादेः । ज्ञानग्राहकस्येत्यनेन तज्जन्य... स्वाश्रयग्राहकसामग्रीजन्ययावद्ग्रहान्तर्गतत्वं सूचितम् । *बाध इति* । यद्यपि

(प्र०) क्रमिकज्ञानद्वयसामग्र्योरेकक्षणेऽसत्त्वनियमादिति । एकात्मन... ... । क्रमिकज्ञानद्वयजनकक्षणद्वयादिघटितसामग्रीद्वयस्य एकक्षणावच्छेदेनैक... ... सम्भवः ।

गुणान्तरपरिग्रह इति = इच्छादिपरिग्रह इत्यर्थः । अप्रामाण्या... ... जनकनिवेशे इति । ताद्दशस्थलविशेषे इति शेषः । प्रामाण्यविशेष्यकावगाही यत्तद... ... सामग्र्यां निवेशे इत्यर्थः । ज्ञानत्वपरित्यागे इति = ज्ञानत्वमनन्तर्भाव्य । ... विशेष्यकावगाही यत्तदजनकत्वनिवेशे इति भावः ।

... पाक्तपदस्य पदानां कृत्यं समाप्येदानीं मीमांसकमतसाध्ये स्वतन्त्रं ... दीधितिकार आह नन्वित्यादिना । सविशेष्यकमित्यादेरिति । अ... ... । ज्ञानग्राहकस्येति । शाब्दबोधात्मको यो ज्ञानग्रहस्तज्जनकस्येत्य... ... ग्राहकत्वादिति । व्यवसायानुव्यवसायज्ञाततालिङ्गकानुमितीन... ... शाब्दबोधस्य प्रामाण्याविषयकत्वादिति भावः ।

बाधः ... । तथाच घटत्वप्रकारकं ज्ञानं सविशेष्यकमितिवाक्यजन्यशाब्दबोधस्यापि ... स्वाश्रयज्ञानग्राहकसामग्रीजन्ययावद्ग्रहान्तर्गततया तद्विषयत्वस्य च प्र... ... इति भावः । स्वाश्रयेति । स्वं प्रमात्वं तदाश्रयो यो घटत्वप्रकारकं ... ताद्दशशाब्दबोधरूपस्तज्जनकसामग्रीजन्यो ग्रहः स एव शाब्दबोधः ।

...

गा०) घटज्ञानं वा गुण इत्यादेः ज्ञानग्राहकस्य प्रामाण्याग्राहकत्वादपि वाध

प्रभा) नच प्रमात्वविशिष्टविषयकज्ञानजनकसामग्रीजन्यत्वमेव निवेश्यतां तावतैव न वाध इति वाच्यम्, तथा सति सिद्धसाधनापत्तेः। प्रमात्वविशिष्टविषयकज्ञानन्तु इदं ज्ञानम्प्रमेत्याकारकमेव तज्जनकसामग्रीजन्यग्रहोऽपि तदेव तद्विषयत्वस्य नैयायिकैरपि प्रमात्वेऽङ्गीकारादिति। घटत्वप्रकारकं ज्ञानं सविशेष्यकमित्यत्र प्रकारकत्वसविशेष्यकत्वोपादानस्य प्रयोजनमुपदर्शयति यद्यपीत्यादिना। वाधसम्भव इति। तथाच ज्ञानं गुण इति वाक्यजशाब्दबोधस्यापि तादृशयावद्ग्रहान्तर्गततया तद्विषयत्वस्य प्रमात्वेऽसत्त्वाद् वाध इति भावः। ननु विषयोपरक्तस्वाश्रयज्ञानग्राहकसामग्रीजन्ययावद्ग्रहविषयत्वस्य साध्यत्वे नायं दोष इत्यत आह घटज्ञानं वेति। आदिपदाद् घटज्ञानवानयमित्याद्यनुमितिस्मृतिपरिग्रहः। तथाच तादृशशाब्दबोधानुमितिस्मृत्यादिकमादाय वाधो दुर्वार इति भावः। नच गुरुमते ज्ञानं स्वनिष्ठप्रामाण्यमवश्यं गृह्णातीति नियमः, तन्मतेऽनुव्यवसायाभिन्नतया व्यवसायस्यैव प्रामाण्याश्रयत्वात् प्रामाण्यविषयकत्वाच्चेति। तथाचेयमनुमितिः शाब्दप्रमितिश्च घटत्ववति घटत्वप्रकारिका इति तत्त्वमपि गृह्णातीति न वाध इति वाच्यम्, घटत्ववति घटत्वप्रकारकत्वस्य ज्ञानभेदेन भिन्नतयाऽनुमित्यादिवृत्तेस्तस्य ग्रहेपि अनुमितिविषयीभूतज्ञानवृत्तेस्तस्याग्रहेण वाधतादवस्थ्यात्। भट्टमिश्रमते वाधस्य दुर्वारत्वाच्च।

अत्र केचित् तादृशशाब्दबोधादिना प्रामाण्यं गृह्यत एवेति वदन्ति। तेषामयमाशयः, यथा गुरुनये घटेन जलमाहरेत्यत्रान्वयितावच्छेदकं छिद्रेतरत्वं शाब्दबोधविषयः, अन्वयप्रयोजकरूपवत्त्वलक्षणयोग्यताबलात् भट्टमते दिवाऽभोजी देवदत्तःपीन इत्यादौ श्रुतार्थापत्तिस्थले श्रुतस्य शब्दस्य शाब्दबोधजनकत्वान्यथानुपपत्त्या शब्दकल्पनस्थले रात्रिभोजित्वमन्वयितावच्छेदकम् अध्याहृतरात्रिभोजनादिशब्दादुपस्थितं शाब्दबोधविषयः, तथा घटज्ञानमितिवाक्येऽपि ज्ञानत्वस्य घटविशेष्यकत्वातिप्रसक्त्या घटविशेष्यकत्वान्वयितावच्छेदकत्वासम्भवेन घटत्वप्रकारकत्वघटविशेष्यकत्वयोः शब्दोपस्थितयोःपरस्परान्वयितावच्छेदकयोः गुरुनये योग्यताबलाच्छाब्दबोधविषयत्वम्। भट्टमते च अन्वयितावच्छेदकीभूतघटत्वप्रकारकत्वस्य शब्दजन्योपस्थित्यर्थं घटत्वप्रकारकादिपदाध्याहारस्यावश्यकत्वात् शब्दोपस्थितयोस्तयोः शाब्दबोधविषयत्वम्। नच भट्टनये मुरारिनये चान्यथाख्यात्यभ्युपगमात् घटाविशेष्यकस्यापि घटत्वप्रकारकज्ञानस्य सम्भवान्न घटविशेष्यकत्वमन्वयितावच्छेदकम्, एवं घटत्वप्रकारकत्वमपि नान्वयितावच्छेदकं, द्रव्यत्वप्रकारकघटविशेष्यकज्ञानेऽतिप्रसक्तेरितिवाच्यम्, घटत्वप्रकारकत्वेऽसति वाधके घटविशेष्यकज्ञानस्य घटत्वप्रकारकत्वनियमात्, घटविशेष्यकत्वेऽसति वाधके घटत्वप्रकारकज्ञानस्य घटविशेष्यकत्वनियमात्। अत एवौत्सर्गिकं धियां प्रामाण्यमिति प्रवादोऽपि सङ्गच्छते। तदर्थश्च यतस्तद्वद्विशेष्यकत्व तत्प्रकारकत्वयोः परस्परं व्याप्यत्वमत एवेत्यर्थः। औत्सर्गिकम्=उत्सर्गसिद्धं, वाधकाभावघटितनियमसिद्धमिति यावत्। तस्माद् यदि वाधकाभावस्तदा गुरुवत्तयोरपि घटत्वप्रकारकज्ञानत्वरूपघटविशेष्यकत्वान्वयितावच्छेदकम्।

(गा०) सम्भवः तथापि तद्धर्मप्रकारकत्वेन सविशेष्यकत्वेन च ज्ञानग्रह निवेशे तद्वारणसम्भवात् उक्तग्रहपर्यन्तानुधावनम् । *विशेष्येति* । वि: प्रकृतप्रामाण्यघटकप्रकारप्रकारकत्वं तेन प्रकारेण ज्ञानस्य ग्राहकत्वं प्रवेश्यमित्यर्थः ।

ननु एवमपि पुरोवर्त्तिनि घटत्वप्रकारकमिदं ज्ञानमित्या शाब्दादिज्ञानस्योक्तप्रकारेण ज्ञानावगाहिनः पुरोवर्त्तिरूपधर्मिणि घटत्व शिष्ट्यानवगाहिनो धर्मिनिष्ठघटत्वादिमत्त्वघटितप्रामाण्यानवगाहित्वा नो दुर्वार एवेत्याशंक्य तादृशज्ञानेनापि धर्मिनिष्ठघटत्वादिवैशिष्ट्यस्य

(प्रभा) इति न बाध इति विभावनीयम् । तद्धर्मप्रकारकत्वनिष्ठप्रकारतानिरूपितत सविशेष्यकत्वनिष्ठप्रकारतानिरूपिता या स्वाश्रयज्ञाननिष्ठा विशेष्यता तन्निरूपकग्र सामग्र्यादिरीत्या निवेशे घटज्ञानं गुण इति वाक्यजन्यबोधस्य तादृशग्रहानन्तर्गतत्व नासम्भव इत्यतो घटत्वप्रकारकं ज्ञानं सविशेष्यकमित्यनुधावनं कृतमित्याशयेनाह तथा उक्तग्रहपर्यन्तानुधावनमिति = घटत्वप्रकारकं ज्ञानं सविशेष्यकमिति ज्ञानपर्यन्ता: निवेशः । सत्यन्तनिवेशेनैव घटज्ञानं गुण इत्यादिकमादाय बाधवारणसम्भवे निरूपि व्यर्थमिति वाच्यम् , तथा सति घटत्वप्रकारकं ज्ञानम् इत्यादिकमादाय बाधस्य दुर्वार

इदं घटत्वप्रकारकं ज्ञानं सविशेष्यकमित्यादिबोधमादाय प्रसक्तस्य बाधस्य परिहारम मिति भावः । विशेष्ये = घटे, घटत्ववतीति यावत् । सप्तम्यर्थो विशेष्यकत्वं तस्य तत्प्रकारकत्वप्रकारतयेति = घटत्वप्रकारकत्वप्रकारतयेत्यर्थः । गादाधर्यां विशे ... इत्यर्थः । यदिति प्रकारकत्वमित्यनेनान्वितम् । प्रकृतप्रामाण्यघटकप्र प्रकारकत्वमिति । प्रकृतं यत् प्रामाण्यं घटत्ववति घटत्वप्रकारकज्ञानत्वरूपम् तद प्रकारतत्प्रकारकत्वमित्यर्थः । तथा च पुरोवर्त्तिनिष्ठविशेष्यतानिरूपिता या प्रकृतप्रा ... निष्ठप्रकारता तदाश्रयप्रकारकत्वमिति पर्यवसितोऽर्थः । तेन प्रकारेणेति । ..., प्रकृतप्रामाण्यघटकप्रकारप्रकारकत्वेन रूपेणेत्यर्थः । साध्ये प्रवेश्यमिति । त पुरोवर्त्तिनिष्ठविशेष्यतानिरूपिता या प्रकृतप्रामाण्यघटकप्रकारनिष्ठप्रकारता तदाश्रयप्र ... [illegible] ... सिद्धम् । एवञ्च घटत्वप्रकारकं ज्ञानं सविशेष्यकमित्यादिवाक्यजन्यशाब्द ... त्वाभावेन यावद्ग्रहान्तर्गतत्वाभावान्न बाधः, तादृशशाब्दबोधस्य घटे ... घटत्वप्रकारकत्वप्रकारकस्वाश्रयज्ञानग्रहरूपत्वाभावादिति भावः ।

अथेदं चिन्त्यते उक्तरीत्या घटे घटत्वप्रकारकं ज्ञानमितिज्ञानस्यैव ग्रहणे सिद्धसा ... घटत्वादिरूपेण घटविशेष्यकत्वघटत्वादिप्रकारकज्ञानत्वावगाहिज्ञानस्यैव प्राम ... त्वात् । तादृशग्रहजनकसामग्र्या नैयायिकमते ...

(दी०) पुरोवर्त्तिनि घटत्वप्रकारकं ज्ञानमिति ज्ञानेन च प्रामाण्यं गृह्यत एव । तत्र तस्य प्रकारत्वं तत्र भासमानवैशिष्ट्यप्रतियोगित्वम् ।

(गा०) तावद्घटकत्वेनावगाहनेन प्रामाण्यग्रहात् न बाध इत्याह पुरोवर्त्तिनीति । प्रदर्शितज्ञानस्य पुरोवर्त्तिनिष्ठघटत्वादिवैशिष्ट्यावगाहितां स्पष्टयितुम् प्रकारतापदार्थं विवृणोति तत्र तस्येति । तत्र भासमानेति । भासमानं यत् तन्निष्ठं वैशिष्ट्यं तत्प्रतियोगित्वमर्थः अत्र वैशिष्ट्येन तत्रेत्यस्य सम्बन्धाभिमानेनाभिमतः । वैशिष्ट्ये भासमानत्वविशेषणात् पुरुष इत्यादिज्ञाने स्वरूपसत्पुरुषादिनिष्ठवैशिष्ट्यप्रतियोगित्वमादाय न दण्डादेः प्रकारता ।

तत्पदार्थेऽपि भासमानत्वं निवेश्यम्, अन्यथा घटो द्रव्यमित्यादौ घटादाविव पटादावपि द्रव्यत्वादेः प्रकारत्वापत्तेः । प्रतियोगित्वमपि भासमानत्वेन विशेष्यम्, अन्यथा दण्डपुरुषसंयोग इत्यादौ दण्डादेः प्रकारत्वापत्तेः ।

नन्वेवं वैशिष्ट्ये भासमानत्वरूपविशेषणस्योक्तव्यावृत्त्यसंगत्या तद्वैयर्थ्यमिति वाच्यम्, प्रतियोगी दण्डःपुरुषश्चे (भासमानवैशिष्ट्यप्रतियोगित्वमित्यत्र वैशिष्ट्ये तन्निष्ठत्वं भासमानत्वञ्चाभिप्रेतम्) त्यादौ दण्डादेः प्रकारतावारणस्य आपाततः तत्प्रयोजनत्वात् ।

(प्रभा) किन्तु घटविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वमेव प्रामाण्यं तस्य च साध्याघटकत्वात् कथं सिद्धसाधनम् । ज्ञाने घटत्ववद्विशेष्यकत्वघटत्वप्रकारकत्वयोर्भानेऽपि तयोः परस्परमवच्छेद्यावच्छेदकभावभानानभ्युपगमात् । तथापि इदं ज्ञानं घटविशेष्यकं घटत्वप्रकारकं चेति शाब्दबोधमादाय बाधवारणाय घटविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वस्यैव निवेश्यतया सिद्धसाधनं दुर्वारमेव नहि तादृश्यपि सामग्री प्रामाण्यग्रहं न जनयतीति नैयायिकैः स्वीकर्त्तुं शक्यते ।

एवमपि = विशेष्यांशे प्रकृतप्रामाण्यघटकप्रकारकप्रकारकत्वेन ज्ञानग्राहकत्वनिवेशेऽपि । उक्तप्रकारेणेति = पुरोवर्त्तिविशेष्यांशे यत्प्रकृतप्रामाण्यघटकघटत्वप्रकारप्रकारकत्वेनेत्यर्थः । ज्ञानावगाहिनः = ज्ञानग्रहस्येत्यर्थः । तथाच पुरोवर्त्तिनि घटत्वप्रकारकमिदं ज्ञानमिति वाक्यजशाब्दबोधस्य विशेष्यीभूतपुरोवर्त्त्यंशे प्रकृतप्रामाण्यघटकघटत्वप्रकारकत्वप्रकारकज्ञानविशेष्यकग्रहरूपत्वात्तादृशयावद्ग्रहान्तर्गततया बाध इति भावः । दीधितौ तत्रेति=घटे इत्यर्थः । तस्य = घटत्वस्य । तत्र भासमानेति=पुरोवर्त्तिनि भासमानेत्यर्थः । स्वरूपसदिति = अज्ञायमानेत्यर्थः । तत्पदार्थेऽपि = तत्रेतिप्रकृतिभूततत्पदार्थे इत्यर्थः । दण्डपुरुषसंयोग इति । अत्र समूहालम्बनज्ञाने न क्वचित्कस्य चिद् ... भासमानत्वविशेषणोपादाने । उक्तव्या-

(दी०) तच्च तत्र वैशिष्ट्यमित्याह, दुर्ग्रहमिति ।

(गा०) यद्यपि एवमपि संयोगप्रतियोगी दण्डः पुरुषश्चेत्यादौ दण्डे प्रकारत्वं दुर्वारम्, तथापि स्वविषयतद्धर्मिनिष्ठं यत् संसर्गविधया स्वविषयी वैशिष्ट्यं तदीयसंसर्गविधया स्वविषयो यत् तदीयप्रतियोगित्वं तदेव स्व तद्धर्म्यंशे प्रकारत्वमिति विवक्षया न दोषः । प्रतियोगितासम्बन्धेन पुरुषादिनि संयोगादिप्रकारकदण्डादिविशेष्यकज्ञाने दण्डादेः प्रकारतावारणाय वैशिष्ट्य संसर्गताख्यविषयताविशेषनिवेशः ।

स्वनिष्ठसंयोगादिप्रतियोगित्वसम्बन्धेन दण्डादौ पुरुषादिप्रकारके पु दण्ड इत्यादिज्ञाने दण्डादेः प्रकारतावारणाय प्रतियोगित्वस्यापि संस संसर्गविधया विषयत्वनिवेशनम् । उक्तपरम्परासम्बन्धावगाहिज्ञाने संसर्गत भासमानवैशिष्ट्यस्य सम्बन्धतया न प्रतियोगित्वभानमिति नातिप्रसङ्गः संसर्गीयप्रतियोगित्वानुयोगित्वयोरपि विशिष्टधीविषयत्वमिति मतेनेदम् । ए टीकाकारानुमतभ्रमे विशेष्यानुयोगिकविशेषणप्रतियोगिकालीकवैशिष्ट्यभा मवलम्ब्येदम् । अन्यथा भ्रमप्रकारासंग्रहात् । *तच्चेति* । तादृशप्रकारत्वं चेत्यर्थः

(प्रभा) भासमानत्वविशेषणेनैव वारणादिति भावः । एवमपि = वैशिष्ट्ये भासमानत्वविशे षणोपादानेऽपीत्यर्थः । स्वविषयेति = स्वं दण्डी पुरुष इति ज्ञानं तद्विशेष्यीभूतो यो धर्म तन्निष्ठं यद् वैशिष्ट्यमित्यनेनान्वयः । संसर्गविधयेति = संसर्गतयेत्यर्थः । तदीयेति = वैशिष्ट्यीयेत्यर्थः । स्वीयम् = ज्ञानीयम् । पुरुषादिविशेष्यकज्ञाने इति = प्रतियोगितासम्बन्धे पुरुषसंयोगवान् दण्ड इति ज्ञाने इत्यर्थः । न प्रतियोगित्वभानमिति । अपितु पुरुषसंसर्ग त्वेन भानमितिभावः । उक्तपरम्परासम्बन्धेनावगाहिज्ञाने = स्वनिष्ठसंयोगादिप्रतियोगिता सम्बन्धेन पुरुषे दण्ड इत्यादिज्ञाने इत्यर्थः । नातिप्रसङ्गः = न दण्डादेः प्रकारत्वापत्तिः मतेनेदमिति । अन्यथा कथमपि भासमानवैशिष्ट्यप्रतियोगित्वं न सिद्ध्येत् । प्रतियोगित्वे भासमानत्वविशेषणस्य सत्त्वात् प्रतियोगित्वस्य ज्ञाने भानानङ्गीकारमते तस्य च भास मानत्वाभावादिति भावः । भ्रमप्रकारासंग्रहादिति । ह्रदो वह्निमान् इदं रजतम् इदं ज्ञानभ्रमा इत्यादौ यः प्रकारस्तस्य प्रकारत्वानापत्तेः ।

न च संयोगप्रतियोगी दण्डः पुरुषश्चेत्याकारकज्ञाने दण्डादेः प्रकारत्वापत्तिः भासमान- वैशिष्ट्यप्रतियोगित्वस्य भासमानतया तस्य दण्डे सत्त्वादिति वाच्यम्, तज्ज्ञानविशिष्टप्रति- योगित्वं तज्ज्ञानप्रकारत्वम् प्रतियोगित्वे तज्ज्ञानवैशिष्ट्यं स्वनिरूपितविषयतावत्त्व-स्वविशिष्ट- सम्बन्धाभिन्नवैशिष्ट्यनिष्ठविषयतानिरूपितसंसर्गत्वाभिन्नविषयतावत्त्वोभयसम्बन्धेन । स्ववै- शिष्ट्यं वैशिष्ट्यविषयतायां स्वनिरूपितत्वस्वविषयीभूतधर्मिवृत्तित्वोभयसम्बन्धेनेत्यस्य विवक्षणीयत्वात् । अत एव संयोगप्रतियोगी दण्डः पुरुषश्चेत्याकारकज्ञानीयसंयोगादि- विषयतायाः संसर्गतानात्मकत्वेन तादृशज्ञानीयधर्मिवृत्तित्वाभावात् ...

(गा०) वैशिष्ट्याग्रहे = धर्म्युपरागेण तद्धर्मिप्रतियोगित्वोपरागेण च वैशिष्ट्याज्ञान इत्यर्थः। ईदृशप्रकारताघटितस्य तदंशे तत्प्रकारकत्वस्य तन्निष्ठवैशिष्ट्यनिरूपिततत्तद्धर्मिनिष्ठप्रतियोगित्वावगाहितारूपस्य भाने तद्घटकतया तद्धर्मिनिष्ठप्रकारवैशिष्ट्यभानमावश्यकमितिप्रामाण्यभाने न किंचिदवशिष्यत इति भावः।

यद्यपि एवं प्रामाण्यघटकसकलपदार्थभानेऽपि विलक्षणविशेषणविशेष्यभावापन्नविशेष्यप्रकारादिरूपपदार्थघटितं तद्वति तत्प्रकारकत्वरूपविशिष्टप्रामाण्यं न भातं, एवं भ्रमे विशेष्यानुयोगिकालीकवैशिष्ट्यावगाहितास्वीकारे तत्साधारण्यवारणाय संसर्गे सत्त्वमधिकं प्रामाण्यशरीरे अवश्यमेव निवे-

---

(प्रभा) प्रतियोगित्वमादाय दण्डादेः प्रकारतावारणाय वैशिष्ट्यनिष्ठविषयतायाः सम्बन्धमध्ये संसर्गत्वाभिन्नत्वेन निवेशः। स्वनिष्ठसंयोगप्रतियोगित्वसम्बन्धेन पुरुषे दण्ड इत्याकारकज्ञाने दण्डादेः प्रकारत्वं स्यात् पुरुषसंयोगप्रतियोगित्वस्य दण्डे सत्त्वादतो धर्मिनिष्ठसंसर्गत्वेन प्रतियोगित्वविषयतायाः पूर्वोक्तसम्बन्धमध्ये निवेशः। उक्तस्थले तु धर्मिनिष्ठसम्बन्धे प्रतियोगित्वादेस्संसर्गत्वान्न दोषः। **धर्म्युपरागेणेति**। उपरागः सम्बन्धः। **वैशिष्ट्याज्ञाने इति** घटादिरूपधर्म्यनुयोगिकत्वविशिष्टघटत्वादिरूपतत्तद्धर्मप्रतियोगिकत्वविशिष्टसंयोगादिसम्बन्धाज्ञाने इत्यर्थः। **ईदृशप्रकारताघटितस्येति**। पुरोवर्त्तिनि भासमानवैशिष्ट्यप्रतियोगित्वघटितस्येत्यर्थः। तद्धर्म्यनुयोगिकसम्बन्धनिरूपिततद्धर्मनिष्ठप्रतियोगित्वरूपप्रकारताघटितस्येति यावत्। **तदंशे** = धर्म्यंशे, घटादौ इति यावत्। **तत्प्रकारकत्वस्येति**=घटत्वप्रकारकत्वस्येत्यर्थः। **तद्घटकतयेति**=तादृशस्य तदंशे तत्प्रकारकत्वस्य घटकतयेत्यर्थः **तद्धर्मिनिष्ठप्रकारवैशिष्ट्यभानमिति**। पुरोवर्त्तिरूपधर्मिनिष्ठं यत् प्रकारीभूतघटत्ववैशिष्ट्यं तद्भानमेवेत्यर्थः। एवंच पुरोवर्त्तिनि प्रकारवैशिष्ट्यभानमेव प्रमात्वभानम् तथा च पुरोवर्त्तिनि घटत्वादिप्रकारकं ज्ञानमिति वाक्यजशाब्दबोधस्य यावदन्तर्गतत्वेऽ। ततःप्रामाण्यग्रहान्न बाध इति भावः।

एवमिति = पूर्वोक्तरीत्येत्यर्थः। **विलक्षणेति** = त्वदुक्तपुरोवर्त्तिरूपधर्म्यनुयोगिकसंसर्गप्रतियोगित्वापेक्षया भिन्नेत्यर्थः। **तद्वति तत्प्रकारकत्वरूपेति**=तद्वद्विशेष्यकत्वावच्छिन्नत्वविशिष्टतत्प्रकारकत्वज्ञानत्वरूपेत्यर्थः। ननु न तावदेतादृशप्रमात्वमङ्गीक्रियतेऽस्माभिः किन्तु तद्धर्म्यनुयोगिकसंसर्गनिरूपिततत्तद्धर्मनिष्ठप्रतियोगित्वरूपमेव तच्च प्रमात्वम्भातमेवेति नानुपपत्तिरित्यत आह **एवमिति**। त्वदुक्तप्रमात्वस्वीकारे, बाधवारणासम्भव इति योजना। **भ्रमे** = इदं रजतमित्यादौ। **विशेष्यानुयोगिकालीकवैशिष्ट्यावगाहितास्वीकारे** = इदन्त्वावच्छिन्नानुयोगिताकत्वविशिष्टसमवायादिसंसर्गप्रतियोगित्वावगाहितास्वीकारे इत्यर्थः। तत्साधारण्यवारणाय = भ्रमसाधारण्यवारणायेत्यर्थः। त्वदुक्तप्रमात्वस्येति शेषः।

(गा०) शनीयम् । तथा च पुरोवर्त्तिनि घटत्वप्रकारकमिदमित्यादि
[illegible]नवगाहनाद् बाधवारणासम्भवः ।

एतेन विशेष्यनिष्ठं यद् वैशिष्ट्यं तद्धर्मनिष्ठप्रतियोगितावगाहितारूपप्र
ण्यमेव तत्प्रकारकप्रवृत्त्यौपयिकम्, तादृशस्यैव पक्षतेत्युक्तावपि न प्रतीका

एवं यदि धर्मिणि तद्वैशिष्ट्यावगाहित्वं तत्प्रमात्वं तच्च विशेष
[illegible]प्रकारकत्वशरीरान्तर्भूतं तदा पर्यवसितम्, प्रामाण्यस्य स्वतोग्राह्यत्वविवा
[illegible]दृशस्य तद्वति तत्प्रकारकत्वस्य ग्राहकसामग्र्या न्यायमतेऽपि निय
प्रामाण्यग्रहात्, तथापि इदन्त्वादिना भासमानविशेष्यांशे घटत्वादिप्रकार
तत्प्रमात्वम् न्यायमतेऽपि अनुव्यवसायेनावश्यं गृह्यते ।

(प्र०ा) एतेनेति = संसर्गे सत्त्वनिवेशेन बाधवारणासम्भवेनेत्यर्थः । न प्रतीकार इत
[illegible]न्वयः । विशेष्यनिष्ठमिति = विशेष्यीभूतघटपटादिपुरोवर्त्तिनिष्ठमित्यर्थः । यद्वै
[illegible]मिति = समवायादिरूपसंसर्ग इत्यर्थः । तदीयेति = तादृशसंसर्गनिरूपितेत्यर्थ
[illegible]प्रतियोगित्वेऽन्वयः । तद्धर्मनिष्ठेति = घटत्वादिनिष्ठेत्यर्थः । प्रामाण्यमेवे
[illegible] घटत्वयद्विशेष्यकत्वावच्छिन्नत्वविशिष्टघटत्वप्रकारकत्वरूपप्रामाण्यव्यवच्छेद
[illegible]प्रकारकप्रवृत्त्यौपयिकम् = घटत्वप्रकारकप्रवृत्तिप्रयोजकमित्यर्थः । तादृशप्रवृत्तिज
[illegible] इत्यर्थः । तादृशस्यैव = तद्धर्म्यनुयोगिकसंसर्गनिरूपिततद्धर्मनि
प्र[illegible]गाहित्वरूपप्रामाण्यस्यैवेत्यर्थः । एवकारेण पूर्वोक्तप्रमात्वव्यवच्छेदः । त
[illegible]ग्रहस्यैव प्रवर्त्तकतया तस्यैव स्वतस्त्वपरतस्त्वविवादास्पदतया यादृशप्रमा
[illegible]प्रति कारणन्तादृशं प्रमात्वमेव पक्षीकृत्य स्वतोग्राह्यत्वं साध्यमेवंचास्मन्मतसि
प्रमा[illegible]स्यैव प्रवृत्तिजनकतया तस्यैव पक्षत्वम् । तथाच तस्य तादृशशाब्दबोधेन निश्च
[illegible] इति निरस्तमितिभावः ।

ननु [illegible]लक्षणत्वस्वीकारे सत्त्वभानन्नावश्यकमिति नायं दोषः, अतो दोषान्त
[illegible] एवं यदीत्यादिना । यदीत्यस्य तत्प्रमात्वमित्यनेन सम्बन्धः । धर्मिणि तद्वैशि
ष्ट्यावगाहित्वमिति = धर्म्यनुयोगिकसंसर्गप्रतियोगित्वावगाहित्वमित्यर्थः । तत्
प्रमात्वमिति = प्रवृत्तिप्रयोजकं प्रमात्वम् । तच्च = धर्म्यनुयोगिकसंसर्गप्रतियोगित्वावगा
[illegible] चेत्यर्थः । विशेष्यांशे घटे तत्प्रकारकत्वशरीरान्तर्भूतमिति । तत्र भासमा
[illegible]प्रतियोगित्वस्यैव प्रकारत्वरूपतया घटांशे घटत्वप्रकारकत्वशरीरान्तर्गतमित्यर्थ
[illegible] धर्म्यनुयोगिकसंसर्गप्रतियोगित्वरूपमेव प्रवृत्तिप्रयोजकं प्रमात्वं स्यात् त
[illegible]प्रमात्वस्य तद्वति तत्प्रकारकत्वरूपप्रमात्वान्तर्गततयेत्यर्थः । पर्यवसितमिति = अ
[illegible]र्थः । स्वतोग्राह्यत्वविवादेनेति । पर्यवसितमिति पूर्वेण सम्बन्धः । स्वतोग्राह्यत्वविवाद
[illegible]मेव (समाप्ति रेव) स्यादितिभावः । अत्र हेतुमाह नियमतः प्रामाण्यग्रहादिति
[illegible]

(दी०) तत्र ! तत्र भासमानवैशिष्ट्ये त्यत्र तत्रेत्यस्य भासमाने
सम्बन्धात्, नतु वैशिष्ट्येनापि। अन्यथा तदभाववति तत्प्रकारकत्वमप्रामा
न ज्ञायेत, तदभावग्रहे तद्वैशिष्ट्यस्य दुर्ग्रहत्वात्, एवमेकत्र विरुद्धोभयप्रकारकत्वस
संशयत्वमपि।

(गा०) तज्ज्ञानं चेदुक्तयुक्त्या प्रामाण्यभाननियतं तदा नैयायिकान
प्रामाण्यग्रहस्य स्वतस्त्वखण्डनाय विचारारम्भणं महासाहसिकतेति मन्वा
विशेष्ये तत्प्रकारकत्वस्य शरीरे प्रामाण्यान्तर्भावनिर्वाहकं तत्रेत्यस
संसर्गान्वयित्वमसहमानस्तदेव दूषयति *तन्नेत्यादिना*। *भानेनैव*। भानं विषय
तथाच तद्धर्मनिरूपिता या वैशिष्ट्यस्य संसर्गतेत्येवंरीत्यैव निवेशात् वैशि
ष्ट्यांशे तन्निष्ठत्वं न तदंशे तत्प्रकारकत्वघटकमिति तज्ज्ञानेऽपि प्रामाण्यघ
कस्य वैशिष्ट्ये धर्मिनिष्ठत्वस्याभानात् नोक्तज्ञानानाम् प्रामाण्यविषयकत्वमि
भावः। *अन्यथा*=तत्र तत्प्रकारकत्वग्रहे तत्र तद्वैशिष्ट्यावश्यम्भाने।
ज्ञायेत=अनाहार्यनिश्चयेन न कदापि विषयीक्रियेत। *तदभावेति*=तदभाववत्त्व
गृह्यमाणे तद्वैशिष्ट्यस्यानाहार्यज्ञानागोचरत्वादित्यर्थः। निर्वह्निर्वह्निमा
त्यादिवद् वह्न्यभाववति वह्निसम्बन्ध इत्यादिज्ञानानामाहार्यत्वनियमादि
भावः।

(प्रभा) स्वतोग्राह्यं तर्हि तादृशप्रमात्वस्य विशेष्ये तत्प्रकारकत्वशरीरान्तर्गततया न्यायमतेऽ
नियमतो ग्रहे नैयायिकमीमांसकयोर्विवाद एव न स्यादितिभावः।

महासाहसिकतेति=अनुचितमित्यर्थः। स्वतोग्राह्यत्वाभावरूपनैयायिकसिद्धा
एव व्याहन्येत इति भावः। तस्य तद्वति तत्प्रकारकत्वशरीरान्तर्वर्तितया स्वतोग्राह्यत्वा
वरूपनैयायिकसिद्धान्तो व्याहन्येतेति, अतो धर्मिनिष्ठत्वघटितस्य तस्य न प्रमात्वरूपताऽपि
संसर्गतानिष्ठतद्धर्मिनिरूपितत्वघटितस्यैव, नोक्तज्ञानानामुक्तप्रामाण्यावगाहित्वमि
समुदितार्थः।

अनाहार्य्यज्ञानागोचरत्वादिति। अयंभावः, यथा स्वविरोधिधर्मधर्मितावच्छेदक
स्वप्रकारकं ज्ञानमाहार्य्यम् निर्वह्निर्वह्निमानित्यादिकम् तथा स्वाभाववत्तया गृह्यमाणनिष्ठ
स्वसम्बन्धावगाहिज्ञानमप्याहार्य्यम् यथा निर्वह्नौ वह्निरिति। एवञ्च तद्धर्मिनिरूपितसंसर्गत
प्रतियोगित्वस्य प्रकारत्वे तादृशप्रतियोगित्वावगाहित्वस्य प्रमात्वपक्षे इदंज्ञानम्भ्रम इत्यप्रम
त्वप्रकारकज्ञानस्य तदभाववति तत्प्रकारकत्वस्य नाहार्यत्वम्। एवञ्चेदं ज्ञानंभ्रम इति ज्ञा
ज्ञानस्य स्वविषयविषयकत्वनियमेन रजतादिरूपधर्मिनिरूपितसंसर्गताप्रतियोगित्वरूपप्रका
त्वावगाहनेऽपि स्वाभाववत्तया गृह्यमाणनिष्ठस्वैशिष्ट्यानवगाहनात् तत्प्रकारकत्वघट

) वस्तुतस्तत्प्रकारत्वादिकं स्वरूपसम्बन्धविशेष इति वक्ष्यामः।

केचित्-अस्ति कस्यां चित् सामग्र्यां विषयग्रहनियमः कस्यांचिन्नेति [।

) संशयत्वमपि न ज्ञायेत, न निश्चयेनावगाह्येतेत्यन्वयः। एकधर्मि- य प्रकारकत्वस्य भवन्मते एकधर्मिणि विरुद्धोभयवैशिष्ट्यघटि- न च विरुद्धोभयवैशिष्ट्यस्य एकधर्मिनिष्ठतयानवगाहनात् तद्वैशिष्ट्यग्रहे तद्विरुद्धवैशिष्ट्यावगाहिनिश्चयस्य विरोधि- वः। एवं तद्धर्मिनिरूपितत्वस्य वैशिष्ट्यविषयतायामनिवेशे पवान् पट इत्यादिज्ञाने तद्विषयपटाद्यंशे द्रव्यत्वादेःप्रकारत्वं बोध्यम्।

विषया प्रतियोगित्वानुयोगित्वयोर्विशिष्टबुद्धौ विलक्षण- पेक्ष्य प्रकारत्वस्य विलक्षणस्वरूपताभ्युपगम एवोचित इत्याश- इति। प्रकारत्वादिकमित्यादिना विशेष्यत्वपरिग्रहः। स्वरूपेति। योर्ज्ञानस्य स्वरूपानतिरिक्तः सम्बन्धविशेष इत्यर्थः।

क्षे मिश्रोक्तं समाधानं दूषयितुमुपन्यस्यति *अत्रेति*। *कस्यांचित्* = अनुव्यवसायादिसामग्र्याम्। *विषयग्रहनियमः* = ज्ञानग्रहे या विषयस्यावश्यंग्रहः। *कस्यांचित्* = शाब्दबोधादिसामग्र्याम्। नियम इत्यनुषज्यते। ज्ञानपदादितो विषयीभूतघटाद्यवि-

---

नास्ति स्वाभाववत्तया गृह्यमाणनिष्ठस्वसम्बन्धभानं येनाहार्यता सम्भाव्येत्। निष्ठसंसर्गप्रतियोगित्वस्य प्रकारतास्वीकर्तृमते तु इदं ज्ञानमप्रमेति ज्ञाने ने तद्घटकतया धर्मिनिष्ठतद्वैशिष्ट्यभानादाहार्यापत्तिः स्यादिति भावः।

क्षे इति = घटत्वप्रकारकं ज्ञानं सविशेष्यकमितिवाक्यजशाब्द- ो दुर्वार इति पूर्वपक्षे इत्यर्थः। मिश्रोक्तम् = पक्षधरमिश्रोक्तमित्यर्थः।

········ज्ञानमपि न गृह्णातीति दीधितिः। तथाच या सामग्री र्वती ज्ञानमपि न गृह्णाति स्वाश्रयज्ञानविषयकग्रहजनकतादृशसामग्रीजन्य- वं साध्यपर्यवसितम्। एवंच घटत्वप्रकारकं ज्ञानं सविशेष्यकम् इत्यादि- विषयमविषयीकुर्वत्या ज्ञानग्रहजनकतया साध्यघटकत्वासम्भवेन न दाय बाधभीरिति तात्पर्यम्।

ामग्री विषयं विषयीकुर्वती ज्ञानं गृह्णातीत्येव लाघवादुच्यतां किन्नन्द्र- चेन्न? घटत्वप्रकारकं ज्ञानं सविशेष्यकमितिशाब्दसामग्र्यास्तथात्वेन स्य तादवस्थ्यात्। तद्विशेषणतयेति = व्यवसायात्मकप्रथमज्ञानविशेष-

(दी०) तथा च या सामग्री विषयमविषयीकुर्वती ज्ञानमपि न गृह्णाति,

(गा०) शेषितस्यापि तज्ज्ञानस्य शाब्दादिज्ञानोत्पत्तेरितिभावः। *या सामग्रीति*=स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकयत्सामग्रीघटकनिखिलकारणम्। *विषयमिति*=विषयितासम्बन्धेन किञ्चिदनवच्छिन्नविषयिताशालिग्रहाजनकमित्यर्थः।

एतेन 'यथाश्रुते ग्राह्यज्ञानस्यापि क्वचिज् ज्ञाने विषयतया सामान्यतो विषयाविषयकज्ञानग्रहाप्रसिद्धिः। ग्राह्यज्ञानविषयाविषयकज्ञानग्रहविवक्षणेऽपि

(प्रभा) ज्ञानवित्तिवेद्यो विषय इति सिद्धान्तात्। **स्वाश्रयविषयक...निखिलकारण-मिति।** प्रमात्वाश्रयविषयको यो ग्रहस्तदुत्पत्तिप्रयोजिका या सामग्री तद्घटकीभूतं यन्निखिल-कारणमित्यर्थः। **विषयितासम्बन्धेन...ग्रहाजनकमिति**=विषयित्वसम्बन्धावच्छिन्ना या किञ्चिन्निष्ठावच्छेदकता तदनिरूपकज्ञाननिष्ठविषयताशालिग्रहाजनकमित्यर्थः। तथाच विषयित्व-सम्बन्धावच्छिन्नकिञ्चिन्निष्ठावच्छेदकत्वानिरूपकज्ञाननिष्ठविषयताशालिग्रहाजनकस्वाश्रयविषय-कग्रहोत्पत्तिप्रयोजकयादृशसामग्रीघटकनिखिलकारणं तादृशसामग्रीजन्ययावद्ग्रहविषयत्वं साध्यम्पर्यवसितम्। इत्थञ्च घटत्वप्रकारकं ज्ञानं सविशेष्यकमित्यादिशाब्दसा-मग्र्याः निखिलकारणमध्ये ज्ञानोपस्थितिरूपमप्येकं कारणम्प्रविष्टन्तच्च विषयमविषयीकुर्वदपि ज्ञानग्रहजनकमिति तद्घटितशाब्दसामग्री न साध्यघटकीभूतेति न तामादाय बाधावसर इति। अनुव्यवसायसामग्रीघटकसकलकारणं हि विषयमविषयीकुर्वदेव ज्ञानग्रहजनकमिति तत्सामग्रीमादाय समन्वयोपि बोध्य इति। ज्ञाननिष्ठविषयताया ज्ञानत्वावच्छिन्नत्वेन किञ्चिद-नवच्छिन्नज्ञानविषयताशालिग्रहाप्रसिद्ध्या साध्याप्रसिद्धिरिति तद्वारणाय विषयितासम्बन्धे-नेत्युक्तम्।

विषयमविषयीकुर्वद्ज्ञानमपि न गृह्णातीति यथाश्रुतशब्दलभ्यस्य विषयाविषयकज्ञानग्रहा-जनकत्वार्थकस्य परित्यागे बीजमुपदर्शयति **एतेनेति।** विषयितासम्बन्धेन किञ्चिदनवच्छिन्न-ज्ञाननिष्ठविषयताशालिग्रहाजनकत्वमित्यर्थकरणेनेत्यर्थः। **यथाश्रुते** विषयाविषयकज्ञान-ग्रहाजनकत्वरूपार्थस्वीकारे। **ग्राह्यज्ञानस्यापि**=ग्राह्यं यज्ज्ञानन्तस्यापीत्यर्थः। **क्वचिज्ज्ञाने**=ज्ञानविषयकज्ञाने इत्यर्थः। ज्ञानविषयकशाब्दबोधादाविति यावत्। **विषयाविषयकज्ञान-ग्रहाप्रसिद्धिरिति**=विषयोऽविषयो यस्य एतादृशो यो ज्ञानग्रहस्तदप्रसिद्धिः, ज्ञानग्रहे विषयी-भूतस्य ज्ञानस्यापि विषयत्वेन ज्ञानरूपविषयविषयकत्वादितिभावः। तथाच विषयाविषयक-ज्ञानग्रहाजनकं स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकंयत्सामग्रीघटकनिखिलकारणं तादृशसाम-ग्रीजन्ययावद्ग्रहविषयत्वरूपं साध्यं यथाश्रुते पर्यवस्यति। एवञ्च साध्याप्रसिद्धिरूपो दोषःस्यादि-तिभावः। **ग्राह्यज्ञानविषयाविषयकेति**=ग्राह्यज्ञानस्य यो विषयो घटादिः सोऽविषयो यस्यैवम्भूतो यो ज्ञानविषयको ग्रहस्तद्विवक्षणेऽपीत्यर्थः। तथाच न साध्याप्रसिद्धिः। ग्राह्यं

(गा० ज्ञानस्य स्वविषयतानियमेन गुरुमते तदप्रसिद्धिरेव, तज्ज्ञानग्र तज्ज्ञानविषयस्य तस्यावश्यंभावात् ।

तत्प्रामाण्यघटकविषयाविषयकत्वविवक्षणेऽपि मेयत्वसर्वत्वादिप्रकारक ज्ञानीयप्रामाण्यघटकतायाः केवलान्वयित्वेन तत्पक्षके दुर्वारैवाप्रसिद्धिरित्यादिकम् परास्तम् । घटज्ञानमित्यादिशाब्दबोधादिसामग्रीघटकज्ञानपदोपस्थित्यादेर्निरुक्तनिखिलकारणान्तर्गतस्य विषयानवच्छिन्नविषयकग्रहम् प्रत्यजनकतया तादृशसामग्रीव्यावृत्तिः । घटपदोपस्थित्यादेर्ज्ञानभानप्रयोजकस्

(प्रभा) ज्ञानस्येत्यादिना । गुरुमते = प्रभाकरमते इत्यर्थः । ननु भट्टमते, तेषां ग्रहस्य स्वविषयतानियमाभावेन पूर्वोक्तरीत्या प्रसिद्धेः । तथाच गुरुमते ग्राह्यज्ञानविषयो ग्राह्यज्ञानमेव तद्विषयकत्वमेव ज्ञानग्रहस्य नतु तदविषयकत्वमिति ग्राह्यज्ञानविषयाविषयकज्ञानग्रहाप्रसिद्धया गुरुमते साध्याप्रसिद्धिर्दुर्वारैवेति भावः । तज्ज्ञानग्रहे = तज्ज्ञानविषयकशाब्दबोधे इत्यर्थः । घटज्ञानविषयकशाब्दबोधे इति यावत् । तज्ज्ञानविषयस्य = घटज्ञानविषयस्य तस्य=घटज्ञानस्य ।

तत्प्रामाण्यघटकविवक्षणेऽपि = तत्प्रामाण्यघटकीभूता ये विषया घटघटत्वादयस्तावत्सकलाविषयकत्वविवक्षणेऽपीत्यर्थः । तथाच साध्याप्रसिद्धिस्तथाहि तत्प्रामाण्यघटत्ववति घटत्वप्रकारकज्ञानत्वं तद्घटकीभूता विषया घटघटत्वादयस्तदविषयो यो ग्रहस्तद्विषयानुपरक्तज्ञानग्रहरूपः शाब्दबोधस्तदजनकमथच स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकानुव्यवसायादिसामग्रीघटकं निखिलं कारणं तज्जन्यग्रहविषयत्वस्य प्रमात्वे सत्वात्समन्वयः घटत्वप्रकारकं ज्ञानं सविशेष्यकमित्यादिशाब्दसामग्र्यास्तु तत्प्रामाण्यघटकीभूतघटघटत्वाद्यविषयको ज्ञानग्रहः शुद्धज्ञानविषयशाब्दबोधस्तज्जनकतया अजनकत्वाभावेन व्यावृत्तिः स्पष्टमिति । अत्र तत्प्रामाण्यघटकत्वं विषयत्वं च ज्ञानत्वे वर्त्तते, तादृशज्ञानत्वस्य शुद्धज्ञानविषयकग्रहात्मकशाब्दबोधेऽपि भानमस्तीति तत्प्रामाण्यघटकविषयाविषयकग्रहाप्रसिद्धिः स्यात् यदि यावत्पदं न स्यात्तदा, किन्तु यावत्पदस्य निविष्टत्वेन प्रसिद्धिसम्भवः, ज्ञानविषयकशाब्दबोधे ज्ञानत्वस्य भानेऽपि तत्प्रामाण्यघटकसकलपदार्थाभानात् इति । मेयत्वसर्वत्वादिप्रकारकघटकतायां इति । मेयत्वसर्वत्वप्रकारकं यज्ज्ञानं मेयं सर्वमित्याकारकं तदीयन्मेयत्ववति मेयत्वप्रकारकज्ञानत्वमेवं सर्वत्ववति सर्वत्वप्रकारकज्ञानत्वं तद्घटकतायाः इत्यर्थः । केवलान्वयित्वेनेति । तथाचेदृशप्रामाण्यघटको यो मेयरूपो विषयस्तदविषयकग्रहाप्रसिद्धेः, सर्वस्यैव ग्रहस्य मेयविषयकत्वात् । तत्पक्षके = तादृशप्रामाण्यपक्षके मेयत्ववति मेयत्वप्रकारकज्ञानत्वरूपप्रामाण्यपक्षके इति यावत् । ननु यद्यद्रूपावच्छिन्नस्य यस्य यस्य तत्प्रामाण्यघटकता तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयताश्रयाविषयकत्वविवक्षणे प्रसिद्धिः सम्भवति इति चेन्न, घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यघटकघटत्वावच्छिन्नस्य घटस्यास्ति नतु घटत्वस्य तस्य निरवच्छिन्नत्वात् । तथाच तादृशघटत्व

(गा०) च ज्ञानांशे विषयान्वयबोधजनकयोग्यताज्ञानादेरुक्तसामग्रीघटककतिपयकारणस्य विषयानवच्छिन्नज्ञानाग्राहकत्वात् निखिलकारणोपादानम्। अनुव्यवसायादिसामग्रीघटकं च न किञ्चिदपि तादृशं कारणमस्ति यद् विषयरूपविशेषणानवच्छिन्नं ज्ञानं गृह्णाति। व्यवसायमनस्संयुक्तसमवायादेः विषयोपरागेणैव ज्ञानादिभासकत्वनियमात्।

नचात्ममनस्संयोगादिरपि तादृशसामग्रीघटकं कारणम्, तच्च विषयानवच्छिन्नज्ञानगोचरस्मृत्यादिजनकमिति कुतस्तादृशसामग्रीसम्भव इति वाच्यम्? ज्ञानभानप्रयोजकनिखिलकारणस्य विवक्षणीयत्वात्, आत्मादेश्च कार्यतावच्छेदककोटौ ज्ञानविषयत्वाप्रवेशेन तस्यातथात्वात्।

(प्रभा) अयंभावः, यादृशसामग्रीघटकं कारणं विषयितासम्बन्धेन किञ्चिदनवच्छिन्नज्ञाननिष्ठविषयताशालिग्रहाजनकं तादृशसामग्रीजन्ययावद्ग्रहविषयत्वस्य साध्यत्वे घटज्ञानशाब्दसामग्रीवारणं न स्यात् तादृशसामग्रीघटकघटपदोपस्थितिरूपकिञ्चित्कारणस्य एवं ज्ञानभानप्रयोजकस्य ज्ञानांशे विषयान्वयबोधजनकयोग्यताज्ञानरूपकिञ्चित्कारणस्य च विषयानवच्छिन्नज्ञानविषयकग्रहाजनकत्वादिति भावः। तथाच निखिलपदानुपादाने घटत्वप्रकारज्ञानं सविशेष्यकमित्याकारकशाब्दबोधस्य साध्यघटकतादृशयावद्ग्रहान्तर्गततया तज्जन्यग्रहविषयत्वस्य प्रभात्वेऽसत्त्वाद् बाध इतिभावः। अनुव्यवसायादिसामग्रीसंग्रहं दर्शयति अनुव्यवसायादिसामग्रीत्यादिना।

एवं साध्यस्वरूपस्वीकारेऽपि अनुव्यवसायप्रयोजकसामग्र्याःसाध्यघटकतया असंग्रहेण पुनःसाध्यप्रसिद्धिमाशङ्कते नचेत्यादिना। तादृशसामग्रीघटकम् = स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकसामग्रीघटकमित्यर्थः। तच्च = आत्ममनस्संयोगरूपतादृशसामग्रीघटककारणमित्यर्थः। विषयानवच्छिन्नेत्यादि = विषयितासम्बन्धेन विषयानवच्छिन्नयज्ज्ञानं तद्विषयकस्मृतिजनकमित्यर्थः। कुतस्तादृशसामग्रीसम्भव इति। अनुव्यवसायादिसामग्रीणामपि साध्यघटकतया संग्रहो न सम्भवति, अनुव्यवसायादिसामग्रीघटकनिखिलकारणान्तर्गतात्ममनःसंयोगादिरूपकारणस्य विषयितासंसर्गेण विषयानवच्छिन्नज्ञाननिष्ठविषयताशालिग्रहाजनकत्वादितिभावः। ज्ञानभानप्रयोजकेति। स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकयादृशसामग्रीघटकज्ञानभानप्रयोजकनिखिलकारणं विषयितासम्बन्धेन विषयानवच्छिन्नज्ञानविषयकग्रहाजनकन्तादृशसामग्रीजन्ययावद्ग्रहविषयत्वरूपसाध्यस्य विवक्षणीयत्वादिति भावः। तथाच निखिलकारणे ज्ञानभानप्रयोजकत्वविशेषणेनानुव्यवसायसामग्रीसंग्रहस्सम्भवति, आत्ममनस्संयोगादेः ज्ञानभानप्रयोजकत्वाभावेन ज्ञानभानप्रयोजकनिखिलकारणपदेन तदसंग्रहात् तदतिरिक्तज्ञानभानप्रयोजकनिखिलकारणानां विषयानवच्छिन्नज्ञानग्रहाजनकत्वात्।

(गा०) नचात्मादीनामपि गुरुमते ज्ञानभानप्रयोजकत्वमव्याहतम्, तन्मते ज्ञानोत्पादकसामग्र्या एव तत्त्वात्, आत्मादीनामपि तत्सामग्र्यन्तर्गतत्वादिति वाच्यम् ? तन्मते तज्ज्ञानप्रागभावमात्रस्य तज्ज्ञानभाने प्रयोजकत्वोपगमात्, आत्मादीनामतथात्वात्। आत्मादिजन्यज्ञानान्तरे तज्जन्यज्ञानान्तराभानेन विनिगमकसम्भवात् तत्तज्ज्ञानप्रागभावस्य च विषयोपरागेणैव तत्तज्ज्ञान-भासकत्वम्। मिश्रादिमतेऽनुव्यवसाय इव गुरुमते व्यवसाये विषयविशेषि-तस्यैव व्यवसायस्य भानात्।

(प्रभा) आत्मनःकारणत्वं स्यात् तदा ज्ञानविषयत्वावच्छिन्नकार्यतानिरूपितकारणताया आत्मनि सत्त्वात् ज्ञानविषयताप्रयोजकत्वमात्मनि सम्भवेत्, नच तथा, गौरवात् अपितु लाघवात् समवायेन ज्ञानत्वावच्छिन्नम्प्रति तादात्म्येन आत्मनःकारणत्वमित्येव कार्यकारणभावात्। तादृशकार्यताया घटविषयकज्ञानेऽपि सत्त्वेन तत्र ज्ञानविषयतायास्सत्त्वात् ज्ञानविषयताया आत्मत्वावच्छिन्नकारणतानिरूपितकार्यतातिरिक्तवृत्तित्वाच्च तथाऽसम्भवात्। गुरुमते ज्ञानोत्पादकसामग्रीघटकात्मादिसकलकारणनिष्ठकारणतानिरूपितकार्यतानतिरिक्तवृत्तित्वं ज्ञान-विषयत्वे सम्भवति तन्मते ज्ञानस्य स्वविषयकत्वनियमेन सर्वत्र ज्ञाने ज्ञानविषयत्वस्य सत्त्वात्। एवञ्च गुरुमते तादृशकार्यतानतिरिक्तवृत्तितया ज्ञानविषयतापि तादृशकार्यतावच्छेदि-केति ज्ञानभानप्रयोजकनिखिलकारणमध्ये पुनरात्ममनस्संयोगादेरपि संग्रहेण अनुव्यव-सायसामग्र्याःसाध्यघटकत्वं न सम्भवतीत्याशंकते नचेति। आदिपदात् आत्ममनस्संयोग-परिग्रहः। तत्त्वात् = ज्ञानभानप्रयोजकत्वादित्यर्थः। ज्ञानविषयतायास्तादृशकार्यतानतिरिक्त-वृत्तितया तादृशकार्यतावच्छेदकत्वात्। ननु ज्ञानविषयतायास्तादृशकार्यतानतिरिक्तवृत्तित्वेऽपि ज्ञानविषयकज्ञानत्वेनात्मत्वेन कार्यकारणभावो नास्ति गौरवात् अनावश्यकत्वाच्च, किन्तु ज्ञानत्वेनात्मत्वेनैवेति कथं ज्ञानविषयतायास्तादृशकार्यतावच्छेदकत्वम् ? न केवलमनतिरि-क्तवृत्तित्वं कार्यतावच्छेदकताप्रयोजकमपितु अनतिरिक्तवृत्तित्वे सति तेन रूपेण कार्यताव-च्छेदककोटिप्रविष्टत्वमेव। इत्थं च ज्ञानविषयतायास्तादृशकार्यतावच्छेदकत्वाभावेन गुरुमते ज्ञानविषयताप्रयोजकत्वमात्मादीनामव्याहतमिति ग्रन्थासङ्गतिरिति तु नाशङ्कनीयम्। ईदृशी आशङ्कनालस्यैवैतद्ग्रन्थोत्थानात्। अत एव एतदुत्तरकोटौ एतादृशभावपूर्णमेव समाहितम्। तन्मते = गुरुमते इत्यर्थः। तज्ज्ञानप्रागभावस्य = घटज्ञानप्रागभावस्येत्यर्थः। तज्ज्ञानभाने = घट ज्ञाननिष्ठविषयत्वे। आत्मादीनामतथात्वात् = आत्मादीनां ज्ञानविषयताप्रयोजकत्वादित्यर्थः। ननु विनिगमनाविरहेण आत्मादीनामेव ज्ञानविषय-ज्ञानविषयताया आत्मादिकारणतानिरूपितकार्यतातिरिक्त-आत्मादिजन्यज्ञानान्तरे इति। आत्मादिजन्यघटज्ञाने ते = आत्मादिजन्यघटज्ञानविषयताया असत्त्वेनेत्य-कार्यतायाःघटज्ञानेऽपि सत्त्वेन तत्र घटज्ञानवि-

(गा०) अथ घटज्ञानमित्यादौ विषयोपरक्तज्ञानविषयकशाब्दबोधसामग्रीनिविष्टज्ञानपदाद्युपस्थितिव्यक्त्या विषयानुपरक्तज्ञानविषयकशाब्दबोधाजननात् तादृशसामग्रीव्यावृत्तिर्दुर्घटा।

नच तयापि उपस्थितिव्यक्त्या ज्ञानशाब्दबोधहेतुभूतविषयानुपरक्तज्ञानविषयकस्मृतेरवश्यं जननात्तद्घटितसामग्रीव्यावृत्तिसम्भव इति वाच्यम्? यादृशज्ञानपदोपस्थित्या ज्ञानस्मृतौ जन्यमानायामुद्बोधकान्तरवशात् ज्ञानांशे पूर्वानुभूतविषयवैशिष्ट्यमपि भातम्, तदुपस्थितिव्यक्तिघटितसामग्र्या उक्तरीत्याप्यवारणादिति चेन्न? ज्ञानमपि न गृह्णाति इत्यत्र स्वरूपयोग्यतारूपज्ञानग्राहकताया एव विवक्षितत्वात्। उक्तसामग्रीघटकज्ञानपदाद्युपस्थितिव्यक्तेश्च विषयाविषयककालान्तरीणज्ञानशाब्दबुद्धावपि स्वरूपयोग्यतया तादृशसामग्रीवारणसम्भवात्।

(प्रभा) घटज्ञानमित्यादिपूर्वोक्तशाब्दबोधमादाय बाधन्तदवस्थमाशंकते अथेति। आदिपदाद् घटत्वप्रकारकं ज्ञानं सविशेष्यकमित्यादेः संग्रहः। तथाच घटज्ञानमित्याकारकवाक्यजन्यशाब्दबोधप्रयोजकसामग्रीघटकस्य कस्यापि कारणस्य विषयानवच्छिन्नज्ञानग्रहजनकत्वाभावेन तादृशशाब्दसामग्र्या अपि साध्यघटकतया तज्जन्यग्रहविषयत्वस्य प्रमात्वेऽसत्त्वेन बाधस्तदवस्थ इति भावः। विषयोपरक्तेति। विषयेण=घटेन, उपरक्तम्=विशिष्टम् घटादिविषयविषयकमिति यावत्। यज्ज्ञानम्=घटज्ञानम्, तद्विषयको यः शाब्दबोधःस च घटज्ञानमितिवाक्यजन्यस्तत्सामग्रीनिविष्टा या ज्ञानपदाद्युपस्थितिव्यक्तिस्तयेत्यर्थः। विषयानुपरक्तेत्यादि। घटादिरूपविषयाविषयककेवलज्ञानवाचकपदघटितज्ञानमित्यादिवाक्यजन्यशाब्दबोधप्रयोजकसामग्रीघटकज्ञानपदाद्युपस्थितिव्यक्तेर्विषयानुपरक्तज्ञानविषयकशाब्दबोधे हेतुत्वेऽपि घटज्ञानमिति वाक्यजन्यशाब्दबोधसामग्रीघटककारणीभूतज्ञानपदाद्युपस्थितिव्यक्त्या घटानुपरक्तज्ञानविषयकशाब्दबोधाजननादित्यर्थः। तया=ज्ञानपदाद्युपस्थितिव्यक्त्येत्यर्थः। अंकुरमादाय बाधमुपस्थापयति यादृशज्ञानपदोपस्थित्येति। स्वरूपयोग्यतारूपेति=तथाच विषयितासम्बन्धेन किञ्चिदनवच्छिन्नज्ञाननिष्ठविषयिताशालिग्रहनिरूपितस्वरूपयोग्यत्वाभाववद्यादृशसामग्रीघटकनिखिलकारणं तादृशसामग्रीजन्ययावद्ग्रहविषयत्वं साध्यम् पर्यवसितमिति न पूर्वोक्ताङ्कुरस्थले बाधः, उद्बोधकान्तराधीनघटविषयकत्वविशिष्टज्ञानोपस्थितिजनकतादृशज्ञानपदोस्थितिव्यक्तावपि विषयितासम्बन्धेन किञ्चदनवच्छिन्नज्ञाननिष्ठविषयताशालिविषयाविषयकशाब्दबोधात्मकग्रहनिरूपितस्वरूपयोग्यत्वस्यैव सत्त्वेन स्वरूपयोग्यत्वाभावविरहात् तादृसामग्र्यास्साध्याघटकत्वात्। उक्तसामग्रीघटकेति=उद्बोधकान्तरस्थलीयसामग्रीघटकेत्यर्थः। ननु विषयितासम्बन्धेन किञ्चिदनवच्छिन्नज्ञाननिष्ठविषयताशाल्युद्बोधकान्तराप्रयोज्यो यो ग्रहस्तदजनकत्वनिवेशेनैव साम-

[illegible]

प्रकाशिता ग्रन्थाः ।

काशीस्थशास्त्रार्थमहाविद्यालयप्रधानाचार्येण नव्यन्यायाचा
श्रीराजनारायणशुक्लेन सम्पादिताः कतिपये विनिर्मिता

मीमांसा—अर्थसंग्रहः संस्कृत-हिन्दी टीकासहितः

न्यायशास्त्रे—१. व्युत्पत्तिवादः (शास्त्रार्थकलास

२. प्रामाण्यवादः (प्रभासमन्वितः

३. अवच्छेदकत्वनिरुक्तिः (विवृतिसहिता)

४. सादृश्यशास्त्रार्थकला (सटिप्पणा)

५. समवायसम्बन्धसाधनम्

६. तर्कसंग्रहः (टिप्पणीसहितः

७. तर्कभाषा (प्रभाप्रसारिणीटीकाद्वय

८. कुसुमाञ्जलिः

व्याकरणे—९. कौमुदीकल्पलतिका द्वि० संस्करणम्

१०. परिष्कारदर्पणः

११. परिभाषेन्दुशेखरः (शास्त्रार्थकला

१२. मनोरमाशब्दरत्नप्रश्नोत्तरावली (लघुब

१३. न्यास-कल्पलता

१४. परिभाषेन्दु-प्रश्नपञ्जिका

१५. व्युत्पत्तिवाद-प्रश्नोत्तरी

१६. प्रयोगशास्त्रार्थकला

१७. न्यास-शास्त्रार्थकला

१८. वैयाकरणभूषणसारः

१९. लौकिकन्यायशास्त्रार्थकला

२०. रूपप्रभा

काव्ये—२१. रामवनगमनम् (प्रभा सहित

२२. विदुलोपाख्यानम् (,, ,,

धर्मशास्त्रे—२३. गायत्रीमन्त्रभाष्यम्

२४. अर्हत्तिथिभास्करः

पुराणे—२५. श्रीमद्भागवत-शास्त्रार्थकला

२६. गोपीगीतम्

सामान्यदर्शने—२७. गोकुलदर्शनकलानिधिः

हिन्दी—२८ [illegible]

(गा०) यद्यद्रूपेण कारणानाम् प्रकृतसामग्रीघटकत्वं तत्तद्रूपस्य विषयानुपरक्तज्ञानग्रहस्वरूपयोग्यतानवच्छेदकत्वं विवक्षणीयम् , तेन गुरुमते तत्तद्व्यवसायप्रागभावस्य प्रागभावत्वेन जन्यमात्रं प्रति स्वरूपयोग्यत्वेऽपि न तद्घटितव्यवसायसामग्र्या असंग्रहः । व्यवसायात्मकज्ञानोत्पादप्रयोजकसमुदायमध्ये तत्तद्व्यवसायप्रागभावत्वेन तन्निवेशात् तद्रूपेण जन्यमात्रम् प्रति स्वरूपयोग्यताविरहात् ।

एवं च मिश्रमतेऽनुव्यवसायसामग्रीघटकव्यवसायस्य कालोपाधिविधया जन्यमात्रस्वरूपयोग्यत्वेऽपि न तत्सामग्र्यसंग्रहः । तत्सामग्रीघटकतावच्छेदकेदंविशेष्यकघटत्वादिप्रकारकज्ञानत्वेनातथात्वात् ।

नच विषयविनिर्मुक्तज्ञानग्राहकत्वस्य विषयानवच्छिन्नज्ञानभानाप्रयोजकत्वरूपस्य निवेशे उक्तविवक्षामन्तरेणापि सामञ्जस्यम् ।

(प्रभा) घटपदोपस्थापकोद्बोधकान्तरापेक्षया ज्ञानोपस्थापकरूपोद्बोधकान्तरजन्यत्वादिति । ननु स्वरूपयोग्यतारूपकारणतानिवेशे गुरुमते साध्याप्रसिद्धिस्तथाहि तत्तद्व्यवसायप्रागभावस्य विषयितासम्बन्धेन विषयानवच्छिन्नज्ञाननिष्ठविषयत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतप्रागभावत्वरूपधर्मवत्त्वाद् गुरुमते साध्याप्रसिद्धिरित्यत आह यद्यद्रूपेणेति ।

यद्यद्रूपावच्छिन्नकारणानां स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकसामग्रीघटकतेत्यर्थः । तथाच प्रकृतसामग्रीघटकतावच्छेदकतापर्याप्त्यधिकरणं यद्यद्रूपं विषयानुपरक्तज्ञानग्रहस्वरूपयोग्यतावच्छेदकतापर्याप्त्यधिकरणं तत्तद्रूपावच्छिन्नघटिततादृशप्रकृतसामग्रीजन्यग्रहविषयत्वं साध्यम्पर्यवस्यति । तेनेति = ईदृशविवक्षणेनेत्यर्थः । गुरुमते इति । मिश्रमतस्यानुपदं वक्ष्यमाणत्वात्तदत्र नोक्तम् । जन्यमात्रम्प्रतीति = जन्यत्वेन रूपेण विषयानुपरक्तज्ञानग्रहनिष्ठजन्यतानिरूपितजनकतावच्छेदकीभूतप्रागभावत्वरूपधर्मवत्त्वस्य तत्तद्रूपव्यवसायप्रागभावे सत्त्वेपीत्यर्थः । तथाच प्रकृतसामग्रीघटकतत्तत्कारणतावच्छेदकं यद्यद्रूपं तत्तत् तत्तद्व्यवसायप्रतियोगिकप्रागभावत्वम् , तादृशं च रूपं विषयानुपरक्तज्ञानग्रहनिरूपितस्वरूपयोग्यतावच्छेदकतापर्याप्त्यनधिकरणमेवेति तत्तद्रूपावच्छिन्नघटिततत्तद्व्यवसायोत्पादकसामग्रीमादाय लक्षणसमन्वय इति न साध्याप्रसिद्धिरिति । पर्याप्तिनिवेशस्तु केवलप्रागभावत्वमादाय साध्याप्रसिद्धिवारणाय । अन्यथा विषयतासम्बन्धेन प्रत्यक्षम्प्रति तादात्म्येन विषयस्य कारणतयाँ केवलयद्रूपावच्छिन्नत्वतद्रूपावच्छिन्नत्वनिवेशेनैव वारणात् । पुनरशङ्कते नचेति । विषयानवच्छिन्नेति । विषयितासम्बन्धेन विषयानवच्छिन्नज्ञाननिष्ठविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताशून्यत्वरूपस्येत्यर्थः । उक्तविवक्षामिति = यद्यद्रूपेण कारणानाम् प्रकृतसामग्रीघटकता तत्तद्रूपावच्छिन्नेत्यादिपूर्वोक्तविवक्षामन्तरेणापीत्यर्थः । तथाच विषयितासम्बन्धेन विषयानवच्छिन्नज्ञाननिष्ठविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताशून्यं यादृशसामग्रीघटकनिखिल-

(गा०) व्यवसायतत्प्रागभावादीनां कालत्वप्रागभावत्वादिना विषयानवच्छिन्नज्ञानविषयकग्रहस्य स्वरूपयोग्यत्वेऽपि तेन रूपेण विषयानवच्छिन्नज्ञानविषयतावच्छिन्नाजनकत्वात् । एवञ्च गुरुमते आत्मादीनां ज्ञानग्राहकसामग्रीत्वेन ज्ञानग्रहत्वावच्छिन्नम्प्रति हेतुत्वेऽपि न क्षतिः, तत्र विषयानवच्छिन्नज्ञानभाना[1]प्रयोजकत्वेन तद्व्यावृत्तेरनपेक्षितत्वादिति वाच्यम् ?

(प्रभा) तेन रूपेणेति = कालत्वप्रागभावत्वादिनेत्यर्थः । विषयानवच्छिन्नेति = विषयानवच्छिन्नज्ञाननिष्ठविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताशून्यत्वादित्यर्थः । एवञ्च = तथा निवेशे इत्यर्थः । न क्षतिरिति = न साध्याप्रसिद्धिरित्यर्थः । तत्रेति = आत्मनीत्यर्थः । विषयानवच्छिन्नेति = विषयितासम्बन्धेन विषयानवच्छिन्नज्ञाननिष्ठविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताशून्यत्वसत्त्वे इत्यर्थः । तथात्व आत्मघटितव्यवसायसामग्रीसंग्रहान्न गुरुमते साध्याप्रसिद्धिरितिभावः । तद्व्यावृत्तेरनपेक्षितत्वादिति = ज्ञानभानप्रयोजकत्वं निखिलकारणे निवेश्य पूर्वं याऽऽत्मव्यावृत्तिस्सम्पादिता

---

१ ज्ञानभानाप्रयोजकत्वे यत्नेन तद्व्यावृत्तेरनपेक्षितत्वादिति पाठान्तरम् । तत्र यत्नेनेति—ज्ञानभानप्रयोजकत्वस्य निखिलकारणे निवेशात्मकप्रयासेनेत्यर्थः । अनपेक्षितत्वादिति = आत्मव्यावृत्तेरनपेक्षितत्वादित्यर्थः । प्रकृतसामग्रीघटकनिखिलकारणे ज्ञानभानप्रयोजकत्वविशेषणदानेन आत्मनः प्रकृतसामग्रीघटककारणेभ्यो बहिर्भूतत्वस्यानपेक्षणादितियावत् । अत्रायमभिसन्धिः, पूर्वं ह्यात्ममनस्संयोगादिव्यावृत्त्यर्थं स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकप्रकृतसामग्रीघटकनिनिखिलकारणे ज्ञानभानप्रयोजकत्वं निवेशितम्, किन्तु तन्निवेशेऽपि गुरुमते आत्मादीनां ज्ञानभानप्रयोजकत्वमव्याहतमेवेति आत्मनोऽपि स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकप्रकृतसामग्रीघटकज्ञानभानप्रयोजकनिखिलकारणान्तर्गतत्वेन तत्र विषयतासम्बन्धेन विषयानवच्छिन्नज्ञाननिष्ठविषयताशालिग्रहाजनकत्वाभावेन तादृशात्मघटितव्यवसायप्रयोजकसामग्र्यसंग्रहाद्र गुरुमते साध्याप्रसिद्धिमाशंक्य तज्ज्ञानप्रागभावमात्रं हि गुरुमते ज्ञानभानप्रयोजकमिति समाहितम् । पूर्वोक्तयत्नेन आत्मव्यावृत्तिर्निरर्थिकेति भावः ।

२ केचित्तु ज्ञानग्रहत्वावच्छिन्नम्प्रति = ज्ञानग्रहम्प्रतीत्यर्थः । नातो ज्ञानविषयकग्रहत्वेन जन्यत्वपर्यवसानाज्ज्ञानविषयताया जन्यतावच्छेदकतया प्रयोज्यतया ग्रन्थसङ्गतिरिति । विषयानवच्छिन्नज्ञानाप्रयोजकत्वेनेति = विषयानवच्छिन्नज्ञानविषयतनिष्ठप्रयोज्यतानिरूपितप्रयोजकताशून्यत्वसत्त्वेनेत्यर्थः । तद्व्यावृत्तेरिति = आत्मव्यावृत्तेरित्यर्थः । अनपेक्षितत्वादिति । तथाच यादृशसामग्रीघटकनिखिलकारणं विषयानवच्छिन्नज्ञानभानाप्रयोजकं तादृशसामग्रीजन्यग्रहविषयत्वस्य साध्यत्वे आत्मजन्यतावच्छेदककोटौ प्रागुक्तदिशा ज्ञानविषयताया अप्रवेशादात्मनि ज्ञानभानाप्र

(गा०) एवमपि मिश्रमते ज्ञानत्वादिप्रकारकव्यवसायस्योपनीतज्ञानग्रहे विषयानवच्छिन्नज्ञानविषयताप्रयोजकत्वसत्त्वेन तद्घटितानुव्यवसायसामग्र्याः दुस्संग्रहतया तादृशव्यवसायप्रामाण्ये बाधस्य वारणाय उक्तविवक्षाया आवश्यकत्वात्। तद्विवक्षणे ज्ञानत्वादिप्रकारकत्वप्रकारकज्ञानत्वस्य ज्ञानोपनीतभानजनकतानवच्छेदकत्वेन सामंजस्यात्।

(प्रभा) तस्या अनपेक्षितत्वादित्यर्थः। अयमाशयः, पूर्वं आत्ममनस्संयोगादिव्यावृत्त्यर्थं स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकसामग्रीघटकनिखिलकारणे ज्ञाने भानप्रयोजकत्वं निवेशितम्, तदिदानीं नापेक्षितम्। **मिश्रमते**=मुरारिमिश्रमते इत्यर्थः। **ज्ञानत्वादिप्रकारकेति**=अहं जाने इत्याकारकमानसप्रत्यक्षरूपव्यवसायस्येत्यर्थः। **उपनीतज्ञानग्रहे**=ज्ञानं जातमित्याकारके ज्ञानलक्षणासन्निकर्षजन्यग्रहे इत्यर्थः। **ज्ञानविषयताप्रयोजकत्वेति**=विषयितासम्बन्धेन विषयानवच्छिन्नज्ञाननिष्ठविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकतासत्त्वेनेत्यर्थः। तद्विषयकंप्रत्यक्षम्प्रति विषयस्य कारणतया ज्ञानज्ञानम्प्रति ज्ञानस्य कारणत्वादिति भावः। **तद्घटितानुव्यवसायेति**=ज्ञानत्वप्रकारकव्यवसायघटितसामग्र्या इत्यर्थः। **तादृशव्यवसायप्रामाण्ये इति**=ज्ञानत्वप्रकारकव्यवसायगतप्रमात्वे इत्यर्थः। **बाधस्येति**=अयम्भावः, घटव्यवसायगतप्रमात्वस्थल इव ज्ञानत्वप्रकारकव्यवसायगतप्रमात्वम्पक्षीकृत्य विषयितासम्बन्धेन विषयानवच्छिन्नज्ञाननिष्ठविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताशून्ययादृशसामग्रीघटकनिखिलकारणन्तादृशसामग्रीजन्ययावद्ग्रहविषयत्वमवश्यं त्वया साध्यं किन्तु तत्रोपनीतज्ञानग्रहमादाय पूर्वोक्तयुक्त्या निर्दिष्टस्वतोग्राह्यत्वस्य सत्त्वेन बाध एव, उक्तोपनीतज्ञानग्रहे विषयानवच्छिन्नज्ञानविषयताप्रयोजकत्वसत्त्वात्। ननु नैतद्रीत्या बाधः, तथाहि-तादृशसामग्र्याः साध्यघटकत्वे तज्जन्ययावद्ग्रहान्तर्गतज्ञानत्वप्रकारकव्यवसायोपनीतज्ञानग्रहनिरूपितविषयत्वस्योक्तप्रमात्वे सत्त्वं न स्यात्तदा बाधसम्भवः, प्रकृते तु तथोक्तसामग्र्याः साध्याघटकत्वेन साध्याप्रसिद्धेरेव योग्यत्वादिति चेन्न? पक्षे साध्यसत्त्वानिर्वाहरूपबाधस्योक्तत्वेनात्रापि तस्यैवाभिप्रेतत्वात्। **उक्तविवक्षाया इति**=यद्यद्रूपेण कारणानाम् प्रकृतसामग्रीघटकतेत्यादिविवक्षाया इत्यर्थः। **तद्विवक्षणे इति**। प्रकृतसामग्रीघटकतावच्छेदकं यद्यद्रूपमित्यादिविवक्षणे इत्यर्थः। **ज्ञानत्वादिप्रकारकत्वेति**=ज्ञानत्वप्रकारको योऽनुव्यवसायः तत्सामग्रीघटकतावच्छेदक यद् ज्ञानत्वप्रकारकत्व-ज्ञानत्वैतद्द्वयं (रूपम्) तस्येत्यर्थः। **ज्ञानोपनीतभानजनकतेति**=तथाच तद्विषयकप्रत्यक्षं प्रति तद्विषयकज्ञानत्वेन कारणतेति ज्ञानलक्षणासन्निकर्षस्थलीयकार्यकारणभावेन प्रकृते ज्ञानत्वप्रकारकव्यवसायविषयकोक्तमानसप्रत्यक्षम्प्रति ज्ञानत्वप्रकारकव्यवसायविषयकज्ञानत्वेन कारणतयैतादृशज्ञानोपनीतभानजनकतावच्छेदकं ज्ञानत्वप्रकारकव्यवसायविषयकत्वमेव नतु ज्ञानत्वप्रकारकज्ञानत्वमिति नोक्तदोषः।

(गा०) अथैवं घटज्ञानमित्यादिशाब्दजन्यशाब्दसामग्रीवारणमशक्यमेव घटान्वितज्ञानविषयकशाब्दबोधे हि घटपदसाकांक्षज्ञानपदज्ञानत्वेनैव हेतुता नतु केवलज्ञानपदज्ञानत्वेन, परस्पराकाङ्क्षाशून्यघटपदज्ञानपदयोर्ज्ञानादन्वयबोधानुदयात्। तथा च तादृशसामग्रीघटकतावच्छेदकघटपदसाकांक्षज्ञानपदज्ञानत्वावच्छिन्नस्य विषयानालिङ्गितज्ञानविषयताघटितधर्मावच्छिन्नग्रहस्वरूपयोग्यतापि नास्ति।

नच घटपदं विनापि ज्ञानपदेन ज्ञानं गुण इत्यादौ शाब्दबोधजननात् तत्साधारणज्ञानगोचरशाब्दबोधत्वरूपसामान्यधर्मावच्छिन्नम्प्रति सामान्यतो ज्ञानपदज्ञानत्वेनापि हेतुत्वात् तदवच्छिन्नमपि घटज्ञानमित्यादिशाब्दसामग्री-

---

(प्रभा) पुनर्बाधमाशंकते अथैवमित्यादिना। एवमिति = प्रकृतसामग्रीघटकतावच्छेदकं ज्ञानविषयत्वावच्छिन्नजन्यतानिरूपितजनकतानवच्छेदकं यत् तद्रूपावच्छिन्नघटितसामग्रीजन्ययावद्ग्रहविषयत्वेन साध्यत्वे इत्यर्थः। घटान्वितज्ञानविषयकशाब्दबोधे इति = विषयित्वसम्बन्धावच्छिन्नप्रकारतानिरूपितज्ञानत्वावच्छिन्नविशेष्यताशालिबुद्धावित्यर्थः। घटपदसाकाङ्क्षज्ञानपदज्ञानत्वेनेति = अव्यवहितोत्तरत्वसम्बन्धावच्छिन्नघटपदत्वावच्छिन्नप्रकारतानिरूपितज्ञानपदत्वावच्छिन्नविशेष्यताशालिज्ञानत्वेनैवेत्यर्थः। एवकारार्थं स्पष्टयति नतु ज्ञानपदज्ञानत्वेनेति। ज्ञानपदज्ञानत्वेन हेतुत्वाभावे युक्तिन्दर्शयति परस्पराकाङ्क्षाशून्येत्यादिना। घटपदज्ञानपदयोर्ज्ञानादित्यर्थः। घटः ज्ञानम् इत्याकारकपरस्पराकाङ्क्षाशून्यपदद्वयज्ञानादित्यर्थः। अन्वयबोधानुदयादिति = घटान्वितज्ञानविषयकान्वयबोधानुदयादित्यर्थः। तथाचेति = घटपदसाकाङ्क्षज्ञानपदज्ञानत्वेन हेतुत्वे चेत्यर्थः। तादृशसामग्रीघटकतावच्छेदकघटपदसाकाङ्क्षज्ञानपदज्ञानत्वावच्छिन्नस्येत्यर्थः। घटपदाव्यवहितोत्तरत्वविशिष्टज्ञानपदत्वप्रकारकज्ञानत्वरूपावच्छिन्नस्येतिभावः। विषयानालिङ्गितज्ञानविषयताघटितेत्यादि। तथाच घटज्ञानमितिवाक्यजन्यशाब्दबोधप्रयोजकसामग्रीघटकतावच्छेदकं यद् घटपदसाकाकाङ्क्षज्ञानपदज्ञानत्वं बुद्धि विषयानवच्छिन्नज्ञानविषयताघटितधर्मावच्छिन्नजन्यतानिरूपितस्वरूपयोग्यतानवच्छेदकं किन्तु तद्रूपावच्छिन्नघटिततादृशशाब्दसामग्रीजन्यतादृशशाब्दात्मकग्रहविषयत्वरूपसाध्यस्य घटज्ञानगतप्रमात्वे विरहेण बाध इति भावः। पुनस्तादृशशाब्दसामग्रीं वारयितुं यतते घटपदं विनापीत्यादिना। तत्साधारणज्ञानगोचरशाब्दबोधत्वरूपेति = ज्ञानं गुण इति वाक्यार्थबोधसाधारणज्ञानविषयकशाब्दबुद्धित्वरूपेत्यर्थः। सामान्यधर्मावच्छिन्नम्प्रति = ज्ञानविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रतीत्यर्थः। सामान्यत इति = घटपदानन्वितेनेत्यर्थः। ज्ञानपदज्ञानत्वेनापीति = घटान्वितज्ञानविषयकशाब्दम्प्रति घटपदसाकाङ्क्षज्ञानपदज्ञानत्वेन हेतुत्वेऽपि घटानालिङ्गितज्ञानविषयकशाब्दम्प्रति ज्ञानपदज्ञानत्वेनैव हेतुत्वमित्य

(गा०) घटकम् । विशेषसामग्र्याः सामान्यसामग्र्यनुप्रवेशेनैव कार्योपधानप्रयोजकत्वात् । सामग्रीपदेनापि फलोपधानप्रयोजकसामान्यकारणसमुदायस्यैव विवक्षितत्वादिति वाच्यम् ? यत्र विशेषकारणस्य सामान्यकारणतावच्छेदकावच्छिन्नत्वनियमस्तत्र विशेषकार्योपधानप्रयोजकविशेषकारणघटितसमुदाये तादृशसामान्यकारणस्य प्रयोजनविरहेणानिवेशात् । विशेषसत्त्वे "सामान्य" सत्त्वस्यावश्यकतया सामान्यकारणं विना कार्योपधानासम्भवात् इतिचेत् ? माभूत्केवलं ज्ञानपदज्ञानत्वेन घटज्ञानगोचरशाब्दबोधसामग्रीघटकता तथापि पदजन्यज्ञानोपस्थितित्वेन पदार्थोपस्थितेःज्ञानगोचरशाब्दसामान्यहेतुत्वात् , तद्रूपावच्छिन्नस्य विषयानवच्छिन्नज्ञानभानेऽपि प्रयोजकस्योक्तसामग्रीघटकत्वेन तद्व्यावर्त्तनसम्भवात् ।

(प्रभा) ज्ञानपदज्ञानत्वस्य विषयानवच्छिन्नज्ञानविषयताघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकतया तद्रूपावच्छिन्नघटिततादृशशाब्दसामग्र्याःसाध्याघटकत्वेन नास्ति बाधावसर इति भावः ।

यत्र = घटज्ञानमितिवाक्यार्थबोधे । **विशेषकार्योपधानप्रयोजकेति** = घटान्वितज्ञानविषयकशाब्दबोधोपधानप्रयोजकेत्यर्थः । **विशेषकारणघटितसमुदाये**= घटपदसाकाङ्क्षज्ञानपदत्वप्रकारकज्ञानपदघटितसमुदाये इत्यर्थः । **तादृशसामान्यकारणस्य**=ज्ञानपदत्वप्रकारकज्ञानत्वावच्छिन्नकारणस्येत्यर्थः । तस्य विशेषकार्योपधानप्रयोजकसमुदायमध्येऽप्रवेशे कृते सामान्यधर्मावच्छिन्नकारणं विनाऽपि तादृशशाब्दबोधापत्तिरित्याशङ्क्याह **विशेषसत्त्वे सामान्यसत्त्वस्येत्यादि** । निर्विशेषं न सामान्यम्भवतीतिनियमादिति भावः ।

घटज्ञानमित्यादिशाब्दसामग्रीं वारयति **माभूदित्यादिना** । **केवलमिति**=घटपदाव्यवहितोत्तरत्वशून्येत्यर्थः । **घटज्ञानगोचरशाब्दबोधेत्यादि** । घटान्वितज्ञानविषयकशाब्दबोधसामग्रीघटकतावच्छेदकत्वम्मास्तु ज्ञानपदत्वप्रकारकज्ञानत्वस्येति भावः । **तथापीति**= ज्ञानपदत्वप्रकारकज्ञानत्वस्य घटान्वितज्ञानविषयकशाब्दसामग्रीघटकतावच्छेदकत्वाभावेऽपि । पदजन्यज्ञानोपस्थितित्वेन ज्ञानपदजन्यज्ञानपदार्थविषयकोपस्थितित्वेन **पदार्थोपस्थितेः** = ज्ञानपदार्थोपस्थितेः, ज्ञानगोचरशाब्दसामान्यहेतुत्वात् = ज्ञानविषयकशाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावत्त्वात् । तथाच विषयानवच्छिन्नज्ञानविषयकबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकं ज्ञानविषयकोपस्थितित्वं "हि घटज्ञानमितिवाक्यार्थविषयकबोधप्रयोजकसामग्रीघटकतावच्छेदकमित्यतो घटज्ञानमितिशाब्दसामग्र्याः साध्या-

(गा०) नहि पदार्थोपस्थितेरपि घटाद्यन्वितज्ञानादिबोधे घटादिपदसाकाङ्क्षज्ञानादिपदज्ञानजन्यज्ञानाद्युपस्थितित्वेन हेतुता कल्प्येते, प्रयोजनविरहात् तत्तत्पदजन्योपस्थितितत्तत्पदधर्मिकपदान्तराकाङ्क्षाज्ञानघटितसामग्र्याः कार्योपधानप्रयोजकत्वेन निराकाङ्क्षपदजन्योपस्थितिबलात् अन्वयबोधापत्त्यसम्भवात् ।

यदि च आकाङ्क्षाज्ञानं न शाब्दधीकारणम्, अपितु पदार्थोपस्थितिकारणतायां जन्यतासम्बन्धेनावच्छेदकमेवेति नव्याशिवत्यादिना मणिकाराणां स्वं मतमाद्रियते तदोक्तप्रकारेण घटज्ञानमित्यादिसामग्र्युदा-

---

(प्रभा) ननु घटान्वितज्ञानविषयकशाब्दम्प्रति ज्ञानपदजन्यज्ञानोपस्थितेरपि घटपदसाकाङ्क्षज्ञानपदजन्यज्ञानोपस्थितित्वेनैव हेतुता नतु शुद्धज्ञानोपस्थितित्वेन । इत्थञ्च विषयानुपरक्तज्ञानविषयताशालिग्रहनिरूपितस्वरूपयोग्यतावच्छेदकतापर्याप्त्यनधिकरणत्वं प्रकृतसामग्रीघटकतावच्छेदकीभूते ज्ञानविषयकोपस्थितित्वेऽपीति शाब्दसामग्रीवारणं दुःशक्यमेवेत्यत आह नहीति । पदार्थोपस्थितेरपीति = ज्ञानपदजन्यज्ञानोपस्थितेरपीत्यर्थः । प्रयोजनविरहादिति । ननु निराकाङ्क्षघटपदज्ञानपदाच्छाब्दापत्तिवारणरूपमेव प्रयोजनमित्यत आह तत्पदजन्योपस्थितीत्यादि । ज्ञानपदजन्यज्ञानोपस्थितीति —ज्ञानपदधर्मिकघटपदाकाङ्क्षाज्ञानघटितसामग्र्या इत्यर्थः । कार्योपधानप्रयोजकत्वेनेति=घटान्वितज्ञानविषयकशाब्दबोधप्रयोजकत्वेनेत्यर्थः । निराकाङ्क्षपदजन्योपस्थितिबलादिति=घटःज्ञानमितिपरस्परं निराकाङ्क्षपदज्ञानघटोपस्थितिज्ञानोपस्थितिबलादित्यर्थः । अन्वयबोधापत्त्यसम्भवादिति=विषयितासंसर्गेण घटप्रकारकज्ञानविशेष्यकशाब्दबोधोदयापत्त्यसम्भवादित्यर्थः । तथाचाकाङ्क्षाज्ञानरूपकारणविरहादेवोक्तबोधापत्तिवारणसम्भवे उपस्थितिजनकतावच्छेदककोटावाकाङ्क्षाज्ञाननिवेशने प्रयोजनाभावादिति भावः ।

ननु पुनःशाब्दसामग्र्याः साध्यघटकताऽव्यावृत्तिरशक्येत्याह यदि चेत्यादि । आकाङ्क्षाज्ञानमिति । तथाच यदि आकाङ्क्षाज्ञानं स्वतन्त्रं कारणं स्यात्तदा ज्ञानपदजन्यज्ञानोपस्थितेरेव विषयानवच्छिन्नज्ञानविषयको यो ग्रहः 'ज्ञानं गुणः' इति वाक्यजन्यशाब्दबोधरूपः तज्जनकतया विषयानवच्छिन्नज्ञानग्रहाजनकत्वाभावेन शाब्दसामग्रीवारणं स्यात् किन्तु आकाङ्क्षाज्ञानस्य उपस्थितिकारणतावच्छेदकतया उक्तशाब्दसामग्रीघटकतावच्छेदकं स्यादिति शाब्दसामग्रीवारणस्याशक्यतया तस्यास्साध्यघटकतामादाय बाधो दुर्वार इति भावः । जन्यतासम्बन्धेनावच्छेदकमेवेति । जन्यतासम्बन्धेन आकाङ्क्षाज्ञानविशिष्टपदार्थोपस्थितिः कारणमितिभावः । दीधितौ यस्या विषयग्राहकत्वमिति । यस्या इत्यत्र निष्ठत्वं षष्ठ्यर्थः यत्पदार्थः सामग्री, तथाच यादृशसामग्रीनिष्ठविषयग्राहकता ज्ञानग्राहकताप्रयोज्या तादृशसामग्रीजन्ययावद्ग्रहविषयत्वं साध्यम् । एवञ्च घटज्ञानमितिशाब्दसामग्रीवारणासम्भवस्तथाहि घटज्ञानमितिशाब्दसामग्रीनिष्ठविषयग्राहकताया ज्ञानग्राह-

(टी०) ज्ञानग्राहकताप्रयुक्तमेव यस्या विषयग्राहकत्वमिति यावत् । तादृश यावत्सामग्रीग्राह्यत्वमर्थः ।

(गा०) सासम्भवात् पक्षधरमिश्रा एव प्रकारान्तरमनुसृतवन्तः, तमेव पक्षमु न्यस्यति *ज्ञानग्राहकताप्रयुक्तमिति* । यत्र ज्ञानभासकमेव विषयभानार्थं नाधिक पेक्षितं तज्ज्ञानसामग्र्या विषयग्राहकत्वे ज्ञानग्राहकत्वम् प्रयोजकम् । उक्तशाब्द बोधसामग्र्या विषयग्राहकत्वे च न ज्ञानग्राहकत्वम्प्रयोजकम् । तत्र ज्ञानभान प्रयोजकघटादिपदज्ञानस्य अधिकस्य विषयभासकत्वात् । अनुव्यवसा सामग्र्या विषयग्राहकत्वे च ज्ञानग्राहकत्वम् प्रयोजकम् । तत्र ज्ञानभानप्रयो जकव्यवसायज्ञानधर्मिकविषयासंसर्गग्रहाभावयोरेव विषयभासकत्वात् ।

यद्यपि ज्ञानपदसमभिव्याहृतत्वेन घटपदज्ञानस्य ज्ञानविषयता जन्यतावच्छेदिका, तथापि तदवच्छिन्नजनकत्वमेव न तत्प्रयोजकत्वम तद्भासकत्वम् । किन्तु एतद्बोधजनकवाक्येऽमुकपदसत्त्वादस्य बोधस्य एत विषयकत्वमित्यादिव्यवहारसिद्धस्वरूपसम्बन्धविशेष एव । नहि घटज्ञानवत् ज्ञानपदाज् ज्ञानभानमितिवत् घटपदाज् ज्ञानभानमित्यपि व्यवहारः । विष पस्थितिं विना ज्ञानस्य शाब्दबोधे बहुशो भानं नतु ज्ञानोपस्थितिं वि कञ्चिदपीति ज्ञानविषयोपस्थापकपदयोर्विशेषादिति भावः ।

(प्रभा) प्रयोज्यप्रयोजकभावसम्भवात् इत्यत आह यत्र ज्ञानभासकमेव विषयभान मित्यादि । ज्ञानभासकमेवेति = ज्ञाननिष्ठविषयत्वावच्छिन्नजन्यतानिरूपितजनक रूपं ज्ञानभानप्रयोजकमित्यर्थः । विषयभासकमिति = विषयभानप्रयोजकमिति, विषय विषयत्वावच्छिन्नजन्यतानिरूपितजनकतावत् इत्यर्थः । तथाच प्रकृते ग्रन्थोक्त निरुक्तशाब्दसामग्र्याः प्रयोज्यप्रयोजकभावविरहेण तादृशशाब्दसामग्र्याः साध्याघटक न पूर्वोक्तबाधावसर इति । ननु ज्ञानग्राहकत्वं ज्ञाननिष्ठविषयत्वावच्छिन्नजन्यतानिरू जनकत्वम् । विषयग्राहकत्वं विषयनिष्ठविषयत्वावच्छिन्नजन्यतानिरूपितजनकत्वम् । प्रकृते ज्ञाननिष्ठविषयताऽपि ज्ञानपदसमभिव्याहृतत्वेन घटपदज्ञानजन्यतावच्छेद ज्ञाननिष्ठविषयत्वावच्छिन्नजन्यतानिरूपितजनकतायाश्च घटपदज्ञानेऽपि सत्त्वेन ज्ञानभान जकस्यैव घटपदज्ञानस्य विषयभानप्रयोजकत्वात्पुनः शाब्दसामग्रीवारणमशक्यमित्या यद्यपीत्यादिना । घटपदज्ञानस्येति = घटपदज्ञाननिष्ठजनकतानिरूपिते जन्यतायां तदन्वयः ।

अत्र हि ज्ञाननिष्ठविषयत्वावच्छिन्नजन्यतानिरूपितजनकत्वं न ज्ञानभान

—— विना ज्ञानोपस्थापकवाक्येऽमुकपदसत्त्वादस्य बोधस्यैतदविषयकत्वमित्यादिव्य

(दी०) यद्यपि उभयभासकसामग्र्या नैकग्राहकत्वप्रयुक्तमन्यग्राहकत्वम् तथापि ज्ञानग्राहकताप्रयोजकसामग्रीप्रयुक्तविषयग्राहकताकत्वं वाच्यम् ।

घटज्ञानपदाद्यात्मकसामग्र्यास्तु ज्ञानपदाधीनं ज्ञानग्राहकत्वम्, तच्च न घटग्राहकत्वे तन्त्रम्; अपि तु घटपदम् ।

(गा०) एतावतानुव्यवसायादिस्थले तुल्यकालसम्बन्धिनोर्ज्ञानविषयभानयोरिव तथाविधयोस्सामग्रीनिष्ठज्ञानविषयभासकतयोरपि न प्रयोज्यप्रयोजकभावःसिध्यति, अपितु एकतरभानेऽन्यतरभासकहेतोरेवेति, यथाश्रुते सम्भव इत्याशंक्य निष्कृष्टार्थमाह *यद्यपीत्यादि* । *ज्ञानग्राहकतेति* । यादृशसामग्रीजन्यज्ञाने विषयभानं ज्ञानभानप्रयोजकत्वेन तत्प्रयोजकप्रयुक्तं तादृशत्वं सामग्र्यां विशेषणं वक्तव्यमित्यर्थः ।

एतेन यथाश्रुते घटज्ञानमित्यादिशाब्दबोधरूपज्ञानग्रहस्य विषयग्रहरूपतया तत्सामग्रीनिष्ठज्ञानग्रहोपधानरूपज्ञानग्राहकताया विषयग्रहोपधानरूपविषयग्राहकतातोऽभिन्नतया तुल्यप्रयोजकप्रयुक्तत्वसत्त्वेऽपि न क्षतिः ।

प्रयोजकत्वेनेतिकरणात् तादृशशाब्दबोधे योग्यताज्ञानादीनामुभयभानप्रयोजकत्वेऽपि न दोषः । ज्ञानभानप्रयोजकत्वस्य विषयभासकमध्यनिविष्टघटपटाद्यसंग्राहकत्वेन विषयभासकतानवच्छेदकत्वात् । तदेव दर्शयति *घटज्ञानपदेति* । तादृशसामग्रीजन्यज्ञाने ज्ञानपदाधीनं ज्ञानभानमित्यर्थः । तच्च = ज्ञानपदं च । *घटग्राहकत्वे* = घटविषयकत्वे ।

(प्रभा) ननु तथापि साध्याप्रसिद्धिः ज्ञानग्राहकताप्रयुक्तत्वस्यानुव्यवसायसामग्रीनिष्ठविषयग्राहकतायामप्यसत्त्वेन ज्ञानग्राहकताप्रयोज्यविषयग्राहकतासामग्र्या अप्रसिद्धेः इति दर्शयति एतावतेत्यादिना । ज्ञानविषयभानयोरिवेति = ज्ञानविषयताविषयविषयत्वयोरिवेत्यर्थः । तथाविधयोः = तुल्यकालसम्बन्धिनोः । एकतरभाने = ज्ञाननिष्ठविषयत्वे । अन्यतरभासकहेतोरिति = विषयभानप्रयोजकघटपदज्ञानरूपहेतोरित्यर्थः । विषयभानमिति = विषयनिष्ठविषयत्वम् । ज्ञानभानप्रयोजकत्वेनेति = तृतीयार्थोऽवच्छिन्नत्वम् । तत्प्रयोजकत्वे तदन्वयः । तत्प्रयोजकप्रयुक्तमिति = विषयभानप्रयोजकप्रयुक्तमित्यर्थः । तथाच यादृशजन्यज्ञाने ज्ञानभानप्रयोजकत्वावच्छिन्नविषयज्ञानप्रयोजकताप्रयोज्यं विषयभानं तादृशसामग्रीजन्ययावद्ग्रहविषयत्वं साध्यम् पर्यवसितमिति न शाब्दसामग्र्याः साध्यघटकत्वम् । शाब्दसामग्रीजन्यज्ञाने विषयभानप्रयोजकता ज्ञानभानप्रयोजकत्वावच्छिन्ना सती न विषयभानप्रयोजिकेति अदोषात् ।

एतेनेति = यादृशसामग्रीजन्यज्ञाने विषयभानं ज्ञानभानप्रयोजकत्वेन प्रयुक्त-

(दी०) एकयैव शक्त्या विषयोपरक्तज्ञानग्राहकेण प्रमापदेन प्रामाण्यग्राहि सिद्धसाधनवारणाय यावदिति ।

(गा०) ननु एवम् प्रामाण्यानुमितिग्राह्यत्वमादाय सिद्धसाधनवा यावत्पदमनर्थकम्, इदं ज्ञानं घटविषयकं घटेच्छाजनकत्वादित्याद्यनुमा नामिव प्रामाण्यानुमानस्यापि उक्तविशेषणेनैव वारणात्, तत्रेवात्रापि ज्ञा विषयग्राहकतयोः पृथक् प्रयोजकप्रयुक्तत्वादित्याशंक्य एकप्रयुक्तोभयग्राहक कपदविशेषघटितसामग्रीग्राह्यताप्रयुक्तसिद्धसाधनवारकतां तस्याह एकयैवे पदैक्येऽपि विशेषणविशेष्यभेदेन शक्तिरूपप्रयोजकभेदात् न तादृशसाम संग्रह इति तदैक्याभिधानं *विषयोपरक्तेति*। विषयघटितयाथार्थ्यवि घटेत्यर्थः। उपसर्गस्य द्योतकतया न प्रशब्दस्य याथार्थ्यरूपप्रकर्षे स्वतः शक्तिरिति भावः।

ननु प्रमापदं यथार्थानुभवत्वविशिष्ट एव शक्तम् नतु यथार्थज्ञानत विशिष्टे स्मृतिकरणे, प्रमाणव्यवहारविरहात्। एवञ्चानुभवत्व जातिमङ्ग कुर्वतां नैयायिकानां न प्रमापदस्य ज्ञानत्वघटितप्रामाण्यग्राहकत्वमित्याश

(प्रभा) साध्यत्वे योग्यताज्ञानादिकमादाय पुनःशाब्दसामग्र्याः साध्यघटकत्वेन वा दुर्वार इत्यतोऽवच्छेद्यत्वनिवेशस्तदर्थज्ञानभानप्रयोजकत्वेनेति तृतीयान्तोक्तिश्च ।

एवमिति=ज्ञानग्राहकताप्रयुक्तमेव यस्या विषयग्राहकत्वमितिनिवेशे इत्यर्थः। यादृश सामग्रीजन्यज्ञाने ज्ञानभानप्रयोजकत्वावच्छिन्नविषयभानप्रयोजकताप्रयुक्तं विषयभानं तादृश सामग्र्यास्साध्यघटकत्वे इति यावत्। **प्रामाण्यानुमितिग्राह्यत्वमादायेति**=इदं ज्ञानम्प्र संवादिप्रवृत्तिजनकत्वादित्यनुमितिमादायेत्यर्थः। **अनर्थकमिति**=यादृशसामग्र्याः ज्ञा ग्राहकताप्रयोज्यत्वस्य विषयग्राहकत्वेऽसत्त्वेन साध्याघटकतया बाधवारणान्निष्प्रयोजनमेवे भावः। **उक्तविशेषणेनैवेति**। ज्ञानग्राहकताप्रयुक्तमेव यस्या विषयग्राहकत्वमिति विशे णेनैवेत्यर्थः। तत्रेवेति=इदंज्ञानं घटविषयकमित्यत्रेवेत्यर्थः। **अत्रापि**=प्रामाण्यानुमित वपि। **पृथक्प्रयोजकप्रयुक्तत्वादिति**। ज्ञानग्राहकतायां व्यापकत्वं प्रयोजकं विषयग्राहक तायां व्यापकतावच्छेदकत्वं प्रयोजकमिति भावः।

इत्याशंक्येति = यावत्पदवैयर्थ्यमाशंक्येत्यर्थः। **एकप्रयुक्तोभयग्राहकताप विशेषेति**। एका या विषयघटितप्रमापदार्थनिरूपिता प्रमापदनिष्ठा शक्तिस्तत्प्रयुक्त या ज्ञानस्य विषयस्येत्युभयस्य च ग्राहकता तन्निरूपको यः प्रमापदविशेषस्तद्घटितसामग्र्य साध्यघटकतया तामादाय सिद्धसाधनापत्तेरिति ।

(दी०) तद्धि धात्वर्थतावच्छेदकज्ञानत्वपुरस्कारेणैव यथार्थज्ञानमभिधत्ते। स्मृतिहेतोः प्रमाणान्तरतापत्तेस्तु भीतास्तान्त्रिकाः शास्त्रे प्रमाव्यवहारौपयिकं स्मृतिव्यावृत्तं रूपमनुमन्यन्ते ।

भ्रमपदेन प्रामाण्याग्रहाद् बाधवारणाय तदप्रामाण्येति ।

(गा०) निरस्यति *तद्धीति* । *तत्*=प्रमापदम् । *ज्ञानत्वपुरस्कारेणैवेति* । ज्ञानत्वघटितप्रामाण्यप्रकारेणेत्यर्थः । एवकारेण यथार्थानुभवत्वविशिष्टव्यवच्छेदः । प्रकर्षादिद्योतकोपसर्गपूर्वकधातोः प्रकर्षादिसहितस्वशक्यतावच्छेदकावच्छिन्नवाचकत्वनियमादिति भावः। उपसर्गस्तु शक्यतावच्छेदककोटौ निविशतां नवा इत्यन्यदेतत् । स्मृतौ तान्त्रिकाणां प्रमाव्यवहारं शास्त्रे प्रमापदस्य पारिभाषिकतया वारयति *स्मृतीति* । *प्रमाणान्तरतापत्तेः*=प्रमाणान्तरव्यवहारविषयतापत्तेः । स्मृतिव्यावृत्तं रूपं यथार्थानुभवत्वं प्रमाव्यवहारौपयिकमनुमन्यन्त इत्यन्वयः ।

ननु एवमपि अप्रामाण्याग्राहकेत्यस्य वैयर्थ्यम्, भ्रमग्राहकानुमित्यादेः उक्तविशेषणेन वारणात् तद्ग्राह्यत्वेऽपि बाधासम्भवादित्यत आह *भ्रमपदेनेति* । एकयैव शक्त्या विषयघटितमूर्त्तिकभ्रमत्वविशिष्टबोधकेनेति शेषः ।

नच भ्रमपदस्य प्रामाण्याश्रयाग्राहकत्वात् न तद्ग्राह्यत्वेऽपि बाध इति वाच्यम्, प्रमाया अप्यंशे भ्रमत्वसम्भवेन भ्रमपदस्य तादृशज्ञानबोधकतया प्रामाण्याश्रयबोधकत्वात् ।

(प्रभा) वारणसम्भवे यावत्पदोपादानन्निरर्थकमेवेति भावः । इत्याशङ्कनम् = यावत्पदवैयर्थ्यशंकाम् । ज्ञानत्वपुरस्कारेणैवेति । तथाच ज्ञानग्राहकताप्रयुक्तविषयग्राहकतया उक्तशाब्दसामग्र्या अपि साध्यघटकतया तामादाय सिद्धसाधनवारणाय यावत्पदोपादानमिति भावः ।

एवमपि = यावत्पदस्य सार्थक्येऽपि । भ्रमग्राहकानुमित्यादेः = इदं ज्ञानं भ्रमःविसंवादिप्रवृत्तिजनकत्वादित्यनुमित्यादेरित्यर्थः । उक्तविशेषणेनेति=ज्ञानग्राहकताप्रयुक्तं यस्या विषयग्राहकत्वमितिपूर्वोक्तविशेषणेनेत्यर्थः । एकयैव शक्त्येत्यादि तथाच भ्रमग्राहकशाब्दसामग्र्याः साध्यघटकतया तज्जन्यग्रहविषयत्वस्य प्रमात्वेऽसत्त्वेन बाधापत्तिरित्यप्रामाण्याग्राहकत्वस्य सार्थक्यम् ।

कस्मिंश्चिदपि प्रामाण्ये सामान्यतो यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं न प्रसिद्धमित्य प्रसिद्धिवारणाय स्वाश्रययावज्ज्ञानग्राहकत्वं सामग्र्यामप्राङ्निवेशितं तत एव च भ्रम

(दी०) तन्न ? गुरुनये विषयग्राहकताया ज्ञानग्राहकताप्रयोजकाप्रयुक्तत्वात् प्रत्युत विषयग्राहकताप्रयोजकस्यैव ज्ञानग्राहकताप्रयोजकत्वात् । सर्वस्यैव विषयग्रहस्य आत्मविषयत्वात् ।

(गा०) सर्वधीयाथार्थ्यमते भ्रमपदं तदभाववद्धर्मिसाकञ्जतद्विषयकज्ञानत्वेन तत्प्रमामेव बोधयति । एतच्च समाधिसौकर्येण अग्राहकान्तानुपादाने गुरुमते स्वतन्त्राप्रामाण्योपस्थितिद्वितीयक्षणोत्पन्नप्रामाण्याश्रयविषयकस्वप्रकाशात्मकव्यवसायसामग्र्या मिश्रमते चोपगीताप्रामाण्यघटकविषयग्राहकताकत्वेऽपि तदप्रयुक्तप्रामाण्यघटकधर्मिग्राहकताकत्वेन उक्तविशेषणेन वारणासम्भवात् तद्ग्राह्यतयापि बाधस्य निष्प्रत्यूहत्वादिति वदन्ति ।

विषयग्राहकतायाः = विषयविषयतायाः । *ज्ञानग्राहकताप्रयोजकाप्रयुक्तत्वादिति* । ज्ञानभानप्रयोजकत्वेन तत्प्रयोजकाप्रयुक्तत्वादित्यर्थः । एकसामग्र्या एव ज्ञानविषयभासकतया यथाश्रुतासङ्गतेः । अयम्भावः, व्यवसायसामग्र्याः न ज्ञानभानप्रयोजकत्वेन घटादिरूपविषयग्राहकता, ज्ञानं गुण इत्याकारकघटज्ञानादिबोधेऽपि ज्ञानभानप्रयोजकसत्त्वेन घटादिभानप्रसंगात् । अपितु घटतत्सन्निकर्षादिघटितसमुदायत्वेनैव तथात्वमिति । *विषयग्राहकताप्रयोजकस्यैवेति*= विषयभानप्रयोजकत्वावच्छिन्नस्यैवेत्यर्थः । *ज्ञानग्राहकताप्रयोजकत्वात्*=ज्ञानभानप्रयोजकत्वात् । विषयभासकत्वेन ज्ञानभानप्रयोजकत्वं विपरीतवत् तदा न सम्भवेद् यदि विषयभानप्रयोजकसमुदायसत्त्वेऽपि कदाचित् ज्ञानभानं न स्यात्, नचैवमित्याह *सर्वस्यैवेति* । आत्मेति दृष्टान्तविधयोक्तम् ।

(प्रभा) सर्वधीयाथार्थ्यमते=प्रभाकरमते । स्वप्रकाशात्मकेति=इदं ज्ञानमप्रमेति-व्यवसायसामग्र्या इत्यर्थः । उक्तविशेषणेनेति = ज्ञानग्राहकताप्रयुक्त विषयग्राहकत्वं यस्यास्तादृशसामग्रीविशेषणेनेत्यर्थः । वदन्ति । अत्र केचिदित्यारभ्य वदन्तिपर्यन्तं पक्षधरमिश्रमतमुपन्यस्याग्रे तन्नेत्यादिना निराकरिष्यते ।

पक्षधरमिश्रमतं निराकर्तुमुपक्रमते तन्नेत्यादिना । तत्प्रयोजकाप्रयुक्तत्वादिति = विषयभानप्रयोजकाप्रयुक्तत्वादित्यर्थः । तथाच ज्ञानभानप्रयोजकत्वावच्छिन्ना या विषयभानप्रयोजकता तत्प्रयुक्तत्वं विषयभाने नास्ति, एवञ्च गुरुमते व्यवसायसामग्र्याः साध्याघटकतया साध्याप्रसिद्धिरिति भावः । यथाश्रुतासङ्गतेरिति = विषयग्राहकताया ज्ञानग्राहकताप्रयोजकाप्रयुक्तत्वादिति यथाश्रुतदीधितेरसङ्गतिरित्यर्थः । एकसामग्र्या एव ज्ञानद्वयभासकतया, विषयग्राहकतायां ज्ञानग्राहकताप्रयोजकप्रयुक्तत्वस्यानिवार्य्यत्वात् । ननु यद्येकयैव सामग्र्या ज्ञानविषययोर्भानं तर्हि ज्ञानभानप्रयोजकत्वेन विषयभानप्रयोजकप्रयुक्तत्वमपि विषयभाने [illegible]

(दी०) अस्तु वा तत्र यथातथाभिधानम् ।

(गा०) ननु यत्र ग्रहे ज्ञानविषययोरेकभानप्रयोजकत्वेन अपरभानप्रयोजकता तादृशी सामग्री विवक्षणीया, एवञ्च स्वप्रकाशकसामग्र्या विषयभासकत्वेन ज्ञानभासकत्वादेव संग्रहः। मिश्रमते घटज्ञानमितिशाब्दस्थले यथा ज्ञानभासकताया न घटभासकता, घटपदासत्त्वेऽपि तद्भानप्रसङ्गात्, तथा घटभासकत्वेनापि न ज्ञानभासकता, ज्ञानपदासत्त्वेऽपि तद्भानप्रङ्गादित्यत आह अस्तु वेति। *तथाभिधानम्* = स्वप्रकाशसामग्रीसाधारणविशेषणाभिधानम् ।

(प्रभा) अस्तु वा तत्र यथातथाभिधानमिति दीधितिमवतारयति नन्वित्यादि। **यत्र ग्रहे इति** = यादृशसामग्रीजन्यज्ञानग्रहे इत्यर्थः। **ज्ञानविषययोरेकभानेति**। ज्ञानविषययोर्मध्ये यदेकतरं ज्ञानं विषयो वा तस्य यत् भानं तन्निष्ठविषयतेति यावत्। तत्प्रयोजकत्वावच्छिन्ना याऽपरनिष्ठविषयता तत्प्रयोजकता तदाश्रयसामग्रीति व्युत्पत्तिः। तथाच ज्ञाननिष्ठविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकत्वावच्छिन्नविषयनिष्ठविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताकत्व-विषयविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकत्वावच्छिन्नज्ञानभानप्रयोजकताकत्व-एतदन्यतरवत्सामग्रीजन्यग्रहविषयत्वं साध्यमिति पर्यवसितम्। ज्ञानविशिष्टसामग्रीजन्यग्रहविषयत्वमित्यनुगमः। वै० स्वविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकत्वावच्छिन्नविषयविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताकत्वस्वविषयविषयतात्वावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताकत्वावच्छिन्नस्वभानप्रयोजकताकत्व-एतदन्यतरसम्बन्धेनेति यावत्। गुरुमते सङ्गमयति **एवञ्चेति**। एतादृशविवक्षणे चेत्यर्थः। **स्वप्रकाशकसामग्र्या इति** = स्वप्रकाशजनकसामग्र्या इत्यर्थः। **विषयभासकत्वेन ज्ञानभासकत्वादेवेति** = विषयभानप्रयोजकत्वावच्छिन्नज्ञानभानप्रयोजकत्वादेवेत्यर्थः। **संग्रह इति** = साध्यघटकत्वमिति भावः। तथाच गुरुमतसिद्धव्यवसायसामग्री विषयभानप्रयोजकत्वावच्छिन्नज्ञानभानप्रयोजकताकसामग्रीपदेन संगृहीता। अथ च तज्जन्यव्यवसायात्मकग्रहविषयत्वस्य व्यवसायगतप्रमात्वे सत्त्वेन सङ्गतिरिति भावः। मुरारिमिश्रमते घटज्ञानमिति शाब्दसामग्रीं वारयति **मिश्रमते इति**। दृष्टान्तयति **यथेत्यादि**। **ज्ञानभासकत्वेन न घटभासकतेति** = ज्ञानभानप्रयोजकत्वावच्छिन्नघटभानप्रयोजकतेत्यर्थः। तत्र हेतुमाह **घटपदासत्त्वेऽपीत्यादि**। **तद्भानप्रसङ्गादिति** = घटभानप्रसङ्गादित्यर्थः। दार्ष्टान्तमुपादत्ते **घटभासकत्वेनेत्यादि**। घटभानप्रयोजकत्वावच्छिन्ना न ज्ञानभानप्रयोजकता अत्र हेतुमाह **ज्ञानपदासत्त्वेऽपीत्यादि**। **तद्भानप्रङ्गादिति** = ज्ञानभानप्रसङ्गादित्यर्थः तथाच समनैयत्यं नास्तीतिभावः। **इत्यत इति** = उक्तरीत्या सर्वसामञ्जस्ये किञ्चिदनुपपत्त्यभावादिति भावः। दीधितौ **यथातथाभिधानमिति** = एकप्रयोजकप्रयोज्यज्ञानभान... ...नाभिधानमित्यर्थः। एतदेवा

(दी०) तथापि मिश्रमते दुर्वचम् ज्ञानविषयग्राहकतयोरनतिप्रसक्तमेकप्रयोजकप्रयोज्यत्वम् ।

(गा०) दुर्वचमिति । यथाश्रुतस्य योग्यताज्ञानादिकमादाय घटज्ञानमिति शाब्दबोधादिगततदुभयभानसाधारणत्वात् । एकप्रयोजकत्वेन अपरप्रयोजकत्वविवक्षणे च अनुव्यवसायसामग्रीघटकव्यवसायादेर्ज्ञानविषययोरेकतरभासकत्वे अपरभानप्रयोजकत्वे केवलज्ञानग्रहे विषयस्य केवलविषयग्रहे च ज्ञानस्य भानप्रसङ्गाद् विनिगमनाविरहाच्च तदुपगमासम्भवेन तादृशसामग्र्या एवासंग्रहात् एकधर्मपुरस्कारेण उभयभानप्रयोजकत्वविवक्षणे च घटज्ञानमित्यादौ योग्यताविशेषज्ञानादेःतादृशज्ञानत्वादिना उभयभानप्रयोजकतया बाधवारणमशक्यम् फलोपधानरूपप्रयोजकत्वविवक्षया एकैकहेतुसाधारणरूपेण ज्ञानादिभानप्रयोजकत्वनिराकरणे अनुव्यवसायादिसामग्रीघटकव्यवसायादेरपि घटज्ञानत्वादिना घटज्ञानादिभानाप्रयोजकतया व्यवसायमनस्संयुक्तसमवायादिसमुदायपर्याप्तधर्मस्यैव ज्ञानविषयोभयभानप्रयोजकतावच्छेदकतया तादृशसामग्रीसंग्रहे तुल्ययुक्त्या घटज्ञानमित्यादिशाब्दबोधनिष्ठतदुभयभानेऽपि घटपदज्ञानपदादिसमुदायपर्याप्तधर्मावच्छिन्नस्य प्रयोजकतया न तत्सामग्रीवारणसम्भव इति भावः ।

(प्रभा) दीधितौ तथापीति = यथातथाभिधानेनार्थादेकभानप्रयोजकप्रयोज्यज्ञानभानविषयभानप्रयोजकसामग्रीत्यभिधानेनोक्तानुपपत्तिपरिहारेऽपीत्यर्थः । मिश्रमते = मुरारिमिश्रमते इत्यर्थः । दुर्वचमिति = दुर्निरूप्यमित्यर्थः । दुर्वचत्वं निरूपयति ज्ञानविषयग्राहकतयोरनतिप्रसक्तमेकप्रयोजकप्रयोज्यत्वमित्यादिना । ज्ञानविषयग्राहकतयोरिति = ज्ञानग्राहकताविषयग्राहकतयोरित्यर्थः । तथाच ज्ञानविषयता-विषयविषयतेत्युभयगतमनतिप्रसक्तं सदेकप्रयोजकप्रयोज्यत्वं दुर्वचमिति भावः । कथमनतिप्रसक्तं सद् दुर्वचमित्यतो दुर्वचत्वसाधिकामतिप्रसक्तिन्दर्शयति यथाश्रुतस्येत्यादिना । यथाश्रुतस्येति = एकप्रयोजकप्रयोज्यत्वस्येत्यर्थः । योग्यताज्ञानादिकमादायेति = विषयित्वसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपितज्ञानत्वावच्छिन्नविशेष्यताशालियोग्यताज्ञानादिकमित्यर्थः । आदिपदात्तात्पर्यपरिग्रहः ।

तदुभयभानसाधारणत्वादिति = ज्ञानभानविषयभानसाधारणत्वादित्यर्थः । यथाश्रुतस्येति पूर्वेण सम्बन्धः । तथा च एकप्रयोजकप्रयोज्यज्ञानभानविषयभानप्रयोजकसामग्रीपदेन घटज्ञानमितिशाब्दसामग्र्या अपि संग्रहेण साध्यघटकतया तज्जन्यग्रहविषयत्वस्य तत्प्रमात्वेऽसत्त्वाद् बाध इति भावः । स्वोक्तिपक्षे दोषमुद्घाटयति एकप्रयोजकत्वेनापरप्रयोजकताविवक्षणे चेति । विषयभानप्रयोजकत्वावच्छिन्नज्ञानभानप्रयोजकता — ज्ञानभानप्रयोजकत्वावच्छिन्नविषयभानप्रयोजकता — एतदन्यतरवत्सामग्रीजन्यग्रहविषयत्वं साध्यमिति । एकधर्मपुरस्कारेणेति = योग्यताज्ञानत्वादिनेत्यर्थः । एकैकहेतुसाधारणेति —

(दी०) किञ्च घटज्ञानत्व न् घटेच्छावत्त्वादित्याद्यनुमित्या तद्ग्रहाद् बाधः।

नचात्र ज्ञानग्राहकतायां व्यापकत्वं घटग्राहकतायां तदवच्छेदकत्वं प्रयोजकम्, ते नैकमुभयग्राहकताप्रयोजकम्, प्रमापदेऽपि शक्तितदवच्छेदकत्वयोरेव ज्ञान-षयग्राहकतायाम् प्रयोजकत्वात्।

(गा०) ननु यत्र ज्ञाने विषयभानं ज्ञानभानाप्रयोजकाप्रयुक्तं तज्ज्ञानसामग्र्येव ावर्णनीया, घटज्ञानमित्यत्र ज्ञानभानाप्रयोजकं घटपदं घटभाने प्रयोजक-त्यत एव तद्व्युदासः। अनुव्यवसाये विषयभानप्रयोजको व्यवसाय एव, ाच न ज्ञानभानाप्रयोजक इति तत्सामग्रीसंग्रहः। स्वप्रकाशमते व्यवसाय-ामग्रीत्वेन व्यवसायस्य सर्वाण्येव कारणानि अविशेषेण ज्ञानभानप्रयोजकानि, ततो न तदतिरिक्तस्य विषयभानेऽपेक्षेति तत्सामग्री-संग्रह इत्यतो दूषणान्तर-ाह किञ्चेति।

यद्यपि विषयोपरक्तज्ञानानुमितिस्थले एकस्य परामर्शादेरेव विधेयतया ज्ञानस्य, विधेयतावच्छेदकतया विषयस्य भासकता ननु व्यापकतायास्तदवच्छेद-कत्वस्य च ज्ञानं विधेयतत्त्वावच्छेदकविषयकानुमितौ पृथक् कारणम्, तथापि प्रयोजकभेदं विना विधेयादिविषयतानां वैचित्र्यानुपपत्त्या परामर्शीयतद्विषय-निष्ठविलक्षणविषयतानाम् अनुमितौ विलक्षणतत्तद्विषयभानप्रयोजकत्वमाव-श्यकम्, इत्युक्तानुमितिसामग्र्यव्यावृत्तिरित्याशङ्कते नचेति। *व्यापकत्वं* व्यापकत्वेन परामर्शविषयत्वम्। *तदवच्छेदकत्वम्*=व्यापकतावच्छेदकत्वेन तद्विषयत्वम्। *शक्तितदवच्छेदकत्वयोः*=शक्यत्वतदवच्छेदकत्वावच्छिन्न-ज्ञानविषयत्वयोः। *प्रयोजकत्वात्*=तुल्ययुक्त्या प्रयोजकत्वापातात्। तथाचोक्त-यावत्पदव्यावृत्त्यसङ्गतिरिति भावः।

ननु शक्यतावच्छेदकेऽपि शक्त्युपगमेन शक्यतया तद्भानमेव शाब्दबोधे तद्भानप्रयोजकम्।

(प्रभा) ावर्णनीयात=साध्यघटकतया विवक्षणीयेत्यर्थः। न तदतिरिक्तस्य विषयभानेऽपेक्षेति सामग्रीवारणम्।

व्यापकत्वेन परामर्शविषयत्वमिति = व्यापकत्वप्रकारकपरामर्शविषय-त्वमित्यर्थः। व्यापकतावच्छेदकत्वेन तद्विषयत्वमिति=व्यापकतावच्छेदकत्वप्रकारक-परामर्शविषयत्वमित्यर्थः। तद्भानप्रयोजकमिति। अयम्भावः, अनुमितिस्थले हि वह्नित्वादौ व्यापकताया असत्त्वेन व्यापकतानवच्छेदकत्वरूपपरामर्शीयविषयतायाः प्रयो-जकता नाङ्गीक्रियते, शाब्दबोधस्थले तु तादृशप्रयोज्यप्रयोजकभावाङ्गीकारेऽपि शक्त्या एव प्रयोजकतया शक्यतानवच्छेदकरूपेण भानवारणसम्भवात् तादृशप्रयोज्य-

(दी०) अव्यापकस्यानुमितिविषयत्वेऽतिप्रसङ्गस्य व्यापकतावच्छेदकत्वेनेव, अशक्यस्यापि शाब्दधीविषयत्वे अतिप्रसङ्गस्य शक्यतावच्छेदकत्वेनैव निराससम्भवात् ।

शक्यतावच्छेदके शक्तिसत्त्वेऽपि न तस्याः तद्बोध उपयोगः,

(गा०) शक्यतया अभातस्यापि शाब्दबुद्धौ भानोपगमे गवादिपदात् सास्नादेरपि गोत्वादिवच्छाब्दबोधे भानापत्तेरित्यत आह *अव्यापकस्येति*। *अव्यापकस्य*=व्यापकतया अभातस्य। *अनुमितिविषयत्वे*=अनुमितौ धर्मितावच्छेदकीयप्रकारताविलक्षणप्रकारत्वे। *अतिप्रसङ्गस्य व्यापकतावच्छेदकत्वेनेव*=परामर्शे व्यापकतावच्छेदकतया भानस्य नियामकत्वेन यथा वारणम्। *अशक्यस्य*=शक्यतयाऽभातस्य। *शक्यतावच्छेदकत्वेन*=शक्यतावच्छेदकतया शक्तिज्ञाने भानस्य प्रयोजकतयैव।

ननु व्यापकतावच्छेदके वह्नित्वादौ धूमादिव्यापकता नास्तीति व्यापकतावच्छेदकतया भानं विधेयतावच्छेदकतया भानप्रयोजकम्। शक्यतावच्छेदके च सर्वत्र शक्तिरस्ति। तस्य पदबोध्यतया तेन रूपेण भगवदिच्छायामवश्यं भानात्, अतो नोभयत्र साम्यमित्यत आह *शक्यतावच्छेदक इति*। उपयोगः न स्वीक्रियत इति शेषः। गोत्वादिविशिष्टविशेष्यकशक्तिग्रहस्य गोत्वांशे शक्यतावगाहिनः

(प्रभा) भानप्रयोजकतया घटज्ञानमितिशाब्दसामग्र्यास्साध्यघटकतया तज्जन्यग्रहविषयत्वस्य च प्रमात्वेऽसत्त्वाद् बाध इत्यतो यावत्पदं सार्थकम्तथा च न मिश्रमते यावत्पदवैयर्थ्यमिति भावः। ईदृशप्रयोज्यप्रयोजकभावं दर्शयितुमाह **शक्यतयेति**। **अभातस्यापीति**। शक्तिज्ञानीयावच्छेदकताभिन्नविषयत्वाभावविशिष्टस्यापि तद्धर्मस्येत्यर्थः। **शाब्दबुद्धौ भानोपगमे**=शाब्दबोधीयप्रकारत्वाभिन्नविषयताविशिष्टत्वाभ्युपगमे इत्यर्थः। **यथा वारणमिति**। अनुमितीयधर्मितावच्छेदकनिष्ठप्रकारताविलक्षणतद्धर्मप्रकारताम्प्रति परामर्शीयव्यापकतावच्छेदकत्वरूपविषयता प्रयोजिकेतिभावः। **व्यापकतावच्छेदकतयेति**=अनुमितीयविधेयतावच्छेदकत्वाख्यविषयताप्रयोजिका इति भावः। **पदबोध्यतयेति**=पदजन्यप्रतीतिविषयतयेत्यर्थः। **तेन रूपेण**=गोत्वादिरूपशक्यतावच्छेदकेन रूपेणेत्यर्थः। **नोभयत्रेति**=अनुमितौ शाब्दबोधे चेत्यर्थः। **साम्यमिति**=तुल्यतेत्यर्थः। उत्तरयति दीधितौ **शक्यतावच्छेदके** इत्यादि। **तस्या इति**=शक्तेरित्यर्थः। **तद्बोधे इति**=शक्यतावच्छेदके शक्तिर्न स्वीक्रियते इति। गोपदाद् गोत्वावच्छिन्नो बोद्धव्यः इत्याकारकशक्तिः। **गोत्वविशिष्टेति**=गोत्वविशिष्टो गोपदवाच्य इत्याकारकस्येत्यर्थः। **गोत्वांशे शक्त्यनवगाहिनः** तादृशशक्तिज्ञानसत्त्वेऽपि स्वरूपतो गोत्वादिभाने न काऽप्यनुपपत्तिः। पूर्वोक्तप्रयोज्यप्रयोजकभावेनातिप्रसङ्गस्यापि वारणाच्छक्तिज्ञाने गोत्वस्यानुल्लेखादित्यत आह

(गा०) स्वरूपतो गोत्वादिविषयकत्वानुपपत्त्या स्वरूपतो गोत्वाद्यवगाहिशाब्दबोधहेतुत्वासम्भवात् तदवच्छेदेन शक्त्यवगाहिनस्तद्धर्मितावच्छेदकज्ञानस्यैव तथात्वादिति भावः ।

यद्यपि पदधर्मिकगोत्वविशिष्टवाचकताग्रहस्य स्वरूपतो गोत्वप्रकारकत्वं सम्भवति, तथापि गोत्वविशिष्टवाचकत्वस्य गोत्ववाचकत्वगर्भस्य गोत्वप्रकारकत्वावच्छिन्नगोविषयकत्वविशेषितबोधजनकत्वप्रकारकभगवत्संकेतविषयत्वरूपस्य धियो हेतुत्वे बोधविशेषणतापन्नगोविशेषितविषयिताविशेषणतापन्नप्रकारित्वांशे विशेषणतया विषयत्वरूपस्य वाच्यत्वस्य गोत्वांशे भानं गोत्वस्य शाब्दधीप्रकारतानियामकं वाच्यम्, गोत्वावच्छेदेन वाच्यताज्ञानस्य हेतुत्वे च गोत्वांशे

(प्रभा०) दिच्छ्रीषविशेष्यतारूपशक्तेरवच्छेदकतासम्बन्धेन गोत्वेऽवगाहिनः । स्वरूपतो गोत्वादिविषयकत्वानुपपत्त्येति = शक्तिज्ञाने उल्लिख्यमानतया गोत्वादिजातेर्गोत्वत्वेनैव रूपेण भानादिति । तथाचोक्तशक्तिज्ञानं न निरवच्छिन्नगोत्वविषयकम्, अनुल्लिख्यमानजातेरेव स्वरूपतया भानेन उल्लिख्यमानायास्तादृशजातेस्स्वरूपतो भानासम्भवादिति भावः ।

ननु स्वरूपतो गोत्वादिविषयकत्वानुपपत्तौ को दोष इत्यत आह स्वरूपतो गोत्वाद्यावगाहिशाब्दबोधहेतुत्वासम्भवादिति । अर्थात् येन रूपेण यद्विषयकशक्तिज्ञानं तेनैव रूपेण तद्विषयकोपस्थितिस्तेनैव रूपेण तद्विषयकशाब्दबोध इति नियमोऽवश्यमङ्गीकार्यः । अन्यथाऽन्यरूपेण शक्तिज्ञाने भातस्य पदार्थस्यान्यरूपेण भानापत्तिः । तथाच तद्रूपावच्छिन्नप्रकारताशालिबोधम्प्रति तद्रूपावच्छिन्नप्रकारताकशक्तिज्ञानं कारणं वाच्यमन्यथा पशुपदस्य लोमवल्लाङ्गूलावच्छिन्ने शक्तिरितिज्ञानेऽपि प्रमेयत्वेन लोमभानापत्तिः नन्वेवं स्वरूपतो गोत्वावगाहिशाब्दबुद्धित्वावच्छिन्नम्प्रति किं कारणमित्यत आह तदवच्छेदेन शक्त्यवगाहिनस्तद्धर्मितावच्छेदककज्ञानस्यैव तथात्वादिति । तदवच्छेदेन = गोत्वावच्छेदेनेत्यर्थः । शक्त्यवगाहिनः = शक्तिविषयकत्वस्येत्यर्थः । तद्धर्मितावच्छेदककेति = गोत्वधर्मितावच्छेदककेत्यर्थः । ज्ञानस्यैव = शक्तिज्ञानस्यैवेत्यर्थः । तथात्वादिति = स्वरूपतो गोत्वावगाहिशाब्दबोधहेतुत्वसम्भवादित्यर्थः । तथाच निरवच्छिन्नगोत्वनिष्ठप्रकारताकशाब्दबुद्धित्वावच्छिन्नम्प्रति गोत्वावच्छेदेन गोपदशक्त्यवगाहिज्ञानं कारणमिति समुदितार्थः । गोत्वधर्मितावच्छेदककज्ञानस्येति = गौर्गोपदशक्या इत्याकारकगोत्वधर्मितावच्छेदककशक्तिज्ञानं कारणमिति । अवच्छेदकत्वसम्बन्धेन तादृशशक्तिज्ञाने गोत्वस्य धर्मितावच्छेदकतया किञ्चिद्रूपेण ज्ञानमिति । शक्यतावच्छेदके शक्तिस्वीकारे उक्तदोषा वारयति यद्यपीति । तथाचोक्तशाब्दबोधसामग्र्यास्साध्यघटकत्वं सम्भवति इति बोधवारणाय यावत्पदम्मिश्रमतेनानर्थकमित्यभिप्रायः । गोपदं गोरूपार्थवाचकमित्याकारकशक्तिज्ञानस्येत्यर्थः । स्वरूपतो गोत्वप्रकारकत्वमिति = निरवच्छिन्नगोत्वप्रकारकत्व

(दी०) विनापि लक्षणां लक्ष्यतावच्छेदकस्येव विनापि शक्तिं तस्य बो
सम्भवात् ।

(गा०) बोधविशेषणताप्रकारविषयिताविशेषणधर्मिविषयतावच्छेदकतारूपशक्
तावच्छेदकताभानं तद्भाननियामकमिति तन्मते गोत्वविशिष्टगोचरशाब्दध
हेतुतायां विषयितायां गोविशेषितत्वांशनिवेशाधिक्येन गौरवम् । इतरांशस्य
भयमतेऽपि तुल्यशरीरत्वात् । तदनिवेशे तु भवतां धर्म्यंशे शक्तिधियोऽनपे
क्षणीयत्वापत्तेः ।

ननु शाब्दबोधीयसंसर्गतान्यविषयतायाः स्वांशे वृत्तिज्ञानप्रयोज
तानियमात्, शक्यतावच्छेदकांशेऽपि शक्तिज्ञानस्य प्रयोजकत्वमावश्यकमित्य
शंक्य तन्नियमं निराकरोति *विनापीति* । *लक्षणाम्*=स्वांशे लक्षणाग्रहम्
शक्तिम्=स्वांशे शक्तिग्रहम् । *तस्य*=शक्यतावच्छेदकस्य ।

ननु पशुत्वेन गौरस्मात् पदाद् बोद्धव्य इत्येतादृशाधुनिकसङ्केतात् पशुत्
नैव गोबोधो भवति न तु तादृशसंकेतविषयतावच्छेदकेनापि गोत्वेनेति नियम
माद् विशेषणांशेऽपि सङ्केतविषयत्वभानं शाब्दधीविषयत्वप्रयोजकमवश्
वाच्यम् । न च गोत्वस्य गोविशेषणतया उक्तसङ्केतविषयतया तावतापि नोक्त
तिप्रसङ्गवारणसम्भव इति वाच्यम् ? पदजन्यबोधविषयत्वेन विषयतारूप
वाच्यत्वभानस्य प्रयोजकत्वोपगमेन तद्वारणसम्भवादिति चेत्, अस्त्वेवम्
एवमपि विशेषणतया वाच्यत्वस्य विशेष्यतया वाच्यत्वविलक्षणस्य पदार्थताव
च्छेदकभानप्रयोजकतया प्रमापदघटितसामग्र्या निरुक्तरूपताया दुरुपपादतैव

(प्रभा) निरूपितत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितप्रकारितात्वावच्छिन्नविशेष्यित्वाव
च्छिन्नप्रकारितानिरूपितगोनिष्ठावच्छेदकताकविशेष्यित्वनिष्ठविशेष्यत्वावच्छिन्नप्रकारतानिरू
पितबोधनिष्ठविशेष्यत्वावच्छिन्नप्रकारतानिरूपितजनकतात्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकार
तानिरूपितपदनिष्ठविशेष्यताशालिज्ञानं कारणमिति ।

अवच्छेदकत्वसम्बन्धावच्छिन्नबोधविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वरूपवाच्यत्व
भानस्येत्यर्थः ।

निरुक्तरूपताया इति । एकप्रयोजकत्वेनापरप्रयोजकत्वरूपताया असम्भवात्तथा च
यावत्पदस्यासन्निवेशेऽपि न प्रमापदमादाय सिद्धसाधनमितिभावः । विशेष्यताप्रकारतोप-

(दी०) भट्टमतेऽसम्भवाच्च । ज्ञाततालिङ्गकानुमित्यापि विषयग्रहे व्यापकतावच्छेदकत्वस्यैव नियामकतया वक्ष्यमाणत्वात् ।

नच ज्ञाततालिङ्गकत्वमेव तत्प्रयोजकम् । अनुमितिसामग्र्याः साध्यग्राहकत्वे लिङ्गविशेषस्य व्यभिचारेणातन्त्रत्वात् । ज्ञाततामात्रेण ज्ञानमात्रानुमानसम्भवात् विशेषस्य तथा स्वभावकल्पनायां मानाभावाच्च ।

(गा०) ननु यावत्पदादाने माभूत् प्रामाण्यस्य प्रमापदग्राह्यतया सिद्धसाधनम् , तथापि विशेष्यताप्रकारतोपनायकतज्ज्ञानकालीनानुव्यवसायसामग्रीग्राह्यतया सिद्धसाधनं दुर्वारमेव, तादृशसामग्र्या अपि विषयग्रहे व्यवसायातिरिक्तानपेक्षणात् । अतो न तत्पदवैयर्थ्यमतो दूषणान्तरमाह *भट्टेति* । *असम्भवात्* = प्रामाण्यग्राहकतया अभिमताया अनुमितिसामग्र्या उक्तविशेषणाक्रान्तत्वासम्भवात् , तदेव दर्शयति *ज्ञाततेति* । *व्यापकतावच्छेदकत्वस्येति* । विषयगर्भप्रमात्वांशे व्यापकतावच्छेदकत्वग्रहस्येत्यर्थः । *वक्ष्यमाणत्वादिति* । घटो घटत्वप्रकारकज्ञानविषयः घटत्वप्रकारकज्ञाततावत्त्वात् इत्यनुमानस्यैव प्रामाण्यग्राहकतया वक्तव्यत्वात् , तत्र च ज्ञानस्य साध्यत्वाद् विषयस्य तु तदवच्छेदकत्वादितिभावः ।

ज्ञाततालिङ्गकत्वम् = तल्लिङ्गकपरामर्शत्वावच्छिन्नजन्यत्वम् । *तत्प्रयोजकम्* = अनुमितौ विषयविशिष्टज्ञानभानप्रयोजकम् । एवकारेण व्यापकतावच्छेदकत्वभानस्य विषयभानप्रयोजकत्वव्यवच्छेदः । *लिङ्गविशेषस्य* = लिंगविशेषावगाहिपरामर्शजन्यत्वस्य । *व्यभिचारेण*=व्यभिचारादिना तल्लिंगकपरामर्शत्वेन हेतुताया असम्भवेन । *ज्ञाततामात्रेण*=शुद्धज्ञानत्वेन व्यापकतावगाहिपरामर्शबलेन । *ज्ञानमात्रेति* । विषयानवच्छिन्नस्यैव ज्ञानस्यानुमितिसम्भवादित्यर्थः ।

ननु स्वव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तेर्लिङ्गविशेषघटिततया लिङ्गभेदेन परामर्शहेतुताभेद आवश्यकः । व्यभिचारोऽपि कथंचिद् विचारणीयः । तथाच ज्ञाततालिङ्गकपरामर्शस्य शुद्धज्ञानत्वावच्छिन्नव्याप्त्यवगाहिनोऽपि विषयोपरक्तज्ञानानुमितित्वमेव जन्यतावच्छेदकमुपगन्तव्यमिति तद्घटितसामग्र्यां ज्ञानभानप्रयोजकमात्रप्रयोज्यविषयग्राहकताकत्वमक्षतमेवेत्यत आह *विशेषस्येति* । शुद्धज्ञानव्याप्यतया ज्ञाततारूपलिङ्गविशेषावगाहिपरामर्शस्येत्यर्थः । *तथा स्वभावकल्पनायाम्* = विषयविशिष्टज्ञानविषयकत्वावच्छिन्नजनकत्वकल्पनायाम् । *मानाभावादिति* । व्यवसायानन्तरं द्वित्रक्षणमध्य

(दी०) ज्ञातताविशेषत्वेन ज्ञानविशेषजन्यत्वानुमानञ्च घटेच्छात्वेन घटज्ञान न्यत्वानुमानेन समानयोगक्षेमम् । तदादिपदेन प्रकरणात्

(गा०) एवं विषयोपरक्तज्ञानभानस्य आनुभविकतया कालान्तरे शुद्धज्ञानव्याप तथा ज्ञाततावगाहिपरामर्शात् शुद्धज्ञानानुमितिनिर्वाहाय तादृशपरामर्शस्य पृथ कारणताया आवश्यकत्वे विषयोपरक्तज्ञानानुमितौ तस्य हेतुत्वान्तरकल्प कालविशेषस्य तत्सहकारिताया अतिप्रसंगभङ्गाय कल्पनं चापेक्ष्य ज्ञान ऐन्द्रियकताया एव कल्पयितुं युक्तत्वादिति भावः ।

ननु घटवृत्तिघटत्वप्रकारकज्ञाततायास्तादृशज्ञाततात्वेन घटविशेष कघटत्वप्रकारकत्वविशिष्टज्ञानजन्यत्वरूपसाध्यानुमापकत्वात्, तत्र च व्याप तावच्छेदकत्वमेव उभयभानप्रयोजकमिति न ज्ञानभानाप्रयोजकं विषयभा प्रयोजकमित्याशङ्कां निरस्यति *ज्ञातताविशेषत्वेनेति* । *समानयोगक्षेममिति* । अ प्यनुमाने विषयस्येव ज्ञानस्यापि साध्यतावच्छेदकत्वात्, अवच्छेदकता विशेषादरे च ज्ञातताලिंगकानुमानेऽपि तद्विशेषसत्त्वादेकसामग्रीसंग्रहोऽन्यव रणञ्चाशक्यमितिभावः । प्रमापदस्थले एकेन पदेन ज्ञानविषयोभयग्रहात् सि साधनस्य यावत्पदेन वारणमित्युक्तं तदनुसारेण प्रमात्वाग्राहकमपि तादृश पदमस्ति तदग्राह्यतया वाधस्य दुर्वारतामाह *तदादीति* ।

तदादेर्बुद्धिस्थत्वेनैव बोधकता नतु घटज्ञानत्वादिनेति भ्रमं निर कर्त्तुमाह *प्रकरणादिति* । विशेषरूपेण बोधौपयिकप्रकरणसहकारादित्यर्थः प्रकरणञ्च प्रकृतत्वम्, विशेषरूपेण वक्तृबुद्धिस्थत्वमिति यावत् । सामान्य वक्तृबुद्धिस्थत्वेन शक्तमपि सर्वनाम विशेषरूपेण बोधयति, सहकारिविशेष पेक्षयाऽतिप्रसङ्गनिराससम्भवादिति भावः । विवेचितं चेदमधिकमन्यत्र

(प्रभा) *अतिप्रसङ्गभङ्गायेति* । शुद्धज्ञानव्याप्यतया ज्ञाततावगाहिपरामर्श शुद्धज्ञानानुमितिम्प्रति कारणतया विषयविशिष्टानुमितिम्प्रति च कारणतया द्वित्रिक्षणाति रिक्तकालेऽपि यथा ज्ञाततालिङ्गकपरामर्शात् शुद्धज्ञानानुमितिस्तथा विषयोपरक्तानुमितिर अनिवार्या स्यादतस्तादृशातिप्रसङ्गवारणाय द्वित्रिक्षणरूपकालस्यापि सहकारिकारण कल्पनीयमिति भावः । तत्र च व्यापकतावच्छेदकत्वमेव **उभयभानप्रयोजकमिति** = जन त्वस्य साध्यत्वे तत्र व्यापकत्वं ज्ञानस्यापि तत्र विशेषणत्वेन घटादिरूपविषयस्यापि त विशेषणत्वेनोभयोस्साध्यतावच्छेदकत्वाद् व्यापकतावच्छेदकत्वस्योभयत्रापेक्षेति एकं व्याप तावच्छेदकं विषये ज्ञाने चोभयत्र प्रयोजकमिति भावः ।

विशेषादरे चेति = ज्ञाने व्यापकतावच्छेदकत्वं विषये व्यापकतावच्छेदकत

(दी०) पदान्तरेण वा लक्षणयाऽऽधुनिकसङ्केतेन वा घटविषयक ज्ञानोपस्थापकेन प्रामाण्याग्रहाद् बाधाच्च ।

एतेन यादृशसामग्र्या विषयग्राहकत्वव्यापृतं ज्ञानग्राहकत्वम् तादृशयावद्ग्राह्यत्वमपि प्रत्युक्तम् ।

अत्र वदन्ति-तज्ज्ञानप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद्भट्टमतसिद्धं तद्भिन्नार्थकमग्राहकान्तम् ।

(गा०) *पदान्तरेण*=सर्वनामातिरिक्तेनापि घटादिपदेन । तादृशपदस्य तद्रूपावच्छिन्नवाचकस्य कया वृत्त्या तद्रूपावच्छिन्नबोधकत्वमित्याकाङ्क्षायामाह *लक्षणया आधुनिकसंकेतेन वेति* । लक्ष्यार्थप्रकारे लक्षणाग्रहस्यापेक्षितत्वेऽपि तत्र तदितरग्रहस्याप्यनपेक्षितत्वात् न विषयभानेऽधिकापेक्षेति भावः ।

न च तत्र लक्ष्यतावच्छेदकग्रहस्यापेक्षया विषयग्रहेऽधिकस्य अपेक्षणीयतैवेतिवाच्यम् ? लक्षणाग्रहस्य प्रकारतयैव तीरत्वादीनां गंगापदजन्यधीप्रकारतोपपत्तेस्तत्र शक्यप्रवाहादिसम्बद्धतावच्छेदकत्वग्रहस्यानुपयोगात् । पश्वादिपदाद्भ्रान्तपुरुषस्य शक्त्या गोत्वादिप्रकारकबोधानुदयात् लक्षणाप्रतिसन्धानं विना तद्रूपविशिष्टप्रत्यायनेच्छया तत्पदाप्रयोगाच्च । शक्त्यधीनविशिष्टविषयकबोधे परं विशेषणांशे शक्तेः शक्यतावच्छेदकताया वा ग्रहस्योपयोगित्वोपगमात् । अभ्युपेत्यैकवृत्तेरुभयग्रहप्रयोजकतामपि उपपादयितुं संकेतानुधावनम् ।

एतावता विषयग्रहे अधिकानपेक्षाविवक्षान्निराकृत्य ज्ञानग्रहेऽधिकानपेक्षाविवक्षामपि निराकरोति *एतेनेति* । एकसंकेतेनोभयबोधकपदघटितसामग्रीव्यावृत्त्यसम्भवेन घटेच्छालिङ्गकघटज्ञानानुमान-ज्ञाततालिंगकप्रामाण्यविशिष्टज्ञानानुमानयोर्विशेषविरहेण चेत्यर्थः । *यादृशसामग्र्या* इति । ज्ञानग्राहकताप्रयुक्तेत्यत्र प्रयुक्तत्वस्य व्यापकतारूपत्वात् यथाश्रुतग्रन्थलभ्यमेवैनदित्यवधेयम् । *तादृशयावद्ग्राह्यत्वम्*=तज्जन्ययावद्ग्रहविषयत्वम् । मनःसंयुक्तसमवायस्य व्यवसायविषयघटादिभानाप्रयोजकत्वे मिश्रमतापरिग्रहोऽप्यत्र बोध्यः ।

तज्ज्ञानेति । घटज्ञानमित्यादिशाब्दबोधसामग्र्या इच्छादिलिंगकज्ञानानुमितिसामग्र्याश्च भट्टैर्ज्ञानग्राहकतया प्रामाण्याग्राहकतया चाभ्युपग-

---

(प्रभा) उभयग्रहेति । विषयज्ञानोभयप्रयोजकतामित्यर्थः । तज्ज्ञानप्रामाण्यविषयकज्ञानाजनकत्वेन ज्ञानविषयकज्ञानाजनकत्वेन या भट्टमतसिद्धा सामग्री तदन्या ज्ञानविषयकग्रहजनिका या सामग्री तज्जन्ययावद्ग्रहविषयत्वं

(गा०) मात् तद्व्युदासः । अनुव्यवसायस्य ज्ञानविषयकलौकिकप्रत्यक्षात्मकस्य ज्ञानातीन्द्रियतावादिना भट्टेनानुपगमात् मनस्संयुक्तसमवायादिघटिततत्सामग्र्या न ज्ञानग्राहकत्वेन तदुपगता, गुरुभिरेव तस्या ज्ञानग्राहकत्वोपगमात् । ज्ञातता लिंगकानुमितिसामग्री ज्ञानग्राहकत्वेन भट्टमतसिद्धापि तैस्तस्याः प्रामाण्यग्राहकत्वोपगमात् प्रमाण्याग्राहकत्वेन न तन्मतसिद्धेति तत्तन्मते प्रामाण्यग्राहकत्वेन अभिमतानां सामग्रीणां संग्रहः । गुरुमते घटत्ववतीत्यादिप्रामाण्यग्राहिकाणां ज्ञानविषयो घट इत्यादिशाब्दानुमितिसामग्रीणां प्रामाण्याग्राहकतया ज्ञानग्राहकतया च भट्टाभ्युपगतानामसंग्रहेऽपि न क्षतिः ।

अयं घट इत्येतादृशप्रत्यक्षसामग्र्याः प्रामाण्यग्राहकताविचार एवेदृशविप्रतिपत्त्यादरात् भट्टमते ज्ञातताल्लिङ्गकानुमितिसामग्र्याः संग्रहाय *तज्ज्ञानप्रामाण्याग्राहकत्वेनेति* । पटज्ञानम् प्रमा घटज्ञानं गुण इत्येतादृशसमूहालम्बनशाब्दसामग्र्या पटज्ञानप्रामाण्याग्राहकत्वेन भट्टमतासिद्धया घटत्ववतीत्यादिप्रामाण्याग्रहाद् बाधवारणाय तज्ज्ञानेति प्रकृतप्रामाण्यस्य विशेषतं निवेशसूचकम् । प्रामाण्याग्राहकत्वं च प्रामाण्याग्रहानुपधायकत्वम् , तेन घट

(प्रभा) घटेच्छावत्त्वादिति पूर्वोक्तानुमितिसामग्र्या इत्यर्थः । तद्व्युदासः = घटज्ञानमिति शाब्दसामग्री तादृशेच्छालिङ्गकसामग्रीव्युदास इत्यर्थः । तथाच न पूर्वोक्तशाब्दबोधमिच्छालिङ्गकानुमितिञ्चादाय बाध इति भावः । समन्वयं दर्शयति अनुव्यवसायस्येत्यादि व्यवसायसामग्रीति = चक्षुस्संयोगादिरूपेतिभावः । ज्ञानविषयो घट इत्यादीति = घटं घटत्वप्रकारकज्ञानविशेष्य इति । असंग्रहेऽपि न क्षतिः = तादृशसामग्रीणां साध्याघटकत्वेऽपि नानुपपत्तिः । विप्रतिपत्त्यादरादिति । अयंघटइत्यादिव्यवसायादिना प्रमात्वग्रहस्यैव मीमांसकैः प्रतिज्ञाततया तत्र साध्यप्रसिद्धिरपेक्षिता । परत्रास्तु मा वाऽस्तु का क्षतिरिति भावः ।

ननु प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धभिन्नत्वमेव निवेश्यताम् तज्ज्ञानपदोपादानं व्यर्थमित्यत आह पटज्ञानं प्रमा घटज्ञानं गुण इति तथाच तज्ज्ञानेत्यत्र तत्पदानुपादाने पटज्ञानं प्रमा घटज्ञानं गुण इत्याकारकसमूहालम्बनशाब्दबोधसामग्रीप्रामाण्याग्राहकत्वेन च न भट्टमतसिद्धाऽपितु केवलघटज्ञानशाब्दबोधसामग्र्येव तादृशत्वेन भट्टमतसिद्धा, तदन्यत्वस्य च निरुक्तसमूहालम्बनसामग्र्यां सत्त्वेन तज्जन्यग्रहविषयत्वस्य घटत्ववति घटत्वप्रकारकज्ञानत्वरूपप्रामाण्ये विरहाद् बाधस्स्यादिति भावः । निवेशसूचकमिति । तज्ज्ञाननिष्ठतत्प्रामाण्यव्यक्तिलाभार्थं तत्पदम् , तथाच निरुक्तसमूहालम्बनशाब्दबोधसामग्र्याः घटत्ववति घटत्वप्रकारकज्ञानत्वरूपतत्प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वे च भट्टमतसिद्धतया तदन्यत्वस्य तत्र विरहान्न तमादाय तत्र बाधावसर इति भावः प्रामाण्यग्रहानुपधायकत्वमिति = अव्यवहितपूर्वत्वसम्बन्धेन प्रामाण्यग्रहविशिष्टत्वा

(गा०) ज्ञानमित्यादिशाब्दसामग्र्याः घटज्ञानम्प्रमेत्यादिप्रामाण्यविषयकशाब्दादि स्वरूपयोग्यत्वेऽपि न क्षतिः । एवं ज्ञानग्राहकत्वमपि ज्ञानग्रहोपधायकत्वं गुरुण प्रामाण्यग्राहकत्वेन सिषाधयिषिताया अयं घट इति प्रत्यक्षादिसामग्र्या अपि उपनीतभानाङ्गीकर्तृभट्टेन ज्ञानविषयो घट इत्युपनीतभानादिस्वरूपयोग्यत योपगमात् ।

नच • ज्ञानविषयकत्वघटितधर्मावच्छिन्ननिरूपितयोग्यतानिवेशेऽपि नाय दोष इति वाच्यम् ? तथासति आत्ममनोयोगादीनां ज्ञानविषयकत्वावच्छि आजनकत्वात् तद्घटिततया वारणीयानां सामग्रीणामपि ज्ञानग्राहकतया भट्टमत सिद्धत्वानुपपत्तेः ।

अथैवं भवन्मतेऽपि आत्मशरीरादीनां भट्टमतेऽन्यत्र प्रामाण्यग्राहकतय तद्घटितानां वारणीयसामग्रीणां प्रमाण्याग्राहकतया तु भट्टमतसिद्धत्वम् ।

यदि चात्मादीनां तथात्वेन भट्टमतसिद्धत्वविरहेपि वारणीयसामग्रीघटव पदज्ञानपरामर्शादीनां प्रामाण्यग्रहानुपधायकत्वेन भट्टमतसिद्धतया तद्घटित समुदायस्य तथात्वेन भट्टमतसिद्धभिन्नत्वानुपपत्त्या तद्वारणं सुघटमित्युच्य तदैतन्मतेऽपि उक्तरीत्या निर्वाह इति चेत् सत्यम्, एवं सति पदाजन्ययोग्यत

(प्रभा) मित्यर्थः । उपनीतभानेति = ज्ञातो घट इति उपनीतभानेत्यर्थः । स्वरूपयोग्यतयं पगमादिति । अयं घट इति प्रत्यक्षसामग्र्याश्चक्षुःसंयोगादिघटिताया इति पूर्वेणान्वयः अर्थाज्ज्ञानविषयो घट इत्युपनीतज्ञानसामग्र्या तज्ज्ञानप्रामाण्यग्रहानुपधायकतया ज्ञानग्रह स्वरूपयोग्यतया भट्टमतसिद्धभिन्नतया साध्यघटकत्वेन बाधस्स्यादित्यतो ज्ञानग्रहोपधायकत निवेश आवश्यक इति भावः ।

ज्ञानविषयो घट इत्युपनीतसामग्र्यास्साध्यघटकतां वारयति नचेत्यादिना ज्ञानविषयकत्वघटितेति = ज्ञानविषयकत्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छे दकधर्मवत्त्वरूपयोग्यतानिवेशेऽपीत्यर्थः । अयम्भावः, तत्प्रकारकप्रत्यक्षे • तद्विषयकज्ञान कारणतया प्रकृते ज्ञानविषयो घट इत्यत्र घटभानं चक्षुःसंयोगादिना, ज्ञानभानं तु स्मरण त्मकज्ञानलक्षणासन्निकर्षेणेति, चक्षुःसंयोगादिजन्यतावच्छेदकं घटविषयकत्वं नतु ज्ञानविष कत्वं, ज्ञानविषयकत्वं हि तादृशस्मृतिजन्यतावच्छेदकमित्यतोऽयंघट इति प्रत्यक्षसामग्र् श्चक्षुःसंयोगादिघटिताया ज्ञानविषयकत्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेद धर्मवत्त्वरूपस्वरूपयोग्यत्वाभावेन तज्ज्ञानप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नतया साध्यघटकत्वेन नास्ति बाध इति भावः । आत्ममनोयोगादीन मिति = ज्ञानपदस्य ज्ञानविषयताप्रयोजकत्वेन ज्ञानविषयकत्वं नात्मजन्यतावच्छेदकमि भावः । तद्घटिततया=आत्ममनोयोगादिघटिततयेत्यर्थः । तृतीयार्थः प्रयोज्यत्वम्, अ पपत्तेरित्यनेनान्वयः । वारणीयानां सामग्रीणामिति = घटज्ञानमितिशाब्दसामग्री घटज्ञानवान् घटेच्छावत्त्वादित्यनुमितिसामग्रीणामित्यर्थः । ज्ञानग्राहकतया भट्टमतसि

(गा०) ज्ञानघटितयोग्यताविषयकशाब्दसामग्रीविशेषेण गुरुमते प्रामाण्याग्र
बाधस्य शङ्कायां ग्रन्थकृतोऽसङ्गतिः ।

तादृशयोग्यताज्ञानस्य ज्ञानग्राहकतया भट्टाभ्युपगतभिन्नत्वेऽपि कार
न्तरस्य तथात्वेन भट्टमतसिद्धत्वस्य तत्र सत्त्वात् तद्घटितसमुदायात्म
सामग्र्यास्तथात्वेन भट्टमतसिद्धभिन्नत्वानुपपत्तेः । अतः प्रामाण्यग्रहफलोपध
प्रयोजकतानवच्छेदकतया ज्ञानग्राहकतावच्छेदकतया भट्टाभ्युपगतं यादृश
तदन्यज्ञानग्रहोपधानप्रयोजकतावच्छेदकरूपावच्छिन्नसामग्रीग्राह्यत्वं साध्य
तदभिमतम् । तथा च कारणसमुदायपर्याप्तस्य ज्ञानग्रहोपधानप्रयोजकतावच
दकधर्मस्य स्वरूपयोग्यतानवच्छेदकत्वात् तदवच्छेदकतया भट्टमतसिद्धभि
त्वावश्यकत्वात् ज्ञानग्रहोपधाननिवेशनमावश्यकम् । तादृशसाध्यानुसरणं नि
योजनमिति न शंक्यम् , वारणीयसामग्रीघटकज्ञानभासकानां सर्वेषाम् प्रत्ये
मिलितानाञ्च यत्र ज्ञायमानलिङ्गादिविधया प्रामाण्यविषयकानुमित्युपधायक
तादृशसामग्र्याः प्रामाण्याग्राहकत्वेन भट्टमतसिद्धभिन्नतया तज्जन्यप्रामाण
विषयकज्ञानमादाय बाधस्य दुर्वारतया यथाश्रुतस्य सामग्र्याम् प्रामाण्याग्राह
तया भट्टमतसिद्धान्यत्वविशेषणघटितसाध्यस्य विवक्षणासम्भवात् ।

(प्रभा) तादृशशाब्दसामग्र्या ज्ञानग्रहस्वरूपयोग्यत्वेन भट्टमतसिद्धत्वाभावात् तज्ज
प्रामाण्याग्राहकत्वेन ज्ञानग्रहस्वरूपयोग्यत्वेन च भट्टमतसिद्धभिन्नत्वेन साध्यघटक
बाधस्तदवस्थ एवेति भावः ।

तादृशयोग्यताज्ञानस्येति = ज्ञानविषयकत्वघटितधर्मावच्छिन्नजन्यतानिरू
जनकतावच्छेदकधर्मवत्त्वरूपयोग्यताज्ञानस्येत्यर्थः । प्रामाण्यग्रहेति = प्रामाण्य
फलोपधानप्रयोजकतानवच्छेदकतया ज्ञानग्राहकतावच्छेदकतया भट्टाभ्युपगतं यादृशं स
दायत्वं तदन्यज्ञानग्रहोपधानप्रयोजकतावच्छेदकरूपावच्छिन्नसामग्रीग्राह्यत्वं साध्यमिति भाव
वारणीयसामग्रीघटकेति=शाब्दबोधसामग्रीघटकेत्यर्थः । ज्ञायमानलिङ्गादिविधये
इदं ज्ञानं प्रमा तत्सामग्रीमत्त्वात् ; तथाच प्रामाण्यग्रहफलोपधायकतानवच्छेदकतया ज्ञान
फलोपधायकतावच्छेदकतया च भट्टाभ्युपगतं यादृशं समुदायत्वं तादृशसमुदायत्वा
ज्ञानग्रहफलोपधायकतावच्छेदकीभूतं यत्समुदायत्वं तदवच्छिन्नसामग्रीजन्ययावद्ग्रहविष
मीमांसकमते साध्यं पर्यवसितम् । अन्यथा घटज्ञानशाब्दबोधसामग्रीणां यावतीनां यत्र
ज्ञानम्प्रमा तादृशसामग्रीमत्त्वादित्याकारकप्रामाण्यानुमितिफलोपधायकत्वं सम्भवति ताद
स्थले प्रामाण्यग्रहानुपधायकत्वेन ज्ञानग्रहोपधायकत्वेन च निरुक्तशाब्दबोधसामग्र्या भट
तसिद्धभिन्नतया तज्जन्यघटज्ञानशाब्दबोधविषयत्वस्य प्रमात्वेऽसत्त्वाद् बाधः, अस्माकम् मत
न, शाब्दबोधसामग्रीनिष्ठसमुदायत्वस्य प्रामाण्यग्रहोपधायकतानवच्छेदकत्वेन भट्टमतसिद्ध
तदन्यत्वस्य तादृशसमुदायत्वे विरहात् ।

(गा०) उक्तसाध्यादरे तु प्रामाण्याविषयकज्ञानग्रहोपधानप्रयोजकता-वच्छेदकस्य तज्ज्ञानग्रहोपधायकसमुदायपर्याप्तधर्मस्य प्रामाण्यविषयकतत्तत्का-रणलिङ्गकिञ्चित्साध्यकानुमित्युपधानप्रयोजकतानवच्छेदकत्वेन तादृशसामग्री-जन्यप्रामाण्याविषयकग्रहस्य साध्याघटकत्वेन बाधवारणसम्भवात् ।

वस्तुतस्तु प्रामाण्यग्रहानुपधायकत्वेन भट्टमतसिद्धत्वं न पृथङ् निवेश्यते अपितु ज्ञानग्राहकान्तर्गतो ग्रह एव प्रामाण्याविषयकत्वेन विशेष्यते लाघवात् । एवंच प्रामाण्याविषयकग्रहजनकत्वेन भट्टमतासिद्धत्वनिवेशे व्यवसायादि-सामग्रीघटकात्मादेर्भट्टमतेऽपि प्रामाण्याविषयकज्ञानग्रहजनकतया

(प्रभा) ननु लिङ्गज्ञानस्यानुमापकत्वं नतु ज्ञायमानलिङ्गस्येत्याशंकयाह वस्तु-तस्तु इति । तथाच प्रामाण्याविषयकज्ञानग्रहजनकत्वेन भट्टमतसिद्धा या सामग्री तद्भिन्ना या ज्ञानग्राहिका सामग्री तज्जन्यग्रहविषयत्वं साध्यमिति पर्यवसितम् । संगमनप्रकार-स्त्वेत्थम्-भट्टमते व्यवसायस्यातीन्द्रियतया ज्ञाततालिङ्गकानुमित्यतिरिकेन केनचिदन्येन व्यवसायग्रहो न जायते, एवञ्च गुरुमतसिद्धव्यवसायसामग्री च न ज्ञानग्राहकत्वेन भट्टमतसिद्धा । एवं मिश्रमतसिद्धानुव्यवसायसामग्री च ज्ञानग्राहकत्वेन भट्टमतसिद्धा इत्यतः प्रामाण्याविषयकज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वस्य व्यवसायानुव्यवसायादि-सामग्र्यां सत्त्वेन साध्यघटकतया तत्संग्रहेण साध्यसत्त्वोपपत्तिः । भट्टमतसिद्धानुमितिसामग्र्या ज्ञानग्राहकत्वेन भट्टमतसिद्धत्वेऽपि तादृशसामग्रीजन्यतादृशानुमित्यात्मकज्ञानग्रहस्य भट्टमते प्रामाण्याविषयकत्वाभावात् ज्ञाततालिङ्गकानुमितिसामग्र्या अपि प्रामाण्याविष-यकज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नतया संग्रहः । घटज्ञानमितिशाब्दसामग्र्या ज्ञानग्राह-कत्वेन भट्टमतसिद्धत्वम्, तादृशशाब्दबोधश्च न प्रामाण्यविषयक इत्यपि सिद्धम् । एवञ्च प्रामाण्याविषयकज्ञानग्रहजनकत्वेन भट्टमतसिद्धतया साध्याघटकतया नास्ति बाध इति । ग्रह एवेति=द्वितीयग्रह एवेत्यर्थः ।

फलोपधायकतानिवेशकामो व्यवसायानुव्यवसायसामग्र्योः साध्याघटकतया गुरुमिश्रमते बाधं सम्पादयति एवञ्चेत्यादिना । प्रथमं मतत्रये बाधं दर्शयति व्यवसायेत्यादिना । व्यवसायादिसामग्रीघटकात्मादेरिति=व्यवसायादिजनकसामग्रीघटकात्मादेरित्यर्थः । आदिपदादनुव्यवसायपरिग्रहः । आत्मादेरित्यत्र शरीरपरिग्रहः । निष्ठत्वं षष्ठ्यर्थः, ज्ञानग्रह-जनकतयेत्यनेन सम्बन्धः ।

आत्मशरीरादेर्लिङ्गविधया प्रामाण्याविषयकज्ञानग्रहजनकत्वेन भट्टमतसिद्धत्वस्य सत्त्वेन तद्घटितसामग्र्या भट्टमतसिद्धभिन्नत्वं न स्याद् व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकै-कदेशभेदस्याप्रामाणिकत्वात् । प्रामाण्याविषयकज्ञानग्रहजनकतयेति = न भट्टमतसिद्ध-त्वमित्यनेनान्वयः,प्रामाण्याविषयकज्ञानग्रहस्वरूपयोग्यतयेत्यर्थः । प्रामाण्याविषयको यो ज्ञानग्रहो घटज्ञानविषयकशाब्दबोधादिस्तज्जनकताऽत्मनि भट्टेनाभ्युपगम्यत एवेति प्रामाण्या-

(मा०) तादृशज्ञानानुमितौ लिंगविधया ज्ञानभानेऽपि प्रयोजकत ऽनुव्यवसायजनकव्यवसायस्य प्रामाण्याविषयकेऽपि स्वान्वयबोधे तन्म ज्ञायमानपदार्थविधया कारणस्य स्वात्मकज्ञानभासकतया अभिमतसाम ग्र नोक्तप्रकारेण भट्टमतासिद्धत्वम्, अतः फलोपधायकतावच्छेदकधर्मं प ताहशज्ञानग्रहफलोपधायकतावच्छेदकतया भट्टमतसिद्धभिन्नत्वं निवेश्यमि ति ग्रन्थसंगतिः ।

(प्रभा) दित्थञ्च भट्टमतसिद्धभिन्नत्वाभावाद् व्यवसायसामग्र्यास्साध्याघटकतया संग्रहे गुरुमते काऽपि ज्ञानग्राहिका सामग्री नास्ति या तादृशभट्टमतसिद्धभिन्ना स्यादिति साध्य प्रसिद्धिरिति भावः । **तादृशज्ञानानुमितौ इति** = समवायेन प्रमाकालीनघटज्ञानवा तादात्म्येनात्मनः, एवमवच्छेदकतासम्बन्धेन घटज्ञानवान् तादात्म्येन शरीरात् इत्याद्यनुमित वित्यर्थः । **लिङ्गविधयेति**=हेतुतयेत्यर्थः । मिश्रमते साध्याप्रसिद्धिन्दर्शयति **अनुव्यव सायजनकव्यवसायस्येति** । अग्रिमकारणस्येत्यनेन सम्बन्धः कुत्र कारणस्येति जिज्ञासाय माह **स्वान्वयबोधे इति** । स्वविषयकज्ञानस्मृतिम्प्रति स्वस्य हेतुत्वेन व्यवसायस्य जनकत्व मिति बोध्यम् । **प्रामाण्याविषयकेऽपीति** । अपिशब्दस्य स्वान्वयबोधे इत्यनेन सम्बन्ध स्वान्वयबोधेऽपीति योजना । स्वं व्यवसायस्तद्विषयकशाब्दबोधेऽपीत्यर्थः । **तन्मते**=भट्टम इत्यर्थः । **ज्ञायमानपदार्थविधया कारणस्येति** । पूर्वोक्तव्यवसायस्येत्यनेन सम्बन्धः अयंभावः, पदार्थस्यान्वयबोधकारणतावादिनो भट्टस्य मते व्यवसायविषयकशाब्दबो व्यवसायो हि हेतुः । भट्टस्य मते शाब्दबोधे पदन्न करणं किन्तु पदार्थ एव । अत एवापू वाक्यार्थमनुभूयैवाभिनवकाव्यं कवयो रचयन्ति । तादृशापूर्ववाक्यार्थज्ञानमसन्निकृष्टत्वा प्रत्यक्षम् , व्याप्तिज्ञानापूर्वकत्वान्नानुमितिः, शब्दाभावान्न शाब्दबोधः, परन्त्वन्वयबो एव, तादृशबोधे चिन्तावशोपस्थिताः पदार्था एव हेतवः नतु पदानि इति भट्टाभि मानस्तथाच मिश्रमतसिद्धानुव्यवसायसामग्री प्रामाण्याविषयकज्ञानग्रहस्वरूपयोग्यत्वे भट्टमतसिद्धैवेति भट्टमतसिद्धभिन्नत्वाभावस्य मिश्रमतसिद्धानुव्यवसायसामग्र्यामसत्त्वे तादृशसामग्र्याःसाध्याघटकतया मिश्रमते न काचिदीदृशी प्रसिद्धा सामग्री या प्रामाण्याविष यकज्ञानग्रहजनकत्वेन भट्टमतसिद्धभिन्ना स्यात्तथा च मिश्रमतेऽपि साध्याप्रसिद्धिरिति भावः **स्वात्मकज्ञानभासकतयेति** = व्यवसायात्मकज्ञानभानप्रयोजकतयेत्यर्थः । **अभिमत सामग्र्या इति** = साध्यघटकतयाऽभिमता या व्यवसायसामग्री तस्या एवम्मिश्रमते साध्य घटकतयाऽभिता या सामग्री तस्या इत्यर्थः । **न इति** । भट्टमतासिद्धत्वमित्यनेन सम्बन्धः उक्तप्रकारेण न भट्टमतासिद्धत्वमिति योजना । **उक्तप्रकारेणेति** = उपर्युक्तो यः प्रका व्यवसायादिसामग्रीघटकेत्यारभ्य स्वात्मकज्ञानभासकतयेत्येतत्पर्यन्तो व्यापारस्तेनेत्यर्थः तृतीयार्थः प्रयोज्यत्वम्, उक्तप्रकारप्रयोज्यो भट्टमतासिद्धत्वाभाव इति योजना । तथा गुरुमते मिश्रमते न [illegible]

(दी०) अयं घट इत्यादिज्ञानजनकसामग्र्याः प्रामाण्याग्राहकत्वेन भट्टैर्मा-ङ्गीकृतत्वात् गुरुमतसाधारण्यसम्पादनाय ज्ञानग्राहकत्वेनेति ।

(गा०) ज्ञानग्राहकत्वेनेत्यस्य प्रयोजनं स्वयमाह *अयं घट इत्यादीति* । *भट्टाङ्गीकृतत्वादिति* । नच तादृशसामग्र्यन्तर्गतस्य घटत्वादिग्राहकसंयुक्तसम-वायस्य समवायानङ्गीकर्तृ भट्टमतसिद्धत्वाभावान्न तादृशसामग्र्या भट्टमत-

---

(प्रभा) फलोपधायकतावच्छेदकतया भट्टमतसिद्धं यद्रूपं तद्भिन्नं यद् ज्ञानग्रहफलोपधायकतावच्छेदकं रूपं तद्रूपावच्छिन्नसामग्रीजन्यग्रहविषयत्वं साध्यं पर्यवसितम् ।

तथा च व्यवसायसामग्रीगतसमुदायत्वस्य प्रामाण्याविषयकज्ञानग्रहस्वरूपयोग्यतावच्छेद-कतया भट्टाभ्युपगतत्वेऽपि न प्रामाण्याविषयकज्ञानग्रहफलोपधायकतावच्छेदकतया भट्टाभ्युपगतत्वमिति व्यवसायसामग्र्यास्साध्यघटकत्वमिति, एवमनुव्यवसायेऽपि । घटज्ञानमितिशाब्द-सामग्रीगतसमुदायत्वं तु तथात्वेन भट्टाभ्युपगतमिति बाधवारणमपि सिद्ध्यति । अग्रिम-ग्रन्थसंगतिरिति = ओदनकामकार्यताज्ञानविषयः पाक इत्यत्र बाधदानपरदीधितिग्रन्थ-संगतिरित्यर्थः । तथाहि ओदनकामकार्यताज्ञानविषयः पाक इत्यत्र तादृशयोग्यताज्ञानघटित-सामग्रीगतसमुदायत्वं हि प्रामाण्याविषयकज्ञानग्रहफलोपधायकतया भट्टमतसिद्धं नास्ति इत्य-तस्तादृशसामग्र्याःसाध्यघटकतया तज्जन्यग्रहविषयत्वस्य प्रमात्वेऽसत्त्वाद् बाध इति भावः ।

प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वदले ज्ञानग्राहकत्वदल-प्रयोजनं दर्शयति दीधितौ **अयं घट** इत्यादिना । आदिपदादयं पट इत्यादिसंग्रहः । अयं भावः, तज्ज्ञानप्रामाण्याग्राहकत्वेन भट्टमतसिद्धभिन्नत्वमात्रनिवेशे अयं घट इत्यादिव्यवसाय-सामग्र्यास्तज्ज्ञानप्रामाण्याग्राहकत्वेन भट्टमतसिद्धतया तद्भिन्नत्वाभावेन साध्याघटकतया गुरुमते साध्याप्रसिद्ध्यापत्तेः । गुरुमतसाधारण्यसम्पादनायेति । ज्ञानातीन्द्रियत्ववादिभट्टमते ज्ञानानुव्यवसायासत्त्वेन मिश्रमतसिद्धानुव्यवसायसामग्र्या अलीकतया तादृशसामग्र्यां तज्ज्ञानप्रामाण्याग्राहकत्वेन भट्टमतसिद्धभिन्नत्वसौलभ्येन तादृशसामग्र्याःसाध्यघट-कतया न मिश्रमते काप्यनुपपत्तिरतो मिश्रमतसाधारण्यायेति नोक्तम् । तादृशभट्टमत-सिद्धभिन्नत्वदले ज्ञानग्राहकत्वेनेत्यस्य निवेशाभावेऽपि न गुरुमतसाधारण्यानुपपत्तिरित्या शङ्कते नचेत्यादिना । तादृशसामग्र्यन्तर्गतस्येति=अयंघट इति व्यवसायसामग्र्यन्त र्गतस्येत्यर्थः । घटत्वादिग्राहकसंयुक्तसमावायस्येति = घटत्वप्रत्यक्षजनकस्य संयुक्तसमवायस्ये त्यर्थः । आदिपदात्पटत्वाद्युपग्रहः समवायानङ्गीकर्तृ भट्टमतसिद्धत्वाभावादिति । अयंभावः भट्टो हि घटघटत्वयोः समवायसम्बन्धं नाङ्गीकरोति किन्तु तयोस्तादात्म्यसम्बन्धमेव । एवञ्च तन्मते समवायस्यालीकतया तद्घटिताया अयं घट इति प्रत्यक्षसामग्र्या अपि भट्टमतसिद्ध —— तत्प्रामाण्याग्राहकत्वेन भट्टमतसिद्धभिन्नतया साध्यघटकत्वोपपत्तौ तद

(भा०) सिद्धत्वमिति बाध्यम्, समवायत्वेन तदनङ्गीकारेऽपि घटत्वादिसम्ब न्धत्वेन तदभ्युपगमात्। घटादौ समवायस्यैव वस्तुतो घटत्वादिसम्बन्धत्वात्।

ननु प्रामाण्याग्राहकपरोक्षसामग्रीभिन्नत्वं निवेश्यते तावतैव गुरुमते व्य सायात्मकज्ञानप्रत्यक्षसामग्र्या मिश्रमतेऽनुव्यवसायसामग्र्याः परोक्षसाम भिन्नत्वेन भट्टमते च ज्ञाततालिङ्गकानुमितिसामग्र्याः परोक्षसामग्रीत्वे प्रामाण्याग्राहकभिन्नत्वेन विशिष्टभेदस्याक्षततया मतत्रयसाधारण्योपपत्तेः प्रामाण्याग्राहकशाब्दानुमितिसामग्र्योश्च तादृशभेदासत्त्वेन व्यावृत्तिसम्भव दिति चेन्न ? ज्ञाततालिङ्गकानुमितिसामग्र्याः प्रामाण्यग्राहकत्वासिद्धिकं तज्जन्यानुमितेः साध्यघटकयावद्ग्रहान्तर्गतत्वासिद्धया उक्तसाध्यसिद्धाव तादृशानुमितेः प्रामाण्यावगाहितायाः असिद्धया भट्टस्योद्देश्यासिद्धेः।

(प्रभा) अयं घट इति प्रत्यक्षसामग्र्या इत्यर्थः। समवायत्वेन तदनङ्गीकारेऽपि=सम यत्वेन रूपेण समवायानङ्गीकारेऽपीत्यर्थः। घटत्वादिसम्बन्धत्वेन तदभ्युपगमादिति अयं भावः, घटघटत्वयोः कश्चित्सम्बन्धस्तु भट्टेनापरेणापि स्वीकर्तव्यः संसर्गावगा त्वात् किन्तु स एव संसर्गो भट्टमते तादात्म्यमपरत्र मते समवायः, संज्ञायामेव तयोर्विवादात् घटादौ समवायस्येति। य एवापरमते घटादौ घटत्वादिसमवायः स भट्टमते तादात्म्यम्

ननु प्रामाण्याग्राहकपरोक्षसामग्रीभिन्नत्वेनैव ज्ञानग्राहकसामग्रीविवक्षणे लाघवसम्भ वाद्दीधितिकृतान्निरुक्तरीत्या गुरुतरनिवेशनं व्यर्थमित्याशङ्कते नन्वित्यादिना प्रामाण्याग्राहकेति। तथाच प्रामाण्याग्राहकपरोक्षसामग्रीभिन्ना या ज्ञानग्राहिका साम तज्जन्यग्रहविषयत्वं साध्यं पर्यवसितम्। तथाच प्रामाण्याग्राहिका या परोक्षसामग्री सा शाब्दसमग्री ननु प्रत्यक्षसामग्रीति तद्भिन्नैव गुरुमतसिद्धव्यवसायसामग्री तस्यास्साध्य घटकतया गुरुमते समन्वयः। एवम्मिश्रमतसिद्धानुव्यवसायसामग्री च प्रामाण्याग्राहक परोक्षसामग्रीभिन्नेति तत्संग्रहः। एवम्भट्टमतसिद्धज्ञाततालिङ्गकानुमितिसामग्री यद्यपि परोक्षसामग्रीरूपा तथापि न प्रामाण्याग्राहकीभूता किन्तु प्रामाण्यग्राहिकैवेति तत्रापि प्रामाण्याग्राहकपरोक्षसामग्रीभिन्नत्वसत्त्वात्तत्संग्रहः।

अत एव परोक्षसामग्र्यां प्रामाण्याग्राहकत्वविशेषणमुपात्तम्। घटज्ञानमितिशाब्द सामग्री घटेच्छालिङ्गकघटज्ञानवानित्यनुमितिसामग्री च प्रामाण्यग्राहिका अथ च परोक्ष सामग्रीरूपाऽपीति तत्र तद्भिन्नत्वविरहेण तस्यास्साध्याघटकतया नास्ति बाध इति भावः इदन्तु बोध्यम्, परोक्षसामग्रीभिन्नत्वनिवेशे ओदनकामकार्यताज्ञानविषयः पाक इत्याद्युत्तर बाधो न स्यात् तत्र ओदनसाधनतारूपयोग्यताज्ञानरूपशाब्दसामग्र्याः प्रामाण्याग्राहकतया परोक्षसामग्रीरूपतया च तादृशसामग्रीभिन्नत्वानुपपत्तेरिति। खण्डयति इति चेन्नेत्या दिना। ज्ञाततालिङ्गकानुमितिसामग्र्या प्रामाण्यग्राहकत्वासिद्धिकाले=यावत्काल पर्यन्तं ज्ञाततालिङ्गकानुमितिसामग्र्या प्रामाण्यं गृह्यते इति व्यवस्था न सिद्धा तावत्काले इत्यर्थः। तज्जन्यानुमितेरिति=ज्ञाततालिङ्गकानुमितिसामग्रीजन्यानुमितेरित्यर्थः।

(गा०) प्रामाण्यग्राहकत्वयोभयवादिसिद्धानुमित्यादिसामग्रीग्राह्यतामादा-यापि साध्यपर्यवसानात् । नैयायिकमतासिद्धत्वोक्त्यानुव्यवसायसामग्र्यसंग्रहः । गुरुमतासिद्धत्वं मिश्रमतासिद्धत्वं वा यदि निवेश्यते तदा व्यवसायसामग्र्या गुरु-मतेऽनुव्यवसायसामग्र्याश्च मिश्रमते प्रामाण्यग्राहकतया विशिष्टभेदसत्त्वेऽपि

(प्रभा) सामग्र्यां भट्टमतसिद्धानुमितिसामग्रीसंग्रहार्थमेवोपादीयते किन्तु इदानीं प्रमात्वे स्वतोग्राह्यत्वविचारावसरे ज्ञातताលिङ्गकानुमितिसामग्र्या अपि प्रामाण्यं गृह्यते इत्यपि साध्य-मेव नतु सिद्धमेवञ्च ज्ञाततालिङ्गकानुमितिसामग्र्यां प्रामाण्यग्राहकत्वस्य साध्यत्वे साध्यघटक-प्रामाण्याग्राहकपरोक्षसामग्रीभिन्नपदेन ज्ञाततालिङ्गकानुमितिर्न धर्तुं शक्यते । तथाच भट्टस्योद्देश्यासिद्धिः नतु साध्याप्रसिद्धिः, संवादिप्रवृत्तिजनकत्वलिङ्गकानुमितिसामग्र्याः प्रामाण्यग्राहकत्वस्य भट्टनैयायिकोभयमतसिद्धतया प्रामाण्याग्राहकपरोक्षसामग्रीभिन्नपदेन तादृशसंवादिप्रवृत्तिजनकत्वलिङ्गकानुमितिसामग्र्या संग्रहेण साध्यसत्त्वोपपत्तेः ।

अनुमित्यादिसामग्रीग्राह्यतामादायापीति=प्रामाण्यग्राहकतया भट्टनैयायिकोभय-वादिसिद्धा या संवादिप्रवृत्तिलिङ्गिका इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वादित्याकारिका-ऽनुमितिस्तज्जनकसामग्रीजन्यतादृशानुमित्यात्मकग्रहविषयतामादायापीत्यर्थः ।

ननु तथाऽपि प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन नैयायिकमतसिद्धभिन्ना या ज्ञान-ग्राहिका सामग्रीत्येवोच्यतामलम्भट्टमतसिद्धत्वोक्त्येत्याशङ्कायामाह नैयायिकमतसिद्धत्वोक्तौ अनुव्यवसायसामग्र्यसंग्रह इति । अनुव्यवसायसामग्र्यास्तज्ज्ञानप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन नैयायिकमतसिद्धतया तद्भिन्नत्वविरहेण तदसंग्रहे मिश्रोद्देश्यासिद्धिर्नतु साध्याप्रसिद्धिः, इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वादित्यनुमितिमादाय साध्यसत्त्वोपपत्तेः । गुरुमतसिद्धव्यवसायसामग्री च न ज्ञानग्राहकत्वेन नैयायिकमतसिद्धा इति तत्र प्रामाण्या-ग्राहकत्वेन ज्ञानग्राहकत्वेन च नैयायिकमतसिद्धभिन्नत्वोपपत्तिः । शाब्दसामग्री च प्रामाण्य-ग्राहकत्वेन नैयायिकमतसिद्धैवेति बाधवारणम् । ज्ञाततालिङ्गकानुमितिसामग्री च ज्ञानाती-न्द्रियत्वमनभ्युपगच्छतां नैयायिकानाम्मतेऽलीकैव नतु तत्सिद्धेति तत्रापि तद्भिन्नत्वोपपत्तिः । ओदनकामकार्यताज्ञानविषयः पाक इत्यत्र बाधसंगतिश्च ।

ननु तथापि प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन गुरुमतसिद्धभिन्नत्वमेवोच्यतां व्यव सायसामग्र्याः प्रामाण्याग्राहकत्वेन गुरुणाङ्गीकृतत्वाभावेन तत्संग्रहः । स्वप्रकाशवादि गुरुमतेऽनुव्यवसायानङ्गीकारात्तद्भिन्नत्वोपपत्तिः । एवं ज्ञाततालिङ्गकानुमितिसामग्र्या अपि गुरुणानङ्गीकृतत्वात्तत्रापि तद्भिन्नत्वोपपत्तिः । बाधवारणमिति । अग्रिमबाधपरग्रन्थ सङ्गतिश्चेति । एवं प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च मिश्रमसिद्धभिन्नत्वमेवोच्यत गुरुमतसिद्धव्यवसायसामग्र्या ज्ञानग्राहकत्वेन मिश्रमतसिद्धत्वाभावात्तत्संग्रहः । मिश्रम सिद्धानुव्यवसायसामग्री च न प्रामाण्याग्राहकत्वेन मिश्रमतसिद्धेति तत्संग्रहः । भट्टम ——लिङ्गकानुमितिश्च मिश्रमतेऽलीकैवेति तत्रापि तद्भिन्नत्वोपपत्तिः । शाब्द

... इत्यादिप्रत्यक्ष
सामग्र्या गुरुमिश्रमतासिद्धतया घटज्ञानादिप्रामाण्याग्रहाद् भट्टमते बाधस्य
ईति भट्टमतासिद्धभिन्नत्वोपादानम् ।

यत्तु 'पश्यतश्श्वेतिमा रूपम्' इत्यादिन्यायेन पदाजन्योपस्थितिविषय
दार्थान्वयबोधस्य ज्ञानावगाहिनः सामग्र्या मिश्रादिमतासिद्धतया घटज्ञानादि

(प्रभा) कामकार्यताज्ञानविषयः पाक इत्यग्रिमवाधपरग्रन्थासङ्गतिश्चेत्याशङ्क्य उभयत्र दूषणमुपादत्ते उपनीतघटादिविषयकत्वेति ।

गुरुमतासिद्धत्वनिवेशाभावे एवम्मिश्रमतासिद्धत्वनिवेशाभावेऽन्यथा बीजमुपदर्शयन् यत्तुवादिनाम्मतं दूषयितुमुपन्यस्यति यत्तु इति । पश्यतः श्वेतिमा रूपं ह्रेषाशब्दञ्च शृण्वतः खुरविक्षेपशब्दञ्च श्वेतोऽश्वो धावतीति धीः । श्वेतिम आ रूपमितिच्छेदः, आङ् ईषदर्थे श्वेतत्वजातिविशिष्टं रूपमीषत्पश्यत इत्यर्थः । नन्वेवं तेप्राग्धातोरित्यनुशासनात् आपश्यत इति युक्तमितिचेत् गत्यादिसंज्ञानां प्रागेव प्रयोगोऽतथाभूतानां तु व्यवहितोऽपीति मते व्यवधानेनापि आङः प्रयोगसम्भवात् । अत एव पातञ्जले महाभाष्ये संज्ञानियमपक्षस्य सिद्धान्ततया व्यवहिते गत्युपसर्गसंज्ञानिषेधेऽपि प्रयोगे बाधाभावात् अतएव "तस्य स्थित्वा कथमपि पुर इतिमेघदूतम्, अभवद् युगपद् विलोलजिह्व युगलीढोभयसृक्कभागमाविरितिमाघः" आविःपुरश्शब्दयोर्व्यवहितेऽपि प्रयोगः । तथाच प्रकृतेऽप्यापश्यत इत्यन्वयः साधुः । एतेनोपस्थिताःपदार्थास्तदुपस्थितिर्वा शाब्दबोधहेतुर्नतु पदज्ञानं तद्विनाऽपि शाब्द बोधोदयेन व्यभिचारात् इति पदज्ञानस्य व्यभिचारित्वं शाब्दबोधे भट्टेन प्रदर्शितम् । अत्र श्वैत्यादिज्ञानस्य प्रत्यक्षादिजन्यत्वेऽपि विशिष्टज्ञानस्यालौकिकप्रत्यासत्त्यनङ्गीकर्तुस्तस्य मते प्रमाणपञ्चकाजन्यत्वेन शाब्दमतावन्तर्भावनीयतया तस्याश्चाकाङ्क्षाज्ञानं विनैवोत्पत्तिरितिभावः ।

अश्वत्वस्य धावनस्य चानुमानिकत्वत्नाभाय क्रमेण ह्रेषाखुरविक्षेपध्वन्योराकर्णनमुक्तम् । अत्र हि श्वेतरूपदर्शने ह्रेषाशब्दश्रवणेन गवादिद्रव्यासंसर्गनिश्चये श्वेतत्वमश्वसंसर्गं विनानुपपन्नमितिधीरश्वत्वस्य भासिका खुरविक्षेपशब्दश्रवणे च खुरविक्षेपशब्द उपलभ्यमानःधावनकर्तृत्वं विनानुपपन्न इति धीर्धावनस्य, श्वेतरूपस्याश्वान्यद्रव्यवृत्तित्वबाधधीसहिताऽधावद्द्रव्यवृत्तित्वबाधधीसहिता च द्रव्यवृत्तित्वधीरश्वत्वधावनोभयालिङ्गिकेति केचित् । इदन्तु बोध्यम्, श्वेतोऽश्वो धावतीति ज्ञानं न प्रत्यक्षम् अश्वत्वादिद्रव्यनिष्ठजातिव्यञ्जकाभावात्, नाप्यनुमितिः श्वेतत्वव्याप्यग्रहात्, नाप्युपनीतभानं चाक्षुषत्वप्रयोजकास्येन्द्रियसन्निकर्षविनाशात्, बहिर्विषये मनसोऽसामर्थ्यात् ह्रेषादेरपदत्वाच्च न पदं करणमित्यनायत्या उपस्थिताः पदार्थास्तदुपस्थितिर्वा शाब्दबोधे हेतुः, प्रमाणपञ्चकाजन्यत्वेन शाब्दमतावन्तर्भावनीयतया तस्याप्याकाङ्क्षाज्ञानं विनाऽप्युत्पत्तिरिति । किन्तु कार्यान्वितशक्तिवादे च प्रथममयं श्वेतोऽश्वो ह्रेषावत्त्वादित्यनुमानं ततोऽयं श्वेतोऽश्वो धावति खुरविक्षेपशब्दविशेषवत्त्वादित्यपरम् । यद्वा श्वेतोऽश्वो ह्रेषावत्त्वे सति खुरविक्षेपशब्दविशेषवत्त्वादित्यनुमानम् । एवञ्च प्रकृते ज्ञानपदाजन्यस्य शाब्दबोधे भानम् ।

सामग्र्या मिश्रादिमतासिद्धत्वेति ...

(गा०) प्रामाण्याग्रहाद् भट्टमतेपि बाधस्स्यादिति मिश्रादिमतसिद्धत्वोपेक्षाबीज-वर्णनम्, तदसत्? भट्टमतसिद्धभिन्नत्वनिवेशेऽपि ज्ञानविषयो घट इत्यादि-मानसोपनीतभानसामग्र्या मिश्रमते प्रामाण्याग्रहेण बाधस्य दुर्वारत्वात्। भट्टोपनीतभानाङ्गीकारेऽपि वह्निविशेष्यकज्ञाने मनसोऽसामर्थ्येन घटादिविशेष्य-कमानसोपनीतभानानङ्गीकारात्, तत्र पदार्थकरणकान्वयबोधस्यैवोपपत्तौ तादृ-शमानसोपनीतभानसामग्र्या भट्टमतासिद्धत्वात्।

यदि च तादृशज्ञानमुभयसिद्धमेव, तस्य मानसप्रत्यक्षरूपतैव भट्टेन नोपेयते किन्तु पदार्थकरणकान्वयबोधरूपतैवेत्यसंसर्गाग्रहपदार्थोपस्थितिरूपा तत्सामग्री अपि उभयसिद्धैवेति तद्वारणमिति मन्यते, तदा मिश्रमतभिन्नत्व-निवेशेऽपि तुल्यरीत्या भट्टमते उक्तबाधस्य वारणसम्भवात्।

अथ भट्टमतसिद्धभिन्नत्वनिवेशे उपनीतघटज्ञानविषयकपटज्ञानानुव्यव-सायेन घटज्ञानप्रामाण्याग्रहात् मिश्रमते बाधः, तादृशस्यापि पटज्ञानानुव्यव-सायस्य भट्टानभ्युपगतत्वात्, तत्सामग्र्याः पटज्ञानादिघटितायास्तथात्वात्।

नच तत्र घटज्ञानपटज्ञानयोर्भासकं सामग्रीद्वयं तत्संवलनादुभय-विषयकमेकं ज्ञानम्, एवञ्च तत्र घटज्ञानग्राहिका तज्ज्ञानादिरूपा सामग्री भट्टेन अन्वयबोधसामग्रीत्वेन उपेयत एवेति वाच्यम्, यतस्समूहालम्बनस्थल एव ग्राहकसामग्रीभेदः, यत्र चोपनीतघटज्ञानसमानाधिकरणपटज्ञानत्वादिना तादृश-घटज्ञानविशिष्टे आत्मनि पटज्ञानत्वेनैव वा पटज्ञानानुव्यवसायः तत्र तादृशविशिष्टविषयकानुव्यवसायसामग्र्या विशिष्टघटकतया घटज्ञानग्राहिकाया भट्टमतसिद्धाया घटज्ञानप्रामाण्याग्राहकत्वात् बाध एव। एवमुपनीतघट-ज्ञानरूपविषयोपरक्ततद्विषयकशाब्दबोधाद्यनुव्यवसायसामग्र्या घटज्ञानग्राहि-कया तदीयप्रामाण्याग्रहादपि बाधो दुर्वारः।

(प्रभा) ज्ञानग्राहकत्वं मिश्रेण नाङ्गीक्रियते। एवञ्च तादृशसामग्र्याः प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धभिन्नतया साध्यघटकतया तज्जन्यतादृशशाब्दबोधात्मकग्रह-विषयत्वस्य प्रमात्वेऽसत्त्वेन भट्टमतेऽपि बाधःस्यादिति।

तादृशज्ञानमिति = ज्ञानविषयो घट इति ज्ञानमित्यर्थः। उभयसिद्धमिति = मिश्रभट्टोभयमतसिद्धमित्यर्थः। तद्वारणमिति = बाधवारणमित्यर्थः। उपनीतघटज्ञान-विषयकपटज्ञानानुव्यसायेनेति = घटज्ञानविशिष्टपटज्ञानवानहमित्यनुव्यवसायेनेत्यर्थः।

सामग्रीद्वयमिति = घटज्ञानभासको ज्ञानलक्षणासन्निकर्षः, पटज्ञानभासिका चात्ममनःसंयोगादिघटिता सामग्री। सामग्रीत्वेनोपेयते इति। तथाच घटज्ञानग्राहक-सामग्र्यां निरुक्तभट्टमतसिद्धभिन्नत्वविरहेण तस्याः साध्यघटकतयाऽसंग्रहेण न तामादाय बाध इति भावः। उपनीतघटज्ञानसमानाधिकरणेति। घटज्ञानसमानाधिकरणपट-

(गा०) नच घटज्ञानं जानामीत्यादिशाब्दबोधाद्यनुव्यवसाये घटत्ववत्त्यादिप्रामाण्यमपि भासते-तद्विषयीभूते घटज्ञानमित्यादिव्यवसायेऽतत्प्रामाण्यसत्त्वादिति वाच्यम्, पुरोवर्त्तिज्ञानत्वादिना घटज्ञानविषयकव्यवसायताद्दशप्रामाण्यासत्त्वेन तदनुव्यवसाये ताद्दशप्रामाण्याभानादिति चेन्न ज्ञानान्तरविशेष्यतानापन्नात्मनिष्ठविशेष्यतानिरूपितस्वाश्रयप्रकारताशालिग्रहसामग्र्या एव ज्ञानग्राहकसामग्रीपदेन विवक्षणीयत्वात्, उक्तघटज्ञानोपनीतभानेषु घटज्ञानांशे ताद्दशात्मनिष्ठविशेष्यतानिरूपितप्रकारताविरहेणैव तत्सामग्र्याः साध्याघटकतया बाधानवकाशात्।

नचात्मनो लौकिकप्रत्यक्षे, पटादिज्ञानस्य इच्छादेर्वा विशेषगुणस्य विद्यमानस्य भानावश्यकतया लौकिकप्रत्यक्षविषयात्मांशेऽविद्यमानघटज्ञानोपनीतभाने या पटादिज्ञानीयलौकिकभानांशे धर्मितावच्छेदकतया घटज्ञानप्रकारता तस्या निरुक्तात्मविशेष्यतानिरूपितत्वविरहेऽपि एवमुपनीतघटज्ञानावच्छिन्न आत्मनि यदिच्छादेर्लौकिकप्रत्यक्षं तत्सामग्र्या भट्टमतसिद्धत्वेऽपि घटज्ञानवदात्मत्वेन परात्मोपनीतभानरूपे पटज्ञानानुव्यवसाये ताद्दशपरात्मविशेष्यतानिरूपितघटज्ञानप्रकारतासत्त्वात् ताद्दशानुव्यवसायेन घटज्ञानप्रमाण्याग्रहाद् बाधो दुर्वार एवेति वाच्यम्? उपनीतस्य परात्मनो मुख्यविशेष्यतयानुव्यवसायविषयत्वे तज्ज्ञानस्य समूहालम्बनरूपतया सामग्रीभेदेन तद्घटज्ञानभासकसामग्र्या अन्वयबोधसामग्रीत्वेन भट्टमतसिद्धतया घटज्ञानप्रामाण्यस्य तद्ग्राह्यत्वेऽपि बाधानवकाशात्, ताद्दशात्मनः स्वात्माद्यंशे कथंचित् प्रकारत्वे चात्मनो

(प्रभा) घटज्ञानविषयकव्यवसाये इति। घटज्ञानवानहमित्याकारकव्यवसाय इत्यर्थः। अयंच घटानुव्यवसायः घटज्ञानस्य व्यवसायः यश्च विषयानुव्यवसायः सच ज्ञानव्यवसाय इति। उक्तघटज्ञानोपनीतभानेषु=घटज्ञानविशिष्टपटज्ञानवानहमित्यत्रेत्यर्थः तथाच तज्ज्ञानप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्ना या ज्ञानान्तरविशेष्यतानापन्नात्मनिष्ठविशेष्यतानिरूपितस्वाश्रयप्रकारताशालिग्रहजनिका सामग्री तज्जन्यग्रहविषयत्वं साध्यं पर्यवसितम्। बाधानवकाशादिति। तथाचोक्तसामग्र्यां निरुक्तभट्टमतसिद्धभिन्नत्वसत्त्वेऽपि आत्मनिष्ठविशेष्यतानिरूपितप्रकारताविरहात्ताद्दशसामग्र्याः साध्यघटकतया नास्ति बाधावकाश इति भावः।

लौकिकप्रत्यक्षे=घटमहं जानामीत्याद्याकारके। घटज्ञानवदात्मत्वेनेत्यादि। घटज्ञानवदात्मकालीनपटज्ञानवानहमित्यत्रेति यावत्। बाधो दुर्वार इति=ताद्दशानुव्यवसायसामग्र्याः साध्यघटकतया ततश्च घटत्ववति घटत्वप्रकारकज्ञानत्वरूपप्रामाण्याग्रहाद् बाध इति भावः मुख्यविशेष्यतयेति। ननूपनीतं विशेषणतयैव भासते तथा चेदमसंगतमितिचेन्न, मानसे नायं दोष इति सिद्धान्तेन मकने। [illegible]

(गा०) मुख्यविशेष्यताया निवेशनीयतया बाधवारणसम्भवात् । नचैवमोदनकामकर्तव्यताबोधविषयः पाक इत्यादिवाक्यजन्यशाब्दबोधे पाकविशेषणतया ओदनसाधनताज्ञानस्य अन्वयप्रयोजकरूपात्मकस्य भानेऽपि आत्मविशेषणतया तज्ज्ञानाभानात् तादृशशाब्दबोधेन तज्ज्ञानप्रामाण्याग्रहेऽपि न बाधप्रसक्तिरित्यभिमतादृशबाधशङ्काया असङ्गतिरिति वाच्यम् ? यथाश्रुताभिप्रायेण तदाशङ्कायास्सङ्गमनीयत्वात् ।[1] यथा विवक्षणे तु आत्मांश

(प्रभा) मुख्यविशेष्यताया इति । अथैवमीदृशरीत्या घटज्ञानवत्परात्मविशिष्टपटज्ञानवत्स्वात्मज्ञानस्य परात्मनो मुख्यविशेष्यत्वाभावेन वारणेऽपि कथं पटज्ञानवत्स्वात्मविशिष्टघटज्ञानवत्स्वात्ममुख्यविशेष्यकसामग्रीवारणं तादृशसामग्र्याः पटज्ञानलौकिकप्रत्यक्षजनकतया भट्टैरनभ्युपगमादितिचेन्न, ज्ञानान्तरविशेष्यतानापन्नत्वस्य साक्षात्परम्परया वा ज्ञानान्तरविशेष्यतापन्नत्वरूपत्वात् । यद्वा ज्ञानान्तरविशेष्यतानापन्नात्मनिष्ठमुख्यविशेष्यतायाः समानाधिकरणो यस्तन्निरूपितस्वाश्रयवृत्तिप्रकारताकग्रहः स एव विवक्षणीयः । स्वात्मनिष्ठतादृशग्रहस्य परात्मनिष्ठविशेष्यतासामानाधिकरण्याभानं न दोषः ।

यत्त्वेवं सति भट्टाचार्याणां मुख्यत्वनिवेश आपातत एव घटज्ञानवत्परात्मविशिष्टपटज्ञानवत्स्वात्मग्रहस्यापि विशेष्यताया आश्रये स्वात्मनि तन्निरूपितस्वाश्रयवृत्तिप्रकारताकग्रहविरहादिति, तत्तुच्छम् , उपनीतघटज्ञानसमानाधिकरणपटज्ञानत्वादिना आत्मनि ज्ञानसमानाधिकरणघटकत्वेनात्मनो विशेष्यतया तन्निरूपितस्वाश्रयवृत्तिप्रकारताकग्रहस्य तद्वद्वृत्तित्वेन मुख्यत्वस्यावश्यकत्वात् । वस्तुतो जागरे नियमतः स्वात्मनि विजातीयमनःसंयोगत्वेनानुव्यवसायस्य स्वात्ममुख्यविशेष्यकत्वान्न पूर्वपक्षावतार इति ।

यथाश्रुताभिप्रायेणेति = ज्ञानान्तरविशेष्यतानापन्नात्मनिष्ठविशेष्यतानिरूपितस्वाश्रयप्रकारताशालिग्रहजनकसामग्रीतिविवक्षानादरे इत्यर्थः । यथाविवक्षणे इति = ज्ञानान्तरविशेष्यतानापन्नेत्यादिरीत्या विवक्षणे इत्यर्थः ।

---

१ नन्वेवं योग्यतायाः शाब्दबोधभानोपगमेऽपि बाधवारणसम्भवात् समाधानासङ्गतिरित्यत आह यथाविवक्षणे त्विति ।

ननु मिश्रमतासिद्धत्वं दातुं शक्यते एव व्यवसायानन्तरज्ञाततालिङ्गकज्ञानानुमितेर्विषयविशिष्टज्ञानानुमितिरूपाया ज्ञानप्रत्यक्षत्वेन मिश्रमतेऽपि प्रामाण्यग्राहकत्वात् तदनन्तरशुद्धज्ञानानुमितेश्च मिश्राणां ज्ञानविषयतालिङ्गकानुमितित्वेन तत्सामग्र्याः प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च मिश्रमतसिद्धत्वादित्यत आह यथाश्रुतेति । तथाच मिश्रमतासिद्धत्वनिवेशे आयासः सचेह नास्तीति भट्टमतासिद्धत्वं सम्यगिति भावः । विषयेति हेतुगर्भम् । विषयनिरूप्यं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषय इति [illegible]

(गा०) एव यत्र इच्छाश्रयत्वाद्यन्वयितावच्छेदकतया ज्ञानस्य भानं तत्र तादृश ज्ञानप्रामाण्याभानेन बाधप्रसक्त्या अन्वयितावच्छेदकरूपस्य शाब्दबोधे भाना भ्युपगमेन समाधानस्य संगमनीयत्वात् ।

यद्यपि ज्ञानजन्यज्ञाततावान् घट इत्यादिप्रत्यक्षेण प्रामाण्याग्रहेण भट्टमते बाधस्य मिश्रादिमतसिद्धभिन्नत्वनिवेशेऽपि उक्तविवक्षायामप्रसक्तिः, तथापि ज्ञाततालिङ्गकशुद्धज्ञानादिसाध्यकात्मादिपक्षकानुमितिसामग्र्या मिश्राद्यनभ्यु पगततया प्रामाण्याग्रहेण बाधस्य वारणाय यथाश्रुतानुसारेण वा भट्टमत सिद्धत्वोक्तिः ।

आत्मपक्षकज्ञाततालिङ्गकप्रामाण्यविशिष्टज्ञानसाध्यकानुमितिसामग्रीमादा यैव भट्टमते प्रामाण्यस्य यथोक्तसाध्यवत्त्वनिर्वाहः नतु ज्ञाततापक्षकानुमिति सामग्रीमादाय, आत्मपक्षकानुमितेरेवानुव्यवसायसमानविशेष्यकतया तादृशानु मितेरेव तैरभ्युपगन्तव्यत्वात् , अन्यथा अनुभववैषम्यापत्तेः ।

अथैवमपि उपनीताप्रामाण्यविषयकघटादिज्ञानानुव्यवसायेन तदीय प्रामाण्याग्रहात् तादृशसामग्र्या अपि भट्टमतासिद्धत्वात् मिश्रमते बाधस्य दुर्वारतेति चेन्न ? प्रामाण्यभासकसामग्र्या विषयनिरूप्यत्वमर्यादोपबृंहिताया अपि अप्रामाण्यभासकसामग्र्यपेक्षया बलवत्त्वेनानुव्यवसायेऽप्रामाण्यस्य व्यवसायांशे भानासम्भवात् प्रामाण्यभानस्यावश्यकत्वात् । तथाविधसामग्र्या अबलवत्त्वे घटत्वप्रकारकत्वादिना व्यवसायभाने तत्र तदभावादेरपि भान प्रसङ्ग इत्यग्रे वक्ष्यमाणत्वात् ।

यदि चोक्तप्रामाण्यभानसामग्र्या बलवत्त्वोपगमेऽनभ्यासदशा पन्नज्ञाने प्रामाण्यसंशयानुपपत्तिरिति मीमांसकैः अप्रामाण्योपस्थितिदशायां तादृशदोषवशात् अनुव्यवसायेऽप्रामाण्यभानमवश्यमेवोपगन्तव्यम्, तथाच तादृशानुव्यवसायसामग्र्या ज्ञानग्राहकत्वेन भट्टानभ्युपगततया प्रामाण्याग्रहात् मिश्रमते बाधो दुर्वार एवेत्युच्यते तदाऽप्रामाण्याग्राहकत्वमपि स्वातन्त्र्येण सामग्रीविशेषणं देयम् ।

(प्रभा) ननु गुरुमिश्रमतसिद्धभिन्नत्वनिवेशे ज्ञानजन्यज्ञाततावान् घट इत्यादिप्रत्यक्षसा मग्र्या गुरुमिश्रयोर्मते ज्ञाततायाः शशविषाणायमानतया प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन गुरुमिश्रमतसिद्धसामग्रीभिन्नत्वस्य तत्राक्षतत्वेन तादृशभट्टमतसिद्धसामग्रीजन्यग्रहविषयत्वस्य घटत्ववति घटत्वप्रकारकज्ञानत्वरूपप्रामाण्ये विरहेण बाध इति च प्रागुक्तं किन्तु ज्ञानान्तर- विशेष्यतानापन्नात्मनिष्ठविशेष्यतानिरूपितस्वाश्रयप्रकारतेत्यादिविवक्षायां तु तस्य न प्रसक्तिः, तादृशात्मनिष्ठविशेष्यतानिरूपितप्रकारताविरहेणैव तत्सामग्र्याः साध्याघटकतया बाधानव- काशादित्याशङ्कते यद्यपीत्यादिना । उक्तविवक्षायामिति = ज्ञानान्तरविशेष्यतानापन्ना-

(गा०) वस्तुतस्तु अप्रामाण्योपस्थितेरनुव्यवसायपूर्वं सत्त्वे तुल्यबलसामग्रीभ्यां प्रामाण्याप्रामाण्योभयसंशयरूप एवानुव्यवसायस्तत्र जन्यते, धर्मिज्ञानस्य संशयहेतुताया मीमांसकैरनभ्युपगमात् । तथाच नादृशानुव्यवसायसामग्र्यापि प्रामाण्यग्रहान्न बाधः ।

नच यत्रानुव्यवसायपूर्वं नाप्रामाण्यमुपस्थितं तत्राप्यनभ्यासदशापन्नज्ञानप्रामाण्यसंशयात् तदनुरोधेन अनुगतदोषात् तत्र प्रामाण्याग्रहस्तैरवश्यमङ्गीकार्यः तथा च तत्स्थलीयसामग्र्या प्रामाण्याग्रहाद् बाधो दुर्वार एवेति वाच्यम् ? अप्रामाण्याग्राहकत्वविशेषणेनापि तादृशबाधवारणासम्भवात् । तद्वारणाय तत्रानुव्यवसायः प्रामाण्यं गृह्णात्येव, तादृशानुव्यवसाये विनष्टे सत्येव च तज्जनितसंस्कारात् प्रामाण्याविषयकज्ञानरूपधर्मिस्मरणे तदुपनीततद्धर्मिविषयकः प्रामाण्यसंशय इत्येव स्वीकरणीयत्वात् । एतेन स्वातन्त्र्येण अप्रामाण्याग्राहकत्वविशेषणदानेऽग्राहकान्तरस्य निरुक्तार्थकत्वविरोध इति निरस्तम् ।

यत्तु व्यवसायोल्लिखितप्रकारविशिष्टधर्मिविशेष्यकत्वमेव अनुव्यवसायेन गृह्यते न तु धर्मान्तरविशिष्टविशेष्यकत्वमिति नानुव्यवसाये तदभाववद्विशेष्यकत्वघटिताप्रामाण्यावगाहितेति समाधानम् । तत्तुच्छम् ? धर्मान्तरविशिष्टविशेष्यकत्वस्य लौकिकविषयताया एवानभ्युपगमेन उपनीतभ्रमत्वस्य प्रमात्वाभावस्य च अनुव्यवसायेनावगाहनेऽविरोधात् । पित्तादिदोषाद् यथा शंखादौ अपीतत्वादेरग्रहे पीतिमाद्यारोपस्तथा दोषविशेषाद् यत्रानुव्यवसाये अप्रामाण्यमात्रभानं तत्सामग्रीमादाय बाध इत्यपि न शंक्यम्, अनुभवानुरोधेन क्वचित् तथा दोषकल्पनेऽपि प्रकृते तथाविधदोषकल्पकानुभवविरहात् ।

(प्रभा) रेवेत्यत आह अनभ्यासेति । व्यवसायगर्भतद्भानसामग्र्या बलवत्त्वात् तुल्येति । प्रामाण्यभासिका सामग्री लौकिकसन्निकर्षगर्भा अप्रामाण्यभासिका च दोषगर्भेति तुल्यत्वम् । तदनुरोधेनेति = औत्तरकालिकप्रामाण्यसंशयानुरोधेनेत्यर्थः । तत्र = अनुव्यवसाये । अन्यथा अनुव्यवसायस्य प्रामाण्यनिश्चयत्वेन प्रतिबन्धकतया ततःप्रामाण्यसंशयो न स्यादिति भावः ।

ननु धर्मिनाशे धर्मिभानं न स्यात्तद्भासकसन्निकर्षाभावादत आह तज्जनितेति । प्रामाण्यविषयकस्मरणरूपत्वे तु प्रामाण्यसंशयो न स्यादतः प्रामाण्याविषयकेति । मीमांसकानां धर्मिज्ञानाकारणत्वस्योक्तत्वादाह तदुपनीतेति । इत्येवेति । मिश्रभट्टाभ्यामिति शेषः । पूर्वकल्पं निरस्यति एतेनेति ।

अनुव्यवनतिर्वाति । अन्यथा इदन्त्वादिविशिष्टविशेष्यकत्वादेर्ग्रहापत्तिः ।

(दी०) विशिष्टव्यतिरेकस्य तत्रापि सत्त्वाददोषः। ज्ञातताप्रत्यक्षजनकसामग्रीवारणाय ज्ञानग्राहकेति।

(गा०) अथ यत्र घट एव अघटोऽयं घट इत्याहार्यं तत्र तदनुव्यवसायस्य घटत्वाभाववति घटत्वप्रकारकत्वेन तज्ज्ञानविषयकस्य घटत्ववतीत्यादिप्रामाण्याग्राहकत्वात् भट्टमतासिद्धतत्सामग्रीमादाय बाध इति चेन्न? प्रकारविरुद्धधर्मावच्छिन्नविशेष्यत्वाघटितप्रामाण्यस्यैव पक्षत्वोपगमात् तादृशप्रामाण्याश्रयग्राहकसामग्र्या एव साध्यघटकत्वात्। अयं घट इत्यादिज्ञाननिष्ठमनस्सन्निकर्षघटितसामग्र्या ग्राहकत्वेन भट्टमतसिद्धभिन्नत्वोक्त्यापि संग्रहसम्भवात् ज्ञानग्राहकत्वपर्यन्तनिवेशनप्रयोजनं गुरुमते व्यवसायसामग्र्युपग्रह एवेत्याशयेन मिश्रमतानुपन्यासः। *विशिष्टव्यतिरेकस्य* = प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद् भट्टमतसिद्धं तद्भेदस्य। *तत्र* = तादृशसामग्र्याम्। एवं प्रतियोगिकोटौ ज्ञानग्राहकत्वानिवेशे भेदविशेष्यसामग्र्यामपि तद्विशेषणं व्यर्थं स्यात्, तन्निवेशस्यावश्यकत्वे च विशेष्ये तद्विशेषणस्यापि सार्थक्यमिति सूचयितुम् भट्टमते तद्व्यावृत्तिं दर्शयति *ज्ञातताप्रत्यक्षजनकेति*। घटादिसामग्र्यामपि विशिष्टभेदसत्त्वात् तज्ज्ञानग्राहकत्वस्य सामग्रीविशेषणत्वाभावे तत्सामग्रीपरिग्रहेऽपि केवलग्राहकत्वनिवेशेनापि तद्व्यावृत्तिसम्भवात् सामग्रीजन्यग्रह एव यावत्त्वविशेषणे तज्जन्यग्रहाप्रसिध्या च न बाधसम्भव इति सा नोपात्ता।

यद्यपि घटादिग्राहकसामग्रीमादाय दर्शितव्यावृत्तिसम्भवात् ज्ञातताप्रत्यक्षपर्यन्तसामग्रीनिवेशनमफलं, तथापि मिश्रादिमतासिद्धत्वम् परित्यज्य भट्टमतसिद्धत्वपर्यन्तनिवेशव्यावृत्तिर्ज्ञातताप्रत्यक्षमादायैव सम्भवतीति ज्ञातताप्रत्यक्षपर्यन्तानुधावनम्। ज्ञानविशेषितज्ञातताविषयकानुमित्यादेर्मिश्रादिभिरपि ज्ञानविषयतागोचरानुमितित्वेन स्वीकारात् तत्सामग्र्या अपि ज्ञान-

---

(प्रभा) लौकिकसन्निकर्षस्य दौर्बल्यप्रापकम्। **आहार्येति**। आहार्यभ्रमत्वस्य लौकिकताया अन्यत्र व्यवस्थापितत्वात्। **प्रकारविरुद्धेति**। अत्र विपरीतानुगमाय विरुद्धपदम्। तथाच तादृशधर्मावच्छिन्नत्वेन विशेष्यता विवक्षणीयेति भावः।

ननु प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धा या सामग्री तद्भिन्नसामग्रीजन्यग्रहविषयत्वमेव निवेश्यतां किम्पुनर्ज्ञानग्राहकत्वनिवेशेनेत्याशङ्क्य द्वितीयज्ञानग्राहकत्वस्यानुयोगिकोटौ निवेशस्य प्रयोजनमुपदर्शयति दीधितौ ज्ञातताप्रत्यक्षजनकसामग्रीवारणाय ज्ञानग्राहकेति। तथा च प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धत्वस्य ज्ञातताप्रत्यक्षसामग्र्यामसत्त्वेन तद्भिन्नत्वस्य तत्र सत्त्वात् तादृशसामग्रीजन्यज्ञातताप्रत्यक्षात्मकग्रहविषयत्वस्य प्रमात्वेऽसत्त्वात् बाध इति

(टी०) नच विषयबाधभ्रमकालीनानुव्यवसायेन प्रामाण्याग्रहात्

(गा०) ग्राहकसामग्रीत्वेन तन्मतसिद्धता। ज्ञानजन्यज्ञाततावान् इत्यनुमित्यादि-सामग्र्या गुरुणा अनङ्गीकारेऽपि सापि अन्यथाख्यातिवादिना मिश्रेण उपगतैवेति. तादृशसामग्रीमादाय भट्टमतसिद्धभिन्नत्वनिवेशव्यावृत्त्यसङ्गतिरिति प्रत्यक्षोपादानम्।

यद्यपि ज्ञातताप्रत्यक्षमपि ज्ञानविषयत्वोपनीतभानरूपतया मिश्रानुमतम्, तथापि ज्ञातता रूपविषयघटिततत्सामग्री ज्ञानग्राहकत्वेन न तन्मतसिद्धेति तामादाय व्यावृत्तिसङ्गतिः। ज्ञानग्राहकत्वेनेत्यत्र ज्ञानपदम् प्रकृतप्रामाण्याश्रयपरम्, अन्यथा पटादिज्ञानविषयकघटादिशाब्दबोधादिसामग्र्या गुरुमते घटादिज्ञानप्रामाण्यग्राहिकाया असंग्रहात्। तथाच अनुयोगिविशेषणमपि प्रकृतप्रामाण्याश्रयग्राहकत्वं बोध्यम्; अन्यथा पटादिज्ञानग्राहकसामग्र्या घटादिज्ञानप्रामाण्याग्रहेण बाधप्रसङ्गात्।

एतेन ग्राहकसामग्रीमात्रस्यैव गुरुमते ज्ञानग्राहकतया तन्मते ज्ञानपदवैयर्थ्यमिति परास्तम्, प्रकृतप्रामाण्याश्रयपरतया तत्सार्थक्यात्।

अथ प्रामाण्यघटकघटत्वादिप्रकारकत्वाश्रयग्राहकसामग्रीनिवेशेनैव उपपत्तौ प्रामाण्याश्रयग्राहकसामग्रीनिवेशनमनर्थकम्, नचैवं ज्ञाततायाः अपि घटत्वादिप्रकारकत्वाश्रयत्वात् तद्ग्राहकसामग्रीमादाय बाध इति वाच्यम्? ज्ञानग्राहकत्वेनेत्यत्रापि घटत्वादिप्रकारकत्वाश्रयग्राहकताया एव विवक्षणीयतया घटत्वादिप्रकारकज्ञातताप्रत्यक्षसामग्र्या भेदप्रतियोगिकोटौ निवेशनीयत्वादिति चेन्न प्रामाण्यपर्यन्तानिवेशे घटत्वादिप्रकारकभ्रमानुव्यवसायसामग्र्या वास्तवघटत्वाद्याश्रयविशेष्यकत्वघटितस्य प्रामाण्यस्याग्रहेण बाधस्य दुर्वारत्वात्।

विषयबाधभ्रमकालीनेति। नायं घट इत्यादिभ्रमाव्यवहितोत्तरोत्पन्नेत्यर्थः नच तदानीमयं घट इत्यादिव्यवसाय एव न सम्भवति, इति कथमनुव्य

(प्रभा) असंग्रहादिति। प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन भट्टमतसिद्धत्वात ज्ञानविषयो घट इत्यादिशाब्दानुमितिसामग्रीणामसंग्रहेऽपि न क्षतिरित्यादेः प्राक्सिद्धा तत्वेन पटज्ञानकालीनो घट इति शाब्दादिसंग्रहापातो व्यर्थ एवेति न शङ्क्यम्, घटा पदस्य वस्तुविशेषोपलक्षणतया तत्प्रत्यक्षाप्रसिद्धेः ज्ञानान्तराविषयकशाब्दबोधाद्यप्रसि श्रोक्तशाब्दबोधमादायैव तत्प्रामाण्ये साध्यसत्ताया वाच्यत्वात्। पटज्ञानविषयो इतिशाब्दात्मकव्यवसायसामग्र्याः संग्रहस्य भट्टेनेत्यादिपंक्तौ दर्शनीयतया स्वाश्रयज्ञानवि घटशाब्दबोधाद्यसंग्रहनैयत्यस्य व्यक्तत्वाच्च।

(दी०) बाधः, तदापि तद्ग्रहोपगमाद्, बाधग्रहाभावेन विशेषणाद् व रीतिरुक्तैव ; अथ गुरुनये घटेन जलमाहरेत्यादौ छिद्रेतरत्वादेरिव ओद कामकर्तव्यताबोधविषयः पाक इत्यादौ शब्दादनुपस्थितस्यापि अन्वयप्रयोजक ओदनादिसाधनताज्ञानस्यापि शाब्देन ग्रहात् तत्प्रामाण्याग्रहाच्च बाधः।

(गा०) सायोदय इति वाच्यम् ? भिन्नेन्द्रियादिजन्यबाधभ्रमोत्तरं लौकिक सन्निकर्षजन्यव्यवसायसम्भवेन अनुव्यवसायोपपत्तेः। गुरुमते तादृशव्यव सायात्मकज्ञानग्रहे विशेष्ये घटत्वादिमत्ताया लौकिकसन्निकर्षाद् भाने तादृश बाधभ्रमो न विरोधीति प्रामाण्यभानसम्भव इति मिश्रमतानुसरणम्। बाधस्य प्रमात्वे व्यवसायस्य प्रामाण्याश्रयत्वासम्भवात् *बाधभ्रमेत्युक्तम्*। समाधत्ते *तदापीति*। तद्ग्रहोपगमात् = विषयस्य तद्वत्त्वांशे निर्धर्मितावच्छेदकप्रामाण्य ग्रहोपगमात् इत्यर्थः। समानविशेष्यकस्यापि ज्ञानस्य विशेष्यांशे समानप्रकारक स्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति भावः। समानविषयतामात्रेण विरो धित्वे प्रकारधर्मिकावृत्तित्वज्ञानस्य तत्प्रकारकज्ञानसामान्यं प्रति विरोधित्वे व पुनराह *बाधग्रहाभावेनेति*। धर्मिणि प्रकारवत्त्वग्रहप्रतिबन्धकाभावेनेत्यर्थः।

अथैवमपि विशेष्यत्वाद्यंशे घटत्वादिना घटादेर्बाधग्रहे विशेष्य तात्वावच्छिन्नांशे घटत्वादिविशेषितघटीयत्वादिघटितप्रामाण्यभानासम्भवात् बाधो दुर्वार एव, बाधग्रहपदेन प्रामाण्यभानप्रतिबन्धकमात्रविवक्षणे 'तदापि तद्ग्रहोपगमात्' इत्यनेन एतत्समाधानस्य वैकल्पिकताविरोध इति चेन्न विशेष्यतात्वस्य घटादिधर्मितावच्छेदकतया न प्रामाण्यघटकता, अपि एकत्र द्वयमिति रीत्या विशेष्यताविशेषणत्वेन उभयोस्तथात्वमित्याशयेन विकल्पसङ्गतेः। अत एव ज्ञाने विषयितांशे च विषयबाधग्रहदशायाम् उत्पन्न व्यवसाये ज्ञानभानासम्भवेन स्वप्रकाशतानुपपत्तिरित्यपि समाहितम्।

ननु बाधभ्रमो गुरुमते ज्ञानद्वयरूपः, मिश्रमते विशिष्टविषयकैकज्ञानरूप तयोः कथमनुगतरूपेण प्रवेश इत्यत आह *रीतिरुक्तैवेति*। तत्तद्धर्मिनिरूपित तत्तद्धर्मनिष्ठविशेषणताकत्वेन प्रामाण्यग्रहप्रतिबन्धकत्वेन वानुगमसम्भव इति भाव इति भुजङ्गभूषणभट्टाचार्याः। *तत्प्रामाण्याग्रहात्* = ओदनसाधनता ज्ञानप्रामाण्याग्रहात्।

(प्रभा) कत्वावच्छिन्नत्वविशिष्टघटत्वप्रकारकज्ञानत्वरूपप्रमात्वे विरहान्मिश्रमतेऽपि बाधः नायं घट इत्याकारकबाधकाले घटत्ववत्त्वेन घटस्यानुव्यवसाये भानासम्भवादिति भावः प्रामाण्यग्रहोपगमादिति। [illegible]

(दी०) भट्टेन शब्दादनुपस्थितार्थस्य शाब्दबोधप्रवेशानभ्युपगमात् । तदग्रहेऽपि कर्तव्यताबोधग्रहात् न ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वमिति चेन्न,

---

(गा०) नचौदनसाधनतात्वेन साधनताभाने साधनेतरावृत्तित्वादिघटितस्य साधनतात्वस्य भानेन साधनत्वेन साधनभानात् तज्ज्ञाने साधनत्ववति साधनत्वप्रकारकत्वरूपं प्रामाण्यमस्तीति तदपि तेन गृह्यत एव, गुरुमते स्ववृत्तिप्रामाण्यमात्रस्यैव ज्ञानेन ग्रहादिति वाच्यम् ? साधनतात्वस्याखण्डोपाधिरूपतायाः साधनत्वानां कार्यादिभेदेन भिन्नानाम् अनुगमाय अवश्यमुपगन्तव्यतया तद्भाने साधनत्वेन साधनभानानियमात्, साधनमुख्यविशेष्यकज्ञानीयविशेष्यताघटितप्रामाण्यस्य तादृशशाब्दबोधावृत्तेस्तादृशबोधविषयवृत्तेः तेन ग्रहीतुमशक्यतया उक्तरूपसाधनतात्वभानेऽपि बाधस्य दुर्वारत्वाच्च ।

तादृशसामग्र्या ज्ञानग्राहकत्वेन भट्टमतासिद्धत्वं दर्शयति *भट्टेनेति* । *शाब्दबोधप्रवेशानभ्युपगमादिति* । तथाच पटज्ञानविषयो घट इत्यादिशाब्दाद्यात्मकव्यवसायसामग्र्या गुरुमते संग्रहानुरोधेन ज्ञानग्राहकत्वेनेत्यत्र ज्ञानपदस्य प्रकृतप्रामाण्याश्रयज्ञानपरताया उक्तत्वात् उक्तसामग्र्याः प्रकृतप्रामाण्याश्रयौदनसाधनत्वज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वमव्याहतमेवेति न तादृशसामग्रीव्यावृत्तिरिति भावः । गुरुमतेऽपि घटत्वप्रकारकज्ञानविषयो घट इत्यादिव्यवसायसामग्रीवदुक्तव्यवसायसामग्र्यपरिग्रहेऽपि न क्षतिरिति सामान्यतो ज्ञानग्राहकत्वमेव निवेशनीयमतो नोक्तक्रमेण बाध इत्याशयेन शङ्कते *तदग्रहेऽपि* इति । *तदग्रहे*=ओदनसाधनताज्ञानाग्रहे ।

(प्रभा) अथ घटेन जलमाहरेत्यादौ योग्यतावशाद् यथा घटकरणकशाब्दबोधेऽपदार्थस्य छिद्रेतरत्वस्य भानं तथा ओदनकामकार्यताज्ञानविषयः पाक इत्याकारकशाब्दबोधेऽपि ओदनसाधनताज्ञानविषयतारूपयोग्यताज्ञानवत्त्वात्तादृशयोग्यत्वस्यौदनसाधनताज्ञानविषयत्वस्य शाब्दबोधे भानम्भवतीति तादृशयोग्यताज्ञानघटितनिरुक्तशाब्दबोधसामग्र्यं ज्ञानग्राहकत्वेन भट्टमतासिद्धतया तज्जन्यग्रहविषयत्वस्यौदनसाधनताज्ञाननिष्ठौदनसाधनत्ववति ओदनसाधनत्वप्रकारकज्ञानत्वरूपप्रमात्वे विरहाद् बाधो दुर्वार इत्याशङ्कते दीधितौ अथेत्यादिना । ओदनकामकार्यताज्ञानविषयः पाक इत्यत्रापि जात्यखण्डोपाध्यतिरिक्ततया साधनतात्वभाने साधनतात्वस्य च साधनेतरावृत्तित्वे सति सकलसाधनवृत्तित्वरूपतया साधनत्वेन साधनभानमप्यनिवार्यम् । एवञ्च साधनत्ववति साधनत्वप्रकारकज्ञानत्वरूपं प्रमात्वमपि तत्र भातमेवेत्याशङ्कते नचेति । साधनत्ववति साधनतात्वभानेऽपि प्रकारद्वयमाश्रित्य वा वारयति साधनतात्वस्याखण्डोपाधिरूपतायाः इत्यादिना । निरुक्तशाब्दसामग्र्य [illegible] ग्राहकत्वेन भट्टमतसिद्धभिन्नत्वविरहात्साध्याप्रकतयैव नारि

(दी०) शब्दाजन्यकाम्यसाधनताज्ञानघटितायाःशाब्दसामग्र्याःभट्टेनानभ्
पगमात् ।

(गा०) यद्यपि सामान्यतो ज्ञानग्राहकतानिवेशेनोक्तवारणेऽपि भट्ट
प्रकारकेच्छाविषयोऽयमित्यादौ शब्दानुपस्थितस्य योग्यतात्मकघटत्वादिप्रकार
ज्ञानस्य शाब्देन ग्रहात् तत्प्रामाण्याग्रहात् बाधो दुर्वार एव । ज्ञानग्राहकत्वेनेत्य
सविषयकग्राहकत्वविवक्षणे इच्छादिविषयकज्ञानप्रामाण्यपक्षकस्थले सि
साधनम्, तादृशप्रामाण्यग्राहिकाया व्यवसायसामग्र्याःप्रामाण्याग्राहकत्वे
इच्छारूपसविषयग्राहकत्वेन भट्टाभ्युपगतत्वात् तद्भिन्नप्रामाण्यानुमित्या
सामग्रीग्राह्यत्वस्य प्रामाण्ये सत्त्वात् । अस्तु वा ज्ञानमित्यादिशाब्दबोधाद्यात्म
व्यवसायप्रामाण्यवत् तदपि प्रामाण्यम् पक्षबहिर्भूतम्, अस्तु च ज्ञानपदं सविष
परमेव, तथापि कम्बुग्रीवादिमान् इत्यादौ घटत्वादिप्रकारकज्ञानविषयत्वस्या
पदानुपस्थितस्य अन्वयितावच्छेदकतया भानात् तादृशज्ञानप्रामाण्यस्य च तत्र
भानात् बाधस्य दुर्वारत्वैव । तथापि सामान्यतो ज्ञानग्राहकत्वनिवेशमभ्युपे
सम्भवाभिप्रायेण उक्तस्थल एव प्रकारान्तरेण बाधं संगमयति शब्दाजन्येति
शब्दाजन्यकाम्यसाधनताज्ञानोपस्थितिघटितसमुदायपर्याप्तसामग्रीत्वस्य ज्ञा
ग्रहोपधायकतावच्छेदकतया भट्टमतासिद्धत्वादित्यर्थः ।

न च तत्र शाब्दबोधस्य आनुभविकत्वे तज्जनककाम्यसाधनत
ज्ञानोपस्थितेः पदजन्यत्वमेव भट्टेन कल्पनीयम् । तथाच तत्साधारणसामग्रीत
मपि तादृशशाब्दबोधोपधायकसमुदायपर्याप्तत्वादिप्रकारेण प्रामाण्याविषयकज्ञा
ग्रहोपधायकतावच्छेदकतया भट्टाभिमतमिति वाच्यम् ? यत्कालीनकाम्यसा
नताज्ञानोपस्थितौ पदजन्यत्वविरहो भट्टेनापि निश्चितः, तत्कालीनशाब्दबो
जनकतज्जन्यज्ञानोपस्थितेःशाब्दबोधानुपधायकत्वेन भट्टाभिमतायाः शाब्दबोध
पधायकत्वेन भट्टेनाज्ञानात् तत्साधारणसमुदायत्वस्य उक्तप्रकारेण तदीय
भ्युपगमेऽभानात् तत्कालीनसामग्रीमादाय बाधस्य दुर्वारत्वात् ।

(प्रभा) निरुक्तशाब्दसामग्र्या भट्टेनानभ्युपगमादेव भट्टमतसिद्धभिन्नत्वं सुलभमि
दर्शयति दीधितौ शब्दाजन्येत्यादिना ।

शब्दाजन्येति । कारणाकारणसाधारणतादृशसामग्रीत्वस्य भट्टमतेऽतिप्रसक्त
त्वेन ज्ञानग्रहोपधायकतानवच्छेदकत्वादितिभावः । शाब्दबोधव्यक्तिविशेषमादाय सङ्गमय
यत्कालीनेति । पदजन्यत्वेन गृहीतज्ञानोपस्थितिघटितसामग्रीत्वात् पदाजन्यज्ञानोपस्थि
घटितसामग्रीवृत्तिसमुदायत्वमन्यदित्यावेदयितुं यत्कालीनेत्यादि । तादृशसमुदायत्वं ज्ञा
ज्ञानग्रहोपधायकतावच्छेदकमिति न भट्टस्य ज्ञानं, पदाजन्यज्ञानोपस्थितौ ज्ञानग्रहोपधा

(गा०) यदि चोक्तविशेषदर्शनदशायां तत्कालीनकाम्यसाधनताज्ञानोपस्थिति-त्वादिरूपविशेषधर्मपुरस्कारेण ताहशोपस्थितेः शाब्दबोधोपधायकतया भट्टज्ञान-विषयत्वासम्भवेऽपि तादृशविशेषदर्शनशून्यतादशायामुक्तविशेषधर्मप्रकारेण ज्ञा-नदशायामपि उपस्थितित्वादिसामान्यधर्मप्रकारेण तदीयज्ञानविषयत्वसम्भवात् उक्तरूपेण तदुपस्थितिसाधारणसामग्रीत्वं भट्टाभ्युपगमविषय एवेत्युच्यते, तदा चक्षुस्संयोगादिघटितव्यवसायसामग्र्या अपि सामान्यतो ज्ञानग्रहोपधायकत्वेन भट्टाभ्युपगमविषयत्वे बाधकाभावात् तन्निष्ठसमुदायत्वमपि दुस्संग्रहं स्यात् ।

नच प्रामाण्याविषयकज्ञानग्रहोपधायकतावच्छेदकतया भट्टमतसिद्ध-भिन्नत्वं वक्तव्यम्, व्यवसायसामग्र्यां प्रामाण्याग्राहकत्वसहितज्ञानग्राहकत्व-प्रकारकं भट्टज्ञानं गुरुमते न्यायमते च न प्रमा, गुरुमते तस्याः प्रामाण्याग्राहक-त्वस्य, न्यायमते ज्ञानग्राहकत्वस्य च बाधादिति वाच्यम् ? एवं सति अनु-व्यवसायसामग्र्याः सामान्यतो ज्ञानग्राहकत्वप्रकारकभट्टज्ञानस्य प्रामाण्या-ग्राहकत्वविषयकत्वेऽपि नैयायिकमते उभयांश एव प्रमात्वात् प्रामाण्यानुमित्या-दिसामग्रीणामेव साध्यघटकतया निषेधसाधने बाधात् । तस्माद् येन रूपेण स्वाश्रयग्रहोपधायकतावच्छेदकता सामग्रीपर्याप्तधर्मस्य तादृशरूपे प्रामाण्यग्राह-कतावच्छेदकत्वविशिष्टज्ञानग्राहकतावच्छेदकत्वप्रकारकभट्टाभ्युपगमविषयता-नवच्छेदकत्वं विवक्षणीयम् । चक्षुस्संयोगादितत्कारणसमुदायपर्याप्तधर्मत्वेन च व्यवसायादिसामग्रीपर्याप्तधर्मस्य स्वाश्रयग्रहोपधायकतावच्छेदकता तादृश-धर्मत्वस्य न निरुक्तभट्टाभ्युपगमविषयतावच्छेदकत्वमिति गुरुमतादिसंग्रहः । उक्तशाब्दबोधसामग्रीपर्याप्तधर्मस्य पदजन्यकाम्यसाधनताज्ञानोपस्थितिमनिवेश्य याकविशेष्यकतादृशज्ञानविषयत्वरूपयोग्यताज्ञानादिरूपतत्तत्कारणपर्याप्तधर्मत्वेन

(प्रभा) विशेषदर्शनेति = एत्कालिककाम्यसाधनताज्ञानोपस्थितिः पदाजन्यतया न ज्ञानग्रहोपधायिकेति बाधदर्शनेत्यर्थः । तादृशेति । यत्समुदायत्वस्योक्तप्रकारेण तदीया-भ्युपगमे भानाभावस्तस्यैव कालान्तरे तदीयाभ्युपगमे भानमिति न बाध इत्याशयः । अत एव यत्कालीनतत्कालीनेत्युपलक्षणम् । प्रकारान्तरेणापि बोधं निरस्यति उक्तेति । तादृशायाम् = उक्तविशेषदर्शनदशायाम् । व्यवसायेत्यनुव्यवसायोपलक्षणम् । सामान्यत इति = ज्ञानभासकसामग्री स्वानन्तरोत्पन्नज्ञानविषयकग्रहोपधायिकेत्यभ्युपगमेत्यर्थः ।

गुरूणां सिषाधयिषिताया एव सामग्र्याः नैयायिकानामतथात्वे परतस्त्वा-सिद्धिरविरोधादित्यालोच्य न्यायमते चेत्युक्तम् । तस्मात् = व्यवसायसामग्र्या दुस्संग्रहत्वात् । येन रूपेण स्वाश्रयग्रहोपधायकतावच्छेदकता दर्शिता तस्य निरुक्तभट्टाभ्युपगमविषयतान-वच्छेदकत्वमाह पदजन्येति । योग्यताज्ञानादीति = पदाजन्ययोग्यताज्ञानेत्यर्थः । योग्यता-[illegible] भट्टेनोपग-

(दी०) मैवम्, शाब्दबोधे हि योग्यताज्ञानं कारणम्, साच तेषामन्वय प्रयोजकरूपवत्त्वम्, तेन तज्ज्ञानम् प्रथमं मृग्यते। नच शाब्दबोधे तदनुप्रवेशोऽपि नियतो माना भावात्। नहि उपस्थितत्वादेव शाब्दबोधे भानम्, उपस्थिताक्षिप्त यावत्पदार्थानामेव तथा भानप्रसङ्गात्। नियोज्यान्वयेऽपि काम्यसाधनताज्ञानस्य प्रथम ज्ञानम् नतु शाब्दबोधेऽपि तद्भानम् इत्यपूर्वे वक्ष्यते।

(गा०) तादृशज्ञानग्राहकतावच्छेदकता, पदजन्यकाम्यसाधनताज्ञानोपस्थित्यादिपर्याप्तधर्मत्वेन च निरुक्तभट्टाभ्युपगमविषयतेति बाधो दुर्वार एव।

नच तादृशयोग्यताज्ञानस्य भट्टमतेऽपि शाब्दधीहेतुतया तन्मतेऽपि तस्य सामग्रीशरीरे निवेशनमावश्यकम्, तथाच अधिकपदजन्यतादृशयोग्यताज्ञानोपस्थितिनिवेशेऽपि दर्शितसामग्र्या भट्टमतसिद्धत्वमस्त्येवेति वाच्यम्। एवमपि पदजन्ययोग्यताज्ञानविरहकालीनदर्शितशाब्दसामग्रीमादाय बाधस्य दुर्वारत्वात्। (येन रूपेण गुरुमते सामग्रीपर्याप्तधर्मस्य ज्ञानग्राहकतावच्छेदकता तद्रूपस्य निरुक्तभट्टाभ्युपगमविषयतावच्छेदककोटिप्रवेशो व्याहत एवेति वाच्यम्, अधिकान्तर्भावेन पर्याप्तिघटितधर्मस्य विलक्षणाया न्यूनपर्याप्त्याऽघटितत्वात्। पाठान्तरमेतत्)।

योग्यताज्ञानस्य शाब्दधीहेतुत्वेऽपि पदानुपस्थितयोग्यतायाः शाब्दबोधविषयत्वानभ्युपगमात् नोक्तसामग्री काम्यसाधनताधीग्राहिकेति तया तत्प्रमाण्याग्रहेऽपि न क्षतिरिति समाधत्ते *मैवमित्यादिना*। पदजन्योपस्थित्यादिसत्त्वे योग्यतायाश्शाब्दबोधप्रवेशे बाधकाभाव इत्यतो 'नियत' इत्युक्तम्।

नन्वेवं स्वर्गकामो यजेतेत्यादौ कामनाविशिष्टस्य यागे कार्यताबोधोपयोगित्वरूपनियोज्यत्वेनान्वये काम्यसाधनताज्ञानोपयोगित्वरूपयोग्यतायाः पदानुपस्थिताया अपि अन्वयितावच्छेदकतया भानमिति तत्सिद्धान्तो भज्येतेत्यत आह *नियोज्यान्वयेऽपीति*। *प्रथमं ज्ञानमिति*। तैस्स्वीक्रियत इति शेषः। तावतैवेष्टसाधनताघटकापूर्वोपस्थित्याद्यर्थम् अपूर्ववाच्यताया आवश्यकत्वादिति भावः। *नतु शाब्दबोधेऽपीति*। नचैवं "इष्टसाधनताविधिपक्षे स्फुटैवानुपपत्तिः,

---

(प्रभा) ग्रहोत्पत्तिप्रयोजिकेति सूचयित्वा यादृशशाब्दबोधे न तदनुप्रवेशस्तादृशसामग्रीं व्यावर्त्तयितुं नियतपदमित्याशयेन तादृशसामग्रीं स्फुटयति पदजन्येति। तथाच तादृशशाब्दबोधसामग्र्या भट्टमतसिद्धत्वादेव व्यावृत्तिरितिभावः।

ओदनकामकार्यताज्ञानविषयः पाक इत्यत्र प्रसक्तं बाधं वारयति मैवमित्यादिना। मानाभावादिति। तथाच योग्यताज्ञानं हि शाब्दबोधे कारणं नतु योग्यतायाः शाब्दबोधे भानं भवतीत्यत्र कश्चिन्नियमोऽवर्तते मानाभावादित्यत्र [illegible]

(दी०) क्वचिच्छिद्रेतरत्वादेरपि भानम्, एकविशेषबाधे शाब्दबोधसामान्यसामग्र्या विशेषान्तरप्रकारकबोधजननस्वाभाव्यात्।

(प्र०) कार्यताविधिपक्षेऽपि अन्वयप्रकारतया साधनत्वं शाब्दमिति फलतो न विशेषः" इति मणिकारलेखनविरोध इति वाच्यम्? तादृशग्रन्थस्य हि फलीभूतशाब्दबोध एवेष्टसाधनताया अन्वयितावच्छेदकतया भाने न तात्पर्यं किन्तु स्वर्गसाधनत्वस्य अन्वयप्रकारतया अन्वयप्रयोजकरूपयोग्यतात्मकतया तज्ज्ञानस्य फलीभूतबोधात् पूर्वं अवश्यमङ्गीकर्त्तव्यतया तद्बोधकप्रमाणान्तरविरहेण शाब्दमेव ज्ञानं पूर्वमङ्गीकर्त्तव्यम्, तत्रापि विधेस्तात्पर्योपगमादित्यत्रैव। अधिकं नियोज्यान्वये वक्ष्यामः।

नन्वेवं घटेन जलमाहरेत्यादौ पदानुपस्थितं छिद्रेतरत्वादिकमन्वयितावच्छेदकतया भासते इति तत्सिद्धान्तभङ्ग इत्यत आह *क्वचिदिति*। *एकविशेषबाध इति*। नचैवं यथा सच्छिद्रे घटे जलाहरणसाधनताबाधात् छिद्रेतरघटत्वावच्छिन्ने पदानुपस्थितेऽपि जलाहरणसाधनत्वान्वयधीस्तथा काम्यसाधनताज्ञानाविषयपाके कार्यताधीविषयत्वबाधबलात् पदानुपस्थितेऽपि काम्यसाधनताधीविषयत्वविशिष्टे पाके कार्यतान्वयधीरावश्यकी इति तादृशसामग्रीमादायैव बाध इति वाच्यम्? भट्टैरपीतरबाधबलेन पदानुपस्थितार्थस्य शाब्दबोधे भानोपगमात्।

अथैवमपि अर्थाध्याहारवादिनां गुरूणां मते तात्पर्यसत्त्वे पदानुपस्थितस्यापि काम्यसाधनताज्ञानादेर्भानावश्यकतया बाधवारणमशक्यमेवेति चेन्न? यद्यद्रूपावच्छिन्नसमुदायपर्याप्तत्वेन प्रामाण्याविषयकज्ञानग्राहकतावच्छेदकता भट्टाभ्युपगता तत्तद्रूपशून्यकारणान्तर्भावेन पर्याप्तत्वस्य स्वाश्रयग्राहकतावच्छेदकत्वविशेषणत्वोपगमेन सामञ्जस्यात्।

गुरुमते व्यवसायसामग्रीघटकचक्षुस्संयोगादेः मिश्रमते चानुव्यवसायसामग्रीघटकव्यवसायादेःतत्तद्रूपशून्यत्वात् तदन्तर्भावेन पर्याप्तस्य ज्ञानग्राहकतावच्छेदकरूपस्य संग्रहः। अध्याहृतज्ञानग्राहकसामग्र्यां पदजन्यतदुपस्थितेरधिकायाः भट्टमते निवेशेऽपि तन्मतासिद्धकारणस्य गुरुमतेऽनिवेशाद् गुरुमतसिद्धतादृशसामग्रीपर्याप्तज्ञानग्राहकतावच्छेदकं रूपं न निरुक्तरूपशून्य-

(प्रभा) इतरेति। भट्टैरपि यद्धर्मविपरीतवद्यद्धर्मावच्छिन्नधर्मिकयद्धर्मावच्छिन्नाभावग्रहस्य तद्धर्मावच्छिन्नधर्मिकतत्प्रकारकशाब्दबोधहेतुत्वोपगमात्। ईदृशकार्यकारणभावबलेनैव पदानुपस्थिततदर्थस्य भानात्। तथाच भट्टमतसिद्धत्वादेव न बाध इति भावः। अर्थाध्याहारेति। यत्किञ्चिदेकपदाधीनपदार्थोपस्थितिपदानधीनापरपदार्थोपस्थितिद्वयघटितमाग्रया गुरुशाब्दबोधजनकत्वादितिभावः। यद्यदिति वीप्सा समुदायप्रसिद्धये।

(गा०) कारणान्तर्भावेन पर्याप्तमितितद्रूपावच्छिन्नग्राहकत्वेऽपि प्रामाण्यस्य न बाधः। नच तादृशपदजन्योपस्थितित्वादिशून्यपदाजन्योपस्थितिमन्तर्भाव्य गुरुमतसिद्धज्ञानग्रहोपधायकतावच्छेदकरूपस्य पर्याप्तत्वात् न तादृशधर्मव्यावृत्तिरिति वाच्यम् ? पदाजन्योपस्थितेरपि विशेषणतावच्छेदकप्रकारकज्ञानादिविधया भट्टमते तादृशशाब्दबोधहेतुत्वेन तादृशविशेषणतावच्छेदकप्रकारकज्ञानत्वादिधर्मवत्त्वेन निरुक्तरूपशून्यताविरहात् ।

वस्तुतो गुरुमतेऽपि पदाजन्यार्थोपस्थितेः तत्तदर्थोपस्थितित्वेन शाब्दसामग्रीघटकत्वं नोपेयते, तात्पर्यादिज्ञानस्य तत्तदर्थविषयतानियमेन तन्निवेशेनैवोपपत्तेः। तथा च गुरुमतसिद्धसामग्रीघटकनिखिलकारणानां भट्टमतेऽपि उक्तसामग्रीघटकत्वं निर्विवादमेवेत्युक्तरीत्या सामञ्जस्यम् । ज्ञाततालिङ्गकानुमितिसामग्रीघटकसिद्ध्यभावबाधविशेषाभावादीनां प्रामाण्याविषयकज्ञानग्रहोपधायकभट्टमतसिद्धसामग्र्यामनन्तर्भावात् तादृशसामग्र्यास्तन्मते परिग्रहः । अतो ज्ञाततालिङ्गकपरामर्शस्य ज्ञातत्वप्रकारकोपस्थितित्वादिना प्रामाण्याविषयकज्ञानग्रहोपधायकपदाजन्योपस्थितिघटितान्वयबोधसामग्रीघटकत्वेऽपि न क्षतिः । एवञ्च पदानुपस्थिताया अन्वयप्रयोजकरूपात्मकयोग्यताया योग्यताज्ञानबलादेव शाब्दबोधे भानस्वीकारेऽपि तादृशयोग्यताज्ञानस्य भट्टमतेऽपि शाब्दबोधहेतुतया तत्सामग्रीघटकत्वेन तादृशयोग्यताघटकानां पदजन्योपस्थितेर्भट्टमतेऽधिकायास्तादृशयोग्यताविषयकशाब्दबोधेऽपेक्षितत्वेऽपि उक्तरीत्या तादृशसामग्र्या वारणसम्भवात, शाब्दबोधे तात्पर्यसत्त्वे योग्यताज्ञानबलाद् योग्यताभानं निर्युक्तिकमिति वस्तुगत्यनुरोधेन ग्रन्थकृता तन्निराकृतम् ।

(प्रभा) ज्ञानं गुण इत्यादिशाब्दबोधसामग्रीघटककारणनिष्ठरूपाणामेव यच्छब्देन धर्तव्यत्वादिति भावः। गुरुमतसिद्धतादृशसामग्रीपर्याप्तज्ञानग्राहकतावच्छेदकरूपस्य भट्टमते ज्ञानग्राहकतानवच्छेदकत्वादुक्तविवक्षायामपि यद्यद्रूपशब्देन ज्ञानं गुण इति शाब्दबोधकारणगततच्छून्यकारणान्तर्भावेण पर्याप्तत्वं दुर्वारमित्याशङ्कावारणायानिवेशादित्यन्तम् । तथाच पदजन्यकाम्यसाधनताज्ञानोपस्थितिघटितसामग्र्यां सत्यां भट्टमते तादृशशाब्दबोधोदयात्तादृशसामग्रीत्वमेव यद्यद्रूपावच्छिन्नेत्यादिक्रमेण भट्टमतसिद्धं तत्तद्रूपशून्यं च गुरुमतेऽध्याहृतज्ञानग्राहकं शाब्दसामग्रीघटककारणमिति ।

विशेषणतावच्छेदकप्रकारकज्ञानस्याकारणत्वेऽप्याह वस्तुत इति । तात्पर्यादीति । काम्यसाधनताज्ञानप्रकारकपाकप्रतीतिजनकत्वेनेच्छाप्रकारकपाकपदज्ञानम् । आदिना अर्थाबाधरूपयोग्यताज्ञानं पाकःकाम्यसाधनताज्ञानयोग्यः इत्याकारकं ग्राह्यम् । तत्तद्रूपशून्यकारणपर्याप्तत्वमुपेक्ष्य तदन्तर्भावेण पर्याप्तत्वप्रयोजनमाह ज्ञाततेति । भट्टमतेऽपीति। विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन। वस्तुतोऽर्थाबाधरूपयोग्यताज्ञानत्वेनेति शेषः । तात्पर्यसत्त्वे इति । तात्पर्यसत्त्वे गुरुमतेऽपि योग्यताज्ञानस्य पृथक्कारणत्वे [illegible]

(दी०) नच स्वर्गकामकर्तव्यताबोधविषयो यागविषयकं कार्यमिति वेदजन्यं ज्ञानं गुणो ज्ञानत्वादित्यनुमानादिना ग्राह्यज्ञानप्रामाण्याग्रहाद् बाधः ।

वेदजन्यतादृशज्ञानस्य भट्टनये शशविषाणकल्पतया तद्ग्राहकसामग्र्या भट्टेनानभ्युपगमादिति वाच्यम्, अन्यथाख्यातिवादिनस्तस्य शशविषाणं द्रव्यं

(गा०) अथैवमपि सामग्र्यघटिते प्रामाण्याविषयकत्वेन ज्ञानविषयकत्वेन यद् भट्टमतसिद्धं तदन्ययावज्ज्ञानग्राह्यत्वरूपसाध्येऽध्याहृतज्ञानविषयकज्ञानवानात्मेत्याद्याकारकशाब्दबोधाविषयतया प्रामाण्यस्य गुरुमते बाधो निराबाध एवेति चेत्? तत्कल्पे शाब्दान्यत्वेन तादृशज्ञानस्य विशेषणीयत्वात् ।

यत्तु तादृशशाब्दबोधस्यानुभविकत्वे भट्टेनापि पदाध्याहारकल्पनया तादृशबोध उपपादनीय इति स शाब्दबोध उक्तरूपेण भट्टमतसिद्धोऽपीति समाधानम्, तदसत्? यत्र पदजन्याया ज्ञानोपस्थितेरभाव उभयवादिसिद्धस्तत्रत्यबोधे ज्ञानविषयताया भट्टानभ्युपगतत्वात् तद्ग्राह्यत्वमादाय बाधस्य दुर्वारत्वात्, ज्ञानभासकसामग्र्यनन्तरोत्पन्नं ज्ञानं ज्ञानविषयकमिति सामान्यतोऽभ्युपगमः अयं घट इत्याकारकस्वप्रकाशात्मकव्यवसायमपि विषयीकरोति इति तादृशाभ्युपगमव्यावृत्तरूपेणैवाभ्युपगमस्य निवेश्यत्वात् ।

वस्तुतस्तु यत्रात्मादेः पदार्थान्तरस्य पदादुपस्थितिः ज्ञानस्य चान्यत उपस्थितिस्तत्रापि उपनीतभानस्थलीयो ज्ञानान्वयबोधो भट्टाभ्युपगतः, परन्त्वसौ गुरुमते तात्पर्यादिज्ञानघटितसामग्रीजन्यः शाब्दयामीत्यनुव्यवसायविषयः, भट्टमते त्वसंसर्गाग्रहपदार्थोपस्थित्यात्मकसामग्रीमात्राधीन उक्तानुव्यवसायविषयः, एतावतैव च शब्दादनुपस्थितस्यार्थस्य शाब्दबोधेऽप्रवेश इति भट्टमतसिद्धान्तस्योपपत्तिरिति कथिताध्याहृतार्थविषयकशाब्दबोधः प्रामाण्याविषयकत्वेन ज्ञानविषयकत्वेन च भट्टमतसिद्ध एवेति बोध्यम् ।

अनुमानादिनेत्यादिना तादृशशाब्दबोधस्मृतिसामग्रीपरिग्रहः । *ग्राह्यज्ञानेति* । तादृशवेदजन्यज्ञानेत्यर्थः । बाध इति । गुरुमत इत्यादिः । इदमुपलक्षणम्, मनस्संयुक्तसमवायजन्यं घटमहं जानामि इति ज्ञानं गुणो ज्ञानत्वादित्यनुमानादिना ग्राह्यज्ञानप्रामाण्याग्रहात् मिश्रमते बाध इत्यपि द्रष्टव्यम् ।

वेदजन्यतादृशज्ञानस्येति । मनस्संयुक्तसमवायजन्यस्योक्तज्ञानस्यापि तथात्वं बोध्यम् । *तद्ग्राहकेति* । तादृशज्ञानग्राहकेत्यर्थः । *भट्टेनानभ्युपगमादिति* । तथा च तादृशसामग्र्या निरुक्तरूपेण भट्टमतसिद्धा या सामग्री तद्भिन्नत्वेन

(प्रभा) पूर्ववत् ज्ञानवानात्मेत्यादौ गुरुमते सामान्यतो भट्टाभ्युपगमविषयत्वाद्बाधवारणमाश-
[illegible] सामग्र्यविषयत्वं विशेषणमित्यर्थः ।

(दी०) विषाणत्वादित्यनुमानादौ विरोधाभावात्। भट्टमतासिद्धज्ञानग्राहकताक-शाब्दानुमितिस्मृतिसामग्रीभिन्नत्वेन सामग्री विशेषणीयेत्यपि कश्चित्।

(गा०) तज्जन्यग्रहस्य साध्यघटकयावद्ग्रहान्तर्गतत्वादिति भावः। *इत्यनुमानादौ विरोधाभावादिति*। तथा च यथा प्रसिद्धविषाणे शशीयत्वावगाहिन्याः शशविषाणं द्रव्यम् इत्याकारकानुमितेर्भट्टमतसिद्धतया तत्सामग्र्यपि तन्मतसिद्धा, तथा स्वर्गकामनियोज्यकं यागविषयकं कार्यमित्याद्याकारकसामग्र्यन्तरजन्यबोधस्य वेदजन्यत्वाद्यंशे भ्रमरूपतया भट्टाभ्युपगताया उक्तानुमित्यादेस्सामग्र्यपि प्रामाण्याविषयकज्ञानग्रहजनकतया भट्टमतसिद्धैवेति तद्ग्राह्यत्वेऽपि तादृशज्ञानप्रामाण्यस्य न बाध इति भावः। उक्तानुमित्यादिसामग्र्या भट्टानभ्युपगतत्वाभिमानिनो विशेषणान्तरप्रवेशेनोक्तबाधसमाधानमुपन्यस्यति *भट्टमतासिद्धेति*। उक्तानुमित्यादिसामग्र्या भट्टमतासिद्धज्ञानग्राहकताकतया व्यावृत्तिः।

ज्ञाततालिङ्गकानुमितिसामग्र्या भट्टमते संग्रहार्थं ग्राहकताकान्तं सामग्रीविशेषणम्, तस्याश्च ज्ञानग्राहकता न भट्टमतासिद्धेति तत्संग्रहः। भट्टमतसिद्धसामग्र्यास्तन्मतेऽप्रसिद्ध्या तन्मतसंग्रहाय भट्टमतासिद्धत्वं सामग्रीविशेषणमुपेक्ष्य भट्टमतासिद्धज्ञानग्राहकताकत्वपर्यन्तं तद्विशेषणमुपात्तम्। तादृशी च सामग्री तन्मते घटाद्यनुमितिसामग्र्येव प्रसिद्धा, ज्ञानग्राहकतया भट्टमतसिद्धं यत्तदन्यत्वस्य तत्र भट्टमतेऽपि सत्त्वात्। भट्टमतासिद्धज्ञानग्राहकताकसामग्रीसामान्यभेदनिवेशे गुरुमिश्रमतासंग्रहः। व्यवसायानुव्यवसायसामग्र्योर्ज्ञानग्राहकतया भट्टमतासिद्धत्वादिति शाब्दानुमितिस्मृतीनामुपादानम्, तासां च प्रत्यक्षान्यत्वेनैव निवेशः; नतु विशिष्य। तेनानुमितौ ग्राहकान्तविशेषणेनैव भट्टमतसंग्रहे शाब्दादिसामग्रीसामान्यभेदनिवेशेऽपि क्षतिविरहात् तत्सामग्र्यां तादृशविशेषणवैयर्थ्यमित्यपि समाहितम्। अतीन्द्रियगुरुत्वादिविषयघटितप्रामाण्यं पश्चाद् बहिर्भावनीयम्। तेन गुरुमते तादृशप्रामाण्याश्रयव्यवसायसामग्र्या भट्टमतासिद्धज्ञानग्राहकताकपरोक्षसामग्रीत्वनियमेऽपि गुरुमते न बाधः।

अथवा ज्ञानांशे परोक्षस्य सामग्री विवक्षणीया। ज्ञानांशे परोक्षत्वं च ज्ञानविषयकज्ञानजन्यत्वं, गुरुत्वादिप्रकारकव्यवसायस्यापि ज्ञानविषयकज्ञानाजन्यतया तत्सामग्र्या अपि गुरुमते संग्रहः। एवंच दर्शिताकारानुव्यवसायविषयकोपनीतभानसामग्र्या ग्राह्यज्ञानप्रामाण्यग्रहेऽपि न मिश्रमते बाधः। तादृशोपनीतभानेऽपि उक्तानुमित्यादिवत् निरुक्तस्य ज्ञानांशे परोक्षत्वस्य सत्त्वात् तत्सामग्र्या उक्तविशेषणेन व्यावृत्तेः। एतन्मते दर्शितपदाजन्यज्ञानोपस्थितिघटितशाब्दसामग्र्या अपि अनेनैव विशेषणेन व्यावृत्तेः तदवारणाय दर्शित-

(दी०) तत्प्रामाण्याविषयकत्वेन ज्ञानविषयकत्वेन यो भट्टमतसिद्ध-स्तद्द्वयो यावान् विशिष्टोऽविशिष्टो ज्ञानग्रहः तद्विषयो नवेति निष्कृष्टमर्थं वक्ष्यति स्वाश्रयेत्यादिना ।

(गा०) घटज्ञानांशोपनीतभानात्मकपटज्ञानानुव्यवसायसामग्र्या घटज्ञानाद्यभा-वग्राहकसामग्र्या च भट्टमतासिद्धया घटज्ञानप्रामाण्याग्रहेण मिश्रमते बाधोऽने-नापि विशेषणेन शक्यवारणः । उक्तानुमित्यादिसामग्र्या दर्शितरीत्यैव वारणा-सम्भवात् तद्वारणायाधिकविशेषणप्रवेशो व्यर्थ इत्यस्वरससूचनाय *काश्चादति* । अत्र ज्ञानग्रहत्वेन ज्ञानग्राहकसामग्रीजन्यग्रहनिवेशसम्भवे तादृशसामग्रीजन्य-ग्रहत्वेन तन्निवेशः शिरोवेष्टनेन नासिकास्पर्शनमनुधावतीति ज्ञानग्रहत्वेन ग्रहं निवेश्य तद्विषयत्वकोटिकविप्रतिपत्त्यकथनेन मूलस्य न्यूनता, एवं प्रथम-विप्रतिपत्तावपि ज्ञानपदस्य स्वाश्रयार्थकताया उक्तत्वात् तृतीयविप्रतिपत्तौ ग्राहकपदस्य ग्राहकसामग्रीपरत्वे तस्याः ततो न भेदः ।

नचाप्रामाण्याग्राहकत्वविशेषणाप्रवेशादेव विशेषः, पक्षसङ्को-चेनैव अप्रामाण्यग्राहकसामग्रीग्राह्याश्रयकप्रामाण्ये बाधवारणसम्भवादिति मिश्रमतं सम्यक्, तथा सति यादृशज्ञाने प्रामाण्यसंशयः तत्प्रामाण्यस्य पक्ष-बहिर्भावेन तत्र मीमांसकैः स्वतस्त्वासाधनात्, प्रामाण्यसंशयानुपपत्तिरूप-वक्ष्यमाणदूषणासङ्गतेः । एकस्यैव ज्ञानप्रामाण्यमिति पक्षवाचकपदस्य प्रथम-विप्रतिपत्त्यनुरोधात् अप्रामाण्यग्राहकसामग्रीग्राह्याश्रयकपरत्वम्, तृतीयविप्रति-पत्त्यनुरोधेन च तदितरप्रामाण्यपरत्वमिति विरोधाच्च । एवं ज्ञानं गुण इत्यादिशाब्दबोधसामग्रीवारणाय प्रामाण्याग्राहकत्वेनेत्यादिरूपाप्रामाण्या-ग्राहकत्वस्य तृतीयविप्रतिपत्तावपि अवश्यं विवक्षणीयतया दुर्वार एवोभया-विशेषः । यश्च स्वाश्रये ज्ञानत्वप्रवेशाप्रवेशाभ्याम् मिश्राभिहितो विशेषः, सोऽप्यसंगतः । प्रयोजनसत्त्वे उभयत्रैव तत्प्रवेशावश्यकत्वादित्यालोच्य तृतीयविप्रतिपत्तौ ग्राहकपदस्य गृह्णाति विषयीकरोति इति व्युत्पत्त्या ग्रहपरत्वं, गृह्यते इत्यस्य च विषयीक्रियते इत्यर्थपरत्वमभिसन्धाय तृतीयविप्रतिपत्तेरेव सामग्र्यघटितसाध्यपरत्वमाह *तत्प्रामाण्येति* । विशिष्टो-ऽविशिष्टो वेत्यस्य विषयबाधगृहाभावेनेत्यादिः । पूर्ववत् मतभेदेन विकल्पः ।

ननु तत्र यावत्पदाश्रवणात् कुतो ज्ञानगृहे यावत्त्वलाभः । नचैवकारादेव तल्लाभः, एवकारस्य यावत्पदसमानार्थकत्वविरहात् । नच विशेषणसंगतैव-कारस्य अयोगव्यवच्छेदार्थकतया शंखः पाण्डर एवेत्यादौ यथा यावच्छंखे पा-

(दी०) यथा च तस्मादयमर्थो लभ्यते तथैवकारार्थविवेचने प्रपञ्चितमस्माभिः। केचित्तु तत्र ग्राहकं यावत्त्वेन विशेषणीयम्, एवकारश्च प्रामाण्यमात्रस्य तथात्व-लाभायेत्याहुः।

(गा०) शंखः पाण्डर एवेत्यादौ पाण्डरत्वस्य शंखविशेषणतया पाण्डरत्वे शंखनिष्ठाभावाप्रतियोगित्ववत् प्रामाण्यविशेषणग्राह्यताबोधकपदसमभिव्याहृतैवकारात् प्रकृते स्वाश्रयग्रहविषयतायामेव प्रामाण्यत्वव्यापकतालाभसम्भवेन विवक्षितस्य प्रामाण्यग्राहकत्वे स्वाश्रयग्रहत्वव्यापकत्वस्यालाभात्। सरोजेन नीलेन भूयत एवेत्यादौ क्रियासंगतैवकारेण अत्यन्तायोगव्यवच्छेदस्यैव प्रत्यायनात् प्रकृतेऽपि एवकारस्य क्रियासंगततया अयोगव्यवच्छेदबोधकत्वासम्भवाच्च इत्याशङ्काम् परिहरति *यथा चेति*। *एवकारार्थविवेचने इति* ज्ञानमर्थं गृह्णात्येवेतिवत् ज्ञानं रजतं गृह्णात्येवेति अप्रयोगात् गृह्णाति रूपार्थवाचकधातुसमभिव्याहृतेनापि एवकारेण अयोगव्यवच्छेद ए प्रत्याय्यते।

ज्ञानमर्थं गृह्णात्येवेत्यादौ कर्तृप्रत्ययस्थले कर्त्तरि ज्ञाने यथ क्रियाकर्तृत्वायोगव्यवच्छेदःप्रतीयते तथा ज्ञानेनार्थो गृह्यत एवेत्यादौ कर प्रत्ययस्थले विशेषणविशेष्यभाववैपरीत्येऽपि विशेषणीभूतेऽपि कर्त्त अविशेषणस्यापि क्रियाकर्तृत्वस्यायोगव्यवच्छेदःप्रतीयते नतु विशेष्यकर्म विशेषणीभूततत्तत्कर्तृकक्रियाकर्मत्वायोगव्यवच्छेदः, ज्ञानग्राह्यत्वायोगस्य प्रसिद्धेः। विशेषणे विशेष्यनिष्ठाभावप्रतियोगित्वव्यवच्छेदस्य अयोगव्यवच्छे दरूपत्वेऽप्रसिद्धिविरहेऽपि उक्तस्थले तद्बोधस्वीकारे ज्ञानग्राह्यत्वे रजतत्वव्य पकताया अबाधेन ज्ञानेन रजतं गृह्यत एवेत्यादिप्रयोगापत्तेर्दुर्वारत्वात्। एत ज्ञानग्राह्यत्वेऽर्थत्वव्यापकताविरहेण एतज्ज्ञानेनार्थो गृह्यत एवेत्यादिप्रयोगा पपत्तेश्च। एवं च प्रकृतेऽपि प्रामाण्यग्राहकत्वे स्वाश्रयग्रहत्वव्यापकत्वम् प्र तव्यम् इति विवक्षितार्थलाभः। तद्बोधो यथाकथञ्चिदुपपादनीय इति भाव

अत्रापि विशेष्यतावच्छेदकावच्छेदेन विशेषणायोगव्यवच्छेद एवका प्रत्याय्यत इत्यभिमानिनां यावत्पदपूरणेन सिद्धसाधनं वारयतां मिश्रार मतमुपन्यस्यति *केचित्तु इति*। *यावत्त्वेन विशेषणीयमिति*। नन्वेवमेवकारै र्थ्यमत आह *एवकारश्चेति*। *प्रामाण्यमात्रस्य तथात्वलाभाय*=पक्ष वच्छेदकप्रमापदप्रवृत्तिनिमित्तत्वावच्छेदेन साध्यवत्त्वलाभाय। तत्सामाना करण्यमात्रेण साध्यसाधने योगिज्ञानादिमात्रवृत्तिप्रामाण्यविशेषे अंशतस्सि साधनापत्तिरिति भावः। अत्र च प्रमापदप्रवृत्तिनिमित्तत्वेन पक्षत्वे साध

(दी०) अन्ये तु तत्प्रामाण्याग्राहकत्वेन यदुभयवादिसिद्धं तद्भिन्नत्वमग्राहकान्तार्थः ।

(शा०) ज्ञानं गुण इति शाब्दबोधादिना प्रामाण्याग्रहात् बाधस्य वारणाय ओदनकामकर्त्तव्यताबोधविषयः पाक इत्यादिशाब्दबोधे पदानुपस्थितस्य ओदनसाधनत्वादिज्ञानस्य योग्यताबलात् अन्वयितावच्छेदकतया भाने तादृशशाब्दबोधे तज्ज्ञानप्रामाण्याग्रहात् बाधस्य च वारणाय अवलम्बितम् मतमन्येषामुपन्यस्यति *अन्ये त्विति* । तत्प्रामाण्याग्राहकत्वेन=तत्प्रामाण्यग्रहाजनकत्वेन । उभयवादिसिद्धम्=नैयायिकमीमांसकोभयवादिसिद्धम् । अग्राहकान्तार्थः, सामग्र्यां विशेषणमिति शेषः । व्यवसायानुव्यवसायसामग्र्योः प्रामाण्याग्राहकत्वेन नैयायिकसिद्धतया तत्संग्रहायोभयसिद्धत्वनिवेशः । गुरुमतसिद्धाया दर्शितकाम्यसाधनताज्ञानादिविषयकसामग्र्याः प्रामाण्याग्राहकतया गुरुनैयायिकोभयसिद्धतया न तत्संग्रहः ।

नच शब्दाजन्यतादृशज्ञानोपस्थितेः नैयायिकमते शाब्दसामग्र्यप्रविष्टतया तद्घटितशाब्दसामग्री न नैयायिकसिद्धेति कथं तद्वारणमिति वाच्यम् ? तादृशोपस्थितिघटितकारणस्तोमस्य शाब्दसामग्रीत्वेन नैयायिकासिद्धत्वेऽपि प्रामाण्याग्राहकत्वेन तत्सिद्धत्वात् ।

(प्रभा०) **उभयवादिसिद्धम्** । तथाच तत्प्रामाण्यविषयकज्ञानाजनकत्वेन नैयायिकमीमांसकोभयवादिसिद्धं यत्तदन्यज्ञानग्राहकसामग्रीजन्यग्रहविषयत्वं मीमांसकनये साध्यमित्यर्थः । अनुव्यवसायसामग्र्याः प्रामाण्याग्राहकत्वेन नैयायिकमीमांसकोभयमतसिद्धभिन्नत्वात् संग्रहः । एवं गुरुमतसिद्धव्यवसायसामग्र्या भट्टमतसिद्धज्ञाततालिङ्गकानुमितिसामग्र्या अपि तत्प्रामाण्याग्राहकत्वेन नैयायिकमीमांसकोभयमतासिद्धतया संग्रहो बोध्यः । घटज्ञानशाब्दबोधसामग्र्याश्च तत्प्रामाण्याग्राहकत्वेन नैयायिकमीमांसकोभयमतसिद्धत्वात्तमादाय मीमांसकनये बाधः । ओदनकामकार्यताज्ञानविषयः पाक इत्याकारकौदनसाधनताज्ञानविषयकशाब्दबोधसामग्र्या योग्यताज्ञानघटिताया गुरुमतसिद्धाया अप्योदनसाधनत्वादिप्रामाण्याग्राहकत्वेन नैयायिकमीमांसकोभयसिद्धतया न तादृशसामग्रीमादाय बाधः प्रामाण्याग्राहकत्वेन नैयायिकमतसिद्धभिन्नत्वनिवेशे व्यवसायानुव्यवसायसामग्र्योरसंग्रहः नच तत्प्रामाण्याग्राहकत्वेन यन्मीमांसकमतसिद्धं तदन्यत्वमेव सामग्र्यां निवेश्यतामिति वाच्यम्, मीमांसकानामेकैकग्रहणेऽनुव्यवसायादिसामग्रीणां गुरुमते प्रामाण्याग्राहकतयाऽसंग्रहापत्तेः । प्रामाण्याग्राहकत्वेन मीमांसकसकलमतसिद्धभिन्नत्वनिवेशेऽनुव्यवसायासामग्र्यादेः संग्रहसम्भवेऽपि यथासन्निवेशे न वैयर्थ्यमिति ध्येयम् । नैयायिकमतसिद्धाप्रामाण्याग्राहिकाया ज्ञातताप्रत्यक्षजनकसामग्र्या वारणाय तादृशोभयसिद्धभिन्न

(दी०) यदा ययोर्विवादस्तदा तात्पर्यवशात् तदुभयपरमुभयपदम्, अतो नाननुगमो दोषाय। नैयायिकासिद्धया ज्ञातताघटिततत्प्रत्यक्षजनकसामग्र्या प्रामाण्याग्रहात्

(गा०) नन्वत्र मीमांसकसामान्यं यः कश्चन वा निवेश्यते ? आद्ये व्यवसायानुव्यवसायसामग्र्योर्गुरुमिश्रमते संग्रहानुपपत्तिः। प्रथमायाः प्रामाण्याग्राहकतया (मिश्रभट्टानुमततया द्वितीयायाश्च तथात्वेन गुरुमतसम्मततया) मीमांसकसिद्धत्वावच्छिन्नभेदाभावात्। द्वितीये च सप्तमपदार्थरूपबाधाद्यभावघटितज्ञानानुमित्यादिविशेषसामग्र्याः प्रामाण्याग्राहकत्वेन गुरुमतसिद्धभिन्नतया प्रामाण्यस्य तया अग्रहेण भट्टमते बाध इत्यत आह *यदा ययोरिति*। अतः=तात्पर्यभेदात्। अननुगमः=अनुगतरूपेण मीमांसकानुपादानम्। न दोषायेत्यन्वयः। विवादभेदेन साध्यभेदस्वीकारे क्षतिविरहात्, शब्दैक्यमात्रस्यानपेक्षितत्वात्। सामग्रीपदार्थाननुगमेनार्थभेदस्य दुष्परिहरत्वादिति भावः।

ज्ञानग्राहकत्वरूपविशेष्यांशसार्थक्योपपत्तये नैयायिकोपादानमिति दर्शयति *नैयायिकेति*। ज्ञाततायाः भट्टमतसिद्धत्वेऽपि नैयायिकासिद्धतया उभयासिद्धत्वमाविष्कर्त्तुं नैयायिकासिद्धत्वाभिधानम्। तादृशज्ञाततघटितत्वेन तत्प्रत्यक्षसामग्र्या उभयबाधसिद्धत्वलाभः। *प्रामाण्याग्रहादिति*। बाधवारणायेति शेषः।

(प्रभा) ननु ज्ञाततालिङ्गकानुमितेः कथम्परित्याग इति चेत्। गुरुमिश्रयोर्मतेन ज्ञाततालिङ्गकानुमितौ प्रामाण्याग्राहकत्वस्य सत्त्वेऽपि तयोर्मते ज्ञाततायाः शशविषाणायमानतया ज्ञाततालिङ्गकानुमितेरपि शशविषाणायमानतया ज्ञाततालिङ्गकानुमितेः गुरुमिश्रमतासिद्धत्वम्। ज्ञाततालिङ्गकानुमितेर्भट्टमतसिद्धत्वेपि प्रामाण्याग्राहकत्वेन भट्टमतसिद्धत्वं नास्तीति तत्र प्रामाण्याग्राहकत्वेन मीमांसकमतसिद्धत्वसामान्याभावः सुघटः, पूर्वत्र विशेष्याभावेन विशिष्टाभावः, उत्तरत्र विशेषणाभावेन विशिष्टाभाव इति। व्यवसायानुव्यवसाययोस्तु प्रामाण्याग्राहकत्वेन भट्टमतसिद्धत्वमेवेति। सप्तमपदार्थरूपबाधाद्यभावघटितेति। अत्रेदं तत्त्वम्। अनुमितौ बाधनिश्चयस्यापि कारणता, अभावश्च गुरुमतेऽधिकरणरूपो नातिरिक्तः, एवञ्च सर्वासामनुमितीनां सामग्रीमध्ये बाधाद्यभावप्रवेशादनुमितिसामग्री गुरुमतसिद्धभिन्ना इति ज्ञानानुमितिसामग्र्यपि गुरुमतसिद्धभिन्नैवेति। विशेषसामग्र्या इति। बाधाद्यभावघटित 'घटज्ञानवान् घटेच्छावत्त्वादि' त्याद्यनुमितीत्यर्थः। ननूक्तानुमितेस्तु गुरुमिश्रमतसिद्धतया एतदनुमितिसामग्री न तयोर्मतेऽप्रसिद्धा किन्तु प्रामाण्याग्राहिकेति प्रामाण्याग्राहकत्वेनोक्तानुमितिसामग्री गुरुमतसिद्धैवेति चेन्न, अभावस्याधिकरणरूपतावादिगुरुमते बाधाद्यभावघटितज्ञानानुमितिसामग्र्याः प्रामाण्या-

दी०) ज्ञानग्राहकेति । अथ ज्ञानं द्रव्यमित्यन्यथाख्यातिसामग्र्या प्रामाण्याग्रहात् तत्त्वावच्छेदकयावत्सामग्रीग्राह्यत्वाभावरूपपरतस्त्वसाधने सिद्धसाधनमिति वाच्यम् ?

प्र(० ०) भट्टेन समं विवादे प्रामाण्याग्राहकत्वेन तन्मतमात्रासिद्धत्वनिवेशे बाधाप्रसक्त्या ज्ञानग्राहकत्वोपादानमनर्थकमापद्येतेति भावः । *अन्यथाख्या तिसामग्र्येति* । गुरुमतासिद्धत्वेन उभयमतसिद्धभिन्नतयेतिशेषः । सिद्धसाधनम् = अर्थान्तरम् । नैयायिकसिद्धताद्दशान्यथाख्यातिसामग्र्याः प्रामाण्याग्राहकत्वेन तन्मते उक्तपरतस्त्वसत्त्वेन चरितार्थतया गुरुणा समं विवादे तस्याः प्रामाण्याग्राहकत्वासिद्धिरिति यावत् । नतु सिद्धसाधनं यथाश्रुतमेव । गुरुणा प्रामाण्याविषयकग्रहत्वेन ताद्दशपरतस्त्वाभ्युपगमासम्भवात् ।

अथैवमपि अनुव्यवसायसामग्र्या गुरुमतासिद्धया प्रामाण्याग्रहात् अर्थान्तरस्य वक्ष्यमाणविशेषणेनापि वारणासम्भवादसंगतिः । यदि चानुव्यवसायस्य ज्ञानप्रत्यक्षत्वेन तत्सामग्र्याः तत्प्रत्यक्षसामग्रीत्वेन गुरुमतसिद्धत्वमस्त्येवेति मन्यते, तदा ताद्दशसामग्रीत्वेन तस्याः प्रामाण्यग्राहकत्वमपि गुरोरनुमतमिति प्रामाण्याग्राहकत्वेन तन्मतासिद्धत्वं दुरपह्नवमेव । यदि च मनस्संयुक्तसमवायादिसमुदायत्वेन प्रामाण्याग्राहकत्वं तस्यां गुरुणा स्वीक्रियत इति न ताद्दशानुव्यवसायसामग्र्याः प्रामाण्याग्राहकत्वेन गुरुमतासिद्धत्वमित्युच्यते तदा उक्तान्यथाख्यातिसामग्र्या दोषादिरूपाया ज्ञानसामग्रीत्वादिना गुरुमतासिद्धत्वेऽपि दोषादिघटितसमुदायत्वादिना प्रामाण्याग्राहकत्वं तस्या गुरुमतासिद्धमेवेति कथमियमाशङ्का ?

यदि च व्यवसायसामग्र्या अपि प्रामाण्याविषयकज्ञानजनकसामग्रीत्वादिना प्रामाण्याग्राहकत्वस्य गुर्वादिमतसिद्धतया तज्ज्ञानव्यक्त्युत्पादकसामग्रीत्वेन प्रामाण्याग्राहकत्वाभ्युपगमविषयभिन्नत्वमवश्यं विवक्षणीयमिति शङ्कासङ्गतिः, अन्यथाख्यातिजनकसामग्र्याः दोषादिघटितायास्तेन रूपेण

(प्रभा) अर्थान्तरस्येति = अनुव्यवसायसामग्रीमादायोक्तपक्षतरूपसत्त्वेन चारितार्थ्याद् गुरुणा समं विवादे प्राथमिकज्ञानग्राहकसामग्र्याः प्रामाण्याग्राहकत्वसिद्धिरित्यर्थः । न्यायमतेऽनुव्यवसायसामग्र्यां गुरुमतसिद्धत्वं शङ्कते यदिचेति । अस्त्येवेति । न्यायमते इति शेषः । गुरोरिति = तावता ज्ञानप्रत्यक्षसामग्रीत्वं धर्मितावच्छेदकीकृत्य प्रामाण्यग्राहकतानिश्चयेन प्रतिबन्धादनुव्यवसायसामग्र्यां तेन रूपेण प्रामाण्याग्राहकत्वनिश्चयो न्यायमतेन गुरोः सम्भवतीत्यर्थः । ज्ञानप्रत्यक्षोत्पादकसामग्रीत्वेनाभ्युपादानासम्भवादनुव्यवसायसामग्रीवारणं शङ्कते यदीति । विशेष्यवृत्तेः केनापि रूपेणाभावानङ्गीकारादिति भावः । शङ्कायाः सर्वथा तुच्छत्ववारणाय ज्ञानसामग्रीत्वादिनेति । आदिना ज्ञानग्राहकसामग्रीत्वपरिग्रहः ।

(गा०) गुरुणानभ्युपगमेन तद्वारणासम्भवात्, नैयायिकसिद्धधर्मिज्ञान
नन्तरजातबोध्यस्मरणरूपज्ञानद्वयोत्तरान्यथाख्यातिस्थले तादृशज्ञानद्वय
गुरुणा भ्रमत्वस्वीकारात्, एकतरव्यक्तिसामग्रीत्वस्य न्यायमतसिद्धान्य
ख्यातिकारणकलापे असत्त्वात् तादृशकारणकलापस्य न्यायमते गुरोः
शाभ्युपगमविषयत्वाभावादित्युच्यते, तदा अनुव्यवसायसामग्र्या अपि व
सायरूपतया स्वीकृतज्ञानग्रहव्यक्तिसामग्रीत्वेन प्रामाण्यग्राहकरूपाया एव
णाङ्गीकारात् तद्ग्राह्यतयाऽर्थान्तरेण व्यवसायसामग्र्याः प्रामाण्याग्राहक
सिद्धिर्दुर्वारैवेति ।

मैवम् ? अनुव्यवसायसामग्र्याःप्रामाण्याग्राहकत्वसिद्धावपि ज्ञान
स्वप्रकाशतानिराकर्तॄणां नैयायिकानां प्राथमिकज्ञानग्राह्यत्वरूपस्वतस्त्व
प्रामाण्ये निराकरणेन उद्देश्यसिद्धेः । अन्यथा व्यवसायसामग्र्या न्याय
ज्ञानग्राहकत्वरूपविशेषणानाक्रान्ततया तस्याः साध्याघटकत्वेन तद्ग्राह्यता
कथञ्चिदपि निराकरणायोगेन समीहितासिद्धेर्वज्रलेपायितत्वात् ।

(प्रभा) त्वादिनेत्यादिना प्रामाण्याविषयकसविषयकजनकसामग्रीत्वग्रहः । एकतरेति — ध
ज्ञानोत्पादकसामग्रीत्वस्य धर्मिज्ञानघटिततया बाध्यस्मरणोत्पादकसामग्रीत्वस्य बाध्यस्मर
घटिततया सत्त्वेन ज्ञानं गुण इत्यादिशाब्दबोधव्यक्तिमेव तज्ज्ञानपदेनोपादाय तदुत्पादक
मग्रीत्वेनोभयमतसिद्धान्यत्वादित्यर्थः । अन्यथाख्यातिव्यक्त्युत्पादकसामग्रीत्वञ्च गुरुमतेऽ
मेवेति भावः । व्यवसायरूपतया स्वीकृतज्ञानग्रहव्यक्तीति । इयं तज्ज्ञानव्यक्तिपदार्थ
सूचनाय व्यक्तिपदम् । तथाच न्यायमतेऽनुव्यवसायसामग्र्याः प्रामाण्याग्राहकत्वेन गुरुम
सिद्धत्वमनपवादमिति भावः । अत्र मिश्रेण समं विवादे आहत्य नैयायिकानामुद्दे
सिद्ध्यत्येव, तत्त्वेतावता त्रिभिर्विवादे तेषामाहत्य तत्सिद्धिरावश्यकी । भट्टेन समं विव
ज्ञाततालिङ्गकानुमितिसामग्र्याःप्रामाण्याग्राहकत्वस्य दुःसाधनत्वात् न्यायमते तादृशसामग्र
एवाप्रसिद्धेःतस्यां ज्ञानविषयतालिङ्गकत्वमुपगम्य तत्साधने ज्ञाततायां विवादपर्यवसानापत्ते
एवञ्च गुरुणा समं विवादे साध्याघटकीभूताया व्यवसायसामग्र्याः प्रामाण्याग्राहक
सिद्धावपि न क्षतिः, सर्वथोद्देश्यासिद्धिविरहादित्याशयेन समाधत्ते अनुव्यवसायेति
यावदनुव्यवसायसामग्र्याःप्रामाण्याग्राहकत्वे साधनीये यत्किञ्चित्तत्सामग्र्यास्त
ग्राहकत्वस्य विरोधित्वादिति भावः । तर्हि गुरुणा समं विवादे नैयायिकानां सर्वथोद्देश्य
सिद्ध्येदित्यत आह ज्ञानस्येति । न्यायमते व्यवसाययोर्भेदव्यवस्थाप्यज्ञानस्य स्वविष
कत्वखण्डनेन व्यवसायसामग्र्याः साध्यघटकज्ञानग्राहकत्वखण्डनादेव प्रामाण्यग्राहक
रूपोद्देश्यसिद्धिरितिभावः । एवं भट्टेन समं विवादे ज्ञातत्तारूपपदार्थान्तरमस्तु मा वाऽनुमि
सामग्री तल्लिङ्गिका वस्त्वन्तरलिङ्गिका वा सर्वाऽपि साध्यघटिकास्तु ज्ञानस्यातीन्द्रिय
निराकृत्य प्राथमिकज्ञानग्राहकग्राह्यतानिराकरणादुद्देश्यसिद्धिर्बोध्या । तज्ज्ञेयाभिज्ञ

(दी०) व्यधिकरणप्रकारकाजनकत्वेन सामग्रीविशेषणात्। पूर्वोक्तदिशाऽपित्रा निष्कर्षो बोध्य इत्याहुः। इति प्रथमा विप्रतिपत्तिः।

(गां०) *व्यधिकरणप्रकारकाजनकत्वेनेति*। व्यधिकरणप्रकारकमिच्छादिकं प्रसिद्धमेव तन्मते। नचैवं ज्ञानमिच्छामीति विशिष्टज्ञानसामग्र्या गुरुमतासिद्धतया तदग्राह्यतामादाय परतस्त्वसाधने सिद्धसाधनं दुर्वारमिति वाच्यम्, तस्यापि दोषस्य एतन्मतेऽस्वरसबीजत्वात्। *अत्रापि निष्कर्ष* इति। सामग्रीनिवेशस्यानतिप्रयोजनत्वात् प्रामाण्याविषयत्वेन मतद्वयसिद्धभिन्नव्यधिकरणधर्मप्रकारकान्यसकलज्ञानग्रहविषयत्वरूपनिष्कृष्टसाध्योपादानमित्यर्थः। अत्र कल्पे ज्ञानजन्या ज्ञाततेतिप्रत्यक्षसामग्र्यग्राह्यतया भट्टमते बाधः। मतत्रये एकरूपेण साध्यत्वानिर्वाहः। नच मतान्तरसामग्र्यननुगमानुयोगस्तुल्यः, फलोत्पत्तिप्रयोजकतावच्छेदकावच्छिन्नत्वेन तदनुगमात्। नच प्रत्येकं मीमांसकेन विवादेऽन्यमतासंग्रहो न दोषाय, त्रिभिरेकदा विवादे मीमांसकत्रयस्यैवोपादाने साधारण्यसम्भव इति वाच्यम्? त्रिभिरेकदा विवादे मीमांसकत्वेन त्रयोपादाने गुर्वादिमते प्रामाण्याग्राहकतया मिश्रादिमतसिद्धव्यवसायादिसामग्र्यसंग्रहस्योक्तस्य दुर्वारत्वात्। मीमांसकत्रयत्वेन निवेशे सप्तमपदार्थरूपाभावघटितज्ञानग्राहकसामग्रीविशेषाणां तत्तद्ग्रहजनकत्वेन गुरुमतसिद्धप्रामाण्यग्राहकताकत्वेन पूर्वोक्तदोषवारणेऽपि ज्ञानमतीन्द्रियमित्याद्यनुमितेरन्यथाख्यातिमनङ्गीकुर्वाणेन गुरुणानङ्गीकारात् तत्सामग्र्या मतत्रयसिद्धभिन्नतया भट्टमते व्यधिकरणप्रकाराजनिकया प्रामाण्याग्रहात् तन्मते बाध इत्यादिकमस्वरसबीजं बोध्यम्।

(प्रभा) विशिष्टज्ञानसामग्र्या इति। विशेषणज्ञानस्याकारणतया गुरुभिरुपनीतभानानुपगमात्। एतन्मते इति। पूर्वमतेऽन्वयबोधसामग्रीत्वेन भट्टमतसिद्धत्वात्। सकलेति। ज्ञानवान् इच्छाया इत्यादौ। तत्तद्ग्रहेति = तज्ज्ञानोत्पादकसामग्रीत्वेनाधिकरणाद्यात्मकाभावगर्भकारणानां प्रामाण्याग्राहकत्वादित्यर्थः। ज्ञानमिति। अन्यथाख्यातिमादाय तज्ज्ञानव्यक्त्युत्पादकसामग्रीत्वमप्रसिद्धम् धर्मिज्ञानबोध्यस्मरणौकतरव्यक्तिमुपादाय तत्प्रसिद्धावपि क्वचिदन्यथाख्यातिसामग्र्यां गुरुमतसिद्धभिन्नत्वमित्येकसत्त्वेऽपि द्वयं नास्तीतिन्यायेन मतत्रयसिद्धान्यत्वमित्यर्थः। इत्यादिकमिति। उक्तरीत्या भट्टमते कथञ्चिज्ज्ञानग्राहकपदसार्थक्यम्, गुरुमते सम्पूर्णं व्यर्थम्, पूर्वमते च घटादिसामग्रीवारणाय ग्राहकपदसार्थक्यं ज्ञानपदं तु भट्टानुग्रहायेति। एवं ज्ञानजन्यज्ञाततेतिप्रत्यक्षमादाय बाधवारणाय पूर्वोक्तविशेषणानुधावने च न्यायमतसिद्धत्वघटितविशेषणं व्यर्थमित्यस्यादिना परिग्रहः।

इति गादाधरप्रामाण्यवादे सरयूपारीण स्वर्गीय पण्डितराज श्रीवेणीमाधवशास्त्रिशुक्लतनूजेन प्रायश्शतग्रन्थलेखकेन नव्यन्यायाचार्येण श्रीराजनारायणशुक्लेन कृतायाम् प्रभाख्यटीकायाम् प्रथमा विप्रतिपत्तिः।

अथ श्रीकालीशङ्करसिद्धान्तवागीशविरचितं

प्रामाण्यवादगादाधरीक्रोडपत्रम् ।

न च यस्य संशयव्यतिरेकनिश्चयौ प्रवृत्तिप्रतिबन्धकौ तन्निश्चयस्तद्धेतुरनुमितौ व्याप्ते
मूलम् । यस्य संशयव्यतिरेकनिश्चयौ = यद्व्यतिरेकसंशयनिश्चयौ इति शिरोमणिः ।
घटेत्वित्यादिना घटस्य संशय इत्यादौ स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेद
सामानाधिकरण्योभयसम्बन्धेन विषयिताविशिष्टविषयिताशालिज्ञानं संशयपदार्थः, चरम
यितायामेव षष्ठ्यर्थस्य निरूपकत्वस्य निरूप्यत्वस्य वाऽन्वय इत्युक्तम् भट्टाचार्येण ।

ननु प्रथमविषयितायां षष्ठ्यर्थस्यान्वयः कथं न कृत इति । नच प्रथमविषयित
अन्वये एकदेशान्वयप्रसङ्गः, द्वितीयायामन्वये तु न तथा, विषयिताविशिष्टविषयिता-ज्ञा
नस्य संशयपदार्थत्वादिति वाच्यम्, चैत्रस्य पुत्र इत्यादिवत् सप्रतियोगिकपदार्थतावच्छेद
तरान्वयस्य व्युत्पन्नत्वात् पदार्थतावच्छेदकजात्या सहैवेतरान्वयस्याव्युत्पन्नत्वात् इति
प्रथमविषयितायां षष्ठ्यर्थान्वये घटं सन्देह्मीतिशाब्दबोधस्य घटत्वावच्छिन्नविषयिताशा
ज्ञानाभावप्रकारक-घटं न जानामीत्याकारकनिश्चयप्रतिबध्यतानुपपत्तेरिति ध्येयम् ।

केचित्तु प्रथमविषयितायामन्वये घटसंशयो न घटीय इति व्यवहारस्य प्रामाण्यापत्ति
चरमविषयितायां घटीयत्वाभावेनोक्तव्यवहारस्य घटीयत्वाभाववत् तादृशविषयिताशालि
दित्याहुः । तन्न, तादृशव्यवहारस्य संशयधर्मिकघटविषयितावदन्यत्वबोधकतया प्रामाण्याप
योगात् । अन्यथा चरमविषयितायामन्वयेऽपि घटसंशयो न घटाभावीय इत्यादिव्यवहारस्य
प्रामाण्येन तस्य प्रामाण्यापत्तेर्दुरुद्धरत्वादिति ध्येयम् ।

अथ निरुक्तविषयिताविशिष्टविषयिताशालिज्ञानस्य संशयपदार्थत्वे भूतलं घटवन्नवेत्या
दिसंशयस्य भूतलसंशयत्वापत्तेः, तादृशविषयिताविशिष्टभूतलविषयितासत्त्वादिति । न
प्रकारिताविशिष्टप्रकारिताशालिज्ञानत्वमेव संशयत्वम् । प्रकारितायाश्च भूतलनिरूपितत्व
भावान्नोक्तापत्तिरिति वाच्यम्, वायौ रूपं नवेत्यादिसंशयस्य रूपसंशयत्वानुपप
असमानप्रकारकज्ञानस्य प्रतिबन्धकत्वे वायुवृत्तित्वसंशयत्वापत्तेश्चेति चेन्न, प्रागुक्तो
सम्बन्धेन—एवं स्वावच्छेदकीभूतधर्मावच्छिन्नस्वरूपाभावप्रतियोगितावच्छेदकावच्छिन्न
एतत्त्रितयसम्बन्धेन विषयिताविशिष्टविषयिताशालिज्ञानस्य संशयपदार्थत्वान्नानुपपत्तिः
अथवा स्वनिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदताकविषयित्वावच्छिन्नं यु
त्वं तदन्यत्वस्य चरमविषयितायां निवेशान्न भूतलं घटवन्नवेत्यादिसंशयस्य भूतलसंश
त्वापत्तिः, संशये उभयकोटितानिरूपितविशेष्यताद्वयस्योपगमेन भूतलविषयितायां तादृश
न्यत्वविरहात्, न वा वायौ रूपं नवेत्यादिसंशयस्य रूपसंशयत्वानुपपत्तिः, रूपविषयिता
तादृशान्यत्वसत्त्वादिति ध्येयम् ।

तेन व्यतिरेकज्ञानत्वेन प्रतिबन्धकता लभ्यत इति शिरोमणिः । व्यतिरेकज्ञानत्वेन
तृतीयार्थोऽनतिरिक्तवृत्तित्वं नतु स्वरूपसम्बन्धरूपम्, तथासति ग्राह्याभावज्ञानत्वस्य ग्राह्यज्ञा

ग्राह्यविशिष्टबुद्धौ व्यभिचारस्य दुर्वारत्वात् । पर्याप्तिनिवेशे च तदर्थपर्यालोचने ला
सम्भवादित्युक्तम् भट्टाचार्येण ।

अथ यद्व्यतिरेकघटकीभूताखण्डधर्मप्रकारेण पदार्थान्तरावगाहिभ्रमस्य प्रतिबन्धक
नुरोधेन परस्परोपश्लेषावगाहिविषयिताशालिज्ञानत्वेनैव प्रतिबन्धकत्वं वाच्यम्, तथाच यद्व्य
रेकग्रहत्वपर्याप्तावच्छेदकताकप्रतिबन्धकत्वमेवासिद्धम् कुतोऽवच्छेदकतापर्याप्तिनिवेशे ल
गौरवविवेचनमिति । न च यत्र विषयविशेषेऽनुमितेरितरसामग्रीसमवधानकाले व्याप्ति
पदार्थांशे भ्रमात्मकव्याप्त्यादिव्यतिरेकज्ञानं कस्यापि न जातम् तत्र विशिष्टज्ञानत्वेनैव
बन्धकता कल्प्यते लाघवादिति तत्रैव पर्याप्तिनिवेशसम्भव इति वाच्यम्, तादृशविषयस्य प्र
णिकत्वे पर्याप्तिघटितनियमस्य सम्भवेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वघटितनियमस्वीका
नौचित्यात् । नचावच्छेदकतायाः प्रत्येकपर्याप्तिनिवेशेऽप्रसिद्धभ्रमस्थलविशेषे विशि
व्यभिचारवारणासम्भवात्तदतिरिक्तधर्मानवच्छिन्नत्वे सति तदवच्छिन्नत्वरूपैव पर्याप्ति
वेश्या तथाच तदपेक्षयाऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेन गौरवमिति वाच्य
व्याप्त्यादिव्यतिरेकज्ञानत्वावच्छिन्नप्रतिबन्धकताया अपि व्याप्त्यादिव्यतिरेकज्ञानत्वातिरि
प्रामाण्यज्ञानाभावादिनाऽवच्छेदात् दृष्टान्तासिद्ध्याद्यापत्तेः । [illegible]
कतत्कत्वपर्यवसन्नतया व्यापकताघटकाभावप्रतियोगितावच्छेदकतापर्याप्तिनिवेशस्याविश्यक
व्यापकत्वमनिवेश्य पर्याप्तिनिवेशलाघवानवकाशस्यासम्भवदुक्तिकत्वाच्च इति चेत् ।

अत्र केचित् यद्धर्मावच्छिन्नव्यतिरेकज्ञानत्वे प्रतिबन्धकतावच्छेदकतापर्याप्तिनि
भ्रमसाधारणप्रतिबन्धकत्वानुरोधेनाशक्यत्वेऽपि वक्ष्यमाणरीत्या पर्याप्तिनिवेशे तु त
तादृशनिवेश एव लाघवासम्भवः । तथाहि अप्रामाण्यज्ञानाभावविशिष्टयद्धर्मावच्छि
भावत्वावच्छिन्नप्रकारतानिरूपितयद्धर्मावच्छिन्नविशेष्यताशालिनिश्चयत्वव्यापकतादृशविष
वच्छिन्नजनकतानवच्छेदकत्वोपलक्षितविषयिताशालिज्ञानत्वपर्याप्तावच्छेदकताकप्रतिबन्ध
विशेष्यते । तथाच पर्याप्तिनिवेशे स्फुटतरगौरवम् । जनकतायां निरुक्तविषयताशालि
यत्वव्यापकतानिवेशात् व्याप्त्यभावविशिष्टहेतुतावच्छेदकावच्छिन्नविशेष्यकधर्मान्तरप्र
कनिश्चयत्वावच्छिन्नजनकतावच्छेदककतिपयविषयतानां व्याप्त्यभावप्रकारकज्ञानत्वावच्छि
प्रतिबन्धकतावच्छेदककोटयप्रविष्टत्वेऽपि न क्षतिः । तादृशजनकतायां निरुक्तविष
वच्छिन्नत्वनिवेशाच्च निरुक्तविषयताशालिनिश्चयत्वव्यापकजनकतावच्छेदकीभूतानामुदा
ज्ञानीयव्याप्तिघटकपदार्थविषयितानां व्याप्त्यभावज्ञानत्वावच्छिन्नप्रतिबन्धकतावच्छेदकतं
प्रविष्टत्वेऽपि न क्षतिः । वस्तुतस्तु निरुक्तजनकतावच्छेदकविषयिताज्ञानत्वोभयपर्याप्त
निष्ठावच्छेदकताभिन्नसाक्षादवच्छेदकताभिन्नसाक्षादवच्छेदकताकप्रतिबन्धकत्वमेव वि
क्षणीयम् । तथाच भ्रमप्रमासाधारणव्याप्त्यभावज्ञानीयविषयतानां निरुक्तजनकताव
कत्वेन तादृशविषयिताज्ञानत्वे उभयस्मिन् अभावनिष्ठावच्छेदकताभिन्नाया अनुमिति
बन्धकतावच्छेदकतायाः पर्याप्तत्वादनुमितौ दृष्टान्तत्वनिर्वाहः । ईदृशरीत्या पक्षे साध
निर्वाहोऽपि बोध्यः । साक्षादवच्छेदकतायामभावनिष्ठावच्छेदकताभेदनिवेशादनुमिति

श्रासम्भवः। न च विशिष्टबुद्धौ व्यभिचारः ग्राह्याभावनिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपिताया अभावनिष्ठावच्छेदकताभिन्नसाक्षादवच्छेदकताया निरुक्तविषयताशालित्वोभयस्मिन् पर्याप्तत्वादिति वाच्यम्, विरोधिकोट्यप्रकारकत्वातिरिक्ताभावनिष्ठावच्छेदकताभेदस्य विवक्षणीयतया विरोधिकोट्यप्रकारकत्वातिरिक्ताभावनिष्ठावच्छेदकताभिन्नत्वस्य विरोधिकोट्यप्रकारकत्वनिष्ठावच्छेदकतायां सत्त्वेन तत्साधारणावच्छेदकत्वस्य निरुक्तविषयताशालित्वोभयपर्याप्तत्वात् विशिष्टबुद्धौ व्यभिचाराभावात्। एतेनाप्रामाण्यनिश्चयाभावविशिष्टनिरुक्तविषयताशालिज्ञानत्वावच्छिन्नप्रतिबन्धकतानिवेशेनैव सामञ्जस्ये पर्याप्तिनिवेशस्यासङ्गतिः। विशिष्टबुद्धिप्रतिबन्धकतावच्छेदककोटौ अप्रामाण्यनिश्चयाभावनिवेशेन तद्घटितधर्मावच्छिन्नप्रतिबन्धकत्वाभावादेव विशिष्टबुद्धौ व्यभिचारासम्भवेन तन्मात्रप्रयोजनकस्य पर्याप्तिनिवेशस्यानर्थक्यादित्यपि परास्तम्। अनतिरिक्तवृत्तित्वनिवेशापेक्षया पर्याप्तिमनिवेश्य निरुक्तजनकतावच्छेदकविषयितायां स्वरूपसम्बन्धात्मकावच्छेदकतानिवेशेऽपि लाघवासम्भवादित्याहुः।

तच्चिन्त्यम्, यद्व्यतिरेकज्ञानत्वव्यापकत्वेन प्रतिबन्धकत्वमनिवेश्य यद्व्यतिरेकनिश्चयत्वव्यापकतावच्छेदकविषयित्वावच्छिन्नत्वेन प्रतिबन्धकतानिवेशस्यापि शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात्। यद्व्यतिरेकज्ञानत्वव्यापकतानिवेशस्योभयत्रैव साम्यादिति ध्येयम्।

नव्यास्तु यद्व्यतिरेकज्ञानत्वावच्छिन्नत्वपदेन यद्धर्मावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नत्वप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकावच्छिन्नविशेष्यताशालिग्रहत्वावच्छिन्नत्वमेव विवक्षणीयम्। साध्यीभूतजन्यत्वमपि तद्धर्मावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नजनकतानिरूपितं ग्राह्यम्, नातो धर्मभेदमादाय दोषः। न चैवमपि तादृशयद्व्यतिरेकग्रहत्वपर्याप्तावच्छेदकताकत्वस्य प्रतिबन्धकतायां निवेशापेक्षया गुरुतरव्यापकतानिवेशोऽनुचित इति वाच्यम्, अप्रामाण्यज्ञानाभावादेरपि अनुमित्यादिनिरूपितव्याप्यभावज्ञानादिनिष्ठप्रतिबन्धकतावच्छेदककोटौ प्रविष्टतया तत्प्रतिबन्धकतायामपि तादृशग्रहत्वपर्याप्तावच्छेदकत्वस्य विशिष्टधीप्रतिबन्धकतावच्छेदकत्वेऽपि तस्याभावरूपतया अभावावृत्तितादृशग्रहत्वपर्याप्तावच्छेदकत्वस्य विशिष्टधीप्रतिबन्धकतायामपि सत्त्वेन विशिष्टव्यभिचारप्रसङ्गात्। विरोधिप्रकारत्वाभावातिरिक्ताभावावृत्त्यवच्छेदकतायाः पर्याप्तिनिवेशे चाभावद्वयघटिततादृशव्यतिरेकग्रहनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वनिवेशापेक्षयाऽभावत्रयघटितनिरुक्तावच्छेदकत्वपर्याप्त्यधिकरणयद्व्यतिरेकग्रहत्वकस्य प्रतिबन्धकताविशेषणत्वे लाघवानवकाशः। एतेन व्यापकताघटकाभावप्रतियोगितावच्छेदककोटावपि पर्याप्तिनिवेशस्यावश्यकतया व्यापकतानिवेशापेक्षया पर्याप्तिनिवेशे लाघवानवकाशोऽसम्भवदुक्तिक इति प्राग् यदुक्तं तदपि प्रत्युक्तम्। निरुक्तपर्याप्तिघटकाभावत्रयप्रतियोगितावच्छेदककोटावपि पर्याप्तिनिवेशस्यावश्यकत्वादित्याहुः।

एतदपि प्रतिबन्धकतावच्छेदककोटौ तत्तद्धर्मपर्याप्तावच्छेदकताकप्रतियोगितासम्बन्धावगाहित्वनिवेशमतानुसारेण संसर्गांशे भ्रमानभ्युपगमेन च यथाकथञ्चित् सङ्गच्छते। प्रतिबन्धकतावच्छेदककोटौ प्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतावच्छेदकतापर्याप्तिनिवेशमते प्रतियोगि-

न्धकतयाऽखण्डव्याप्तित्वावच्छिन्नप्रकारतायां प्रतिबन्धकतावच्छेदकतावच्छेदकत्वेन यद्धर्म-पदेन व्याप्तित्वस्य धर्तुमशक्यतया दृष्टान्तासिद्ध्यादिप्रसङ्गात् । एवं संसर्गांशे भ्रमोपगमे व्याप्तित्वावच्छिन्नप्रतियोगित्वसंसर्गघटकव्याप्तिघटकपदार्थांशे भ्रमात्मकतादृशप्रतियोगित्व-सम्बन्धावगाहिव्याप्त्यभावज्ञानस्यापि प्रतिबन्धकत्वेन वास्तवव्याप्तित्वावच्छिन्नप्रतियोगिता-संसर्गतावगाहितायाः प्रतिबन्धकतानवच्छेदकतया यद्धर्मपदेन व्याप्तित्वादेरुपादानासम्भवेन तद्दोषप्रसङ्गाच्चेत्यवधेयम् ।

केचित्तु अप्रसिद्धभ्रमस्थले उक्तरीत्याऽभावत्रयाघटितपर्याप्तिं निवेश्य वास्तवयद्व्यतिरेक-ग्रहत्वावच्छिन्नप्रतिबन्धकतानिवेशोऽपि सम्यक् तत्र च व्यापकतानिवेशापेक्षया लाघवान्-वकाश इत्यभिप्रायेण ग्रन्थं सङ्गमयन्ति ।

अथ तथापि विरोधिप्रकारकत्वाभावनिष्ठावच्छेदकत्वानिरूपकयद्व्यतिरेकग्रहत्वावच्छि-न्नप्रतिबन्धकत्वनिवेशेनैव विशिष्टबुद्धौ व्यभिचारवारणं सम्भवति, विरोध्यप्रकारकयद्व्यतिरेक-प्रकारकग्रहत्वरूपनिश्चयत्वावच्छिन्नप्रतिबन्धकतायां विरोधिप्रकारकत्वाभावनिरूपकत्वसत्त्वेन तस्या हेत्ववच्छेदकत्वात् इति किं गुरुतरव्यापकतानिवेशेनेति चेन्न, निश्चयत्वं हि केषाञ्चिन्मते विरोधिप्रकारकत्वानवच्छिन्नतदभावप्रकारिताशालिज्ञानत्वरूपम् , केषाञ्चिन्मते विरोधि-प्रकारकत्वानवच्छिन्नतदभावप्रकारकत्वावच्छिन्नकिञ्चिद्धर्मावच्छिन्नविशेष्यकत्वरूपम् , केषा-ञ्चित् विरोध्यप्रकारकतदभावप्रकारकज्ञानत्वरूपमित्यादिनानामतानुसारेण विशिष्टबुद्धौ व्यभिचारवारणाय विरोधिप्रकारित्वावच्छिन्नाभावनिष्ठावच्छेदकत्वानिरूपकयदभावप्रकारि-तानिष्ठावच्छेदकतानिरूपिका विरोधिप्रकारत्वावच्छिन्नाभावनिष्ठावच्छेदकत्वानिरूपककिञ्चि-द्धर्मावच्छिन्नविशेष्यकत्वनिष्ठावच्छेदकतानिरूपिका च सती विरोधिप्रकारकत्वाभावनिष्ठा-वच्छेदकत्वानिरूपिका या यद्व्यतिरेकज्ञानत्वावच्छिन्नप्रतिबन्धकता तन्निवेशापेक्षया यद्व्य-तिरेकग्रहत्वव्यापकप्रतिबन्धकतानिवेशस्यैव लघुत्वादिति ध्येयम् ।

अथ यद्व्यतिरेकज्ञानत्वव्यापकप्रतिबन्धकतानिवेशेऽपि तादृशव्याप्त्यादिव्यतिरेकज्ञाने यद्धर्मावच्छिन्नांशे यद्धर्मावच्छिन्नत्वं भासते तद्धर्मावच्छिन्नांशे तद्धर्मावच्छिन्नव्यतिरेकावगाहि-अभावो हेत्वसमानाधिकरण इत्यादिज्ञाननिरूपितप्रतिबन्धकताया अपि व्याप्त्यादिव्य-तिरेकज्ञानत्वव्यापकतया व्याप्त्यादिनिश्चयाजन्ये अभावो हेत्वसमानाधिकरण इत्यादिज्ञाने व्यभिचारो दुर्वार इति । न च यद्व्यतिरेकज्ञानत्वसमनियतप्रतिबन्धकतानिवेशान्नायं दोष इति वाच्यम् , प्रतिबन्धकताया असाधारणत्वात्तादृशसमनैयत्याप्रसिद्धेः । न चाभावांश हेतुसामानाधिकरण्यादिसंशयात्मकव्याप्त्यादिव्यतिरेकज्ञाने उक्तप्रतिबन्धकत्वाभावान्नियमाश्र-ङ्केति वाच्यम् , प्रतियोगिविशेषिताभावज्ञानस्य विशिष्टवैशिष्ट्यावगाहितानियमे विशेषणता-वच्छेदकप्रकारकनिश्चयजन्यतादृशज्ञानाप्रसिद्धेः । न च स्वव्यापकत्वस्वभिन्नत्वोभयसम्बन्धे-यद्व्यतिरेकज्ञानत्वव्यापकप्रतिबन्धकतावदन्ययद्व्यतिरेकज्ञानत्वव्यापकप्रतिबन्धकता निवेश-नीया व्याप्त्यादिव्यतिरेकवद्धेत्वादिमान् देश इत्यादिज्ञानीयतादृशहेत्वभावज्ञानप्रतिबन्धकता-
... प्रतिबन्धकतायामपि नास्तीति भेदप्रतियोगिकुक्षि

विशेष्यविशेषणभाववैपरीत्येन प्रतिबन्धकता नानैव तथाच व्याप्त्यादिव्यतिरेकज्ञानत्वा-वच्छिन्नप्रतिबन्धकतायामपि न तादृशप्रतिबन्धकतावदन्यत्वमिति दृष्टान्तासिद्ध्यादिप्रसङ्ग इत्यु-च्यते तदा स्वव्यापकत्वस्वानधिकरणवृत्तित्वोभयसम्बन्धेन तादृशप्रतिबन्धकतावदन्यत्वं निवे-शनीयमिति वाच्यम्, एवमपि व्याप्त्यादिव्यतिरेकवद्धेतुमत्त्वाद्यभावग्रहत्वव्यापकीभूतव्याप्त्या-दिव्यतिरेकग्रहत्वव्यापकतावदन्यतादृशप्रतिबन्धकताकानुमित्यादौ व्याप्त्यादिव्यतिरेकवद्धेत्वा-दिनिश्चयाजन्ये व्यभिचारस्य दुर्वारत्वात्, व्याप्त्यादिव्यतिरेकवद्धेतुव्यतिरेकनिश्चयत्वावच्छि-न्नप्रतिबन्धकतायास्तादृशसंशयावृत्तित्वेन तादृशहेतुव्यतिरेकग्रहत्वव्यापकत्वाभावेन स्वपदेनोपा-दातुमशक्यत्वात्। यद्व्यतिरेकनिश्चयत्वव्यापकप्रतिबन्धकतावदन्ययद्व्यतिरेकज्ञानत्वव्यापक-प्रतिबन्धकतां निवेश्योक्तव्यभिचारवारणेऽपि व्याप्त्यादिव्यतिरेकग्रहत्वव्यापकप्रतिबन्धकतायां व्याप्त्यादिव्यतिरेकनिश्चयत्वावच्छिन्नप्रतिबन्धकतावत्त्वेन तादृशप्रतिबन्धकत्ववदन्यत्वाभावा-द्दृष्टान्तासिद्ध्यादिप्रसङ्गः। न च यद्व्यतिरेकग्रहत्वव्यापकयद्व्यतिरेकविषयित्वावच्छिन्न-प्रतिबन्धकत्वमेव निवेशनीयम्, तथाचाभावो हेत्वसमानाधिकरण इत्यादिज्ञानीयप्रतिबन्धक-तायां व्याप्त्यादिव्यतिरेकग्रहत्वव्यापकत्वेऽपि तादृशविषयित्वावच्छिन्नत्वाभावादेव न व्यभि-चार इति वाच्यम्, अभावो हेत्वसमानाधिकरण इत्यादिज्ञानीयप्रतिबन्धकतायाम् एकत्र द्वयमिति रीत्या हेतुसामानाधिकरण्यत्वव्याप्त्यभावत्वोभयावच्छिन्नप्रकारताकाभावविशेष्य-कज्ञानीयतादृशप्रकारत्वावच्छिन्नत्वस्यापि सत्त्वेन व्यभिचारस्य दुर्वारत्वादिति।

मैवम्, यद्व्यतिरेकग्रहत्वाव्यापकयद्व्यतिरेकत्वावच्छिन्नप्रकारतानिरूपितयद्धर्मावच्छिन्न-विशेष्यताशालिग्रहत्वव्यापकप्रतिबन्धकताकं यत्तद्धर्मावच्छिन्नप्रकारतानिरूपिततद्धर्मावच्छिन्न-विशेष्यताशालिनिश्चयत्वावच्छिन्नजनकताकमिति समुदितार्थस्य विवक्षणात्, तथाचाभावो हेत्वसमानाधिकरण इत्यादिज्ञाननिरूपितप्रतिबन्धकताया व्याप्त्यादिव्यतिरेकग्रहत्वाव्यापक-त्वविरहेण व्युदासः। अनुमित्यादिनिरूपितधूमादिनिष्ठव्याप्त्यादिव्यतिरेकग्रहत्वव्यापकप्रतिब-न्धकताया व्याप्त्यादिव्यतिरेकग्रहत्वाव्यापकत्वेन ऽङ्ग्रहश्च प्रतियोगितासम्बन्धेन व्याप्त्य-भाववान् अभाव इत्यादिज्ञाननिरूपितव्याप्त्यादिव्यतिरेकग्रहत्वव्यापकप्रतिबन्धकतामादाय व्यभिचारवारणाय यद्ग्रहत्वाव्यापकत्वमपहाय यद्व्यतिरेकग्रहत्वाव्यापकत्वनिवेशः। न च तथापि व्याप्त्यादिप्रकारकगुणकर्मान्यत्वविशिष्टहेत्वादिविशेष्यकनिश्चयाजन्ये उक्तप्रतिबन्ध-कतानिरूपितप्रतिबध्यतावति गुणकर्मान्यत्वाभाववत् सत्त्वमित्यादिज्ञाने व्यभिचारो दुर्वार इति वाच्यम्, विशेष्यतावच्छेदकत्वेन यद्धर्मस्य निवेशस्तद्धर्मविशिष्टग्रहत्वाव्यापकत्वस्यापि प्रतिबन्धकतायां निवेशनीयत्वादिति ध्येयम्।

केचित्तु यदभावावगाहिताप्रयुक्तयद्व्यतिरेकग्रहत्वव्यापकप्रतिबन्धकतानिवेशान्न प्रागुक्त-दोषावकाश इत्याहुः।

यत्तु व्याप्तिशरीरेऽप्रामाण्यनिश्चयानास्कन्दितयद्व्यतिरेकग्रहत्वव्यापकतानिवेशेनैवाभावो हेत्वसमानाधिकरण इत्यादिज्ञाने व्यभिचारवारणसम्भवः। हेतुसामानाधिकरण्यांशेऽ-प्रामाण्यसंशयास्कन्दितव्याप्त्यादिव्यतिरेकग्रहस्योक्तविशिष्टधीप्रतिबन्धकत्वाभावेन व्यापकत्वा-भावात् ग्राह्याभावनिश्चयस्याप्रामाण्यज्ञानाभावविशिष्टत्वेनैव प्रतिबन्धकत्वात् इति यथा-

तन्न, संशयसाधारणप्रतिबन्धकतास्थलेऽप्रामाण्यनिश्चयाभावस्य प्रतिबन्धकतावच्छेदक
घटकत्वस्यावश्यकत्वेऽपि प्रकृतेऽतिशरीरेऽप्रामाण्यनिश्चयाभावमपेक्ष्य लाघवेनाप्रामाण
ज्ञानाभावस्य सामान्यनिरुक्तिपत्रिकोक्तयुक्त्याऽभावविशिष्टान्यत्वस्य वा निवेशौचित्यात्
उक्तदोषवारणाय गुरुतरनिश्चयत्वावच्छिन्नाभावनिवेशसम्भवेऽपि ग्राह्याभावनिश्चयत्वा
च्छिन्नप्रतिबन्धकतामादाय घटादिविशिष्टबुद्धौ व्यभिचारवारकानतिरिक्तवृत्तित्वरूपावच्छेदकत
निवेशवैफल्यापत्तेश्चाप्रामाण्यनिश्चयाभावस्य ग्राह्याभावनिश्चयप्रतिबन्धकतावच्छेदकाघट
तया स्वरूपसम्बन्धरूपावच्छेदकतानिवेशस्यैव सम्यक्त्वादिति ध्येयम् ।

इदं पुनरिहावधेयम् । अप्रामाण्यग्रहाभावविशिष्टयद्व्यतिरेकग्रहत्वस्यानतिरिक्तवृत्तित
रूपावच्छेदकत्वनिवेशापेक्षयाऽप्रामाण्यनिश्चयाभावविशिष्टयद्व्यतिरेकग्रहत्वस्य स्वरूपसम
न्धरूपावच्छेदकत्वनिवेश एव लाघवादुचितः । निश्चयत्वस्य स्वव्यापकतत्कत्वरूपानति
क्तवृत्तित्वापेक्षया लघुशरीरत्वात्, तावतैव च बाधप्रतिबन्धकतामादाय घटादिविशिष्टबु
एवं विशेषणान्तरादानेऽपि अभावो हेत्वसमानाधिकरण इत्यादिज्ञाने च व्यभिचारान
काशः, तत्तत्प्रतिबन्धकताया अप्रामाण्यनिश्चयाभावविशिष्टव्याप्त्यादिव्यतिरेकग्रहत्वान
च्छिन्नत्वात् इति तत्कथमुपेक्षितमिति चेदत्राहुः ।

निश्चयत्वस्य मतभेदेन भिन्नतायाः प्रागेवोक्ततया एकमतसिद्धनिश्चयत्वावच्छिन्न
भावनिवेशे मतान्तरासङ्ग्रहः । एवमप्रामाण्यज्ञानस्याननुगमेन प्रतिबन्धकतावच्छेदक
वच्छेदककोटौ यद्यनुगतरूपेणाप्रामाण्यनिश्चयाभावो न निवेश्यते किन्तु तत्तद्व्यक्तित्वावच्छि
न्नाभावा एव गत्यन्तराभावात्तदाऽप्रामाण्यनिश्चयसामान्याभावस्य प्रतिबन्धकतानवच्छेदकत
दृष्टान्तासिद्ध्यादिप्रसङ्गः । तत्तदप्रामाण्यज्ञानाभावस्य व्याप्तिघटकत्वे च बाधादिप्रतिबन्धक
मादाय विशिष्टबुद्धौ व्यभिचारतादवस्थ्यम्, तत्तदप्रामाण्यनिश्चयाभावस्य बाधप्रतिबन्धक
यामप्यवच्छेदकत्वादिति ध्येयम् । नच तथापि यद्व्यतिरेकसंशयवृत्तिप्रतिबन्धकतावार
सम्भवात् यद्व्यतिरेकग्रहत्वव्यापकतानिवेशनमफलमिति वाच्यम्, पर्वतत्वादिसामानाधि
करण्येन घटादिनिश्चयात्मकपर्वतत्वावच्छेदेन घटादिकोटिकपर्वतत्वसामानाधिकरण्येन घटाभा
दिकोटिकसंशयवृत्तिप्रतिबन्धकताके पर्वतत्वाद्यवच्छेदेन घटाभावादिबोधकव्यभिचारवारक
व्यापकत्वनिवेशस्यावश्यकत्वादिति ध्येयम् ।

अथ धूमत्वाद्यवच्छिन्नविशेष्यकव्याप्त्यादिव्यतिरेकत्वावच्छिन्नप्रकारताकज्ञानत
जातित्वादिना धूमत्वाद्यवगाहिजातिमान् व्याप्त्यभाववानित्याद्यप्रतिबन्धकज्ञानसाधारण
सर्वत्रैव प्रतिबन्धकतायां व्यापकत्वं न सम्भवतीति चेन्न, स्वावच्छेदकीभूतविषयताशालियद
तिरेकग्रहत्वव्यापकताया विवक्षितत्वात्, स्वपदं प्रतिबन्धकतापरम् । संशयेपि प्रतिबन्धक
वच्छेदकविषयतासत्त्वात् न बाधादिप्रतिबन्धकतामादाय विशिष्टबुद्धौ व्यभिचारः । वस्तु
यद्व्यतिरेकप्रकारतात्वावच्छिन्नस्वप्रतिबन्धकतावच्छेदकताश्रयमुख्यविशेष्यतानिरूपितयदभ
त्वावच्छिन्नप्रकारताशालिग्रहत्वव्यापकतायाः स्वप्रतिबन्धकतावच्छेदकधर्मितावच्छेदकता

शालिघटादिव्यतिरेकज्ञानत्वव्यापकतादृशप्रतिबन्धकताकानुमितौ घटादिनिश्चयाजन्यत्वे व्यभिचारः। प्रथमकल्पे स्वप्रतिबन्धकतावच्छेदकतायां घटादिव्यतिरेकप्रकारतात्वावच्छिन्नत्व भावात्, द्वितीयकल्पेऽपि धर्मितावच्छेदकताऽव्यप्रकारताभिन्नघटादिव्यतिरेकप्रकारतायां स्व प्रतिबन्धकतावच्छेदकत्वाभावात् इति। अवच्छेदकत्वव्यतिरेकप्रकारतात्वावच्छिन्नावच्छे कताकव्याप्त्यभावावगाहिताप्रयुक्तप्रतिबन्धकताकानुमितौ अवच्छेदकत्वनिश्चयत्वावच्छिन्न जन्यत्वात् व्यभिचारवारणाय मुख्यविशेष्यतानिरूपितत्वं यदभावत्वावच्छिन्नप्रकारताविशेष मिति कृतं पल्लवितेन।

मिश्रमते स्वप्रतिबन्धकताशालियत्संशयव्यतिरेकनिश्चयप्रतिबध्यत्वस्य हेतुत्वमुक्तम् अत्र घटादिविशिष्टबुद्धौ व्यभिचारवारणाय यत्संशयोपादानम्। यत्पदेन व्यभिचारमादाय व्यभिचारविशिष्टबुद्धौ व्यभिचारवारणाय यद्व्यतिरेकनिश्चयोपादानम्। यत्पदेनाव्यभिचा मादाय तद्विशिष्टबुद्धौ तत्संशयप्रतिबध्यत्वस्य तद्व्यतिरेकनिश्चयप्रतिबध्यत्वस्य च सत्त्वाद्व्य भिचार इति तद्वारणाय यत्संशयव्यतिरेकनिश्चययोरभावत्वप्रकारतानैयत्यविशेषणं वैकल्पि कमित्युक्तम्। तत्र मेयत्वादिना व्याप्त्यन्तरावगाहिपक्षधर्मत्वाभावविषयकनिश्चयेऽनुमि प्रतिबन्धके व्याप्त्यभावत्वादिप्रकारकत्वाभावात् दृष्टान्तासिद्ध्यादिवारणाय व्यतिरेकनि श्चये यदभावत्वप्रकारतानैयत्यनिवेशकल्प एव स्वप्रतिबन्धकतायां यदभावावगाहिताप्रयुक्त निवेशितं भट्टाचार्येण।

तस्यायमभिप्रायः। संशयपदेन यद्रूपावच्छिन्नप्रकारताशालिसंशयविवक्षणेऽपि दृष्टान्त सिद्ध्यादिवारणसम्भवः। यद्व्यतिरेकनिश्चयपदेन यद्व्यतिरेकत्वावच्छिन्नप्रकारताकनिश्च विवक्षणे तु निश्चये यदभावत्वप्रकारतानैयत्यनिवेशे व्यभिचारविशिष्टबुद्धौ व्यभिचारवारण सम्भव इति यद्व्यतिरेकनिश्चये यदभावत्वप्रकारतानैयत्यनिवेशकल्प एव यदभावावगाहि प्रयुक्तत्वनिवेशनमिति। अथ संशये यदभावत्वप्रकारतानैयत्यनिवेशकल्पे स्वरूपसम्बन्धे व्याप्तित्वेन रूपेण व्याप्त्यवगाहिप्रतियोगितासम्बन्धेनाभावांशे व्याप्तित्वेन घटाद्यवगाहिसंश यदभावत्वप्रकारतानैयत्यविरहेण दृष्टान्तासिद्धिः। एवंरीत्या प्रामाण्यसंशयविशेषे प्रामाण्या भावत्वप्रकारतानैयत्यविरहेण स्वरूपासिद्धिश्चेति। न च यत्संशयपदेन यन्निरूपितप्रतियोगि तावच्छेदकावच्छिन्नकोटिकसंशयस्य विवक्षणान्नोक्तदोषः, व्याप्त्यभावत्वस्यैव व्याप्तिनिरूपि प्रतियोगितावच्छेदकतयोक्तसंशयस्य वास्तवव्याप्त्यभावत्वावच्छिन्नकोटिकत्वात् इति वाच्य एवमपि व्याप्तिमानाधेयत्वाभाववान् वा धूम इत्याकारकसंशये इदं ज्ञानं प्रामाण्यवत्प्र रित्वाभाववद्वा इत्याकारकसंशये च व्याप्त्यभावत्वादिप्रकारकत्वाभावेनोक्तदोषतादवस्थ्य दाधेयत्वाभावत्वादेरपि व्याप्त्यादिनिरूपितप्रतियोगितावच्छेदकत्वादिति चेन्न, यदभाव प्रकारतानैयत्यपदेन यद्रूपावच्छिन्नप्रकारतात्वव्यापकीभूतरूपपर्याप्तावच्छेदकताकनिरूपकता भावत्वावच्छिन्नावच्छेदकतानात्मकविषयतानैयत्यस्य यद्रूपावच्छिन्नसंशये विवक्षितत्वात्

शुद्धप्रकारतात्वावच्छिन्ननिरूपकतामादाय न व्यभिचारः । अवच्छेदकतानात्मकविषः
निवेशादव्यभिचारत्वावच्छिन्नप्रकारतात्वव्यापकीभूताभावत्वावच्छिन्नप्रकारतात्वावच्छिन्न
निरूपकतामादायाभावसाध्यकस्थलेऽव्यभिचारविशिष्टबुद्धौ न व्यभिचारः । एतेन प्रतियं
तायां अभावविशेषणीभूतव्याप्तिघटकपदार्थांशे भ्रमरूपव्याप्तिसंशये व्याप्यभावत्वप्रका
त्वविरहेण दृष्टान्तासिद्धिरपि निरस्ता । वास्तवव्याप्तित्वावच्छिन्नप्रकारतात्वव्यापकभ्रमः
साधारणनिरूप्यनिरूपकभावापन्नप्रकारतात्वमादाय दृष्टान्तासिद्धिवारणादिति ।

अथ व्यतिरेकनिश्चये यदभावत्वप्रकारतानैयत्यस्य निवेशपक्षे स्वप्रतिबन्धकतायां
भावावगाहिताप्रयुक्तत्वनिवेशेऽपि पक्षधर्मत्वाभावेन व्याप्यभावावगाहिनिश्चयमादाय दृष्ट
सिद्धितादवस्थ्यम् । न च यदभावावगाहित्वपदेन यन्निरूपितप्रतियोगितावच्छेदकावच्छि
वगाहिताविवक्षणान्नोक्तदोष इति वाच्यम्, पक्षधर्मत्वाभावत्वस्यापि व्याप्तिनिरूपितः
योगितावच्छेदकतयोक्तदोषतादवस्थ्यात् । पर्वतो वह्निमानितिविशिष्टबुद्धौ वह्निमद्वृत्तिधर्मः
निश्चयस्य प्रतिबन्धकतया वह्न्यधिकरणावृत्त्याधेयत्वाभाववान् वह्न्यधिकरणावृत्तिवह्निस
नाधिकरण्याभाववान् वा पर्वत इत्यादिनिश्चये व्याप्तिनिरूपितप्रतियोगितावच्छेदकावच्छि
वगाहिताप्रयुक्तप्रतिबन्धकताशालिनि यदभावत्वप्रकारतानैयत्यविरहेणासिद्धितादवस्थ्या
चेन्न, यदभावावगाहितापदेन यद्रूपावच्छिन्नप्रतियोगिताकाभाववृत्तियद्रूपाश्रयनिरूपितः
योगितावच्छेदकावच्छिन्नावगाहित्वस्य विवक्षितत्वात् । तथाचाव्यभिचारत्वस्य यद्रूपपदे
पादानस्थले व्यभिचाराभावावगाहित्वमिव व्यभिचारावगाहित्वमपि तादृशमतो नाव्यभि
निश्चये व्यभिचारः । पक्षधर्मत्वाभावत्वेन व्याप्यभावागाहिनिश्चयमादायासिद्धिवारः
वृत्त्यन्तम् प्रतियोगितावच्छेदकविशेषणम् । तद्व्यक्तिपदेन व्याप्यभावमादाय वह्न्यधिकर
वृत्तितद्व्यक्तिमानिति निश्चयासिद्धिवारणाय यन्निरूपितप्रतियोगितावच्छेदकत्वविशेष
मिति ध्येयम् ।

ननु यत्संशय इत्यादेर्यत्संशयनिष्ठप्रतिबन्धकतार्थकत्वे विभिन्नधर्मितावच्छेदकक
लाद्यंशे घटाभावनिश्चयात्मकपर्वतादिविशेष्यकघटसंशयनिष्ठप्रतिबन्धकताके घटविशिष्ट
व्यभिचारः । एवं सामानाधिकरण्येन घटाभावनिश्चयात्मकसामानाधिकरण्येन घटकोटि
वच्छेदकावच्छेदेन घटाभावकोटिकसंशयनिष्ठप्रतिबन्धकताकेऽवच्छेदकावच्छेदेन घटविशि
बोधे व्यभिचार इति चेन्न, किञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नकोटिताशा
संशयत्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यत्वस्य विवक्षितत्वात् । नचैवं सत्यपि व्य
चारनिश्चये व्यभिचारवारणायोपात्तस्य यदभावत्वप्रकारतानैयत्यविशेषणस्य वैयर्थ्यं
सर्वासामेव व्यभिचारनिश्चयप्रतिबन्धकतानामव्यभिचारि न वा व्यभिचारि नवेत्य
संशयवृत्तिविभिन्नरूपावच्छिन्नानां चालनीन्यायेन तादृशसंशयत्वव्यापकत्वादिति वाच्य
त्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वसामानाधिकरण्योभयसम्बन्धेन ज्ञा
यविषयताविशिष्टयद्रूपावच्छिन्ननिरूपितविषयतारूपसंशयत्वविशिष्टप्रतिबन्धकत्वस्य
क्षितत्वात् । संशयत्ववैशिष्ट्यञ्च व्यापकतासम्बन्धेन । तथा चाव्यभिचारि

त्वेऽपि व्यापकतासम्बन्धेन तादृशसंशयत्ववैशिष्ट्यमक्षतमेव । नच यदभावत्वप्रकारतान्त्यविशेषणसार्थक्यार्थमेतादृशविवक्षाऽनुचितेति वाच्यम्, धूमो वह्निव्याप्यो नवा व्याप्तिमानाधेयत्वाभाववान् वा इत्याकारकसंशयसाधारणैकप्रतिबन्धकत्वाभावेनानुमित्याप्रतिबन्धकतानामपि तादृशसंशयत्वाव्यापकत्वेन दृष्टान्तासिद्ध्यादिवारणायैव तादृशविवक्षा आवश्यकत्वादिति ध्येयम् ।

अथ तथापि घटाभाववद्भूतलकालीनपटवान्न वा पर्वत इत्यादिसंशयत्वस्य व्यापकतासम्बन्धेन घटादिविशिष्टबुद्धिप्रतिबन्धकतायां सत्त्वात्तादृशविशिष्टबुद्धौ व्यभिचारः । एवं घटाभाववद्भूतलकालीनपटवान्न वा पर्वत इत्यादिसंशयत्वविशिष्टप्रतिबन्धके च घटविशिष्टबोधे व्यभिचार इति, मैवम्, तादृशसंशयत्वविशिष्टप्रतिबन्धकतायां तादृशसंशयनिरूपितविशेष्यतावच्छेदकविशिष्टविषयकनिश्चयत्वाव्यापकत्वस्य तादृशसंशयनिरूपितप्रकारतावच्छेदकविशिष्टविषयकनिश्चयत्वाव्यापकत्वस्य च विशेषणतोपगमेन तद्दोषवारणादिति ध्येयम् ।

अथ तथापि धूमो व्याप्यः अव्यभिचाराभाववांश्चेत्यादिसमूहालम्बनबुद्धौ व्यभिचारसंशयप्रतिबध्यत्वस्य व्यभिचारव्यतिरेकनिश्चयप्रतिबध्यत्वस्य च सत्त्वाद्व्यभिचार इति चेन्न, संशयप्रतिबध्यतावच्छेदकतापर्याप्त्यधिकरणत्वे सति यद्व्यतिरेकनिश्चयप्रतिबध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वस्य हेतुताया विवक्षितत्वादिति । वस्तुतस्तु निश्चयीयविषयताऽभिन्नत्वमते स्वप्रतिबन्धकतायां यत्संशयत्वघटकविषयित्वावच्छिन्नत्वनिवेशेनैवोपपत्तौ संशयत्वव्यापकत्वपर्यन्तमपि न निवेशनीयमिति सुधीभिरवधेयम् ॥ १२ ॥

अत्र च यदभावावगाहिताप्रयुक्तस्वप्रतिबन्धकताशालियद्व्यतिरेकज्ञाने यदभावत्वप्रकारतानैयत्यस्य निवेशेनैव सामञ्जस्ये निश्चयत्वघटकयत्तदभावाप्रकारकत्वदलम्, यदभावत्वप्रकारतानियतयदभावावगाहिताप्रयुक्तस्वप्रतिबन्धताकत्वस्यैव सम्यक्त्वे व्यतिरेकनिश्चयोपादानमेव वा किमर्थमिति चिन्त्यम् ।

एतत्कल्पे व्याप्तिमद्भेदादिकोटिकसंशयस्य प्रामाणिकत्वे तत्र व्याप्त्यभावत्वप्रकारतानैयत्यविरहेणासिद्धिस्तादवस्थ्यमतः कल्पान्तरमाह यदभावत्वाप्रकारकज्ञाननिष्ठयदभावावगाहिताप्रयुक्त इत्यादि । कल्पान्तरमाह स्वप्रतिबन्धकतानवच्छेदकयदभावत्वानवच्छिन्नयदभावावगाहितासामान्यकत्वे सतीति वा वक्तव्यमिति ।

अथात्र घटादिव्यतिरेकनिश्चयप्रतिबध्यघटादिविशिष्टज्ञाने घटाद्यभावत्वानवच्छिन्नघटाद्यभावविषयतासामान्यान्तर्गताया अभाववानित्यादिनिश्चयकालीनाभाववानित्यादिनिश्चयीयाभावत्वावच्छिन्नविषयितायाः स्वप्रतिबन्धकतानवच्छेदकत्वविरहेण सत्यन्ताभावे व्यभिचाराप्रसक्त्या तद्वारकयत्संशयप्रतिबध्यत्वदलं व्यर्थमिति । एवं व्यभिचाराभावत्वानवच्छिन्नव्यभिचाराभावविषयितासामान्यान्तर्गताया अभाववान् व्यभिचारवानितिनिश्चयकालीनाभाववानितिनिश्चयीयाभावत्वावच्छिन्नविषयताया अव्यभिचारधीप्रतिबन्धकतानवच्छेदकत्वविरहेण व्यभिचारज्ञाने व्यभिचारावारकव्यतिरेकनिश्चयप्रतिबध्यत्वदलम्।

वाच्यम्, एवमपि प्रतियोगितासम्बन्धेन घटाभावांशे घटत्वेन पदार्थान्तरावगाहिभ्रमीय-घटाभावविषयताया एवं व्यभिचारत्वेनाव्यभिचारपदवृत्तित्वेन वा व्यभिचारा-वगाहिभ्रमीयव्यभिचारविषयतायास्तादृशविषयितासामान्यान्तर्गतायाः स्वप्रतिबन्धकतान-वच्छेदकत्वविरहेण तद्दोषतादवस्थ्यात्। न च यदभावत्वानवच्छिन्नयदभावविषयतायां अप्रामाण्यवृत्तित्वमपि निवेश्यमिति वाच्यम्, तथापि घटवदवृत्तित्वेन घटाभावावगाहिघटवद-वृत्तिमानितिनिश्चयीयघटाभावविषयतायास्तादृशविषयतासामान्यान्तर्गताया घटवत्त्वाज्ञानप्रति-बन्धकतानवच्छेदकत्वविरहेण यत्संशयप्रतिबध्यत्वदलवैयर्थ्यस्य दुर्वारत्वात् भ्रमात्मकाव्यभि-चारनिश्चये व्यभिचारापत्तेश्चेति।

मैवम्, स्वप्रतिबन्धकतावच्छेदकतानवच्छेदकयदभावत्वानवच्छिन्नविषयितानिष्ठयन्नि-रूपितप्रतियोगितावच्छेदकावच्छिन्नत्वसामान्यकत्वस्य सत्यन्तेन विवक्षणादेव सामञ्जस्यात्। तथा च व्याप्त्यभावत्वानवच्छिन्नविषयितानिष्ठस्य व्याप्तिनिरूपितप्रतियोगितावच्छेदकीभूतत-त्तद्व्यक्तयभावत्वावच्छिन्नत्वस्यानुमितिप्रतिबन्धकतानवच्छेदकतया दृष्टान्तासिद्धिविरहः।एवञ्च घटाभावत्वानवच्छिन्नविषयितानिष्ठघटनिरूपितप्रतियोगितावच्छेदकीभूततत्तद्व्यक्तयभावत्वाव-च्छिन्नत्वस्य घटविशिष्टधीप्रतिबन्धकतावच्छेदकतया घटादिविशिष्टज्ञाने व्यभिचारवारणाय यत्सं-शयप्रतिबध्यत्वदलसार्थक्यमिति। स्वप्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वमपि देयम्, तेन द्रव्याभाववान् घटाभाववानितिनिश्चयकालीनद्रव्याभावद्भूतलमितिनिश्चयीयघटाभाव-त्वानवच्छिन्नविषयतानिष्ठस्य घटनिरूपितप्रतियोगितावच्छेदकीभूतद्रव्यत्वाभावत्वावच्छिन्नत्वस्य घटविशिष्टधीप्रतिबन्धकतावच्छेदकतावच्छेदकत्वेऽपि नोक्तदोषतादवस्थ्यम्। अव्यभिचारा-भावत्वानवच्छिन्ना या पूर्वक्षणवृत्तित्वविशिष्टाव्यभिचाराभावत्वावच्छिन्नविषयिता तन्निष्ठस्या-व्यभिचारनिरूपितप्रतियोगितानवच्छेदकीभूतपूर्वक्षणवृत्तित्वविशिष्टस्याव्यभिचारस्याभावत्वाव-च्छिन्नत्वस्याव्यभिचारधीप्रतिबन्धकतानवच्छेदकतया व्यभिचार इत्यतः सामान्यपदम्। तथाच सति निरुक्तप्रतियोगितावच्छेदकावच्छिन्नत्वसामान्यान्तर्गतव्यभिचारविषयितानिष्ठव्य-भिचारत्वावच्छिन्नत्वस्यातथात्वात् न व्यभिचारः। न च व्याप्तिमदवृत्तिधर्मवत्तानिश्चयस्य व्याप्त्यभावावच्छेदकत्वेन गृहीतधर्मवत्तानिश्चयस्य चानुभवासिद्धत्वेनानुमित्यप्रतिबन्धकतया दृष्टान्तासिद्ध्याद्यवारकस्योक्तविवक्षणस्य प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वविशे-षणस्य च विशिष्टबुद्धौ अतिप्रसङ्गसम्पादकस्य प्रक्षालनाद्धीत्यादिन्यायेन वैयर्थ्यमिति वाच्यम्, अखण्डाभावघटकतया सार्थक्यसम्भवेन प्रक्षालनाद्धीतिन्यायानवकाशात्।

वस्तुतस्तु साध्यवदवृत्तित्वेन व्याप्त्यभाववत्तानिश्चयस्याधेयत्वाभाववान् साध्याभाववानिति निश्चयकालीनाधेयत्वाभाववत्तानिश्चयस्य चानुमितिप्रतिबन्धकतया दृष्टान्तासिद्धिरतस्तद्वा-रणायोक्तविवक्षणमावश्यकमेवेति। एवं ग्राह्याभावानवगाहितयापि यदभावज्ञानस्य यः प्रतिबन्धकता तत्र तदभावावच्छेदकत्वेन गृहीतधर्मवत्त्वतद्वदवृत्तिधर्मवत्त्वयोर्ज्ञानस्यापि प्रति-बन्धकत्वमिति प्राचीनमते आवश्यकमेव। अत एवानुमितिमात्रप्रतिबन्धकतां निवेश्य व्यभि-

भवनानितिनिश्चयकालीनाधेयत्वाभाववत्ताज्ञानीयाया व्याप्तिमदवृत्तित्वेन व्याप्त्यभा
ज्ञानीयायाश्च व्याप्त्यभावत्वावच्छिन्नविषयितायां अनुमितिप्रतिबन्धकतावच्छेदकत्वेन ह
सिद्धिरत: प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वविशेषणस्योक्तविवक्षणस्य च स
मित्यपि केचित् । तन्न, पक्षधर्मत्वाभाववान् हेतुरितिज्ञानीयव्याप्त्यभावत्वानवच्छिन्न विष
निष्ठस्य व्याप्तिनिरूपितप्रतियोगितावच्छेदकीभूतपक्षधर्मत्वाभावत्वावच्छिन्नत्वस्यानुमिति
पितज्ञा॰ वैशिष्ट्यानवच्छिन्नप्रतिबन्धकतावच्छेदकतया दृष्टान्तासिद्ध्यापत्तेः । यदभावत्व
च्छिन्नविषयितायां यदभावीयत्वनिवेशेऽपि पक्षधर्मत्वाभावत्वेन व्याप्त्यभावावगाहिज्ञानी
यितामादायोक्तदोषापत्तेरिति ध्येयम् ।

इदन्तु बोध्यम् । यद्रूपावच्छिन्नयत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वानव
यद्रूपावच्छिन्नप्रतियोगिताकाभाववृत्तियद्रूपाश्रयनिरूपितप्रतियोगितावच्छेदकावच्छिन्न विष
सामान्ये स्वनिरूपितज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकत्वं विवक्षणीयम् ,
पूर्वोक्तदोषाणामवकाशः । न च व्याप्तित्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रतियोगित
भावत्वानवच्छिन्नव्याप्तित्वावच्छिन्नप्रतियोगिताकाभाववृत्तिव्याप्तित्वाश्रयनिरूपितप्रतियो
वच्छेदकीभूतधर्मावच्छिन्नविषयित्वाप्रसिद्ध्या यत्पदेन व्याप्तेरुपादातुमशक्यतया दृष्ट
सिद्धिः, एवंरीत्या स्वरूपासिद्धिश्चेति वाच्यम् , सम्बन्धान्तरावच्छिन्नप्रतियोगिताकाभा
वच्छिन्नविषयिताया एव तादृश्याः प्रसिद्धत्वादिति पक्षधर्मत्वाभावत्वेन व्याप्त्यभावज्ञा
पक्षधर्मत्वाभावत्वावच्छिन्नविषयिताया अनुमितिप्रतिबन्धकतावच्छेदकतया दृष्टान्तासि
वृत्त्यन्तं प्रतियोगिताविशेषणम् । व्याप्तिमदवृत्तित्वेन व्याप्त्यभावविषयतामादाय दृष्ट
सिद्धिरतो यद्रूपाश्रयनिरूपितत्वं तद्विशेषणम् । साध्याभावावच्छेदकत्वेन गृहीतसम्बन्ध
रावच्छिन्नप्रतियोगिताकव्याप्त्यभावविषयितामादाय दृष्टान्तासिद्धिवारणाय प्रतिबन्धक
ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशः । निरुक्तप्रतियोगितावच्छेदकावच्छिन्नत्वञ्च तादृशप्र
गितावच्छेदकमात्रावच्छिन्नत्वरूपं बोध्यम् , नातः साध्यवदवृत्तित्वेन व्याप्तिमदवृत्तित्वेन
घटितसम्बन्धावच्छिन्नप्रतियोगिताकव्याप्त्यभावत्वोभयत्वावच्छिन्नविषयितामादाय दृष्ट
सिद्धिः । एवं द्वितीयकल्पेऽपि यदभावत्वाप्रकारकज्ञाननिष्ठयदभावावगाहितापदेन नि
विषयित्वमेव विवक्षणीयम् , अतस्तत्कल्पे नोक्तदोषाणामवकाश इति ध्येयम् ।

अत्रेदं चिन्त्यते । यत्पदेनाव्यभिचारमुपादायाव्यभिचारनिश्चये व्यभिचारवारणाय
सत्यन्तनिवेशकल्पद्वये अव्यभिचारनिश्चये व्यभिचारवारकयद्व्यतिरेकनिश्चयोपादानम
कम् निश्चयत्वघटकैकार्थमपहाय यद्व्यतिरेकज्ञानसामान्यप्रतिबध्यत्वनिवेशेनैव यत
व्यभिचारमादायाव्यभिचारनिश्चये व्यभिचारवारणसम्भवात् । एवञ्च यत्पदेन घटादि
दाय घटादिविशिष्टबुद्धौ व्यभिचारवारकयत्संशयप्रतिबध्यत्वदलमनर्थकम् घटादिविशिष्ट
घटादिव्यतिरेकसामान्यप्रतिबध्यत्वादेव व्यभिचारानवकाशादिति सुधीभिर्विभावनीयम् ।

अथवा यन्निश्चयविरहविशिष्टस्य यद्धर्मिकव्यतिरेकज्ञानस्याभावो यद्विशेष्यकयत्प्र
[illegible]

न्तरक्षणेऽनुमितिस्तत्र तत्पूर्वक्षणे विशेषणाभावाद्विशिष्टाभावोऽक्षत एवेति न दृष्टान्तासिद्धिरिति भट्टाचार्येणोक्तम्। यत्र प्रामाण्यनिश्चयो नास्ति किन्तु इष्टसाधनताज्ञानान्यधर्मिकप्रामाण्यव्यतिरेकज्ञानमस्ति तत्र प्रामाण्यनिश्चयविरहविशिष्टस्य तद्व्यतिरेकज्ञानस्याभावे प्रवृत्तेर्नियताव्यवहितपूर्ववर्तित्वाभावात् स्वरूपासिद्धिरतो यद्व्यतिरेकज्ञाने यद्धर्मिकत्वनिवेशः। एवं प्रामाण्यनिश्चयविरहविशिष्टस्येष्टसाधनताज्ञानधर्मिकान्यप्रकारकज्ञानस्याभावस्य प्रवृत्तिनियताव्यवहितपूर्ववर्तित्वाभावात्तद्दोषः स्यादतो यद्व्यतिरेकप्रकारकत्वनिवेशः। अथात्र यन्निश्चयविरहविशिष्टे इत्युक्तावपि दृष्टान्तासिद्धिदुर्वारा धूमहेतौ व्याप्यभावज्ञानकालीनालोकादिहेतुकव्याप्तिनिश्चयात् यत्र पर्वतविशेष्यकवह्न्यनुमितिस्तत्र व्याप्तिनिश्चयविरहविशिष्टस्य धूमधर्मिकव्याप्तिव्यतिरेकज्ञानस्याभावे पर्वतविशेष्यकवह्निप्रकारकानुमितिनियताव्यहितपूर्ववर्तित्वाभावात्। न च प्रयोजनविरहेण यन्निश्चये यद्धर्मिकनिश्चयत्वानिवेशादुक्तस्थले आलोकादिधर्मिकव्याप्तिनिश्चयसत्त्वे व्याप्तिनिश्चयविरहरूपविशेषणाभावादेव विशिष्टाभावोऽनुमितिपूर्वक्षणेऽक्षत एवेति वाच्यम्, हेतुभेदेन व्याप्तेर्विभिन्नतया धूमालोकादिनानाहेतुकानुमितौ एकव्याप्यसत्त्वेन धूमहेतुकव्याप्यसत्त्वेन यत्पदेन धूमहेतुकव्याप्तेरुपादेयतया तन्निश्चयविरहरूपविशेषणाभावस्योक्तस्थलीयानुमितिपूर्वक्षणे सत्त्वात्। अत एव हेतुभेदे अभिन्नसाध्यव्यभिचरितसामानाधिकरण्यरूपव्याप्तिरेवानुमितिप्रयोजिकेत्युक्तावपि न निरासः। साध्याव्यभिचरितसामानाधिकरण्यरूपव्याप्तेरपि हेतुतावच्छेदकसम्बन्धभेदेन भिन्नतया संयोगसम्बन्धावच्छिन्नतादृशव्याप्तिव्यतिरेकप्रकारकधूमविशेष्यकज्ञानानन्तरोत्पन्नसमवायादिसम्बन्धावच्छिन्नतादृशव्याप्तिज्ञानात् यत्र वह्न्यनुमितिस्तत्र यत्पदेन संयोगसम्बन्धावच्छिन्नतादृशव्याप्तेरुपादाने दृष्टान्तासिद्धितादवस्थ्यात् इति। नच यन्निश्चयविरहविशिष्टस्य यद्धर्मिकयद्व्यतिरेकज्ञानस्याभावोऽव्यवहितोत्तरत्वसम्बन्धेन तन्निश्चयविशिष्टस्य तादृशसम्बन्धेन तद्व्यतिरेकज्ञानविशिष्टान्यस्य वा यद्विशेष्यकयत्प्रकारकयज्जातीयकार्यस्य नियताव्यवहितपूर्ववर्तीतिविवक्षणान्नोक्तदोष इत्युक्तस्थलीयानुमितौ व्याप्तिनिश्चयविशिष्टत्वाभावात् धूमहेतुकव्याप्तिव्यतिरेकज्ञानविशिष्टत्वाच्चेति वाच्यम्, एवंसति घटादिनिश्चयविरहविशिष्टस्य घटादिव्यतिरेकज्ञानस्याभावेपि अव्यवहितोत्तरत्वसम्बन्धेन घटादिनिश्चयविशिष्टस्य तादृशसम्बन्धेन घटादिव्यतिरेकज्ञानविशिष्टान्यस्य घटादिप्रकारकज्ञानस्य नियताव्यवहितपूर्ववर्तित्वसत्त्वेन व्यभिचारापत्तेः। द्वितीयकल्पे यन्निश्चयविरहविशिष्टस्येत्यस्य वैयर्थ्यापत्तेश्च। व्याप्यभावसंशयद्वितीयक्षणोत्पन्नव्याप्तिनिश्चयाद्यत्र तदनन्तरक्षणेऽनुमितिस्तत्रत्यानुमितौ अव्यवहितोत्तरत्वसम्बन्धेन व्याप्तिव्यतिरेकज्ञानविशिष्टान्यत्वाभावादेव दृष्टान्तसिद्ध्याद्यनवकाशादिति विभावनीयम्।

इति श्रीकालीशङ्करसिद्धान्तवागीशविरचितं

प्रामाण्यवादगादाधरीक्रोडपत्रम्।

संशोधनीयम् ।

प्रमायाम्—

१३ पृष्ठे ४ र्थपंक्तौ "अप्रमात्मकप्रयोजनत्त्वज्ञानात्" इति सम्पातायातम् अतस्तदपहाय "अर्थनिश्चयकाले तद्द्वितीयक्षणे वा यत्र प्रामाण्यसंशयः तादृशार्थनिश्चयद्वितीयक्षणे तत्तृतीयक्षणे वा" इति योजनीयम् ।

१८ पृष्ठे १३ पंक्तौ "स्वरूपावच्छिन्न" इत्यस्य स्थाने स्वरूपत्वावच्छिन्न पठनीयम् ।

२० पृ० ८ पंक्तौ कथम् इत्यस्याग्रे "प्रथम" शब्दो योजनीयः ।

३५ पृ० २ य प० च्छेदकत्वाभावात् इत्यस्याग्रे 'दृष्टान्तासिद्धिरेव' इति । ४र्थी प्रतिबन्धकतयेति ।

६१ पृ० गादाधर्याम् ९ पंक्तौ "अन्वयितावच्छेदकावच्छेदेन" इत्यपहाय अन्वयितावच्छेदके इति पाठः ।

६७ पृ० प्रभा ११ पंक्तौ प्रसिद्ध्यति इत्यस्याग्रे 'यद्धर्मघटितप्रमात्वाश्रयज्ञानग्राहकप्रामाण्यविरोध्यग्राहकसामग्री अप्रसिद्धा' इतिपठनीयम् । "यद्धर्मप्रकारकज्ञानं सामग्र्या न गृह्यते" इति सम्पातायातम् ।

६८ पृ० ६ प० विशिष्टं ज्ञानम् इति सम्पातायातम् । २० तम प० "गुरूणा इत्यारभ्य ६६ पृष्ठीय १६ तम पंक्ति (समवहितत्वाभाववादितिभावः) पर्यन्तः पा २७ तमपंक्त्यनन्तरम् 'अत्रेदं बोध्यम्' इत्यतः पूर्वम् पठनीयः ।

पठनीयांशे च २ प० "इदन्त्वेन" इत्यतः पूर्वं स्मरणसंवलित इति पाठः । ३ च तदजनकत्वाभावात् इत्यस्याग्रे 'किञ्च प्रामाण्यविरोध्यग्राहकसामग्र्यसमवहितत्वस्य ज्ञानग्राहकसामग्र्यां निवेश्यत्वात्' इति पाठः । ६ पंक्तौ किञ्च इत्यतः पूर्वम् 'नन्वेच्छा तदङ्कुराभाववति तदङ्कुरप्रकारकमानसप्रत्यक्षे च घटकतया तदङ्कुरप्रकारकज्ञानस्य प्रागावश्यकत्वेन तज्ज्ञानजनकसामग्र्यामेव तदप्रामाण्याग्राहकत्वमावश्यकम्' इति पाठः । ६६ २७ तम प० मिश्रादिमते इत्यनन्तरम् विशिष्ट ज्ञानम् इति पाठ उचितः ।

७० तम पृ० २० तम प० तदन्या इति सम्पातायातम् । सामग्री इत्यनन्तरम् 'सा अप्रसिद्धेति साध्याप्रसिद्धिः स्यात्' इति पाठः । गुरुमते इत्यस्यानन्तरम् 'साध्यसत्त्वनिर्वाहरूप' इति पाठः । स्यात् इत्यनन्तरम् 'इत्यपि कश्चित्' इति पाठः ।

परिशिष्टम् ।

पृ० ५६ ज्ञानस्यातीन्द्रियतयेति । नच विषयविनिर्मुक्तज्ञानप्रत्यक्षस्यालोकतया विषयविशिष्टनिर्विकल्पकस्य प्रत्यक्षं वक्तव्यम्, एवञ्च विषयोपनायकसामग्रीविरहादेव तत्प्रत्यक्षासम्भव इति वाच्यम्, तत्प्रकारकप्रत्यक्षम्प्रति निर्विकल्पकतद्विषयकज्ञानत्वेन कारणत्ववादिनां नव्यानाम् मते निर्विकल्पकस्यैव स्वप्रत्यक्षे स्वविषयोपनायकत्वसम्भवात् । न च प्रत्यक्षसामान्यम् प्रत्येव अदृष्टत्वादिनेव निर्विकल्पकत्वेनापि तादात्म्यसम्बन्धेन प्रतिबन्धकत्वकल्पनात् निर्विकल्पकस्य न प्रत्यक्षमिति वाच्यम्, अत्रापि निर्विकल्पकत्वस्येव निष्प्रकारकत्वनिस्संसर्गकत्वनिर्विशेष्यकत्वादीनामपि विनिगमकाभावेन प्रतिबन्धकत्वकल्पने गौरवापत्तेः । किञ्च निर्विकल्पकमिव सविकल्पकमपि कुतो न स्वप्रत्यक्षे प्रतिबन्धकमितिप्रश्ने तयोः स्वभावभेद इति न वक्तुं युक्तम्, भेदकस्यात्र दुर्वचत्वात् इत्यादिबहुविधव्यर्थकल्पनापेक्षया ज्ञानत्वाविशेषात् ज्ञानमात्रमतीन्द्रियमितिमन्तुमुचितमिति ।

पृ० ६९ तदङ्कुरप्रकारकज्ञानमन्तरेणापि जातायामिति । केवलभ्रमत्वग्राहकसामग्र्युत्तरं प्रामाण्यग्रहो न भवतीति ब्रूषे, किंवा प्रामाण्याभावावच्छेदकतया गृहीतभ्रमत्वग्राहकसामग्र्युत्तरम् ? नाद्य इत्याह तादृशेति । तदभाववति तत्प्रकारकत्वात्मकभ्रमत्वापरपर्यायाप्रामाण्यभ्रमस्येत्यर्थः । ग्राह्याभावानवगाहितयेति = तद्वति तत्प्रकारकत्वात्मकप्रमात्वरूपग्राह्याभावानवगाहितयेत्यर्थः । न द्वितीय इत्याह पूर्वमिति । तादृशप्रामाण्यावच्छेदेन = तदभाववति तत्प्रकारकत्वात्मकभ्रमत्वावच्छेदेनेत्यर्थः । प्रामाण्यविरहोपगमन इति = तदभाववति तत्प्रकारकत्ववान् तद्वति तत्प्र-